॥ श्रीः ॥

श्रीगणेशाय नमः ।

# पराशरस्मृतिः ।

## विद्वन्मनोहराख्यव्याख्यासहिता ।

श्रीवत्साङ्कितवक्षसः प्रणयिनो नित्यार्चने संविधा-
माधातुं निहितं गिरीन्द्रसुतयोत्सङ्गे स्वयं धूर्जटेः ।
चूडाचुम्बिकलङ्कपङ्किलकलं चन्द्रं मृणालभ्रमा-
दादातुं करमुक्षिपन्तमसकृद्दुण्ढिं चिरं भावये ॥ १ ॥

यं साक्षात्कर्तुमाद्यं पुरुषमविकृतिं योगिनः शुद्धचित्ता
मैत्र्याद्यैः क्लेशकर्मोद्भवविविधविपाकाशयैरप्रमृष्टाम् ।
भेदख्यातिं प्रपद्य प्रकृतिपुरुषयोराश्रयन्ते सबीजं
योगं तं श्रीसहायं हरिमनिशमहं सच्चिदानन्दमीडे ॥ २ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
व्याख्यायते कलियुगोचितवर्णधर्म-
शास्त्रं पराशरमुखोद्गतमल्पशब्दैः ॥ ३ ॥

तरतः सततं विनैव पोतं स्मृतिसिन्धौ दृढतर्कनक्रबन्धौ ।
समृकण्डुजनेरिवावलम्बो मम भूयादभयाय केशवोऽयम् ॥ ४ ॥

माधवाचार्यनिर्दिष्टपथमार्गानुसारिणः ।
स्खलने ऽपि न मे दोषः परप्रत्ययगामिनः ॥ ५ ॥

इह खलु कलिकवलितानुभावान्वर्णाश्रमाननुगृह्णानैः परम कारुणिकैर्महामुनिभिर्वेदाभ्यासपुरस्सरैस्तत्त्वजिज्ञासया पृष्टान् कलिकाला

नुष्ठेयान् वर्णाश्रमधर्मान् पराशरमुनिमुखादाकर्ण्य कश्चिद्द्विपश्चिद्द्रूपिरनवद्यैः पद्यैरष्टानषट्शतैर्द्वादशाध्यायान् परिकल्प्य काण्डत्रयेण तान्निबबन्ध ।

तत्राद्यपद्येन ग्रन्थावतरबीजमाह ।

**अथातो हिमशैलाग्रे देवदारुवनाश्रये ।**
**व्यासमेकाग्रमासीनमपृच्छन्नृषयः पुरा ॥ १ ॥**

उपनीय शौचाचारांश्च शिक्षयेदित्यनेनोपनयनानन्तरं शौचाचाराणां यतो विज्ञेयत्वमुपदिश्यते अतो हेतोरथोपनयनानन्तरं हिमशैलाग्रे हिमाचलशिखरे देवदारूणां वनाश्रयत्वेन विविक्ते मनोऽनुकूले च विक्षेपकारणाभावेन तत्त्वप्रतिभासयोग्य इति यावत् । व्यासं पराशरात्मजं कृष्णद्वैपायनम्, एकाग्र यमनियमाद्यष्टाङ्गाभ्यासपाटवादेकस्मिन्विषये वृत्तिप्रवाहरूपेण प्रतिष्ठितचित्तं पञ्चधासु चित्तभूमिष्वतीन्द्रियवस्तुदर्शनयोग्यतदर्थभूमिस्थितचित्तमिति यावत् । आसीनमैकाग्र्यनिर्वाहाय "आसीनस्य सम्भवादि"ति न्यायात् । ऋषयो ऽतीन्द्रियार्थदर्शनयोग्यास्तापसाः पुरा कलियुगादावपृच्छन् पप्रच्छुः । अन्वयव्यतिरेकाभ्यां प्रश्नस्यैवावगत्युपायत्वात् । विधिवत्प्रणिपातेन परिप्रश्नेन सेवयेति शास्त्रेण प्रणिपातपूर्वकप्रश्नावगतस्य श्रेयस्करत्वाच्च ।

प्रश्नस्वरूपमाह ॥

**मानुषाणां हितं धर्मं वर्तमाने कलौ युगे ।**
**शौचाचारं यथावच्च वद सत्यवतीसुत ॥ २ ॥**

अर्वाचीनानां पश्वादीनामसामर्थ्यादुत्तमानां देवादीनां धर्मानुष्ठाने प्रयोजनाभावाच्च मनुष्यमात्राधिकारकत्वाच्छास्त्रस्येति मानुषाणामित्यधिकारिनिर्देशः । साधारण्य तु वर्णाश्रमानुलोमजप्रतिलोमजानभिप्रेत्य । हितमभिमतफलसाधनं साक्षात्परम्परया वा ऐहिकामुष्मिकाभ्युदयनिःश्रेयससाधनमिति यावत् । धर्ममभ्युदयनिःश्रेयसे साधनीभूय धारयतीति

धर्मः, स्वलक्षणप्रमाणाभ्यां चोदनसूत्रव्यवस्थापितं शौचाचारं शौचं शुद्धिः प्रायश्चित्तादिराचारः स्नानाचमनादिस्तयोः समाहारस्तमाचारप्रायश्चित्ते इति यावत् । व्यवहारस्य न्यायमूलकत्वेन तस्य च सर्वयुगसाधारण्येनाग्रहणात् । वर्तमाने कलौ युगे स्मृत्यन्तरधर्मस्य सानुभावपुरुषानुष्ठेयत्वेन कलिकालीनाल्पसामर्थ्यपुरुषविषयत्वाभावात्तत्कालानुष्ठेयं यथावत्कालिकालानुष्ठेयधर्मप्रतिपादकश्रुत्यर्थस्मरणपूर्वकं चकारात्तत्कालाननुष्ठेयं च भो सत्यवतीसुत सत्यवदनशीलात्मज वद कथय । एतेन प्रेक्षावत्प्रवृत्तिप्रयोजकं विषयप्रयोजनसम्बन्धाधिकारिलक्षणमनुबन्धचतुष्टयमप्यभिहितम् ।

एवं पृष्टो व्यासः किं चकार ।

**तच्छ्रुत्वा ऋषिवाक्यं तु सशिष्योऽग्न्यर्कसन्निभः ।**
**प्रत्युवाच महातेजाः श्रुतिस्मृतिविशारदः ॥ ३ ॥**

तत्पूर्वोदितमृषीणां वाक्यं श्रुत्वा सशिष्यः सुमन्तुजैमिनिवैशम्पायनपैलसुतैश्चतुर्वेदपुराणसंहिताप्रवर्तकैः शिष्यैस्समेतोऽग्न्यर्कसन्निभो ज्वलनादित्यवत्तेजोभिः पूर्णोऽत एव महातेजा ब्रह्मवर्चस्वी श्रुतिस्मृतिविशारदो वेदशास्त्रनिपुणः तु अनन्तरं प्रत्युवाच प्रतिवचनमाह ।

**न चाहं सर्वतत्त्वज्ञः कथं धर्मं वदाम्यहम् ।**
**अस्मत्पितैव प्रष्टव्य इति व्यासः सुतोऽवदत् ॥ ४ ॥**

अपशवो वा अन्ये गोअश्वेभ्य इतिवच्च चाहं सर्वतत्त्वज्ञ इति स्वस्य सर्वतत्त्वज्ञानाभावप्रतिपादनं पितृप्रशंसार्थम् । यद्वा पाराशर्यैव प्रातिकल्पं कलिधर्मप्रवचनाधिकारिपुरुषत्वं श्रुतिस्मृतिभ्यामवगत्य स्वस्यानुचितं कलिधर्मानुशासनं मन्वानो व्यासः सुतोऽहं धर्मं कथं वदाम्यस्मत्पितैव पराशरः प्रष्टव्य इत्यवदत् ।

एवं प्रत्युक्ता ऋषयः किं चक्रुः ।

**ततस्ते ऋषयः सर्वे धर्मतत्त्वार्थकाङ्क्षिणः ।**
**ऋषिं व्यासं पुरस्कृत्य गता बदरिकाश्रमम् ॥ ५ ॥**

ततो ऽनन्तरं ते प्रष्टार ऋषयः सर्वे सन्निहितव्यासनिराकरणे-नासन्निहितपराशरस्य पुनः प्रष्टव्यत्वेन चाध्यवसायाद्विच्युता इति यावत् । धर्मतत्त्वार्थकाङ्क्षिणः धर्मस्य कलिकालानुष्ठेयस्य तत्त्वमबाधितं रूपं तत्काङ्क्षिणो ऽर्थो ऽभ्युदयसाधनं तेन श्येनाद्यभिचाराणामनर्थानां निरासः, तं काङ्क्षन्ति अत एव ऋषिमतीन्द्रियधर्मतत्त्वार्थप्रश्नाभियुक्तं व्यासं पुरस्कृत्य तन्मुखेनैव प्रष्टुकामाः पराशराश्रमं बदरिकाश्रमं गताः जग्मुः । तस्य कलिकल्मषनिर्मोकक्षमत्वेन पराशरनिवासत्वमुचितम् । तदुक्तं कूर्मपुराणे ।

बदर्याश्रममासाद्य मुमुचे कलिकल्मषान् ।
तत्र नारायणो देवो नरेणास्ते सनातन इति ।

तमाश्रमं विशिनष्टि ।

**नानापुष्पलताकीर्णं फलवृक्षैरलङ्कृतम् ।**
**नदीप्रस्रवणोपेतं पुण्यतीर्थोपशोभितम् ॥ ६ ॥**
**मृगपक्षिनिनादैश्च देवतायतनावृतम् ।**
**यक्षगन्धर्वसिद्धैश्च नृत्यगीतैरलङ्कृतम् ॥ ७ ॥**

एतैराश्रमविशेषणैः पराशरतपःसिद्धेरुत्कर्षो ऽभिहितः । तथा हि नानाविधपुष्पावनम्रलताकीर्णत्वेन देवार्चनलक्षणतपःसिद्धिः फलोपचितवृक्षोत्कर्षादाहारनियतेः ग्रीष्मकाले ऽप्यशुष्यन्नदीप्रस्रवणप्रवाहेण त्रिषवणस्नानपाननियतेः, उष्णतीर्थविष्णुगङ्गादिपुण्यतीर्थशोभया च नानातीर्थाटनतपःसिद्धिः मृगपक्षिणामन्योन्यवैरत्यागेन विश्रब्धनिनादादहिंसानुष्ठानस्य । उक्तं च पातञ्जले तपःसिद्धिलिङ्गसूत्रेण "तत्सन्निधौ वैरत्याग"इति । देवतायतनावृतत्वेन निरन्तरस्वस्वाराध्यदेवताध्यानयोगस्य नृत्यगीताद्यलङ्कृतत्वेन सुखहेतुतौर्यत्रिकपरिहारस्य ततश्च यद्यत्तपः पराशरेणात्र चीर्णं तत्फलं तत्रोपस्थितमिति तात्पर्यम् ।

आश्रमप्राप्त्यनन्तरवृत्तमाह ।

**तस्मिन्नृषिसभामध्ये शक्तिपुत्रं पराशरम् ।**
**सुखासीनं महातेजोमुनिमुख्यगणावृतम् ॥ ८ ॥**
**कृताञ्जलिपुटो भूत्वा व्यासश्च ऋषिभिः सह ।**
**प्रदक्षिणाभिवादैश्च स्तुतिभिः समपूजयत् ॥ ९ ॥**

तस्मिन्नाश्रमे ऋषीणां तापसानां सभा समूहस्तन्मध्ये । तेन तेषां वक्ष्यमाणकलिधर्मेषु संमतिर्दर्शिता । शक्तेर्वसिष्ठतनयस्य पुत्रं तेन विशिष्टजन्मना ऽप्यनुभावविशेषो दर्शितः । पराशरम्

पराकृताः शरा यस्माद्राक्षसानां वधार्थिनाम् ।
अतः पराशरो नाम ऋषिरुक्तो मनीषिभिः ॥

इत्यादिनिरुक्तनामानं सुखासीनमैकाग्र्यसाधनासनोपविष्टम् । महातेजा ब्रह्मवर्चस्वी । मुनिषु मुख्याः स्मृतिकर्तारो गोत्रकर्त्तारश्चाप्यान्वयः तत्समुदायेनाप्यावृतं तेन स्मृतिकर्तॄणामप्यत्र सम्मतिर्ज्ञापिता । कृतमञ्जलिपुटं येनासौ व्यासः तैः प्रष्टृभिर्ऋषिभिः सह प्रदक्षिणाभिः स्मृत्युक्तैरभिवादैर्वैदिकलौकिकाभिस्तुतिभिर्गुणकीर्तनैश्चकारात्पादोपसंग्रहणादिभिस्सम्यक्कायवाङ्मनोभिरपूजयत् । अञ्जलिकरणं चोक्तमाश्वलायनेन

उत्तानं वामपाणिं वाङ्मुखं दक्षिणं तथा ।
पाण्योः पृष्ठं दृढं कुर्यादङ्गुलीभिः परस्परम् ॥
अङ्गुष्ठौ च दृढीकृत्य क्रियते या तथा ऽञ्जलिः ।
सा ब्रह्मणा कृतत्वात्तु ब्रह्माञ्जलिरिति स्मृता ॥
वेदारम्भे विशेषेण समाधौ च विशिष्यते ।
ब्रह्मयज्ञे च कार्या स्यात्सावित्रीग्रहणे तथेति ॥

एतेन गुरूपसत्तिप्रकारो दर्शितः ।

एवं पूजितः पराशरः किं चकार ।

**ततः संतुष्टहृदयः पराशरमहामुनिः ।**
**आह सुस्वागतं ब्रूहीत्यासीनो मुनिपुङ्गवः ॥ १० ॥**

ततो ऽनन्तरं सम्यक् तुष्टहृदयः पराशरनामा महामुनिरतिमनननशीलो मुनिपुङ्गवस्सर्वमुनिमान्यस्तेन तपसा वयसा च वृद्धत्वादासीन एव नाभ्युत्थितस्तस्य "ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति। प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यत" इति स्मृत्या स्थविरविषयत्वात्, सुस्वागतं ब्रूहीत्याह।

एवमनुयुक्तो व्यासः प्रतिवचनपूर्वकं पृच्छतीत्याह।

**कुशलं सम्यगित्युक्त्वा व्यासः पृच्छत्यतः परम्।**

अतः परं पराशरस्य कुशलप्रश्नानन्तरं स्वकुशलं सम्यगभिधायानन्तरं विवक्षितमर्थं मुनिप्रश्नादवश्यजिज्ञासितव्यं व्यासः पृच्छति। प्रश्नप्रकारमाह।

**यदि जानासि भक्तिं मे स्नेहाद्वा भक्तवत्सल ॥ ११ ॥**
**धर्मं कथय मे तात ह्यनुग्राह्यो ऽह्यहं तव।**

यदि मे भक्तिमाराध्यत्वेन स्वज्ञानविषयां जानासि तदा भक्तवत्सलत्वेन यदि वा पुत्रस्नेहेनोभयथाप्यनुग्राह्यस्तवाहमिति हे तात धर्मं, वर्तमाने कलौ युग" इति मुनिप्रश्नबला"त्सर्वे नष्टाः कलौ युग"इति प्रश्नशेषाच्च कलिकालानुष्ठेयं मे मह्यम् कथय पुनर्मदितिवचनं स्वस्योपदेशार्हभावप्रयोजकधर्मवत्त्वज्ञापनाय यथोक्तं गन्धर्वविद्यायां छन्दोगैः "इदं तावज्ज्येष्ठपुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्याय चान्तेवासिने नान्यस्मै कस्मै च नेति।

ननु मन्वादिधर्माः किं त्वया न श्रुता येन पुनर्धर्मप्रश्नः क्रियत इत्याशङ्क्य बुभुत्सितं धर्मं परिशेषयितुमाह।

**श्रुता मे मानवा धर्मा वासिष्ठाः काश्यपास्तथा ॥ १२ ॥**
**गार्गीया गौतमीयाश्च तथैवौशनसाः स्मृताः।**
**अत्रेर्विष्णोश्च संवर्ताद्दक्षादङ्गिरसस्तथा ॥ १३ ॥**
**शातातपाच्च हारीताद्याज्ञवल्क्यात्तथैव च।**
**आपस्तम्बकृता धर्माः शंखस्य लिखितस्य च ॥ १४ ॥**

धर्मराजकृताश्चैव बृहस्पतिकृताश्च ये ।
कात्यायनकृताश्चैव तथा प्राचेतसान्मुनेः ॥ १५ ॥

मे मयेत्यर्थः । बहुलानुशासनात् । पञ्चम्यन्तानामत्र्यादिपदानामनुषक्तेन श्रुतपदेन सम्बन्धः । आपस्तम्बेन कृताः प्रोक्ता इति यावत् शंखस्य लिखितस्य च प्रवचनेन ये संवर्धिनो धर्माः, प्रचेता एव प्राचेतसः वायसराक्षसादिव ।

यदि स्मार्ता मानवादयो धर्माः श्रुतास्तर्हि श्रौता किं बुभुत्सिता इत्याशङ्कित आह ।

श्रुता ह्येते भवत्प्रोक्ताः श्रुत्यर्था मे न विस्मृताः ।
अस्मिन्मन्वन्तरे धर्माः कृतत्रेतादिके युगे ॥ १६ ॥

अस्मिन् वर्तमाने वैवस्वते मन्वन्तरे तथा तदन्तर्गतेषु कृतत्रेताद्वापरेषु आदिशब्दाद्द्वापरग्रहणं न कलेस्तस्य प्रायेण श्रौतधर्मविकलत्वात् । युगेषु ये श्रुत्यर्था प्रत्यक्षश्रुतिविहिता अग्निहोत्रादयो धर्माः, एते मया श्रुताः । तदेतत्तवाऽपि प्रसिद्धमिति हिशब्दार्थः, तत्र हेतुर्भवत्प्रोक्ता इति श्रुतानामपि विस्मरणे पुनः श्रवणं मयेप्सितमित्याशङ्किते न विस्मृता इत्युक्तं ततश्च स्मार्तानां मानवादिधर्माणां श्रौतानामग्निहोत्रादीनामेतन्मन्वन्तरान्तर्गतकृतत्रेताद्वापरधर्माणा च नाय प्रश्नस्तस्मात्परिशेषेण कलिधर्मप्रश्न इति सिद्धम् । एतन्निर्देशेन प्रतियुगमिव प्रतिमन्वन्तरमपि धर्मभेद उक्तः । तथा च वायवीये

प्रतिमन्वन्तरं चैव श्रुतिरन्या विधीयत इति ।

यद्यपि नित्यत्वात्सर्वकालमेकरूप एव वेद इति न्यायविदां घण्टाघोषेण प्रतिमन्वन्तरमध्येयवेदस्वरूपभेदो नास्ति तथा ऽपि कालभेदेन तत्तत्कालीनधर्मविधायकानां वेदवाक्यानां भेदे नानुपपत्तिर्यथा वसन्ते ब्राह्मणो ऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्यः पौर्णमास्या पौर्णमास्यया यजेतामावास्यायाममावास्ययेत्यादीनां तथा प्रतिमन्वन्तरमपि

तत्तद्धर्म्मविधायकवेदवाक्यभेदे न दोषस्तथा च तन्मूलकधर्माणामपि भेद इत्यलम्। एतेन "श्रुतिश्च शौचमाचारः प्रतिकालं विभिद्यते" इत्यौपकायनवाक्यमपि व्याख्यातम्।

तमेव धर्मभेदं विवृणोति।

**सर्वे धर्माः कृते जाताः सर्वे नष्टाः कलौ युगे।**
**चातुर्वर्ण्यं समाचारं किञ्चित्साधारणं वद॥ १७॥**

सर्वे देशकालावस्थादिभेदेन बहुविधा ये धर्माः।

धर्मा बहुविधा लोके श्रुतिभेदमुखोद्गताः।
देशभेदाच्च दृश्यन्ते कुलभेदात्तथैव च॥
जातिधर्मा वयोधर्मा गुणधर्माश्च शोभने।
शरीरकालधर्माश्च आपद्धर्मास्तथैव च॥
एतद्धर्मस्य नानात्वं क्रियते लोकवासिभिः।

इत्यानुशासनिकोक्तान् कृते सत्ययुगे युगसामर्थ्येनातीतप्रभावाणां पुरुषाणामसन्दिग्धाविपर्यस्तप्रमाणप्रमेया यथावदनुष्ठेयाश्च जातास्ते त्रेतादिषु पादहानिक्रमेण क्षीयमाणाः कलौ युगे यथोत्तरं सर्वात्मना विनष्टास्तादृशप्रमातृप्रमाणाद्यभावात्। तदुक्तं पुराणसारे

कृते चतुष्पात्सकलो निर्व्याजो व्याधिवर्जितः।
वृषः प्रतिष्ठितो धर्मो मनुष्येष्वभवत्पुरा॥
धर्मः पादविहीनश्च त्रिभिरंशैः प्रतिष्ठितः।
त्रेतायां द्वापरेऽर्द्धेन व्यामिश्रो धर्म इष्यते॥
त्रिपादहीनस्तिष्ये तु सत्तामात्रेण तिष्ठति।

वृषो वृष रूपः तिष्यः कलिः। मात्स्ये।

ततः प्रभृत्ययं लोकः सर्वो ऽप्यापत्स्यते भृशम्।
अनृतोऽपहितो भ्रष्टो धर्मतः कामतोऽर्थतः॥
श्रौतस्मार्त्ते प्रशिथिले नष्टधर्माश्रमे तथा।
सङ्करं दुर्बलात्मानः प्रतिपत्स्यन्ति मोहिता इत्यादि।

अतश्चाल्पसामर्थ्यैः पुरुषैस्तेषां देशकालवयोवस्थादिभेदभिन्नानां धर्माणां यथावज्ज्ञानानुष्ठानासम्भवाच्चतुर्वर्णानुष्ठेयं तत्तद्विशेषानादरेण सर्वसाधारणं किञ्चिद्वदेति। यत्त्वहिंसादिसाधारणधर्मप्रश्नोऽयमिति व्याख्यातं तन्न। अग्रे तेषामप्रतिपादनेनोत्तरस्य न्यूनत्वप्रसङ्गात्। तस्माद्यथोक्तमेव साधीय इति।

ननु चतुर्वर्णधर्मप्रश्नोऽयमनुपपन्नः कलौ क्षत्रियवैश्ययोरभावात्। तथा च भागवते।

> महानन्दिसुतो राजन् शूद्रागर्भोद्भवो बली।
> महापद्म इति ख्यातो नन्दः क्षत्रविनाशकृत्॥
> ततो नृपा भविष्यन्ति शूद्रप्राया अधार्मिकाः।
> येऽतीता वर्तमाना ये भविष्यन्ति च पार्थिवाः॥
> ते ऽत्र उद्देशतः प्रोक्ता वंशीयाः सोमसूर्ययोः।
> आरभ्य भवतो जन्म यावन्नन्दाभिषेचनमिति॥

अत्र सामान्येन क्षत्रविनाशावगमात्परीक्षितमारभ्य नन्दपर्यन्तमेव तत्सद्भावबोधनाच्चोपरिष्टात्तदभावो गम्यते, वैश्यानां त्वनुपलब्ध्यैव तन्निश्चय इति।

उच्यते। अत्रोपक्रमोपसंहाराभ्यां क्षत्रियाणां राज्याभावमात्रं प्रतीयते न स्वरूपाभावः। न च क्षत्रियविनाशकृदित्यनेन तत्सिद्धिः। तस्यापि ताभ्यां राज्याभावमात्रपरत्वात्। अन्यथा प्रत्यक्षविरोधापत्तेः प्रत्यक्षेणैव तदुपलब्धेः। अत एव हरिवंशे।

> वैश्याचाराश्च राजन्या धनधान्योपजीविनः।
> युगोपक्रमणे पूर्वं भविष्यन्ति द्विजातय इति।

युगोपक्रमणे कलियुगोपक्रमणे तयैवोपक्रमात्। एवं च वैश्यानामपि गूर्जरदेशे प्रत्यक्षोपलब्धिरेव सत्तागमिकेत्यलं विस्तरेण।

इदानीं तत्तद्विशेषविहितमसाधारणधर्मं पृच्छति ।

**चतुर्णामपि वर्णानां कर्तव्यं धर्मकोविदैः ।**
**ब्रूहि धर्मस्वरूपज्ञ सूक्ष्मं स्थूलं च विस्तरात् ॥१८॥**

विविधवादिविप्रतिपत्त्या दुर्निरूपं धर्मस्वरूपं सम्यक् जानातीति धर्मस्वरूपज्ञस्सो ऽत्र सम्बोध्यते । विप्रतिपत्तिश्चेत्थं विहितनिषिद्धक्रियासाध्यावात्मगुणौ धर्माधर्माविति तार्किकाः । यो यागादिकमनुतिष्ठति तं धार्मिकमिति आचक्षत इति यागादिकमेव धर्म इति भाष्यकृतः । द्रव्यक्रियागुणादीनामैन्द्रियकत्वे ऽपि न ताद्रूप्येण धर्मत्वमपि तु श्रेयःसाधनतया वेदात्प्रतीयमानत्वेनेन्द्रियागोचरत्वाद्धर्मस्येति भाट्टाः । धात्वर्थसाध्यं स्वर्गादिफलसाधनमपूर्वमेव कार्यनियोगापरपर्यायो धर्म इति प्राभाकराः ।

मत्त्याऽऽर्यैः क्रियमाणं तु शंसन्त्यागमवेदिनः ।

सधर्मो यं न गर्हन्ति तं धर्मं स्वं निबोधतेति मानवाः । दुर्निरूपत्वं च महाभारते ।

अधर्मो धर्म इति च व्यवसायो न शक्यते ।

कर्तुमस्माद्विधेर्ब्रह्मचतो न व्यवसाम्यहमिति, धृष्टद्युम्नेनोक्तम् । राजधर्मे ऽपि

न कल्माषो न कपिलो न कृष्णो न च लोहितः ।
अणीयान् क्षुरधारायाः को धर्मं वक्तुमर्हतीति ॥

एवं विप्रतिपत्तौ दुर्ज्ञेयत्वे च स्वर्गादिसाधनं शास्त्रोक्तं समधिगम्यातिशयो धर्म इति सर्वानुगतधर्मस्वरूपज्ञ चतुर्णां वर्णानां कर्तव्य धर्मकोविदैर्धर्मशास्त्रतत्त्वाभिज्ञैश्च कर्तव्यं विस्तरात्कात्स्न्येन सूक्ष्मं स्थूलं च द्विविधमपि धर्मं ब्रूहि तत्र चतुर्वर्णाभिप्रायेण स्थूलं धर्मकोविदाभिप्रायेण च सूक्ष्ममिति विवेकः । द्वैविध्यं च "बहुधा दृश्यते धर्मः स्थूलः सूक्ष्मो द्विजोत्तमेति" धर्मव्याधोपाख्याने प्रयोजितं तत्र लोकवेदविरोधे जायत्येव विहितः सूक्ष्मस्तदविरोधे विहितश्च स्थूल इति । सूक्ष्मश्च धर्मो द्रौपदी

र्विवाहादिः तथा च लोकविरोधे तस्मादेकस्य बहवो जाया भवन्ति नैकस्यै बहवः सहपतय इत्यादि श्रुतिविरोधे च जायति युधिष्ठिरेण लोकवेदविरुद्धो ऽयं धर्मो धर्मभृतां वर "सूक्ष्मोधर्मो महाराज ना ऽस्य विद्मो गतिं वयमि"ति धर्मे सन्दिहानं द्रुपदम्प्रति सूक्ष्मधर्मत्वं न प्रपञ्चितः ।

एतेन प्रत्यक्षश्रुतिविरुद्धस्य कथं धर्मत्वमिति चोद्यं निरस्तम् । सूक्ष्मत्वाद्दुर्ज्ञेयत्वाच्च । सूक्ष्मो धर्मस्तत्र तत्र वक्ष्यमाणस्तथाविधो ऽल्पप्रायश्चित्तादिः स्थूलश्च धर्मः स्नानाचमनादिः क्षोदाक्षमैरपि बोद्धुं योग्यः । चतुर्णां वर्णानामिति समुदितप्रश्ने ऽपि प्रत्येकं कार्यपरिसमाप्तेरसाधारणधर्मप्रश्न एव तात्पर्यम् । तांश्चोत्तरतः स्वयमेव स्पष्टयिष्यति । एवं च साधारणासाधारणधर्मप्रश्नद्वयेन तत्र तत्र साधारणासाधारणप्रायश्चित्तादिप्रतिपादनमुपपादितमिति ।

उक्तवक्ष्यमाणयोः प्रश्नोत्तरयोरसाङ्कर्यायोत्तरमवतारयति ।

**व्यासवाक्यावसाने तु मुनिमुख्यः पराशरः ।**
**धर्मस्य निर्णयं प्राह सूक्ष्मं स्थूलं च विस्तरात् ॥**

व्यासवाक्यावसाने व्यासोक्तिसमाप्तौ मुनिमुख्यः स्थूलसूक्ष्मधर्मविवेचनप्रवचनकुशलः पराशरो धर्मस्य व्यासप्रश्नविषयस्य निर्णयं निर्णीयत इति निर्णयः स्वरूपं सूक्ष्मं स्थूलं च विस्तरात् कार्त्स्न्येन प्रकर्षेणोक्तिचातुर्येणाह ।

वक्ष्यमाणधर्मतत्त्वग्रहणाय श्रोतृसावधानतां विधत्ते ।

**शृणु पुत्र प्रवक्ष्यामि शृण्वन्तु मुनयस्तथा ॥ १६ ॥**

हे पुत्र पुन्नामनरकत्राणसमर्थ त्वद्बुभुत्सितं धर्ममहं प्रवक्ष्यामि तं त्वं सावधानीभूय शृणु तथा त्वया सहागता अत्रा ऽवस्थिताश्च मुनयो धर्ममननशीला अपि मया वक्ष्यमाणं धर्मं शृण्वन्तु अत्र पुत्रे मुनिषु च स्वस्य समपक्षपाततां ज्ञापयितुं मुन्युपादानं तेन मुनीनामपि व्यासं प्रति प्रश्नाद्वैव लब्धोत्तरत्वमिति ।

इदानीं स्वाभिधेयधर्मस्य स्वोत्प्रेक्षामात्रमूलत्वशङ्कायां वारणाय तत्प्रमातृप्रमाणानां प्रावाहिकीं नित्यतां वक्तुं सृष्टिप्रलयौ प्रपञ्चयति ।

**कल्पे कल्पे क्षयोत्पत्त्या ब्रह्मविष्णुमहेश्वराः ।**
**श्रुतिस्मृतिसदाचारनिर्णेतारश्च सर्वदा ॥ २० ॥**

कल्पते जगदस्मिन्काले इति कल्पः स च सृष्ट्यादिप्रलयान्तो जगदवस्थितिकालः स द्विविधो ऽवान्तरकल्पो महाकल्पश्च तत्र चतुर्मुखस्य दिनमात्रमवान्तरकल्पः तदुक्तं कौर्म्ये

ब्राह्ममेकं महाकल्पस्तावती रात्रिरिष्यते ।
चतुर्युगसहस्रं तत्कल्पमाहुर्मनीषिण इति ।

चतुर्मुखायुःपरिमितो महाकल्पः स च ब्राह्मेण मानेन शतसंवत्सरपरिमितः परार्द्धापरपर्यायः। तदुक्तं सूतसंहितायाम्

त्रिशतैः षष्टिभिः कल्पैर्ब्रह्मणो वर्षमीरितम् ।
वर्षाणां यच्छतं तस्य तत्परार्द्धमिहोच्यते ॥
ब्रह्मणो ऽन्ते मुनिश्रेष्ठ मायायां लीयते जगदिति ।

तदेषां कल्पानामनन्तत्वप्रदर्शनाय क्षयोत्पत्त्येति । तदुक्तं लैङ्गे

एवं कल्पास्तु संख्याता ब्रह्मणो ऽव्यक्तजन्मनः ।
कोटिकोटिसहस्राणि कल्पानां मुनिसत्तमेति, ।

कल्पे कल्पे प्रतिकल्पं क्षयोत्पत्त्या पूर्वकल्पान्ते क्षय उत्तरकल्पादौ उत्पत्तिरिति क्षयपूर्विका उत्पत्तिः क्षयोत्पत्तिः क्षयस्य पूर्वनिर्देशश्च संसारानादित्वसूचनाय प्रेत्यभावत्वादुत्पत्तेः । नित्यनैमित्तिकप्राकृतिकात्यन्तिकचतुर्विधेषु क्षयेषु नैमित्तिकप्राकृतिकाभ्यां क्षयाभ्यां उत्पत्त्या पुनः प्रादुर्भावेन च ब्रह्मविष्णुमहेश्वराः श्रुतिस्मृतिसदाचारास्तन्निर्णेतारश्चकाराद्धर्मा ऽपि सर्वदा अनाद्यन्ते संसारे उपलक्ष्यते, तत्र नैमित्तिकः क्षयो ऽवान्तरकल्पान्ते ब्रह्मदिवसान्तरूपे ब्रह्मणि सुप्ते चतुर्विधभूतग्रामस्य ध्रुवलोकपर्यन्तस्य नाश उच्यते, श्रुतिर्नाम वेदः स्मृतिर्धर्मशास्त्रं सदाचारो होलाकाद्याचारस्तन्निर्णेतारो वेदशाखार्थविभागकारिणो व्यासकठकौथु-

बौधायनाश्वलायनजैमिन्याद्याः स्मृतिनिर्णेतारो मन्वाद्या अष्टादशमूलस्मृतिकर्तारो जाबाल्यादयो अष्टादशोपस्मृतिकर्तारो वसिष्ठादयश्चैकविंशतिरिति ।

तदुक्तं ।

मनुर्बृहस्पतिर्दक्षो गौतमो ऽथ यमो ऽङ्गिराः ।
योगीश्वरः प्रचेताश्च शातातपपराशरौ ॥
संवर्तोशनसौ शंखलिखितावत्रिरेव वा ।
विष्णवापस्तम्बहारीता धर्मशास्त्रप्रवर्तकाः ॥
एते ह्यष्टादश प्रोक्ता मुनयो नियतव्रताः ।
जाबालिर्नाचिकेतश्च स्कन्दो लौगाक्षिकाश्यपौ ॥
व्यासः सनत्कुमारश्च शन्तनुर्जनकस्तथा ।
व्याघ्रः कात्यायनश्चैव जातूकर्ण्यः कपिञ्जलः ॥
बौधायनश्च काणादो विश्वामित्रस्तथैव च ।
पैठीनसिर्गोभिलश्चेत्युपस्मृतिविधायकाः ॥
वसिष्ठो नारदश्चैव सुमन्तुश्च पितामहः ।
विष्णुः कार्ष्णाजिनिः सत्यव्रतो गार्ग्यश्च देवलः ॥
जमदग्निर्भरद्वाजः पुलस्त्यः पुलहः क्रतुः ।
आत्रेयश्च गवेयश्च मरीचिर्वत्स एव वा ॥
पारस्करश्च ऋष्यशृङ्गो वैजवापस्तथैव च ।
इत्येते स्मृतिकर्तारो एकविंशतिरीरिता इति ।

सदाचारनिर्णेतारो होलाकाद्यनुष्ठातारस्तत्कुलवृद्धाः चकारात् पुराणोपपुराणप्रणेतारो व्यासादयो ऽपि एते सर्वे ऽपि प्रतिकल्प लीयन्ते पुनरुत्पद्यन्त इत्यर्थः । तदाह मनुः

तस्य सो ऽहर्निशस्यान्ते प्रसुप्तः प्रतिबुध्यते ।
प्रतिबुद्धश्च सृजति मनः सदसदात्मकम् ॥

एवं स जायत्स्वप्नाभ्यामिदं सर्वं चराचरम् ।
संजीवयति चा ऽजस्रं प्रमापयति चाऽव्ययइति ।

प्राकृतस्तु लयो मायापरपर्यायायां प्रकृतौ यदा ब्रह्मादीनां लयः । तदुक्तं सूतसंहितायाम् ।

ब्रह्मणो ऽन्ते मुनिश्रेष्ठ मायायां लीयते जगत् ।
तथा विष्णुश्च रुद्रश्च प्रकृतौ विलयं गतौ ॥
ब्रह्मणश्च तथा विष्णोस्तथा रुद्रस्य सुव्रताः ।
मूर्तयो विविधास्तेषु कारणेषु लयं ययुरिति ॥

एवं लीनेषु ब्रह्मादिषु ब्रह्मायुःकालपरिमितप्रलयकालानन्तरं भगवत्सच्चिदानन्दरूपस्य सिसृक्षोत्पद्यते "सो ऽकामयत बहु स्यां प्रजायेयेति" श्रुतेः । ततो ब्रह्मविष्णुरुद्रात्मकत्वेन त्रेधा भवति तेषामाद्यो ब्रह्मा "ब्रह्मादेवानां प्रथमः संबभूवेति श्रुतेः । तस्य प्रोक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरित्यथ ह खलु चास्य राजसांशः सोऽयं ब्रह्मा ऽथ यो ह खलु चास्य तामसांशः सोऽयं रुद्रो यो ह खलु चास्य सात्त्विकांशः सोयं विष्णुः शर्व एकस्त्रिधा भूत इति मैत्रश्रुतेः

एक एव शिवः साक्षात् सृष्टिस्थित्यन्तसिद्धये ।
ब्रह्मविष्णुशिवाख्याभिः कलनाभिर्व्यजृम्भत इति । स्कन्दाच्च ।

एवं सृष्टो ब्रह्मा धर्मं सृजति । तथा च श्रुतिः । स नैव व्यभवत्तच्छ्रेयो रूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्तीति । मनुरपि

सृष्टिं ससर्ज चैवेमां स्रष्टुमिच्छन् इमाः प्रजाः
कर्मणां च विवेकार्थं धर्माधर्मौ व्यवेचयदिति ।

तदेवं प्रतिकल्पं ब्रह्मादीनां मन्वादीनां धर्मस्य च जायमानत्वाद्वेदमपूर्वं ममैव प्रवचनमिति तात्पर्यम् ।

नन्वेव स्मृतिवत् श्रुतेरपि पौरुषेयत्वात्तन्मूलकस्मृत्याद्यभिधेयधर्मस्याप्यश्रद्धेयतैवेत्यत आह

**न कश्चिद्वेदकर्तास्ति वेदं स्मृत्वा चतुर्मुखः ।**
**तथैव धर्मान्स्मरति मनुः कल्पाऽन्तरेऽन्तरे ॥२१॥**

ईश्वरब्रह्मव्यासानां मध्ये कश्चिदपि वेदानामृगादीनां कर्त्ता वाक्यार्थज्ञानपूर्वकवाक्यरचयिता नास्त्यपि तु चतुर्मुखो ब्रह्मा ईश्वरात्पूर्वकल्पाधिगतं वेदं स्मृत्वा कल्पान्तरेऽन्तरे प्रतिकल्पं धर्मान्स्मरति तत्र मन्त्रार्थवादादिषु विप्रकीर्णान्वर्णाश्रमधर्मान् सङ्कलयन् पितामहप्रजापत्यादिस्मृतिरूपेणोपनिबध्नाति । व्यासस्तु केवलं राशीभूतं वेदं ऋगादिपृथक्करणेन चतुर्धा करोतीति न कस्याऽपि वेदकर्तृत्वम् । तदुक्तं मात्स्ये

अस्य वेदस्य सर्वज्ञः कल्पादौ परमेश्वरः ।
व्यञ्जकः केवलं विप्रा नैव कर्ता न संशयः ॥
ब्रह्माणं मुनयः पूर्वं सृष्ट्वा तस्मै महेश्वरः ।
दत्तवानखिलान्वेदान्विप्रा आत्मनि सुस्थितान् ॥
ब्रह्मणा चोदितो विष्णुर्व्यासरूपी द्विजोत्तमः ।
हिताय सर्वभूतानां वेदभेदान्करोति स इति ।

ब्रह्मणो धर्मशास्त्र[illegible]

इदं शास्त्रं तु कृत्वाऽसौ मामेव स्वयमादितः ।
विधिवद्ग्राहयामास मरीच्यादीनहं मुनीनिति ।

यथा ब्रह्मा धर्मशास्त्रं करोति तथैव प्रतिकल्पं स्वायम्भुवो मनुरपि वेदात् धर्मान्स्मृत्वोपनिबध्नाति । मनुरिति विष्ण्वादीनामप्युपलक्षणम् । एतेन प्रतिमहाकल्पं प्रत्यवान्तरकल्पं च ब्रह्ममन्वादिभिः श्रुतिस्मृतिधर्माणां स्मरणप्रणयनाभ्यां प्रावाहिकी नित्यतोक्ता भवतीति । तदुक्तमाश्वमेधिके

युगेष्वावर्तमानेषु धर्मोऽप्यावर्तते पुनः ।
धर्मेष्वावर्तमानेषु लोकोऽप्यावर्तते पुनरिति ।

युगभेदधर्मवैलक्षण्यमभिप्रेत्य धर्मानिति बहुवचनात्तदेव प्रतिजानीते

**अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे युगे।**
**अन्ये कलियुगे नृणां युगरूपानुसारतः ॥ २२ ॥**

कृतयुगे सत्ययुगे धर्मा वक्ष्यमाणास्तपः प्रभृतयोऽन्ये भिन्नस्वरूपाः भिन्नचोदनाचोदितत्वाद्धर्मस्वरूपभेदे च शब्दान्तरादेरेव प्रयोजकत्वात्। तथैव त्रेतायां द्वापरे युगे कलियुगे चाऽन्ये तत्र हेतुमाह नृणां युगरूपानुसारत इति। युगस्य कृतादेः रूपं स्वरूपं चतुःसहस्रवर्षपरिमितत्वं चतुश्चरणधर्माधिष्ठितत्वादि च तदनुसारतस्तदनुसरणेन।

अयमभिसन्धिः चतुःसहस्रवर्षपरिमिते सत्ययुगे मनुष्याणां चतुर्वर्षशतान्यायुर्भवति इतरे युगे त्रेतायुगादिषु एकैकसहस्रन्यूनेष्वेकैकशतन्यूनमायुर्भवति तथा कृतयुगे धर्मप्राबल्यादारोग्यादिसामर्थ्यमधिकम्। इतरेषु त्वधर्माभिभवात्सामर्थ्यन्यूनतेति। एवं च सति सर्वधर्मेषु सर्वयुगसाधारण्येन समानमधिकारं कथं मनुष्याणां चोदना ब्रूयात् सामर्थ्यरूपाधिकारिविशेषणतारतम्यात्। सिद्धं चैतत्तृतीयेऽधिकरणे। यथाविनियोगमधिकारसमर्थनात्।

अत एव मनुनापि।

चत्वार्याहुः सहस्राणि वर्षाणां तु कृतं युगम्।
तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः॥
इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु।
एकापायेन वर्तन्ते सहस्राणि शतानि चेति

सर्वयुगपरिमाणमभिधाय।

चतुष्पात्सकलो धर्मः सत्यं चैव कृते युगे।
ना ऽधर्मेणागमः कश्चिन्मनुष्यान्प्रतिवर्तते॥
इतरेष्वागमाद्धर्मः पादशस्त्ववरोपितः।
चौरिकानृतमायाभिर्धर्मश्चापैति पादशः॥

अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः ।
कृतत्रेतादिषु ह्येषां वयो ह्रसति पादशः ॥
वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम् ।
फलन्त्यनुयुगं लोके प्रभावश्च शरीरिणाम् ॥

इत्यन्तेनाधिकारिविशेषणानां सामर्थ्यादीनां तारतम्यं प्रतिपाद्य

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे ।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः ॥
इति स्पष्टमेवोपसंहृतम् ।

तथोपकायनो ऽपि

श्रुतिश्च शौचमाचारः प्रतिकालं विभिद्यते ।
नाना धर्माः प्रवर्तन्ते मानवाना युगे युगे ॥ इति ।

यत्तु अत्राऽन्यशब्दो न धर्मस्वरूपान्यत्वऽपरो ऽपि तु प्रकारान्यत्वपरो ऽन्यथाधर्मप्रमाणचोदनानामपि प्रतियुगं भेदापत्तेः । न हीयं चोदना कृते ऽध्येतव्या इयं त्रेतायामिति व्यवस्थापकं किं चिदस्तीति, तच्चिन्त्यम् । मनुगौतमशङ्खलिखितपराशरवचनानुमितचोदनानां स्वरूपभेदभिन्नानां "कृते तु मानवा" इत्यादिवाक्येन प्रतियुगं व्यवस्थायाः प्रत्यक्षसिद्धत्वात् ।

यश्चात्र प्रकारान्यत्वे दृष्टान्तः । एकस्याप्यग्निहोत्रस्य सायम्प्रातः कालभेदेन ऋतं त्वा सत्येन परिषिञ्चामीति सायं परिषिञ्चति सत्य त्वर्तेन परिषिञ्चामीति प्रातरित्यनुष्ठानप्रकारभेददर्शनं सो ऽपि विषमः । न एको धर्मः तपःप्रभृतिभिः प्रकारैर्भिद्यत इति शक्यं वक्तुं शब्दान्तरन्यायेन यागदानहोमवत्तस्य भिन्नस्वरूपत्वात् । अग्निहोत्रे तु भेदकप्रमाणाभावेन विधिनैवैकत्वावगमात् प्रकारे भेदचोदनानामपि युगभेदेन भेदापत्तिश्च तुल्यैवेत्यास्तां तावत् । तस्माद्धर्मस्वरूपभेद एव वाक्यार्थ इति ।

प्रतिज्ञातं धर्मस्वरूपभेदमुदाहरति ।

**तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।**
**द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे ॥ २३ ॥**

तपसन्ताप इत्यस्माद्धातोर्निर्वचनेन तपःशब्देन मुख्यवृत्त्या कृच्छ्रचान्द्रायणादिभिर्देहशोषणमेवोच्यते । तदुक्तं स्कान्दे

वेदोक्तेन प्रकारेण कृच्छ्रचान्द्रायणादिभिः ।
शरीरशोषणं यत्तत्तप इत्युच्यते बुधैरिति ॥

यद्यपि,

कोऽहं मोक्षः कथं केन संसारं प्रतिपन्नवान् ।
इत्यभिध्यानमर्थज्ञास्तपः शंसन्ति पण्डिताः ॥
तपस्त्वाधर्मवर्तित्वं शौचं सङ्करवर्जनम् ।

एतत् खलु वा वै तप इत्याहुर्यः स्व ददातीत्यादिस्कान्दव्यासश्रुतिवाक्यैर्ज्ञानयज्ञदानानामपि तपस्त्वं गम्यते तथा ऽप्यत्र ब्राह्मणपरिव्राजकन्यायेन तदितरविषयस्तपःशब्द इति । परमत्यायाससाध्यं कठिनमित्यभिलषितफलसाधनं कृतयुगे सत्ययुगे तथा त्रेतायुगे ज्ञानं बाह्येन्द्रियवृत्तिनिरोधेनात्मदर्शनं परमुच्यते ।

यद्यपि-धर्मभेदनिरूपणप्रस्तावे ज्ञानोपन्यासो न युक्तस्तथा "ऽयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति" योगिवाक्येनात्मज्ञानस्या ऽपि परमधर्मत्वप्रतिपादनान्न विरोधः । द्वापरे यज्ञमेव ज्योतिष्टोमादिकं परमाहुः । कलौ युगे दानमेव देशे काले उपायेन श्रद्धया द्रव्यस्य पात्रे प्रतिपादनमेव परमाहुः ।

तदाह मनुः

तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥ इति ।

परत्वं चाल्पस्य कृतयुगीयदानफलसाधकत्वेन । तदाह बृहत्पराशरः

शते तु या कृते दत्ते फलाप्तिः पुरुषस्य सा ।
दत्तैस्तु दशभिर्नृणां फलाप्तिः स्यात्कलौ युगे ॥ इति ।

नेयं परिसङ्ख्या तेन शास्त्रान्तरेण प्राप्तानामपि धर्माणामसाधारणत्वमविरुद्धम् । यथोक्तं वासिष्ठलैङ्गयोः

कृते ध्यानं तपश्चैव कर्तुं शक्यमयत्नतः ।
ज्ञानयोगौ मुनेः शक्यौ त्रेतायामप्रमादतः ॥
द्वापरे शक्यते कर्तुं यागो ऽक्लेशेन सुव्रत ।
दानमेव कलौ शक्यं कर्तुं सर्वजनैः सदा ॥ इति ।

वायवीये ऽपि

इत्यादानं तपस्सत्यं त्रेतायां धर्म उच्यत इति ।

बृहस्पतिना ऽप्युक्तम्

तपो धर्मः कृतयुगे ज्ञानं त्रेतायुगे स्थिते ।
द्वापरे चाध्वरः प्रोक्तस्तिष्ये दानं दया दमः ॥ इत्यादि ।

एवं प्रतियुगं धर्मव्यवस्थामभिधाय तत्प्रमाणव्यवस्थामाह ।

**कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः ।**
**द्वापरे शंखलिखिताः कलौ पाराशराः स्मृताः ॥२४॥**

कृते सत्ययुगे मानवा मनुप्रोक्ता धर्मास्तेन प्रोक्तमित्यण् । एवं गौतमाः गौतमप्रोक्तास्त्रेतायां द्वापरे शङ्खलिखिताः शङ्खलिखिताभ्यां सम्भूय प्रोक्ताः छान्दसो वृध्यभावः कलौ पाराशराः पराशरप्रोक्ताः स्मृतशब्दस्य द्विर्वचनं प्रत्येकं वाक्यचतुष्टये ऽपि "उपरि हि देवेभ्यो धारयतीत्यत्रैव हेतुमन्निगदेन हि शब्देन समानार्थतया प्रसिद्धवदनुवादेन विधित्वं कल्पयितुम् । तेन कलौ पाराशरधर्माः कर्तव्या इत्यर्थः सिध्यति । ततश्चानुवादमात्रमेतदिति निरस्तम् । किं तु कृतादिषु मानवादिधर्मा व्यवस्थाप्यन्ते वार्त्रघ्नीपौर्णमास्यामनूच्येते वृधन्वती अमावास्यायामितिवत् । अत एव बृहत्पराशरेण मन्वादिधर्माणां कलावशक्यानुष्ठानत्वमुक्तम् ।

युगेषु त्रिषु ये प्रोक्ता धर्मा मन्वादिकैर्मुने ।
शक्यन्ते नैव ते कर्तुं वर्णाश्रमवासिभिः ॥
मन्वर्थश्च स धर्माणां कृतादित्रियुगेष्वभूत् ।
धर्मं तु त्रियुगाचारं न शक्यं तु कलौ युगे ॥
मनुर्या याज्ञवल्क्यश्च वसिष्ठः प्राह निष्कृतिं ।
सा कृतादिषु वर्णानां सति धर्मे चतुष्पदे ॥ इति ।

ब्राह्मे ऽपि ।

यद्युगान्तर्युगे धर्मो नादर्तव्यः कलौ युगे ।
पापप्रसक्तास्तु यतः कलौ नार्य्यो नरास्तथा ॥

इत्यनादरणीयत्वमुक्तम् । न चैषां विषयभेदेन व्यवस्था साधीया। नैयायिक्यास्तस्या वाचनिकव्यवस्थातो जघन्यत्वात् । सामान्यानामेषां विशेषपरतासङ्कोचस्तु न समाधेय एव । किं च प्रतिपुरुषमनेकविषयस्फूर्तिसम्भवेन तत्तत्परतया व्यवस्थाकल्पनायामव्यवस्थितः शास्त्रार्थः स्यादित्यलं पल्लवितेन ।

नन्वेवं कलौ मानवादिधर्मा नानुष्ठेया स्युः । अनुष्ठेयत्वे ऽपि वा मन्वादिवाक्यैः पराशरवाक्यानामुपसंहारो न स्यात् । मैवं समाने विषये मन्वादिवाक्यैः पराशरस्य विरोधे व्यवस्थापकत्वात् । अन्यथैतद्वाक्यानर्थक्यं सकलस्मृत्यन्तरवैयर्थ्यं वा स्यात् । उपसंहारस्तु प्रमाणबलाबलापेक्षया प्रमेयबलाबलस्य ज्यायस्त्वेन स्यादेव ततश्च ये धर्माः पराशरानुक्ता अपि मन्वाद्युक्ता ये वा तुल्यरूपा समान्यविशेषरूपा वा तेषामविरुद्धत्वेनोपसंहारेण चानुष्ठेयता सिध्यत्येव कलावपीति सर्वमनवद्यम् । तदाह बृहत्पराशरः

कृते तु मानवा धर्मास्त्रेतायां गौतमस्य च ।
द्वापरे शङ्खलिखिताः कलौ पाराशराः स्मृताः ॥ इति ।

प्रतियुगं धर्मतत्प्रमाणव्यवस्थावदधर्मजनकस्थानहानव्यवस्थामप्याह।

**त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ।**
**द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे ॥ २५ ॥**

पतितपुरुषयुक्तं देशमेकराजाज्ञावशवर्तिग्रामसमूहं कृतयुगे त्यजेत् कृतयुगसामर्थ्यादधर्मसंक्रमभयेन। त्रेतायां तादृशमेव ग्रामं विप्रतद्भृत्यशूद्रवासम् । अनेकजातीयनानावृत्त्युपजीविबहुजननिवासस्थानं नगरं वा ।

विप्राश्च विप्रभृत्याश्च यत्र वै निवसन्ति ते ।
स तु ग्राम इति प्रोक्तः शूद्राणां वास एव च ॥

पण्यक्रयादिनिपुणैश्चातुर्वर्ण्यैस्तु यद्युतम् ।
अनेकजातिसम्बद्धं नैकशिल्पिसमाकुलम् ॥
सर्वदैवतसम्बद्धं नगरं त्वभिधीयते ।

इति भृगुप्रोक्तलक्षणमुत्सृजेत् । द्वापरे पतितपुरुषयुक्तमेकं कुलं तत्स-पिण्डवर्गं त्यजेत् कुलत्यागो नाम पतितकुलमर्यादित्यर्थः ।

नन्वत्र कृतादिक्रमेण कर्तृकुलग्रामदेशत्यागा वक्तव्या धर्मप्राबल्येनाधर्मदौर्बल्यात् । तथा हि यत्र चतुष्पात्सकलो धर्मस्तत्रा ऽधर्मस्यैकपात्त्वेन कर्तृमात्रनिष्ठतया सकलदेशाभिभावकत्वं न सम्भवतीति कर्तृमात्रत्याग उचितो यत्र पुनरधर्मश्चतुष्पाद्धर्मश्चैकपात्तत्र धर्मस्य कर्तृमात्रनिष्ठतया अधर्मस्य सकलदेशव्यापकत्वसम्भवाद् देशत्याग उचित एवं त्रेताद्वापरयोरपि तत्कथमुच्यते कृते देशत्यागः कलौ कर्तृत्याग इत्यादि ।

उच्यते । नात्र धर्माधर्मयोः प्रबलदुर्बलभावो देशादित्यागे प्रयोजकः किन्तु शक्यशक्यौ । तथा हि कृते पतितपुरुषाक्रान्तदेशपरिहारे देशान्तरस्यातथाविधस्योपलब्धिः सम्भवतीति देशत्यागः शक्यते कर्तुं कलौ तु पतितप्रायपुरुषाक्रान्तत्वात्सकलदेशस्य त्यागो ऽशक्य एवेति कर्तृमात्रत्यागो विधीयते । नन्वेकस्य पातित्ये देशादीनां त्यागः कथं तेषामकर्तृत्वेनासंसर्गित्वेन च पातित्यनिमित्ताभावात्संसर्गे तु वाक्यान्तरेणैव वर्जनादिति चेत् सत्यम् । देशादित्यागे संसर्गप्रकारेष्वपरिगणितस्यापि तद्देशवासादेरनेनैव वाक्येन तत्तद्युगेष्वसाधारण्येन संसर्गप्रकारत्वं बोध्यत इति कल्प्यते । अन्यथा ऽदृष्टार्थतादेशत्यागादीनां स्यात् । वक्ष्यति च कृते सम्भाषणादेवेत्यादि तस्मात्सुष्ठूक्तं त्यजेद्देशमित्यादि ।

तदाह बृहत्पराशरः ।

त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् ।
द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे ॥ इति ।

देशादित्यागे हेतुरुक्तः पाद्मे ।

देशारामकुलानि स्युः पापभाञ्जि कृतादिषु ।
कलौ तु केवलं कर्ता भाजनं पुण्यपापयोः ॥ इति ।

प्रतियुगमधर्मजनकस्थानहानव्यवस्थावदधर्मजनकत्याज्यनिमित्त-व्यवस्थामाह ।

**कृते सम्भाषणादेव त्रेतायां स्पर्शनेन च ।**
**द्वापरे त्वन्नमादाय कलौ पतति कर्मणा ॥ २६ ॥**

कृते कृतयुगे पतितस्य संभाषणात्प्रीत्या परस्पराभिलापात्पतति एवकारो व्यवस्थापोद्बलनार्थः । न कर्मव्युदासार्थः । तस्य चतुर्ष्वऽपि युगेषु पातकत्वात् । त्रेतायां स्पर्शनेन परस्परमङ्गसंपर्केण चकारो ऽप्ये-वकारार्थे । द्वापरे त्वन्नमादाय पतितस्वामिकान्नभोजनेन कलौ कर्मणैव निषिद्धेन ब्रह्महत्यादिना पतति द्विजातिकर्मानर्हो भवति । कृतादिषु सम्भाषणादिव्यवस्थापनस्य कलावपरिहार्यत्वमभिप्रेत्य परिहार्ये तु कथं चित्कर्मेति तावन्मात्रप्रतिषेधः। कर्मशब्दोपादानसामर्थ्यान्मानसवाचिक-व्यापारयोः कलावपातकत्वं ध्वनितम् । तथा च भागवते ।

नानुद्वेष्टि कलिं सम्राट् सारङ्ग इव सारभुक् ।
कुशलान्याशु सिध्यन्ति नेतराणि कृतानि यत् ॥ इति ।

सारङ्गवत्सारग्राही राजा परिक्षित्कलिं न जघान यतो ऽस्मिन्कु-शलानि पुण्यानि मनसा वचसा च कृतानि सिध्यन्ति नेतराण्यकुशलान्य-पुण्यानि यतस्तानि कृतान्येव कायिकव्यापारविषयाण्येव सिध्यन्तीत्यर्थः । एतेन पूर्वोक्तेषु देशादित्यागेष्वप्येतानि निमित्तानि दर्शितानि यथा कृते सम्भाषणमात्रात्पातित्य, तच्चैकदेशवासे ऽवश्यम्भावीति देशस्यैव त्यागः । त्रेतायां स्पर्शनं स च एकग्रामवासेऽवश्य भावीति ग्रामस्यैव त्यागः। द्वापरे त्वन्नभोजनेन, तच्चैककुलवासेऽवश्यम्भावीति कुलस्यैव त्यागः । कलौ तु कर्मणैवेति कर्तृमात्रत्याग इति । तदाह बृहत्पराशरः ।

कृते सम्भाष्य पतति त्रेतायां स्पर्शनेन तु ।
द्वापरे भक्षणे ऽन्नस्य कलौ पतति कर्मणा ॥ इति ।

एतेन शास्त्रफले प्रयोक्तरीतिन्यायेनाकर्तरि देशादौ पापसम्भवो न सम्भवतीति चोद्यं निरस्तम् । सम्भाषणादीनां पापहेतूनां सम्भवात् ।

ननु चतुर्णामेव निमित्तानां युगचतुष्टये व्यवस्थापने

संलापस्पर्शनिश्वाससहयानासनाशनात्।

याजनाध्यापनाद्यौनात्पापं सङ्क्रमते नृणाम्॥

इत्यादिवाक्यैर्निमित्तान्तरपरिगणनमनर्थकं स्यादिति चेन्न। तेषां संवत्सरान्ते पातित्यापादकत्वात् मूलवचनोक्तानां तु कृतादिषु सद्यःपातित्यजनकत्वात् सद्यःपातित्यहेतुकर्मसाहचर्यात्। तथा च सम्भाषणादिभिः कलौ न सद्यः पातित्यं कृतादिष्विव किं तु कर्मणैव। सम्भाषणादिभिस्तु संवत्सरान्तेऽपि कलौ न पातित्यं किं तु पतिततुल्यतामात्रम्। "भवेदूर्ध्वं तु तत्सम" इति वक्ष्यमाणत्वात्।

एते महापातकिनस्तत्संसर्गी च पञ्चमः।

एतैः सह समायोगं यः करोति दिने दिने॥

तुल्यतां याति सोऽप्याशु कलौ संवत्सरे गते।

इति पाद्मवाक्याच्च। न चैतावतैव पातित्यं गम्यते, राजसमोमन्त्रीति वत्तत्साम्यबोधकत्वेऽपि तत्त्वानवबोधकत्वात्॥

अत एव "संसर्गदोषः पापेष्विति" संसर्गदोषाभावः कलिवर्ज्यप्रकरणेऽभिहितः सङ्गच्छते। न चैवं संसर्गमाचरन्विप्र इत्यादिना अग्रे प्रायश्चित्ताभिधानमसङ्गतमिति वाच्यम्। तस्य संसर्गोत्पन्नपापविषयत्वेन पातित्यविषयत्वाभावात्। दोषः पातित्यं "भवेदूर्ध्वं तु तत्सम" इति साम्याभिधानेऽपि तत्प्रायश्चित्तानभिधानाच्च। तच्च तत्रैव यथासम्भवं व्याख्यास्यते। न च कर्मणः सर्वत्राऽपि सद्यःपातकत्वेन कलाविति व्यर्थम्। अन्यत्र सम्भाषणादेस्तस्य च सद्यःपातकत्वं कलौ तु केवलस्यैवेत्यर्थात्। तस्मात्कलौ कर्मणैव सद्यःपातित्यं न संसर्गेण यौनादिनाऽपि।

न च यौनस्रौवमौख्यैः सद्यः पततीति विष्णुवाक्यविरोधः। तेषां कृतविषयमुखसम्भवसम्भाषणाध्यापनसाहचर्येण कृतादिविषयत्वात्। तथा हि मुख्यस्य मुखसम्भवाप्ताध्यापनस्य सम्भाषणत्वेन सम्भाषणेऽन्तर्भावः। यौनस्य मैथुनस्य योनिलिङ्गस्पर्शत्वेन स्पर्शेऽन्तर्भावः। स्रौवस्य याजनस्य पुरोडाशादिभक्षणत्वेनाशादनेऽन्तर्भाव इति सर्वं सुस्थम्।

इदानीं अवज्ञातमहापुरुषादिशापपरिपाकहेतुकालव्यवस्थामाह ।

**कृते तात्क्षणिकः शापस्त्रेतायां दशभिर्दिनैः ।**
**द्वापरे चैकमासेन कलौ संवत्सरेण तु ॥ २७ ॥**

कृतयुगे तात्क्षणिकः स एव क्षणः तत् क्षणं तत्क्षणे भवस्तात्क्षणिकः शापः शापपरिपाको अनिष्टाशंसनं, त्रेतायां दशभिर्दिनैरहोरात्रैः, द्वापरे तु एकेन मासेन त्रिंशद्दिनसमूहेन, कलौ संवत्सरेण द्वादशमाससमूहेन भवतीति । अयमर्थः कृते धर्मस्य प्राबल्येन शप्तुः परानिष्टविषयिणी वाक्सिद्धिस्तत्कालमेव भवति कलौ तु धर्मदौर्बल्यात्संवत्सरेणेति । एवं त्रेताद्वापरयोरपि योज्यम् ।

तदाह बृहत्पराशरः ।

कृते तात्क्षणिकः शापस्त्रेतायां दशभिर्दिनैः ।
मासेन द्वापरे त्रयः कलौ संवत्सरेण तु ॥ इति ।

शाप इत्याशीर्वादस्याऽप्युपलक्षणं न्यायसाम्यात् ।

ननु

यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन च ।
द्वापरे यच्च मासेन अहोरात्रेण तत्कलौ ॥
तपसो ब्रह्मचर्यस्य जपादेश्च फलं द्विजाः ।
प्राप्नोति पुरुषस्तेन कलिः साध्विति भाषितम् ॥

इत्यादिविष्णवादिवाक्यैः कलौ धर्मस्याशुफलत्वप्रतिपादनात्कथमुच्यते संवत्सरेण शापपरिपाक इति । सत्यम् । कृतादिषु विलम्बेन फलजनकत्वमधर्मानभिभवात् । कलौ त्वविलम्बेन धर्मोत्पत्तावपि विलम्बेन फलत्वाभिधानात् । तदेतत्त्रैवोक्तम् ।

धर्मसंसाधने क्लेशो द्विजातीनां कृतादिषु ।
अल्पेनैव प्रयत्नेन धर्मः सिध्यति वै कलौ ॥
धर्मोत्कर्षमतीवाशु प्राप्नोति पुरुषः कलौ ।
स्वल्पायासेन धर्मज्ञास्तेन तुष्टोऽस्म्यहं कलेरिति ॥

यद्वा विवादे सत्यासत्यनिर्णायकशपथपरिपाककालव्यवस्थामाह ।

शपः शपनं शपथ इति यावत् । "शपनं शपथः पुमानि"ति कोशात् स च विवादे सत्यासत्यनिर्णयाय देवतादिस्पर्शनम्, तत् कृते तत्क्षणमेव निर्णायकम् । त्रेताया दशभिर्दिनैर्द्वापरे मासमात्रेण कलौ संवत्सरेण ।

कलौ द्वादशभिर्मासैः शपथः परिपच्यते । इति वायुपुराणात् ।

यत्तु कोशपानस्य शपथत्वे ऽपि चतुर्दशभिर्दिनैर्निर्णायकत्वम् ।

अर्वाक्चतुर्दशादह्नो यस्य नो राजदैविकम् ।
व्यसनं जायते घोरं स शुद्धः स्यान्न संशयः ॥

इति योगीश्वरादिभिरुक्तं तत्कृतादिषु कोशपानमात्रविषयम् । न शपथान्तरविषयम् । कोशपानं तु भक्तस्येव तस्याभिधानात् । याज्ञवल्क्यादिस्मृतेर्युगान्तरविषयत्वाच्च ।

उक्तं च

कृते तु मानवा धर्मा इति ।
मनुर्या याज्ञवल्क्यश्च वसिष्ठः प्राह निष्कृतिं ।
सा कृतादिषु वर्णानां सति धर्मे चतुष्पदे ॥ इति बृहत्पाराशरीयाच्च ।

दानमेव कलौ परमित्युक्तं तत्र गुणतारतम्येन फलतारतम्यं वक्तुं तदेव तावद्विभजते ।

**अभिगम्य कृते दानं त्रेतास्वाहूय दीयते ।**
**द्वापरे याचमानाय सेवया दीयते कलौ ॥ २८ ॥**

कृते अभिगम्य प्रतिग्रहीतृसकाशं गत्वा दानं क्रियते त्रेतासु बहुवचनं पाशबहुत्ववत्कृतद्वापरादिषु वा जाताविकवचनम् । प्रतिग्रहीतारमाहूय तस्मै दीयते द्वापरे स्वयमेवागत्य मह्यं इदं देहीति याचमानाय प्रतिग्रहीत्रे दीयते कलौ सेवया तदाज्ञाकरणेन दीयते । अत्र वर्तमानापदेशाद्युगप्रभावकथनमात्रं मतं न तु दानगुणव्यवस्थापनम् । अन्यथा सेवादानस्यातिनिष्फलतोपसंहाराद्बुद्धिविरोधः स्यात् तदाह बृहस्पतिः

कृते प्रदीयते गत्वा त्रेतास्वानीयते गृहे ।
द्वापरे च प्रार्थयतः कलावनुगमान्विते ॥

बृहत्पराशरो ऽपि ।

अभिगम्य कृते दानं त्रेतास्वाहूय दीयते ।
द्वापरे याचमाने तु कलौ सेवाय दीयते ॥

इदानीं तत्फलतारतम्यमाह ।

**अभिगम्योत्तमं दानमाहूयैव तु मध्यमम् ।**
**अधमं याचमानाय सेवादानं तु निष्फलम् ॥ २६ ॥**

अभिगम्य यद्दानं तदुत्तममनन्तफलम् । आहूय यद्दानन्तन्मध्यमं सहस्रगुणफलं याचमानाय यद्दानं तदधमं पञ्चशतगुणफलं सेवादानं तु निष्फलं फलाजनकमिति ।

तदुक्तं पुराणसारे ।

गत्वा प्रदीयते दानं तदनन्तफलं स्मृतम् ।
सहस्रगुणमाहूय याचितं तु तदर्द्धकम् ॥
अभिगम्य तु यद्दानं यद्वा दानमयाचितम् ।
विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते ॥ इति ।

यद्यपि "याचिते नाऽपि दातव्यं श्रद्धापूतं तु शक्तित" इति योगिवाक्येन याचिते ऽपि दानमुक्तम् । तथाऽपि याचितेन श्रद्धापगमे सति यद्दानं तदधममिति द्रष्टव्यम् । श्रद्धापूतमिति वचनात् । यद्यपि सेवादानं न सर्वात्मना निष्फलं तस्य तामसत्वेन तिर्यग्योन्युपभोग्यत्वात् । तथापि ऐहिकामुष्मिकफलहेतुत्वाभावान्निष्फलमिति ।

तदुक्तं गीतासु

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥

विष्णुधर्मोत्तरे ।

तामसानां फलं भुङ्क्ते तिर्यक्त्वे मानवः सदेति ।

स्कान्देऽपि वृथादानान्युपक्रम्य

"परिचारकाय भृत्याय सर्वस्य पिशुनाय च ।
इत्येतानि च राजेन्द्र वृथा दानानि षोडश" ॥ इति ॥

अभिगम्य दानस्योत्तमत्वाभिधानं सेवादानस्य निष्फलत्वाभिधानं चानुष्ठेयत्वाननुष्ठेयत्वप्रतिपादनाय ।

तदाह बृहत्पराशरः

अभिगम्योत्तमं दानमाहूतं चैव मध्यमम् ।
अधमं याचमानं स्यात्सेवादानं तु निष्फलमिति ॥

कृतादिषु धर्मभेदे नृणां युगरूपानुसरणं हेतुरुक्तस्तत्र प्रस्तुतत्वात्कलिस्वरूपं विशेषतः प्रपञ्चयति ।

**जितो धर्मो ह्यधर्मेण सत्यं चैवानृतेन च ।**
**जिताश्चोरैश्च राजानः स्त्रीभिश्च पुरुषाः कलौ ॥ ३० ॥**

धर्मो विध्यर्थः सन्ध्यास्नानादिरधर्मेण तत्कालनिषिद्धेन निद्रालस्यादिना जितो ऽभिभूतः सत्य साक्षिसभ्यादिवाक्येषु अनृतेन मिथ्यावचनेन तिरस्कृतं चोरैः परस्वापहारतत्परै राजानो ऽन्यायमार्गानुवर्तिनो जितास्तिरस्कृताः स्त्रीभिर्गृहिणीभिर्गृहकार्यचर्चायां पुरुषाः पराभूताः । यद्वा स्त्रीभिः स्वपरसाधारणीभिः स्वविषये धैर्यप्रच्यावनेनाभिभूताः पुरुषाः । अत्र धर्मादीनामभिभवकथनेन दुर्बलत्वमधर्मादीनां चाभिभावकत्वकथनेन प्रबलत्वमुक्तम् ।

तदाह बृहस्पतिः

तिष्ये ऽधर्मस्त्रिभिः पादैर्धर्मः पादेन संस्थितः ॥ इति ।

बृहत्पराशरे ऽपि

धर्मश्च सत्यमायुश्च तुर्यांशेन कलौ युगे ।
पुरुषाश्च जितास्त्रीभि. राजानो दस्युभिर्जिताः ।
जितो धर्मश्च पापेन अनृतेन तथा ऋतमिति ॥

किं च ।

**सीदन्ति चाग्निहोत्राणि गुरुपूजा प्रणश्यति ।**
**कुमार्यश्च प्रसूयन्ते अस्मिन्कलियुगे सदा ॥ ३१ ॥**

अग्निहोत्रस्य नित्यत्वात्तदुत्सादो निन्दातिशयनिमित्तम् ।

ननु

अग्निहोत्रं गवालम्भं सन्यासं पलपैतृकम् ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

इत्यनेन अग्निहोत्रस्य कलौ निषेधात्कथं तदभावोऽनिन्दानिमित्तम् । उच्यते । गोनराश्वमेधानामग्निहोत्रानन्तरभाविनां निषेधानुपपत्तिरेवाग्निहोत्रस्य कलौ गमिका तदभावे तेषामप्राप्यत्वात् । तथा अग्निहोत्रहवणीलेहस्य लिङ्गापरिग्रहस्य सौत्रामण्यां सुराग्रहस्य सत्रदीक्षाया विप्राणां शामित्रसोमविक्रययोः निषेधश्च कलावग्निहोत्राभावे नोपपद्येत । तस्माद्विशेषनिषेधः सामान्याभ्यनुज्ञानार्थ इति न्यायादस्त्यग्निहोत्रं कलौ । न चेदं लिङ्गं निषेधश्रुतेर्न बाधकमिति वाच्यम् । तयोः कलिपूर्वापरभागविषयत्वेन विषयभेदकल्पनायामनुपपत्तिः । तथा हि । द्विविधं तावदग्निहोत्रं सर्वाधानेनार्धाधानेन च । तत्र सर्वाधानेन चतुश्चत्वारिंशच्छतवर्षपर्यन्तमेव कार्यं नोपरिष्टात् ।

तथाह व्यासः ।

चत्वार्यब्दसहस्राणि चत्वार्यब्दशतानि च ।
कलेर्यदा गमिष्यन्ति तदा त्रेतापरिग्रहः ॥
सन्यासश्च न कर्तव्यो ब्राह्मणेन विजानता ॥ इति ।

अत्र त्रेतापरिग्रह इति वदन्सर्वाधानमेवाभिप्रेतवान् ।

अत एव लोगाक्षिः

अर्धाधानं स्मृतं श्रौतस्मार्ताग्न्योश्च पृथक्कृतिः ।
सर्वाधानं तयोरैक्यकृतिः पूर्वयुगाश्रितेति ।

युगस्य पूर्वं पूर्वयुगं कलिपूर्वभाग इति व्याख्येयम् । अन्यथा व्यासवाक्याद्विच्छिन्नमूलत्वापत्तेः । अर्धाधानं तु यावद्वर्णवेदविभागं कार्यम् ।

तदाह देवलः

यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते ।
सन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौ युगे ॥ इति ।

नन्विदमनुवादकं न व्यवस्थापकं वैदिककर्मणो वर्णवेदसाध्यत्वेन तदभावेऽर्थत एव तन्निवृत्तेः । मैवम् । तात्पर्यानवगमात् । तथा हि

वर्णानां विभागो नाम योनिवृत्तिधर्मलिङ्गसंकरानपगमाभ्यां यथावस्थितत्वम् । वेदप्रवृत्तिश्चानुष्ठीयमानं पदार्थाभिप्रायकश्रुत्यनुसन्धानसामर्थ्यं तदुभयं यावत्तावदग्निहोत्राद्यनुष्ठेयं नोपरिष्टादित्यर्थः । यद्यग्निहोत्रं सामान्येनोपात्तं तथाऽपि सर्वाधानव्यवस्थापकाविरोधेनार्धाधानं विवक्षितमित्यलमतिप्रपञ्चेन ।

एतेन सन्यासेऽपि विवादः पराकृतः । अत एव–

–"यतेस्तु सर्ववर्णेषु भिक्षाचर्याविधानत" इत्यनेन यतेः सार्ववर्णिकभिक्षाप्रतिषेधः कलिवर्ज्येषु संन्यासाश्रमे लिङ्गम् । व्यवस्थाद्वयं तु त्रिदण्डैकदण्डाभिप्रायेणेति ज्ञेयम् ।

अग्निहोत्राणि इति बहुवचनादन्यान्यपि श्रौतस्मार्तकर्माणि सीदन्ति नश्यन्ति ।

तथा च महाभारते

यज्ञे प्रतिनिधिः पार्थ दाने प्रतिनिधिस्तथा ।
व्रते प्रतिनिधिश्चैव तस्मिन्काले प्रवर्तते ॥
निवृत्तयज्ञस्वाध्यायाः स्थालीपाकविवर्जिताः ।
ब्राह्मणाः सर्वभक्ष्याश्च भवन्तीह गते युगे ॥

गुरूणां पितृश्वश्र्वादीना पूजा अलघनीयता प्रणश्यति ।

तथा च मात्स्ये ऽपि

पितॄन् पुत्रा नियोत्स्यन्ति वध्वः श्वश्रूश्च कर्मणा ।
वाक्शरैस्तर्जयिष्यन्ति गुरुं शिष्यास्तथैव च ॥

भारते ऽपि

न दास्यति पिता पुत्रं पुत्रश्च पितरं तथा ।
भार्या च पतिशुश्रूषां करिष्यति कदा च नेति ॥

कुमार्यः कन्याः कुमाराश्च प्रसूयन्ते प्रजनयन्ति ।

तथा च भारते ।

पञ्चमेवाथ षष्ठे वा वर्षे कन्या प्रसूयते ।
सप्तवर्षाष्टवर्षाश्च प्रजानिष्यन्ति वै नराः ।

THE UNIVERSITY LIBRARY
RECEIVED ON

सप्तवर्षाष्टवर्षाश्च स्त्रियो गर्भधरा नृप ।
दशद्वादशवर्षाणां पुंसां पुत्रा भवन्ति च ॥ इति ।

अस्मिन्वर्तमाने कलियुगे सदा कल्पान्तरवर्तिनि च कलियुगे ऽप्येषैव स्थितिः ।

तदुक्तं विष्णुपुराणे

यदा यदा सतां हानिर्वेदमार्गानुसारिणाम् ।
तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ॥

भारते ऽपि ।

यथर्त्तावृतुलिङ्गानि नानारूपाणि पर्यये ।
दृश्यन्ते तानि तान्येव तथा भावा युगादिषु ॥ इति ।

यद्विदमेवं व्याख्येयम् । सीदन्ति चाग्निहोत्राणीत्यत्र वर्तमानापदेशेन भाव्यव्यापारमात्रं प्रतीयते । तस्य च भावकव्यापारमृते अन्यथाऽनुपपत्त्या भावकव्यापारः कल्प्यते । अष्टाकपालो भवतीत्यादिवत् । तथा च त्रैवर्णिकाः कलावग्निहोत्राणि सादयेयुरित्यर्थः सिध्यति । उक्तं च अग्निहोत्रं गवालम्भमित्यादि पूर्वोदाहृतवचनं तस्य च व्यवस्था पूर्वोदाहृतैव । तथा गुरुपूजा प्रणश्यति इत्यत्रा ऽपि प्रयोज्यव्यापारेण प्रयोजकव्यापारकल्पनावश्यम्भावाद्गुरुपूजा प्रणाशयेदित्यर्थः सिध्यति । तदुक्तं कलिवर्ज्यप्रकरणे दक्षिणा विधिचोदितेति । विधिचोदिता च दक्षिणा "गुरवे तु वरं दत्त्वे"त्यादिना विहिता । तथा कुमार्यश्च प्रसूयन्ते इत्यत्रापि कुमारीः प्रसावयेदित्यर्थः सिध्यति । तथा च निरुक्ते स्त्रीणां दानविक्रयातिसर्गाः विद्यन्ते न पुंसः पुंसो ऽपीत्येके शौनःशेपे दर्शनात् । दृश्यते च स्त्रीमण्डले मल्लालदेशे ज्येष्ठकन्यापुत्रयोरपि विवाहः । अन्येषामतिसर्गः । सो ऽपि निषिद्धः कलिवर्ज्यप्रकरणे बृहन्नारदीये । द्विजानामसवर्णासु कन्यासूपगतं तथेति । असवर्णासूपगतस्तथा इत्यन्वयः । न च असवर्णास्विति कन्याविशेषणम् । सवर्णान्याङ्गनादुष्टैः संसर्गः शोधितैरपीति असवर्णासु कन्यासु उपगतं तथेति । असवर्णासूपगमनस्याधिक-

निषेधात् । तथा चात्रप्रशब्दोऽपि निषेधार्थः सिध्यति । तत्रप्रस्मर्तव्यमिति शबरस्वामिना प्रशब्दस्य निषेधार्थकत्वप्रगटनादित्यलम् ।

यदुक्तं तपः परं कृतयुग इत्यादि, तत्र हेतुमाह ।

**कृते त्वस्थि गताः प्राणास्त्रेतायां मांसमाश्रिताः ।**
**द्वापरे रुधिरं चैव कलौ त्वन्नादिषु स्थिताः ॥ ३२ ॥**

प्राणाः पञ्चापि वायवः प्राणापानसमानोदानव्यानाः हृदयादिस्थानस्थितास्ते कृते अस्थ्यन्तर्वर्तिनो यावदस्थ्यव्याकुला त्रेतायां यावन्मासं द्वापरे च यावद्रुधिरं कलौ तु यावदन्नोपभोगं आदिशब्दात्पानीयपानं च यावत् । तावत्स्थिता अव्याकुलाः चक्षुरादीन्द्रियाणि अपि प्राणाधीनव्यापारत्वात् प्राणशब्देनोपलक्ष्यन्ते न वै वाचो न चक्षूंषि श्रोत्राणि न मनांसीत्याचक्षते प्राणा इत्येवाचक्षत इति छान्दोग्यश्रुतेः । तान्यपि यावदस्थ्याद्यव्याकुलानीति तथाच कृते कृच्छ्रादितपसा मांसाद्युपक्षयेऽप्यस्थ्नामनुपक्षयादव्याकुलप्राणतया तपस्सिद्धिर्न त्रेतायां, तत्र बाह्येन्द्रियवृत्तिनिरोधेन रुधिराविद्रवधातुक्षये ऽपि न मांसोपक्षय इत्यव्याकुलप्राणतया ज्ञानसिद्धिर्न द्वापरे तत्र तु यागीयव्रतपानेनान्नत्यागे ऽपि न रुधिरक्षय इति यागसिद्धिर्न कलौ कलौ त्वन्नापरिहारेणापि दानसिद्धिरिति सर्वयुगेषु प्राणाधाराबाधेन धर्मानुष्ठानं प्रदर्शितम् । तत्र तपसो मांसोपशोषकत्वमुक्तं स्कान्दे

वेदोक्तेन प्रकारेण कृच्छ्रचान्द्रायणादिभिः ।
शरीरशोषणं यत्तत्तप इत्युच्यते बुधैरिति ॥

इन्द्रियनिरोधस्य रुधिरोपशोषकत्वमुक्तमुत्तरगीतासु ।

इन्द्रियाणां निरोधेन देहे नश्यन्ति धातवः ।
देहे नष्टे कुतो बुद्धिर्बुद्धिनष्टे कुतो ज्ञतेति ॥

यागे दीक्षितस्यान्नत्याग उक्तः कल्पकारैः पीवा दीक्षते कृशो यजेतेति यदा ऽस्य चक्षुषो कृष्णं नश्यत्यथ सुमेध्यो भवतीति च । कलौ तु दानेषु नात्यन्तिको ऽन्नत्यागो ऽङ्गमिति न दानेषु प्राणपीडा ततश्च उत्तरोत्तर-

युगेषु पूर्वपूर्वयुगधर्मानुष्ठानमशक्यमेव पूर्वपूर्वयुगेषु तूत्तरोत्तरयुगधर्मा अपि स्वनुष्ठेया इति सर्वं सुस्थम् ।

तदाह बृहत्पराशरः ।

कृते त्वस्थिगताः प्राणास्त्रेतायां मांसमेव च ।
द्वापरे रुधिरं यावत्कलावन्नाद्यमेव त्विति ॥

नन्वेवं धर्मे सत्यग्निहोत्रादिरहितेषु द्विजेषु कलिधर्मा दानादयोऽपि कथं साङ्गाः स्युः तेषामपि दातृदेयपात्रादिशुद्ध्यधीनत्वादित्यत आह ।

**युगे युगे च ये धर्मास्तत्र तत्र च ये द्विजाः ।**
**तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः ॥ ३३ ॥**

युगे युगे प्रतियुगं ये धर्मा गवालम्भनविधवानियोजनादयः कृतयुगादौ, स्वयं कर्षणवेदैकदेशाध्ययनादयश्च कलौ तत्र तत्र युगे तदनुष्ठातारो ये द्विजाश्च ब्राह्मणक्षत्रियवैश्याश्चकाराच्छूद्रादयोऽपि तेषां धर्मिणां द्विजानां च निन्दा अधर्माभासत्वोद्भावनेन दोषकीर्तनं न कर्तव्यं तत्तद्युगविहितत्वेन वास्तवाधर्मत्वाभावात्तदेवाह हि यतस्ते धर्माः द्विजाश्च युगरूपास्तत्तद्युगानुरूपाः वीप्सायां पुनर्वचनं प्रतियुगं धर्मवैलक्षण्यवद् द्विजातीनामपि धर्मवैलक्षण्यप्रतिपादनाय तच्च सर्ववर्णकन्यापरिणयेन युगान्तरे स्पष्टमेव मूर्धावसिक्तादीनामपि द्विजत्वात् ।

तदुक्तमारण्यके ।

भूमिर्नद्यो नगाः शैलाः सिद्धा देवर्षयस्तथा ।
कालेन सह वर्तन्ते तथा भावा युगे युगे ॥
कालं कालं समासाद्य नराणां नरपुङ्गव ।
बलवर्ष्मप्रभावा हि प्रणश्यन्त्युद्भवन्ति चेति ॥

वर्ष्म शरीरं प्रभावो धर्मातिशयः । इदमत्रोक्तम् । यथा कृतादौ गवालम्भादिधर्माणां लोकविरोधेऽपि व्यासादिद्विजानां चानेकनिषिद्धानुष्ठातृत्वेऽपि न निन्दा प्रभावाधिक्येन तत्कालानुरूपत्वात् । तदुक्तमापस्तम्बेन ।

तेषां तेजोविशेषेण प्रत्यवायो न विद्यते ।
तदन्वीक्ष्य प्रयुञ्जानः सीदत्यवरको जन इति ॥

तथा कलिधर्माणामपि स्वयङ्कर्षणवेदैकदेशाध्ययनादीनां तदनुष्ठातॄणां द्विजानां च निन्दा न कार्या अल्पप्रभावत्वे न कलिकालानुरूपत्वादिति ।

तदाह बृहत्पराशरः ।

युगे युगे तु ये धर्मास्तेषु धर्मेषु ये द्विजाः ।
ते द्विजानावमन्तव्या युगरूपा द्विजोत्तमाः ॥ इति ।

यतो युगरूपा इति हेतुरत एव युगाननुरूपा धर्मा द्विजाश्च प्रतिषिद्धाः ।

ब्रह्मपुराणे

दीर्घकालं ब्रह्मचर्यं धारणं च कमण्डलोः ।
गोत्रान्मातृसपिण्डाच्च विवाहो गोवधस्तथा ॥
नराश्वमेधौ मद्यं च कलौ वर्ज्यं द्विजातिभिः ।

तथा

देवराच्च सुतोत्पत्तिर्दत्ता कन्या न दीयते ।
न यज्ञे गोवधः कार्यः कलौ न च कमण्डलुरिति ॥

बृहन्नारदीये ऽपि ।

समुद्रयातुः स्वीकारः कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यासूपगतं तथा ॥
देवराच्च सुतोत्पत्तिः मधुपर्के पशोर्वधः ।
मांसदानं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ॥
दत्तायाश्चैवाक्षतायाः कन्यायाः पुनर्दानं परस्य च ।
दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ ॥
महाप्रस्थानगमनं गोमेधश्च तथा मखः ।
इमान्धर्मान्कलियुगे वर्ज्यानाहुर्मनीषिण इति ॥

शौनकीये धर्मज्ञसमये ऽपि ।

विहितान्यपि कर्माणि धर्मलोपभयाद्बुधैः ।
समापने निवृत्तानि साध्वभावात्कलौ युगे ॥

विधवायां प्रजोत्पत्तौ देवरस्य नियोजनम् ।
बालिकाक्षतयोन्याश्च वरेणान्येन संस्कृतिः ॥
कन्यानामसवर्णानां विवाहश्च द्विजातिभिः ।
आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम् ॥
द्विजस्याब्धौ तु नौयातुः शोधितस्याऽपि संग्रहः ।
सत्रदीक्षा च सर्वेषां कमण्डलुविधारणम् ॥
महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे ।
सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः ॥
अग्निहोत्रहवण्याश्च लेहो लीढापरिग्रहः ।
वानप्रस्थाश्रमस्याऽपि प्रवेशो विधिबोधितः ॥
वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथा ।
प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम् ॥
संसर्गदोषः स्तेयान्यमहापातकनिष्कृतिः ।
वरातिथिपितृभ्यश्च पशूपाकरणक्रिया ।
दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः ॥
सवर्णान्याङ्गनादुष्टेः संसर्गः शोधितैरपि ।
अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियाः ॥
परोद्देशात्मसन्त्यागः उच्छिष्टस्याऽपि वर्जनम् ।
प्रतिमाभ्यर्चनार्थाय सङ्कल्पश्च सधर्मकः ॥
अस्थिसञ्चयनादूर्ध्वमङ्गस्पर्शनमेव च ।
शामित्रं चैव विप्राणां सोमविक्रयणं तथा ॥
षड्भक्तानशनेनान्नहरणं हीनकर्मणः ।
शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणाम् ॥
भोज्यान्नता गृहस्थस्य तीर्थसेवाऽतिदूरतः ।
शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिशालिता ॥
आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनतया तथा ।
प्रजार्थं तु द्विजाग्र्याणां प्रजारणिपरिग्रहः ॥
ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया ।
बलात्कारादिदुष्टस्त्रीसंग्रहो विधिचोदितः ॥
यतेस्तु सर्ववर्णेषु भिक्षाचर्या विधानतः ।

नवोदके दशाहं च दक्षिणा विधिचोदिता ॥
ब्राह्मणादिषु शूद्रस्य पचनादिक्रिया ऽपि च ।
भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा ॥
गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया ।
पितापुत्रविरोधेषु साक्षिणे दण्डकल्पनम् ॥
यत्र सायं गृहत्वं च मुनिभिस्तत्त्वतत्परैः ।
एतानि लोकगुप्त्यर्थे कलेरादौ महात्मभिः ॥
निवर्त्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः ।
समयश्चा ऽपि साधूनां प्रमाणं वेदवद्भवेदिति ॥

अन्यत्रा ऽपि पुराणे ।

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा ।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुमिति ॥

निगमे ऽपि ।

अक्षता गोपशुश्चैव श्राद्धे मांसं तथा मधु ।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेदिति ॥

स्मृत्यन्तरे ऽपि ।

देवराच्च सुतोत्पत्तिः गोमेधं च कमण्डलुम् ।
अक्षतां पौरुषं मेधं कलौ पञ्च विवर्जयेत् ॥

ब्रह्मपुराणे ऽपि ।

स्त्रीणां पुनर्विवाहश्च देवरात्पुत्रसन्ततिः ।
स्वातन्त्र्यं वा कलियुगे न कर्तव्यं कदाचन ॥

क्रतुरपि ।

देवरेण सुतोत्पत्तिर्दत्ता कन्या न दीयते ।
न यज्ञे गोवधः कार्यः कलौ न च कमण्डलुः ॥

बौधायनो ऽपि ।

विधिर्यो निश्चितः पूर्वं क्रियते नेह साम्प्रतम् ।
पुरा कल्पे स एतच्च विधवाया नियोजनम् ॥

हेमाद्रौ ।

यथा नियोगजो धर्मो नानुबन्ध्या वधो ऽपि च ।
तथोद्धारविभागो ऽपि नैव सम्प्रति वर्तते ॥

अन्यत्रा ऽपि ।

अग्निहोत्रं गवालम्भं सन्यासं पलपैतृकम् ।
देवरेण सुतोत्पत्तिः कलौ पञ्च विवर्जयेत् ॥

ब्रह्मपुराणे ऽपि ।

शपथाः शकुनाः स्वप्नाः सामुद्रिकमुपश्रुतिः ।
उपयाचितमादेशाः सम्भवन्ति कलौ क्व चित् ॥
तस्मात्तन्मात्रलाभेन कलौ कार्यं न कारयेत् ।

अथैतानि व्याक्रियन्ते । दीर्घकालमष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यमित्यादिश्रुत्युक्तं तेन नैष्ठिकब्रह्मचर्यमर्थत एव निषिद्धम् । कमण्डलुधारणमथ कमण्डलुचर्यामुपदिशन्तीत्यादिबौधायनोक्तेतिकर्त्तव्यताक सोदकं च कमण्डलुमित्यनेन स्नातकस्य विहितं मृन्मयकरकधारणं न तु नैष्ठिकब्रह्मचर्यं पूर्वोक्तत्वेन पौनरुक्त्यात् । ना ऽपि वानप्रस्थाश्रमः, बृहन्नारदीये पृथग् उपादानात् । गोत्राच्च गोत्रोत्पन्नायाः पितृष्वसुः, मातृसपिण्डान्मातुलाद्, गोत्रसापिण्ड्ययोः सामान्यनिषेधेनैव प्राप्त्यभावादेतन्निषेधानुपपत्तेरयमर्थः कर्तव्यो यः श्रुतिस्मृतिसदाचारैर्मातुलकन्यापरिणयो निर्णीतः सो ऽत्र निषिध्यत इति । तेन यानि कानि चित् मातुलकन्यापरिणयनिषेधकानि मन्वादिवाक्यानि तानि कलिविषयाण्येव ।

अत एव व्यासेन कलिनिन्दाप्रक्रमे ।

तृतीया मातृतः कन्यां तृतीयां पितृतस्तथा ।
शुल्केन चोद्वहिष्यन्ति विप्राः पापविमोहिताः ॥ इत्युक्तम् ।

मातृतो मातृपक्षे कूटस्थां तृतीयां मातुलसुतां पितृतः पितृपक्षे तृतीयां पैतृष्वसेयीमित्यर्थः । एतेन विधायकवाक्यानां युगान्तरविषयत्वं कृष्णार्जुनादीनां मातुलकन्यापरिणयेन स्पष्टीकृतमिति न क्वापि विरोधः । अत एवाधुनिकाना तदाचारो ऽप्यनाचारः इति बौधायनेन पञ्चधा विप्रतिपत्तिर्दक्षिणत इत्युपक्रम्य यथैतदनुपेतेन सह भोजनं स्त्रिया सह

भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृपरिणयनं चेति । तथोत्तरत:, ऊर्णाविक्रयः सीधुपानं उभयतोदद्भिर्व्यवहारः आयुधीयकं समुद्रयानमित्यनेन प्रतिपादितम् । यदपि तत्र तत्र देशप्रामाण्यमेव स्यादित्यनेन तत्तद्देशे ऽनुष्ठेयत्वमुक्तम्, तदपि पूर्वपक्षतया, सिद्धान्ते तु मिथ्या एतदिति गौतम, उभयमेव नाद्रियेत शिष्टस्मृतिविरोधादिति प्रतिपादितत्वाद्, इत्यलम् ।

गोवधो मधुपर्क्कादौ न तु गोमेधे तस्य बृहन्नारदीये पृथगुपादानात् । यद्यपि मुख्यनिषेधे अनुकल्पो न प्राप्नोति तथाऽपि वचनाद्भवति।

तदाह मार्कण्डेयः ।

माधुपर्क्किकपश्वर्थे ततो मात्रां प्रकल्पयेत् ।
सहिरण्यं बीजमात्र द्रविणेन सदैव तु ॥
पशुः कलौ न कर्तव्य इत्याह भगवान्भृगुरिति ।

नरमेधो ब्रह्मणे ब्राह्मणमालभत इत्यादिनोक्तः । अश्वमेधस्तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽ श्वमेधेन यजत इत्यनेनोक्तः । मद्यं सुरा । द्वादशं तु सुरामद्यमिति पुलस्त्यस्मरणात् । सा च सौत्रामण्यादौ कलौ निषिध्यते । सौत्रामण्यां सुराग्रह इति कलिवर्ज्ये वचनात् । सौत्रामणीप्राप्तिश्च नराश्वमेधसाहचर्यात् । तत्रापि सुराशब्देन पैष्ट्येव । तत्प्रकरणे तस्या एवोत्पत्तिप्रकारदर्शनात् ।

अथ वा मद्यशब्देन पानसाद्येकादशविधं मद्यमेव ।

यथाऽऽह पुलस्त्यः ।

पानसं द्राक्षमाहूकं खार्जूरं तालमैक्षवम् ।
मधूत्थं सैरमारिष्टं मैरेयं नारिकेलजम् ॥
समानानि विजानीयान्मद्यान्येकादशैव त्विति ।

तानि च द्विजातिभिस्त्रिभिर्मूर्द्धावसिक्तादिभिः षड्भिश्चानुलोमजैः कलौ वर्ज्यानि । तत्र ब्राह्मणस्य नित्यं मद्यं ब्राह्मणो वर्जयेदिति चतुर्ष्वपि युगेषु प्रतिषेधे ऽपि यत्र अनन्यौषधसाध्यव्याध्युपशमार्थं मद्यमभ्यनुज्ञातं तस्या ऽयं कलौ निषेधः ।

तथा च धन्वन्तरिः ।

मद्यप्रयोगं कुर्वन्ति शूद्रादिषु महार्त्तिषु ।
द्विजैस्त्रिभिस्तु न ग्राह्यं यद्यप्युज्जीवयेन्मृतमिति ॥

यद्यपि क्षत्रियवैश्ययोः ।

कामादपि हि राजन्यो वैश्यो वाऽपि कथं च न ।
मद्यमेवासुरं पीत्वा न दोषं प्रतिपद्यते ॥

इति बृहद्याज्ञवल्क्येन तालादिमद्यमभ्यनुज्ञातं तथाऽपि द्विजैस्त्रिभिस्तु न ग्राह्यमिति वचनात्कलौ निषिध्यत इत्यलम् ।

तथा देवरात्पतिसोदरात्सपिण्डात्सगोत्राद्वा वाग्दानानन्तरं पतिमरणे भ्रातृपत्न्यां पुत्रोत्पत्तिः ।

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः ।
तामनेन विधानेन निजो विन्देत देवरः ॥
अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ।
सपिण्डो वा सगोत्रो वा घृताभ्यक्तस्तावियात् ॥

इत्यादिमनुयाज्ञवल्क्याद्युक्तविधिना । न तु विवाहानन्तरं विधवायाम् । तस्य "नान्यस्मिन् विधवा नारी नियोक्तव्या द्विजातिभि"रित्यादिना मनुनैव पूर्वं निषेधात् । तेन धर्मज्ञसमये बौधायनवाक्ये च विधवाशब्दो व्याख्यात इति प्राञ्चः । वस्तुतस्तु

उक्तो नियोगो मनुना निषिद्धः स्वयमेव तु ।
युगह्रासादशक्योऽयं कर्तुं सर्वैर्विधानतः ॥
तपोज्ञानसमायुक्ताः कृतत्रेतायुगे नराः ।
द्वापरे च कलौ नृणां शक्तिहानिर्हि निर्मिता ॥

इति बृहस्पतिना विवाहोत्तरविधवानियोगनिषेधस्य मनूक्तस्य कलिविषयत्वेनोपसंहाराद्वाग्दत्ताविषयको नियोगः कलावप्यभ्यनुज्ञायत इति अपरार्ककुल्लूकभट्टादिस्वरसत एव तत्प्रसङ्गः । नष्टे मृते प्रव्रजित इत्यनेनाऽग्रे पराशरेणैव देवरातिरिक्तस्य विधानादित्यलम् । दत्ता संस्कृता न वाग्दत्ता तदानीं क्षतत्वाप्रसङ्गेन कन्यास्वविशेषणानर्थक्यापात् । कन्या

अक्षतयोनिर्दत्ताक्षताया इति वचनात् कन्येति विशेषणेन दानयोग्यतायामपीत्युक्तं दानमन्यस्मै प्रतिपादनं पुनर्दानं परस्य चेति वचनात् । यज्ञे ज्योतिष्टोमादौ मैत्रावरुणीमनुबंध्यामालभेतेत्यादिना विहितो गोवधः । प्रत्येकमेवाऽत्र निषेधः स्पष्टः । समुद्रे नौकादिना द्वीपान्तरं यो याति तस्याऽन्यैः, "समुद्रयानं ब्राह्मणस्य न्यासापहरणमि"त्यादिबौधायनोक्तप्रायश्चित्तकरणे ऽपि स्वीकारो व्यवहारः द्विजस्याब्धौ तु नौयातुः शोधितस्याऽपि संग्रह इति वाक्यात् । द्विजानां ब्रह्मक्षत्रविशामसवर्णकन्यासु क्षतुगमनयाचने ऽपि गमनं तद्विवाहस्य धर्मज्ञसमये पृथक् निषेधात् । श्राद्धे पार्वणादौ मांसपरिवेषणम् ।

शौचं च पात्रशुद्धिश्च श्रद्धा च परमा यदि ।
अनन्ततृप्तिकृच्छ्राद्धे एतत् खलु न चामिषम् ॥
यस्तु प्राणिवधं कृत्वा मांसेनातर्पयेत् पितॄन् ।
सो विद्वाश्चन्दनं दग्ध्वा कुर्यादङ्गारविक्रयम् ॥
क्षिप्त्वा कूपे यथा किञ्चिद्बाल आदातुमिच्छति ।
पतत्यज्ञानतः सो ऽपि मांसेन श्राद्धकृत्तथा ॥
सर्वथाचं यदा न स्यादामिषं तु तदाश्रयेत् ।
ब्राह्मणश्च स्वयं नाऽद्यात्तच्च श्वादिहतं यदि ॥

इति बृहत्पराशरस्मरणात् ।

मांसादनमिति पात्रे कथञ्चिद्दत्तस्याऽपि भक्षणम् । वानप्रस्थस्तृतीयाश्रमः, महाप्रस्थानगमनमुत्तरदिग्लङ्घनं, गोमेधो यागविशेषः । विहितानीति जनमेजययज्ञसमापने सति बुधैस्तत्तद्वाक्यविहितान्यपि कर्माणि कलौ धर्मलोपभयान्निवर्त्तितानि तदनुष्ठानयोग्यसाधुपुरुषालाभात् । यथा आततायिनामुद्यतशस्त्रादीनां द्विजाग्र्याणां विप्राणां "ब्राह्मणं वा बहुश्रुतं । आततायिनमायान्तं हन्यादेवे"त्यादिना विहितं सम्मुखमकूटशस्त्रेण मारणम् । एतेन नाततायिवधे दोषो ऽन्यत्र गोब्राह्मणेभ्य इति सुमन्तुवाक्य सामान्यमपि कलिविषयं सिद्धम् । सत्रे गवामयनादौ सप्तदशावराश्चतुर्विंशतिपरमास्सत्रमासीरन्नित्यादिना विहिते दीक्षा यजमानानाम् ।

सौत्रामण्या यागविशेषे यजेत वा सौत्रामण्या इत्यादिना विहिते अथ सुराग्रहान्गृह्णातीति विहितसुराग्रहणकर्तुः सग्रहो व्यवहारः। तेन च सुराग्रहनिषेधो ऽपि सिध्यति। सौत्रामणीति वाजपेयाद्युपलक्षणम्।

यज्ञादौ च गवालम्भं वाजपेयसुराग्रहम्।
अग्निहोत्रहवण्याश्च लिहं च कलौ त्यजेत्॥

इति बौधायनीयभाष्ये वसिष्ठस्मरणात्। अग्निहोत्रं हूयते यया स्रुचा सा वैकङ्कत्यग्निहोत्रहवणी तस्याश्च नित्य होमानन्तरं हुतावशिष्टप्राशनार्थे लेहो जिह्वयास्वादनम्। कथं चिल्लीढायास्तस्याः पुनः परिग्रहो दिनान्तरे होमसाधनता। वृत्तमग्निहोत्रादि स्वाध्यायो वेदस्तावपेक्ष्याघस्याशौचस्य वेदाग्नियुक्तविप्रस्य त्र्यहमाशौचमिष्यत इत्यादिबलादिविहितसङ्कोचः। स चाशौचिसम्पर्के। सम्पर्काभावे तत्सङ्कोचस्य वक्ष्यमाणत्वात्। कामकृते महापातकादौ मरणान्तिकं यत्प्रायश्चित्तं "न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृत" इत्यादिनोक्तं तस्य विधानमुपदेशः। "मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिरिति" मनुस्मरणात् तर्हि कथं तदनुष्ठेयमिति चेत्स्वयमेव धर्मशास्त्राज्ज्ञात्वाऽन्यापदेशेन पृष्ट्वा वेति ब्रूमः।

संसर्गदोषः पतितसंसर्गेण पातित्यं "संवत्सरेण पतति पतितेन सहाचरन्नि"त्यादिना प्रतिपादितम्। कलौ पतति कर्मणेति वाक्यात्। उपपादितं चैतत्प्राक्। एवं च संसर्गः शोधितैरपीत्यादिस्संसर्गनिषेधो नानुपपन्नः। अन्यथा पतितसंसर्गे दोषाभावः शोधितसंसर्गनिषेधश्चेति महद्वैषम्यं स्यात्। स्तेयान्यस्मिन्सुवर्णस्तेयव्यतिरिक्ते महापातके निष्कृतौ रहस्यप्रायश्चित्तं न प्रायश्चित्तमात्रं विरोधात्। नापि प्राणान्तिकं तस्योपदेशनिषेधेन स्वयं कर्तव्यताभ्यनुज्ञानात्। नापि व्यवहारः। ब्राह्मणभोजनादिविधिविरोधात्। नापि परलोकशुद्धिः। तस्या साक्षात्पुरुषकृत्यसाध्यत्वेनावर्जनीयत्वात्। नाप्युपायनिषेधेन तन्निषेधः। पूर्वोक्तविधिविरोधात्। तस्माद्रहस्यप्रायश्चित्तमिति व्याख्येयम्। तद्विधिर्मूले।

अत एव बृहन्नारदीयविष्णुपुराणादिषु ।
छादयन्ति प्रयत्नेन स्वदोषम्पापकर्मिणः ।
रहस्यामेव कुर्वन्ति प्रायश्चित्तक्रिया कलौ ॥
मनःशुद्धिविहीनाना निष्कृतिर्न ततो भवेद् ।

इत्यादिना तत्र तत्र कलिनिन्दाप्रक्रमे रहस्यमेव निन्दितं वक्ष्यति चैतन्नवमे "तस्मात्प्रकाशयेत्पापमि"त्यादिना । स्कान्देपि काशीखण्डे नवैतानि प्राकाश्यानि रहःपापमकुपितमित्यादिना । न चैवं सुवर्णस्तेयवर्जनमसङ्गतम् । तस्य कलावपरिहार्यत्वेन सुवर्णस्तेयस्य प्रतिनिमित्तं पर्षदुपदेशासम्भवेन रहस्यप्रायश्चित्ताभ्यनुज्ञानार्थत्वात् । वरातिथिभ्यां मधुपर्के, पितृभ्यः श्राद्ध इति व्याख्यातम् ।

दत्तो मातापितृभ्यामन्यतरेण वा पुत्र प्रतिग्रहीष्यन्बन्धूनाहूय राजनि निवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबान्धवं बन्धुसन्निकृष्ट एव प्रतिगृह्णीयादित्यादिवसिष्ठोक्तविधिना पुत्रीकृतः । औरसो धर्मपत्न्यां स्वस्मात्प्रसूतस्ताभ्यामितरेषा क्षेत्रजादीनां दशानां पुत्रत्वेन स्वीकारः ।

तथा च बृहस्पतिः ।

अनेकधा कृताः पुत्राः ऋषिभिर्ये पुरातनैः ।
न शक्यास्ते ऽधुना कर्तुं तपोहीनैरतन्द्रितैः ॥

अधुना कलियुग अतन्द्रितैरिति मुनिविशेषणम् । तथा

क्षेत्रजो गर्हितः सद्भिस्तथा पौनर्भवः सुतः ।
कानीनश्च सहोढश्च गूढोत्पन्नस्तथैव च ॥
दत्ता ऽपविद्धः क्रीतश्च अपविद्धस्तथैव च ।

दत्तनिषेधोऽत्रासवर्णविषयः। "सजातीयेष्वयं प्रोक्त"इति योगिना असवर्णनिषेधादिति तन्न। अपविद्धस्य द्विर्निषेधानुपपत्तिस्तस्मादेव व्याख्येयम् । दत्तः पितृभ्यां परिग्रहीत्रा परिगृह्य त्यक्तः । सोऽन्यन न पुत्रीकार्यः । पुनर्भून्यायात् । सवर्णान्या असवर्णा या अङ्गनाः ताभिर्दुष्टैस्तत्संपृक्तैः कृतप्रायश्चित्तैरपि संसर्गः । गुरुस्त्रियाः शिष्यस्त्रियाः जुह्वितोपगतायाश्च स्त्रिया अयोनौ सङ्ग्रहे सति परित्यागः ।

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।
पतिघ्नी च विशेषेण जुङ्गितोपगता च या ॥

इत्याद्युक्तः । अत्रायेनाविति विशेषोपादानादन्ययोन्ययोन्योः साधारण्येन संसर्गे परित्याग इति गम्यते ।

परेषां गोब्राह्मणादीनामुद्देशेन निमित्तेन तदापद्विमोक्षार्थं प्राणत्यागः "गवार्थे ब्राह्मणार्थे वा सद्यः प्राणान्परित्यजे"दित्याद्युक्तः । उच्छिष्टस्पर्शादिवर्जनं स्वमुच्छिष्टमुच्छिष्टोपहतं वेत्यादिवसिष्ठाद्युक्तं तन्निमित्तं प्रायश्चित्तं च । विष्ण्वादिप्रतिमाविशेषस्य यावज्जीविकः पूजनसङ्कल्पः । इयमेव प्रतिमा यावज्जीवं मया पूजनीयेत्येवमादिः ।

चतुर्थेऽहनि कर्तव्यमस्थिसञ्चयनं बुधैः ।
ततः सञ्चयनादूर्ध्वमङ्गस्पर्शो विधीयते ॥

इत्यादिवाक्यविहितोऽस्थिसञ्चयनानन्तरमङ्गस्पर्शः । शामित्रं यज्ञे स्वयं पशुप्रमापणं विप्राणाम् । सोमलतायाः विक्रयश्च । षण्णां भक्तानामनशनमुपवासत्रयं तस्मिन् बुभुक्षित स्त्र्यहं स्थित्वा धान्यमब्राह्मणाद्धरेदित्यादिना विहितमपहरणम् ।

शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः ।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् ॥

इत्यादिना विहितं शूद्राणां भोज्यान्नत्वम् । गृहस्थस्याहिताग्नेरतिदूरेण तीर्थयात्रा ।

धनान्यर्जयितुं युक्तः प्रवासो ह्यग्निहोत्रिणः ।
धनैर्यत्सम्भवेदिज्या तीर्थाद्यर्थं न तु त्यजेदिति मनूक्ता ।

ब्राह्मणानामापदि क्षत्रादिवृत्तिभिर्जीवनम् । क्षात्रेण कर्मणा जीवेद्विशां वाप्यापदि द्विज इत्याद्युक्तम् ।

तथैवाश्वस्तनिकतया जीवनम् । "त्र्याहिको ऽश्वस्तनो ऽपि वे"त्युक्तम् । विप्राणां सन्ततिजीवनाय जातारणिपरिग्रहः । ब्राह्मणानां सर्वदा प्रवासशीलत्वम् । "वृथा तु न चिरं वसेदिति" स्मरणात् ।

मुखेनाग्निधमनं "मुखेनोपधमेदग्निं मुखाद्ध्येषो ह्यजायते"त्युक्तम् । बला-द्दासीकरणादिना दुष्टायाः स्त्रियाः पुनः संग्रहः । संन्यासिनस्सार्ववर्णिकं भैक्षं "चातुर्वर्ण्यं चरेद्भैक्ष्यमि"त्याद्युक्तम् । अभिनवोदके दशाहवर्ज्जनं "दशरात्रेण शुध्यन्ति भूमिष्ठमभिनवोदकमि"त्यादिनोक्तम् । आकालिक-नवोदकदशाहनिषेधस्य प्रतिप्रसवेऽपि कालिकत्र्यहनिषेधस्य न प्रतिप्रस-वः । तथा च स्मृत्यन्तरे ।

काले नवोदकं शुद्धं न पिबेच्च त्र्यहं तु तत् ।
अकाले तु दशाहं स्यात्पीत्वा नाद्यादहर्निशमिति ॥

ब्रह्मचारिणः स्नानार्थं गुरवे दक्षिणादानं "गुरवे तु वरं दत्वा स्नायीत तदनुज्ञयेत्यादि"नोक्तम् । ब्राह्मणादिचतुर्वर्णगृहेषु शूद्राणां पाच-कत्वम् । "आर्याधिष्ठिता वा शूद्राः संस्कर्तारः स्युरि"त्याद्यापस्तम्बोक्तम् । भृग्वग्न्यनशनाम्बुभिर्वृद्धादीनां प्राणत्यागः ।

वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥ इत्याद्युक्तः ।

गोतृप्त्यधिके जले शिष्टानामाचमनकरणम् । "शुचि गोतृप्तिकृ-त्तोयं प्रकृतिस्थं महीगतमि"त्युक्तम् । पितापुत्रयोर्विरोधे साक्षिणां समा-धातॄणां च दण्डविधानम् ।

पितापुत्रविरोधे तु साक्षिणां त्रिपणो दमः ।
अन्तरे च तयोर्यः स्यात्तस्याप्यष्टगुणो दम इत्युक्तम् ॥

संन्यासिना यत्र सायङ्कालस्तत्रैवावस्थान "यत्र सायं गृहो मुनि-रि"त्युक्तम् । एते पूर्वोक्ता धर्मा स्मृत्युक्ता अपि कलेरादौ महात्मभिरैकम-त्येन क्व चिच्छास्त्रविरोधात्क्व चिच्च दृष्टविरोधाद्विवर्तिताः ।

ननु यत्र विशेषशास्त्रमस्ति तत्रास्तु तन्निवृत्तिर्दृष्टविरोधमात्रे तु शास्त्राविरोधे कथं महात्मवचनमात्रेण तन्निवृत्तिरस्त्वित्यत आह समयो-ऽपि शिष्टानां श्रुतिस्मृतिवत्प्रमाणं तदाहापस्तम्बः "धर्मज्ञसमयः प्रमाणं वेदाश्चेति" ।

ननु महात्मनां समयेऽपि कथं प्रामाण्यं न तावच्छ्रुतिवत्स्वतः, तस्य

लौकिकत्वात् । नापि स्मृतिवच्छ्रुतिमूलतया । प्रत्यक्षश्रुतिविरोधेन तदनुमानासम्भवात् । नापि स्मृतिमूलकतया । प्रत्यक्षस्मृतिविरोधात् । अत एव नानुमितस्मृतिमूलकतयापि । नाप्य"स्वर्ग्यं लोकविद्विष्ट धर्ममप्याचरेच्च त्वित्यादिप्रत्यक्षस्मृतिरेवात्र मूलमिति वाच्यम् । श्रुतिस्मृतिविरोधेनाप्रमाणस्याचारस्य तद्बाधकत्वायोगात् । एवं च सति श्रुतिस्मृतिविहितस्य धर्मस्य लोकविरोधे नाननुष्ठानं विरुद्धमनेनोच्यत इति नास्यापि तन्मूलत्वसम्भवः । किं च त्रैविद्याना वैदिककर्मविद्वेषासम्भवात्तद्बाह्यानां तु वैदिककर्ममात्रविद्वेषादेतावन्मात्रेण कर्मविशेषपरिगणनमपि न सम्भवति । वस्तुतस्तु अस्वर्ग्यं नाम दृष्टफलकं धर्ममपि मधुपर्कीयगवालम्भनादि लोकविद्विष्टं नाचरेदित्यर्थपरत्वात्तस्य सत्रदीक्षादावदृष्टफलककर्मनिषेधकत्व दुरध्यवसानमिति ।

अत्रोच्यते । यदेवानूचानः किं च नाभ्यूहत्यार्षे तद्भवतीति श्रुतेः ।

धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः ।
क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः ॥

इतिस्मृतेश्चास्य प्रामाण्ये मूलत्वम् । विशेषतस्तु ब्राह्मनारदीयाद्युक्तनिषेधा एवास्य प्रायशो मूलमन्यत्रापि तत्तत्स्मृतिषु निषेधवाक्यानामेव मूलत्वमवगन्तव्यमित्यल बहुना ।

ज्येष्ठांशं भ्रातृणां विभागे "ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वर"मित्याद्युक्तम् । मधु क्षौद्रम् ॥

मधुना रहिते श्राद्धे निराशाः पितरो गताः ।

इत्यादिना विहितम् । अग्निहोत्रादिकं च व्याख्यातमेव प्राक् । तथा शपथाः दिव्यानि प्रमाणानि । शकुनाः काककपोतादिचेष्टाविशेषाः । सामुद्रिकं करचरणादिवर्तिरेखोपरेखादिकम् । उपश्रुतिश्चैलधावादिगृहपार्श्वे स्थित्वा चिन्तितार्थसूचकशब्दाकर्णनम् । उपयाचितं ममास्मिन्नर्थे सिद्धे गणपतये मोदकान् दास्यामीत्यादिसङ्कल्पः । आदेश आशीर्वादः । ज्योतिःशास्त्रबलेन भविष्यादिकथनं वा । एतेषां कलौ क्वाचित्कः

संवादस्तेन तावन्मात्रावष्टम्भेन निःशङ्कप्रवृत्तिर्न कार्येति । युगमिति देशस्याप्युपलक्षणं तेन तद्देशाचारोऽपि न निन्द्यः । यथाह बौधायनः ।

पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतो यानि दक्षिणतस्तान्यनुव्याख्यास्यामो यथैतदनुपेतेन सह भोजनं स्त्रिया सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृगमनमित्यथोत्तरत उर्णाविक्रयः सीधुपानमुभयतोदद्भिर्व्यवहार आयुधीयकं समुद्रयानमिति तत्रेतरदितरस्मिन् कुर्वन् दुष्यतीतरदितरस्मिन् तत्र तत्र देशप्रामाण्यमेवस्यान्मिथ्यैतदिति गौतम उभयमेव नाद्रीयेत शिष्टस्मृतिविरोधदर्शनादिति । बृहस्पतिः ।

> उद्रूह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः ।
> मत्स्यादाश्च नराः पूर्वे व्यभिचाररताः स्त्रियः ॥
> उत्तरे मद्यपाश्चैव स्पृश्या नृणां रजस्वलाः ।
> सजाताश्चापि गृह्णन्ति भ्रातृभार्यामभर्तृकाम् ॥
> अनेन कर्मणा नैते प्रायश्चित्तदमार्हकाः ।
> विहिताकरणान्नित्य प्रतिषिद्धनिषेवणात् ॥
> भक्ताच्छाहम्प्रदायैषा रोषं गृहीतया । *
> सर्वदेशेष्वनाचारो ख्याताम्बूलचर्वणमिति ॥

ननु तत्तद्धर्माणां युगानुरूपत्वादनिन्द्यत्वमस्तु अधर्मेषु तु कथमित्यत आह ।

**युगे युगे तु सामर्थ्यं शेषं मुनिविभाषितम् ।**
**पराशरेण चाप्युक्तं प्रायश्चित्तं विधीयते ॥ ३४ ॥**

युगे युगे कृतादियुगेषु पराशरेण चकारान्मनुगौतमशङ्खलिखितैश्च यदुक्तं प्रायश्चित्त तथा विधीयते ।

यद्यपि कले तु मानवा धर्मा इत्यनेनैवेदं सिद्धं प्रायश्चित्तानामपि धर्मत्वात्, तथापि मन्वाद्यनुक्तानां स्मृत्यन्तरादुपादानविधानाय पुनरनूद्यते तदेवाह शेषं, मन्वादिभिः कृतादिषूक्तप्रायश्चित्तादवशिष्टमाकाङ्क्षितं च यत्प्रायश्चित्तं तदन्यमुनिभिर्याज्ञवल्क्यादिभिर्विभाषितमेव विधीयते कुत एवमुच्यत इत्यत आह सामर्थ्यं यत इदं सम्यगर्थप्रा-

* अमङ्गलमिदम ।

प्तम् । अयमर्थः येषु निमित्तेषु पराशरादिभिः प्रायश्चित्तं नोक्तं तत्र नैमित्तिकावश्यम्भावेन स्मृत्यन्तरोक्तं ग्राह्यं न्यायसिद्धत्वादस्यार्थस्य । इद-मेव अभिप्रेत्य सुव्रतोऽपि बृहत्पराशरीये "पराशरश्च यत्माह"त्यादिना सर्वं स्वसंहिताप्रतिपाद्यमनुक्रम्याऽन्ते ।

दिष्टं च तत्परं ध्येयं सर्वमेतत्पराशरः ।

प्रोक्तवान् व्यासमुख्याना शेषं मुनिविभापितम् ॥ इत्युपसञ्जहार ।

ननु पराशरेण त्वयाद्यापि तस्यावचनात्कथमस्माभिस्तज्ज्ञेयमि-त्यत आह ।

**अहमद्यैव तत्सर्वमनुस्मृत्य ब्रवीमि वः ।**
**चातुर्वर्ण्यसमाचारं शृण्वन्तु मुनिपुङ्गवाः ॥ ३९ ॥**

अहं पराशरोऽद्यैव तत्सर्वं प्रायश्चित्त पूर्वकल्पीयपराशरोक्तधर्म-शास्त्रं तन्मूलभूतं श्रुतिनिश्चयं चानुस्मृत्य भो ऋषिपुङ्गवा मुनिमुख्याश्चा-तुर्वर्ण्यसमाचारं चत्वारो वर्णाश्चातुर्वर्ण्यं तेन सम्यक् श्रुतिस्मृत्यविधेना-चर्यतेऽनुष्ठीयते इत्याचारः स्नानसंध्यादिस्तं च वो युष्मभ्यं ब्रवीमि यूयं च सावधानाः शृण्वन्तु अहरहर्नयमानोऽपि गामश्वं पुरुषं पशुमिति चकाराभावेऽपि समुच्चयसिद्धेः । एवं च प्रश्नोत्तरयोः समानविषयत्वं भवत्यन्यथोत्तरस्य न्यूनतापातात् । प्रायश्चित्तस्य पूर्वमुपादानं प्रकृतत्वात् । अहमित्यनेनार्थस्मर्तृप्रवक्त्रोरैक्याभिधानाद्व्याख्यानाम्नभिप्रायान्तरशङ्का नि-रस्ता । अद्यैवेत्यनेन कालविलम्बसम्भावनयोर्द्वयो निरस्तः । अनुस्मृत्येत्य-नेनामूलत्वविपर्यस्तमूलत्वशङ्का चापाकृतेति । एवमुपोद्घातं समाप्य विवर्तितधर्मश्रवणाय पुनः सावधानता सम्बोधनेनापाद्यते ।

वक्ष्यमाणधर्मजातस्य सत्प्रमाणतामभिधातुं तदेवादौ प्रशंसति ।

**पराशरमतं पुण्यं पवित्रं पापनाशनम् ।**
**चिन्तितं ब्राह्मणार्थाय धर्मसंस्थापनाय च ॥ ३६ ॥**

पराशरमतं पराशरोक्तं धर्मशास्त्रं पाठतोऽर्थतश्च चिन्तितं सत्पुण्यं पुण्यजनकं पुनः पाठस्यैव प्रयोजनद्वयमिष्टप्रापणमनिष्टनिवर्तनं च विशे-

षणद्वयेनाह । पवित्रं पापनाशनमिति, पवित्रं स्वर्गादिजनकं पापनाशनं नरकादिनिवर्तकम् । अर्थज्ञानस्यापि विशेषणद्वयेन प्रयोजनद्वयमाह ब्राह्मणार्थाय धर्मसंस्थापनाय चेति, ब्राह्मणस्यार्थः प्रयोजनं स्वधर्मानुष्ठानमिति यावत्तस्मै धर्मसंस्थापनं परेषामुपदेशेनानुष्ठापनं तस्मै च ।

तदुक्तं बृहत्पराशरेण ।

पराशरमतं पुण्यं पवित्रं पापनाशनम् ।
चिन्तितं ब्राह्मणार्थाय धर्मसंस्थापनाय च ॥

इति । इत्याचारावतारः ।

इदानीं वक्ष्यमाणाचारस्य प्रयोजनवत्त्वायान्वयव्यतिरेकाभ्यां धर्मसाधनतामाह ।

**चतुर्णामपि वर्णानां साचारो धर्मपालकः ।**
**आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः ॥ ३७ ॥**

चतुर्णामपि वर्णानां ब्राह्मणक्षत्रियवैश्यशूद्राणामाचारः श्रुतिस्मृत्युदितसाधुसेवितक्रियानुष्ठानम् ।

श्रुतिस्मृत्युदितो यश्च साधुभिर्यश्च सेवितः ।
तमाचारं निरीक्षेत धर्मकामजितेन्द्रियः ॥

इति विष्णुस्मरणात् । धर्मस्य सुकृतपूर्वस्य पालकमनुत्पन्नस्योत्पादकमुत्पन्नस्य च संरक्षकम् । "आचारप्रभावो धर्म आचारो धर्मपालनमि"तिस्मरणात् । आचारात्पूर्वोक्ताद् भ्रष्टो ऽनुष्ठानाशक्तो देहो येषां तेषां धर्मः सुकृतं पराङ्मुख उत्पत्तिकारणसद्भावे ऽप्यङ्गवैकल्येन नोत्पद्यत इत्यर्थः ।

तदाह वसिष्ठः ।

नैनं तपांसि न ब्रह्म नाग्निहोत्रं न दक्षिणाः ।
हीनाचारमितो भ्रष्टं तारयन्ति कथं च न ॥ इति ।

बृहत्पराशरो ऽप्येतदेवाह ।

चतुर्णामपि वर्णानामाचारो धर्मपालनम् ।
आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः ॥ इति ।

यत् प्रतिज्ञातं चातुर्वर्ण्यसमाचारं ब्रवीमीति तदेवाह ।

षट्कर्माभिरतो नित्यं देवतातिथिपूजकः ।
हुतशेषं तु भुञ्जानो ब्राह्मणो नावसीदति ॥ ३८ ॥

षट् च तानि कर्माणि षट्कर्माणि तानि च संध्यास्नानादीनि तेषामेव वक्ष्यमाणत्वात् । बृहत्पराशरेणापि । षट्कर्माभिरत इत्यत्र कर्माणि कानीत्यपेक्षाया "कर्मषट्कं प्रवक्ष्यामी"ति प्रतिज्ञाय ।

संध्या स्नानं जपश्चैव देवतानां च पूजनम् ।
वैश्वदेवं तथातिथ्यं षट्कर्माणि दिने दिने ॥

इत्याभिधानाच्च न त्वध्यापनादीनि ।

अध्यापनं अध्ययनं यजनं याजनं तथा ।
दान प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥

इति मनूक्तानि । तेषामेव विधानात् । चातुर्वर्ण्यसाधारण्याभावेन प्रतिज्ञाविरोधाच्च । प्रकृतानां तु भूम्ना साधारण्यात् । तेषु नित्यमभिरतस्तदनुष्ठाने निरतो देवता विष्ण्वादिरतिथिर्वक्ष्यमाणस्तयोर्नित्यं पूजको हुतशेषं वैश्वदेवावशिष्टं च भुञ्जानो ब्राह्मणश्चातुर्वर्णिकश्चातुर्वर्ण्योपक्रमेण "वेदो वा प्रायदर्शनादिति"न्यायेन ब्राह्मणपदस्य चातुर्वर्ण्यपरत्वात् । नावसीदति न प्रत्यवायी स्यात् । नित्यानेकाह्निकाननुष्ठानकृतः प्रत्यवायस्त्वेतावन्मात्रानुष्ठानेऽपि न स्यादित्यर्थः । देवपूजादीनां षट्कर्मान्तर्गतत्वेऽपि पुनर्वचनं सायं सन्ध्योत्तरकालमप्येषां पुनरनुष्ठानप्रतिपादनाय । तथा च शौनकः ।

प्रातर्मध्ये दिने सायं विष्णुपूजां समाचरेदिति ।

अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः । इति योगीश्वरोऽपि । आश्वलायनोऽपि, अथ सायं प्रातः सिद्धस्य हविष्यस्य जुहुयादिति । मनुरपि ।

सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितमिति ।

एतेन अहोरात्रकर्तव्यमनेनोक्तमाह्निकमात्रन्त्वेतनेनेति न पौनरुक्त्याशङ्केति साधीयसीयं व्याख्या

षट्कर्माण्याह ।

**सन्ध्या स्नानं जपो होमो देवतानां च पूजनम् ।**
**आतिथ्यं वैश्वदेवं च षट्कर्माणि दिने दिने ॥ ३६ ॥**

यद्यप्यत्र सन्ध्यास्नानमितिशाब्दः क्रमः प्रतीयते तथाप्यग्निहोत्रं जुहोति यवागूं पचतीतिवदार्थक्रमेणासौ बाध्यते । स्नानस्य शुद्धिहेतुत्वाच्छुद्धस्यैव च सन्ध्यावन्दनाद्यधिकारात् । अत एव दक्षः ।

अस्नात्वा नाचरेत्कर्म जपहोमादि किं च न ।
सर्वमर्हति शुद्धात्मा प्रातः स्नायी जपादिकम् ॥ इति ।

ननु

सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।
यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥

इति दक्षेणैव सन्ध्यावन्दनस्यापि सर्वकर्माङ्गत्वाभिधानाद्यथास्थित एवास्तु क्रम इति चेत् । मैवम् । अत्र सर्वत्वमाधिकारिकमितिन्यायेन स्नानातिरिक्तसर्वकर्माङ्गता सन्ध्यावन्दनस्योच्यते । अन्यथा स्नानाङ्गताप्युच्येत । प्रातःस्नायी जपादिकमर्हतीति पूर्ववाक्येनाहत्यैव स्नानस्य सन्ध्यावन्दनाङ्गताबोधनात् । तस्मात्स्नानं पूर्वभावीति सिद्धम् । यद्वा अशक्तस्य प्रातःस्नानं विनापि प्रातःसन्ध्या भवतीति सूचयितुं सन्ध्यायाः पूर्वमुपादानम् । प्रातःसन्ध्यामुपासीत दन्तधावनपूर्विकामिति योगीश्वरस्मरणात् ।

वस्तुतस्तु सन्ध्यायां स्नानमिति विग्रहेण स्नानस्य कालविधानार्थं सन्ध्याग्रहणम् । अत एव वक्ष्यति द्वादशाध्याये ।

भास्करस्य करैः पूतं दिवास्नानं प्रशस्यते ।
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात् ॥ इति ।

सन्ध्यालक्षणमाह बृहन्मनुः ।

उदयात्प्राक्तनी सन्ध्या घटिकात्रयमिष्यते ।
सायंसन्ध्या त्रिघटिका अस्तादुपरि भास्वतः ॥ इति ।

अत्र यद्यपि स्नानात्प्राग्भाविनां ब्राह्ममौहूर्तिकोत्थानहितचिन्तनदेहधर्मशौचाचमनदन्तधावनकेशप्रसाधनकुशोत्पाटनादीनामनभिधानान्न्यूनता मूलस्य तथापि कलौ षण्णामेव नित्यत्वादन्येषामनित्यतयाऽनभिधानान्न न्यूनता । अन्यथा षट्पदानर्थक्यापातात् । तथात्वेऽपि तेषामन्यतो विधिग्रहणाविरोधात् । उक्तं च प्राक् स्वयमेव "शेषं मुतिविभापितमिति" । अत एव बृहत्पराशरेणाप्येषामेव षण्णां चित्तशोधकत्वेन मुक्तिहेतुत्वमुक्तम् ।

कर्मषट्कं प्रवक्ष्यामि यत्कुर्वन्तो द्विजातयः ।
गृहस्था अपि मुच्यन्ते संसारैर्बन्धहेतुभिरिति ॥

यद्यप्यातिथ्यं वैश्वदेव चेत्यनेनातिथ्यस्य पूर्वभावः प्रतीयते तथापि

पौरुषेण च सूक्तेन ततो विष्णुं समर्चयेत् ।
वैश्वदेवं ततः कुर्यात् बलिकर्म तथैवच ॥

इति नारसिंहे देवपूजानन्तरं वैश्वदेवस्य तत इति पञ्चमीश्रुत्या क्रमाभिधानेन सन्निधिरूपपाठक्रमबाधाद्वैश्वदेवस्य प्राथम्यात् । अत एव बृहत्पराशरः । "वैश्वदेवं तथातिथ्यं षट्कर्माणि दिने दिने इति । यद्वा वैश्वदेवात्प्राग् अतिथ्यागमने आतिथ्यास्य पूर्वभावं बोधयितुं प्राक्तन्निर्देशः । वक्ष्यति च ।

वैश्वदेवे तु सम्प्राप्ते भिक्षुके गृहमागते ।
उद्धृत्य वैश्वदेवार्थं भिक्षुकं तु विसर्जयेदिति ॥

नन्वत्र सप्तत्वप्रतिभानात् षट्त्वं विरुद्धमिति चेत् । मैवम् । यानि कर्माणीत्युद्दिश्य तानि दिने दिने कर्तव्यानीति नित्यत्वविधौ समागन्यायेनोद्देश्यगतायाः षट्त्वसंख्याया अविवक्षितत्वादिति केचित् । तन्न । अस्यां स्मृतौ सन्ध्यादीनां वाक्यान्तरेणोत्पत्त्यभावादनेनैव वाक्येन नित्यत्वविशिष्टानां तेषामुत्पादनादुपादेयगतत्वेन पश्वेकत्ववत् षट्त्वस्यापि विवक्षितत्वात् । यद्यप्यग्निहोत्रं गवालम्भमित्यनेनाग्निहोत्रस्य कलौ निषेधात्तद्धोमपरिहारेण षट्त्वमविरुद्धम् ।

अत एव

सन्ध्या स्नानं जपश्चैव देवतानां च पूजनम् ।
वैश्वदेवं तथातिथ्य षट्कर्माणि दिने दिने ॥

इति बृहत्पराशरेण होमपरिहारेणैव षट्त्वाभिधानादिति । तदपि न । एवमग्निहोत्रहोमपरिहारेऽप्यौपासनहोमापरिहारात् । उक्तरीत्या अग्निहोत्रहोमस्याप्यपरिहाराच्च । तर्हि कथमिदं समाधेयम् । इत्थम् । जपस्य सन्ध्याप्रधानत्वेन पृथक्प्रधानत्वाभावान्न षट्त्वविरोधः । पृथगुपन्यासस्तु सकलकर्माशक्तौ गायत्रीजपमात्रमेव कार्यमित्येवमर्थः । प्राधान्यं च तस्यैव फलसम्बन्धश्रवणात् । अत एव बृहत्पराशरः ।

गायत्र्युपासिता येन तेनोपास्तं जगत्त्रयम् ।
गायत्रीमेव यो ज्ञात्वा सम्यगभ्यसते पुनः ।
इहामुत्र च पूज्योऽसौ ब्रह्मलोकमवाप्नुयात् ॥ इति ।

स्वयमप्यष्टमे वक्ष्यति ।

गायत्रीरहितो विप्रः शूद्रादप्यशुचिर्भवेत् ॥
गायत्रीब्रह्मतत्त्वज्ञाः सम्पूज्यन्ते जनैर्द्विजाः ॥ इति ।

यद्वा जपः गुरूपदिष्टमन्त्रस्य ।

अस्नाताशी मलं भुङ्क्ते अजपी पूयशोणितम् ।
अनर्चयित्वा देवांस्तु नरकं प्रतिपद्यते ॥

इति जपस्य प्राधान्यश्रवणात् । स च ब्रह्मयज्ञतर्पणयोरुपलक्षणम् । तथा च स्मृत्यन्तरे ।

स्नानं सन्ध्या जपो होमः स्वाध्यायो देवतार्चनम् ।
वैश्वदेवं तथातिथ्य नवमं पितृतर्पणम् ॥
एतानि नव कर्माणि कर्तव्यानि दिने दिने ॥ इति ।

तत्र ब्रह्मयज्ञ द्वितीयाध्याये स्वयमेव वक्ष्यति । स्वाध्यायं चैवमभ्यसेदिति । तर्पणस्यात्रावचनं ब्रह्मयज्ञाङ्गत्वेन प्राधान्याभावात् । अङ्गत्वञ्चास्य ब्रह्मयज्ञानन्तरं देवतास्तर्पयति इत्युपक्रम्य देवर्षिपितृतर्पणान्यभिधाय पतितपुरुषं पितृस्तर्पयित्वा ... इत्यादि यद्ददाति सा

THE UNIVERSITY ... RECEIVED ...

दक्षिणेत्यभिधानात् मन्दशन्यायेन सिध्यति। तथाश्वलायनानाम्। याजुषाणां तु तर्पणं स्वतन्त्रमेव प्रधानम्।

स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः।
वैश्वदेवावसाने वा ब्रह्मयज्ञस्त्रिधा स्मृतः॥

इतिकात्यायनस्मरणात्। अत एव उदाहृतवाक्ये तर्पणस्य पृथङ् निर्देशः प्रधान्याभिप्रायेण। मूलवाक्ये षट्संख्याग्रहणं नवकर्माशक्त्यभिप्रायेण। वाक्यद्वयेऽपि दिने दिने इति वीप्साश्रवणात्। तेषां च षण्णामपि दिने दिन इति वीप्सया वसन्ते वसन्ते ज्योतिषा यजेतेत्यनेनाग्निष्टोमस्येव जीवनवदधिकारकत्वान्नित्यत्व बोध्यते। अत एव तत्र तत्रैषामकरणे प्रत्यवायोक्तिरपि। तत्र स्नानं सविशेषं द्वादशाध्याये प्रतिपादयिष्यति। तदनन्तरं कार्यं वस्त्रपरिधानं त्वत्रोच्यते। तत्र योगियाज्ञवल्क्यः। 'स्नात्वैवं वाससी धौते अच्छिन्ने परिधाय चेति"। धौते स्वयमेव। तथा च देवलः।

स्वयं धौतेन कर्तव्या क्रिया धर्म्या विपश्चिता।
न तु नेजकधौतेन नाहतेन न कुत्र चिदिति॥

नाहतमक्षतभिन्नम्। अच्छिन्ने सदशे "क्षौमं वासः प्रशंसन्ति तर्पणे सदशं तथेति" प्रजापतिस्मरणात्। वाससो ऽर्धित्वक्रमयोर्विवक्षामाह।

व्यासः।

नोत्तरीयमधः कुर्यान्नोपर्यधस्यमम्बरम्।
नान्तर्वासो विना जातु निवसेद्वसनं बुधः॥ इति।

अन्तर्वासो लक्षणं संग्रहे।

शोडषद्वादशाष्टाभिरङ्गुलैर्विस्तृतन्तु यत्।
आयतं व्याममात्रं च तदन्तर्वास ईरितम्॥

जातूकर्ण्यः, वस्त्रोत्तरीयाभावे द्व्यङ्गुलं त्र्यङ्गुलं चतुरङ्गुलं वा सूत्रैर्वस्त्राकृतिपरिमण्डलं तदुत्तरीयं कुर्याद्वस्त्रस्य विवरं चेति। तच्च जीवत्पितृकैर्न धार्यम्।

तथा च संग्रहे—

उत्तरीयं योगपट्टं तर्जन्यां रजतं तथा ।
न जीवत्पितृकैर्द्धार्यं ज्येष्ठो वा विद्यते यदि ॥

उत्तरीयासम्भवे यज्ञोपवीतं धार्यम् ।

यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि ।
तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते ॥

इति स्मरणात् । शाणादीन्यपि वा धार्याणि ।

तदाह योगियाज्ञवल्क्यः ।

अलाभे धौतवस्त्रस्य शाणक्षौमाविकानि च ।
कुतपं योगपट्टं वा द्विवासास्तु यथाभवेत् ॥

अत्र द्विवासास्तु यथाभवेदिति हेतुमन्निगदेनोत्तरीयार्थमेव तदुपादानं न परिधानार्थमित्युक्तं भवति । तथा च जातूकर्ण्यः—

परिधेय सदा वासः कार्पासं सदशं सितम् ।
क्षौमं वा कुतपं वापि न कौशेय कदा च नेति ॥

सर्वथापि तदभावे पारस्करः "एकं चेद्वासो भवति तस्यैवोत्तरवर्गेण प्रच्छादयीतेति । प्रतिवर्णं वस्त्रवर्णानाह भृगुः

ब्राह्मणस्य सितं वस्त्रं तु यते रक्तमुल्वणम् ।
पीतं वैश्यस्य शूद्रस्य नील मलवदिष्यते ॥
विकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव च ।
श्रौतं स्मार्तं तथा कर्म न नग्नश्चिन्तयेदपि ॥
नग्नः स्यान्मलवद्वासा नग्नः कौशेयकेवलः ।
नग्नो द्विगुणवस्त्रः स्याच्चग्नो दग्धपटस्तथा ॥
नग्नश्च स्यूतवस्त्रः स्याच्चग्नो ग्रथितवस्त्रकः ।
नग्नश्च बहुवस्त्रः स्याच्चग्नः कौपीनकेवलः ॥
काषायवस्त्रः साक्षाच्च दश नग्नाः प्रकीर्तिताः ।

परिधानप्रकारमाह जातूकर्ण्यः

परिधानाद्बहिः कक्षा निबद्धा ह्यासुरीमता ।
धर्मकर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः ॥

आर्द्रवस्त्रोत्तारणे विशेषः संग्रहे ।

स्नानं कृत्वार्द्रवस्त्रं तु उर्ध्वमुत्तारयेद्द्विजः ।
आर्द्रवस्त्रमधः स्याच्चेत्पुनः स्नानेन शुध्यति ॥

जाबालिः ।

निष्पीडितं धौतवस्त्रं यदा स्कन्धे विनिक्षिपेत् ।
तदासुरं भवेत्कर्म पुनः स्नानं विशोधनम् ॥
वस्त्रं चतुर्गुणीकृत्य निष्पीड्य सदश तथा ।
वामप्रकोष्ठे निक्षिप्य स्थलस्थश्च द्विराचमेत् ॥
वस्त्रं त्रिगुणितं यस्तु निष्पीडयति मन्दधीः ।
वृथास्नानं भवेत्तस्य स्नातस्यादशमम्बुनीति ॥

अथ तिलकविधिः, ब्रह्माण्डे

मृत्तिका चन्दनं चैव भस्म तोयं चतुर्थकम् ।
एभिर्द्रव्यैर्यथाकालमूर्द्ध्वं पुण्ड्रम्भवेत्सदा ॥
स्नात्वा पुण्ड्रं मृदा कुर्याद्धुत्वा चैव तु भस्मना ।
देवानभ्यर्च्य गन्धेन सर्वपापापनुत्तये ॥
जलेन तिलकं कुर्याज्जलान्तःकर्मसिद्धये ॥ इति ।

अत्र मृदादीनां स्नानाद्यनन्तरकालनियमेन स्नात्वा भस्मादिधारणं न सिध्यति । न चास्य पापापनोदकत्वेन काम्यत्वं शङ्क्यम् ।

ऊर्ध्वपुण्ड्रविहीनस्य स्मशानसदृशं मुखम् ।
अवलोक्य मुखं तस्य आदित्यमवलोकयेत् ॥
मद्भक्तो धारयेन्नित्यमूर्ध्वपुण्ड्रं विना तु यत् ।
यः कर्म कारयेन्नित्यं तत्सर्वं निष्फलं भवेत् ॥
इति तत्रैवाभिधानात् ।

अथ सन्ध्याविधिः । तत्र सन्ध्याशब्दो यद्यपि कालवचनस्तथापि दर्शपूर्णमासादिशब्दवत्कालयोग निमित्तीकृत्य कर्मनामधेयमिति कर्मसु गणितः । सा चैकस्मिन् दिवसे त्रिवारमुपस्या । यथाहात्रिः, "सन्ध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदे"ति । तस्याश्च कालनामत्रयमाह व्यासः ।

गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने ।
सरस्वती च सायह्ने सैव सन्ध्या त्रिषु स्मृता ॥ इति ।

तस्याः कालमाह बृहन्मनुः ।

उदयात्प्राक्तनी सन्ध्या घटिकात्रयमिष्यते ।
सायसन्ध्या त्रिघटिका अस्तादुपरि भास्वतः ॥ इति ।

ननु सर्वस्मृतिषूदयात्पूर्वमेव सन्ध्याकालोऽभिहितस्तत्कथमिदमुच्यते । सत्यम् । तस्योदयात्प्राक्कालीनस्नानपक्षविषयत्वात् । अत्र तूदयानन्तरं स्नानं वक्ष्यतीति तदुत्कर्षेण सन्ध्योत्कर्षस्तदाद्युत्कर्षन्यायात् । आग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीतिवत् । सूर्ये ज्योतिषि जुहोमीति मन्त्रलिङ्गाच्च तेनायमेवात्र युक्त इति । तत्तदितिकर्तव्यतामाह बृहत्पराशरः ।

आमणेर्विधनाद्धस्तौ पादौ वा जानुतः शुचिः ।
प्रक्षाल्य ह्याचमेद्विर्ह्यन्तर्जानुकरो द्विजः ॥
निर्मलाफेनपूताभिर्मनोज्ञाभिः प्रयत्नवान् ।
आचमेद्ब्रह्मतीर्थेन पुनराचमनाच्छुचिः ॥
वक्त्रनिर्माजनं कृत्वा द्विस्तेनैवापराण्यथ ।
अद्भिश्च संस्पृशेत्खानि सर्वाण्यपि विशुद्धये ॥
अङ्गुष्ठेन प्रदेशिन्या सव्यपाणिस्थवारिणा ।
घ्राणं संस्पृश्य नेत्रे च तेनानामिकया श्रुती ॥

नेत्रे च प्रदेशिन्यङ्गुष्ठाभ्यामेवेति शेषः । मध्यमाङ्गुष्ठयोगेन वा "मध्यमाङ्गुष्ठयोगेन स्पृशेन्नेत्रद्वयं ततः" इति पैठीनसिस्मरणात् ।

नाभिं च तत्कनिष्ठाभ्यां वक्षः करतलेन च ।
शिरः सर्वाभिरसौ च अङ्गुल्यग्रैश्च संस्पृशेत् ॥
आचम्य प्राणसरोध कृत्वा चोपस्पृशेत्पुनः ।
प्रत्योङ्कारसमायुक्ताः प्रणवाद्यन्तकास्तथा ॥
महाव्याहृतयः सप्त दैवतर्ष्यादिसयुताः ।
प्रणवाद्यन्तगायत्री शिरस्तस्यास्तथैव च ॥
त्रिरावर्तनमेतस्य प्राणायामो विधीयते ।
भूर्भुवःस्वर्महर्जनस्तपस्सत्य तथैव च ॥

आद्यास्तिस्रो महाप्रोक्ताः सर्वत्रैतत्प्रवर्तते ।
अग्निर्वायुस्तथासूर्यो बृहस्पत्याप एव च ॥
इन्द्रश्च विश्वेदेवाश्च देवताः समुदीरिताः ।
गायत्र्युष्णिगनुष्टुप्च बृहती पङ्क्तिरेव च ॥
त्रिष्टुप्च जगती चैव छन्दांस्येतान्यनुक्रमात् ।
भरद्वाजः कश्यपश्च गौतमोऽत्रिस्तथैव च ॥
विश्वामित्रो जमदग्निर्वसिष्ठ ऋषयः क्रमात् ।
ओमापोज्योतिरित्येतच्छिरस्तस्मात्प्रयुज्यते ॥
आपोहिष्ठादि जल्पन्ति छन्दो देवर्षिसंयुतम् ।
सिन्धुद्वीप ऋषिः छन्दो गायत्रमृक्षु तिसृषु ॥
आपो हि देवताः प्राहुरापोहिष्ठादिषु द्विजाः ।
आपोहिष्ठेति च ऋचां पादाच्यक्षरा न च ॥
पादान्ते तु क्षिपेद्वारि पादमध्ये च निःक्षिपेत् ।
भूमौ मूर्ध्नि तथाकाशे मूर्ध्न्याकाशे तथा भुवि ॥
आकाशे भुवि मूर्ध्नीति मार्जनं तु विधीयते ।
अत्रोपस्पर्शने नेत्र प्रातः किंचित्पवन्ति हि ॥
सूर्यश्चमेति मध्याह्ने पुनन्त्वापो विपर्ययम् ।
मन्त्राभिमन्त्रितं कृत्वा कुशपूतं तथा जलम् ॥
आचम्य विधिवद्धीमान् सन्ध्योपासनमारभेत् ।
जलपूर्णं तथा हस्तं नासिकाग्रे समर्पयेत् ॥
ऋतं चेति पठित्वा तु तद्वारि भुवि निक्षिपेत् ।
अघमर्षणसूक्तस्य ऋषिरेवाघमर्षणः ॥
छन्दोऽत्रानुष्टुभं प्राहुरापश्चैव तु दैवतम् ।
जलेनाञ्जलिमापूर्य गायत्रीं मनसा स्मरन् ॥
निक्षिपेत् पूर्वमुद्धम्य पतिता बिन्दवः पुनः ।
वज्रो भूत्वा ययुस्ताश्च मन्देहाद्द् घ्नन्ति राक्षसान् ॥
प्रदक्षिणप्रक्रमेण पापं धुन्वन्ति भूसुराः ।
कालत्रयेऽपि तं ध्यात्वा सकलं भद्रमश्नुते ॥ इति ।

ध्यानस्वरूपमाह श्रुतिः ।

असावादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति एवं वदेति ।

अथसन्ध्याप्रधानजपविधिः । कौर्मे ।

ओङ्कारव्याहृतियुतां गायत्रीं वेदमातरम् ।
जप्त्वा जलाञ्जलिं दद्याद्भास्करं प्रति तन्मनाः ॥
प्राक्कूलेषु ततः स्थित्वा दर्भेषु सुसमाहितः ।
प्राणायामत्रयं कृत्वा ध्यायेत्सन्ध्यामिति श्रुतिः ॥
ध्यात्वार्क्कमण्डलगतां सावित्रीं वै जपेद्बुधः ।

न्यासविधिमाह व्यासः ।

हृदि तत्सवितुर्न्यस्य न्यसेद्मूर्ध्नि वरेण्यम् ॥
भर्गोदेवस्येति पदं शिखायां च ततो न्यसेत् ।
धीमहीति न्यसेद्वर्म धियोयोनश्च नेत्रयोः ॥
प्रचोदयादिति पदमस्त्रार्थे विनियोजयेत् ।

गायत्र्याश्चर्ष्याद्युक्ता बृहत्पराशरेण ।

दैवत्यमस्यां सविता सुरार्च्यश्छन्दोऽपि गायत्रमभूच्च तस्याम् ।
विश्वस्य मित्रो द्विजराजपूज्यो मुनिर्नियोज्यस्तु जपादिकेषु ॥

जपसङ्ख्यामाह यमः ।

सहस्रपरमां देवीं शतमध्यां दशावराम् ।
गायत्रीं प्रजपेन्नित्यं सर्वपापप्रणाशनीमिति ॥

व्यासोऽपि ।

अष्टोत्तरशतं नित्यमष्टाविंशतिमत्र वा ।
विधिना दशकं वापि त्रिकालेषु जपेद्बुधः ॥

जपानन्तरमर्क्कोपस्थानं कार्यम् ।
तदाह कूर्मः ।

अथो मतिष्ठेदादित्यमुदुत्यन्तं समाहितः ।
मन्त्रैस्तु विविधैः सौरैः ऋग्यजुःसामसम्भवैः ॥ इति ।

ऋग्यजुःसामसम्भवैरिति स्वस्वशाखीयमन्त्रप्रदर्शनार्थम् । न त्वेकस्य सर्वमन्त्रप्राप्त्यर्थम् । "उपस्थानं स्वकैर्मन्त्रैरादित्यस्य तु कारयेदि"ति वसिष्ठस्मरणात् । अयमेव विधिः स्वल्पः सन्ध्यात्रयेऽपि वेदितव्यो

मन्त्रास्तु प्रतिपदोक्ता ग्राह्याः । तत्र मध्याह्नसन्ध्याया विशेषं द्वितीयाध्याये वक्ष्यामः । सायंसन्ध्यायां त्वयं विशेषः । तत्र भरद्वाजः ।

सायमग्निश्चमेत्युक्त्वा प्रातः सूर्यस्त्वपः पिबेत् ।
आपः पुनन्तु मध्याह्ने तैरेवाचमनं चरेत् ॥ इति ।

उपस्थाने विशेषमाह नारायणः ।

वारुणीभिरथादित्यमुपस्थाय प्रदक्षिणम् ।
कुर्वन् दिशो नमस्कुर्याद्दिगीशांश्च पृथक् पृथगिति ॥

वारुण्यः इमं मे वरुणेत्याद्याः । यद्यपि वारुणीनां वरुणोपस्थान एव विनियोगो युक्तस्तथापि आदित्योपस्थान एव श्रुत्या विनियुज्यन्ते लिङ्गस्य दौर्बल्यात् । ऐन्द्र्या गार्हपत्योपस्थानवद् इति न विरोधः ॥

अथ होमविधिः । तत्र दक्षः ।

सन्ध्याकर्मावसाने तु स्वयं होमो विधीयते ।
स्वयं होमे फलं यत्स्यात्तदन्येन न लभ्यते ॥

स च होमः श्रौतः स्मार्तश्च श्रौतोऽग्निहोत्रहोमः स्मार्त औपासनहोमः । तदाह याज्ञवल्क्यः ।

कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही ।
दायकालाहृते वापि श्रौतं वैतानिकाग्निष्विति ॥

तत्रोभयोः सद्भावेऽनुष्ठानक्रममाह ।

होमं वैतानिकं कृत्वा स्मार्तं कुर्याद्विचक्षणः ।
स्मृतीनां वेदमूलत्वात्स्मार्तं केचित्पुराविदुः ॥

श्रौतकर्माशक्तौ स्मार्तमात्रं कर्तव्यम् । तदाह व्यासः ।

श्रौतं कर्म न चेच्छक्तः कर्तुं स्मार्तं समाचरेत् ।
तत्राप्यशक्तः करणे सदाचारं लभेद् बुधः ॥

सदाचारः स्नानसन्ध्यादिस्तावन्मात्रमेव अनुतिष्ठेत् । शक्तस्य तु श्रौतपरित्यागे प्रत्यवायमाह गर्गः ।

यो वैदिकमनादृत्य कर्म स्मार्तैतिहासिकम् ।
मोहात्समाचरेद्विप्रो न स पुण्येन युज्यते ॥

स्वयं होमाशक्तौ प्रतिनिधिमाह शातातपः ।

श्रौतं यत्स्यात्स्वयं कुर्यादन्योपि स्मार्तमाचरेत् ।
अशक्तौ श्रौतमप्यन्यः कुर्यादाचारमन्ततः ॥

आचारः स्नानसन्ध्यादिस्तमप्यन्यः कुर्यात् ॥

अन्यपदार्थमाह दक्षः ।

ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः ।
एतैरपि हुतं यत्तु तद्धुतं स्वयमेव तु ॥

अन्यहोमेऽपि दम्पतीसान्निध्येन भाव्यं तदाह कात्यायनः ।

असमक्षं तु दम्पत्योर्होतव्यं नर्त्विगादिना ।
द्वयोरप्यसमक्षं तु भवेद्धुतमनर्थकम् ॥

होमकालमाहापस्तम्बः, उषस्युपोदयं समाविधित उदिते प्रातरिति । पञ्चधा विभक्तस्य दिनस्याद्यो भागः प्रातः स एवात्रोपयुज्यते पूर्वोक्तन्यायात् कालान्तरं तु यथोपक्रमविषयम् ।

सायंहोमकालमाह कात्यायनः ।

यावत्सम्यङ् न भाव्यन्ते नभस्यृक्षाणि सर्वतः ।
लोहितत्वं च नापैति तावत्सायं तु हूयते ॥ इति ।

उभयत्र गौणकालमहाश्वलायनः । सङ्गवान्तः प्रातः प्रदोषान्तः सायमिति । होमद्रव्यमाह नारायणः ।

पयो दधि यवागूश्च सर्पिरोदनतण्डुलाः ।
सोमो मांसं तथा तैलमापस्तानि दशैव तु ॥

मांसं तु स्मार्तातिरिक्ते होम्य च मांसं वर्ज्यमित्याश्वलायनस्मरणात् । होमसाधनमाह । स एव "द्रवं हविः स्रुवेणैव पाणिना कठिनं हविरिति ।

आहुतिपरिमाणमाह बौधायनः ।

व्रीहीणां वा यवानां वा शतमाहुतिरिष्यते ।
तिलानां तु तदर्धं स्यात्स्रुवमात्रं घृतस्य तु ॥

विशेषेतिकर्तव्यता तु स्वस्वगृह्योक्ता याह्या "स्वगृह्योक्तेन विधिना होमं कुर्याद्यथाविधी"ति परिशिष्टात् ।

अथ देवार्चनविधिः । तत्र मूलवचने देवतानामिति सामान्यापादानेऽपि कलौ हरिहरचण्डीविनायकसूर्याः पूज्याः । बहुवचनसामर्थ्याद्विशेषविहितत्वाच्च । तथा च महाभारते ।

कलौ कलिमलध्वंसं सर्वपापहरं हरिम् ।
येऽर्चयन्ति नरा नित्य तेऽपि वन्द्या यथा हरिः ॥

स्कान्देऽपि ।

ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः ॥
द्वापरे भगवान्विष्णुः कलौ देवो महेश्वरः ।

यद्यप्यत्र विधिर्न श्रूयते तथापि प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्तीत्यत्र रात्रिपर्यायेण ये प्रतितिष्ठासन्ति त एता रात्रीरुपेयुरितिवद्धरिवद्वन्द्यत्वकामाः कलौ हरिमर्चयुरित्यसौ कल्पनीयः । तथा 'कलौ चण्डीविनायकावि"त्यत्रापि ज्ञेयम् । तच्च देवार्चनं यद्यपि

अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतम् ॥

इत्याद्याग्नेयादिवाक्यैरनेकत्र प्रतीयते तथापि कलौ शालग्रामशिलायामवश्यं कार्यम् ।

कामासक्तोऽथ वा क्रुद्धः शालग्रामशिलार्चनात् ।
भक्त्या वा यदि वाभक्त्या कलौ मुक्तिमवाप्नुयात् ॥
वैवस्वतभयं नास्ति तथा न कलिजं भयम् ।
यः कथां कुरुते विष्णोः शालग्रामशिलाग्रतः ॥
शालग्रामशिलायास्तु प्रतिष्ठा नैव विद्यते ।
महापूजां तु कृत्वादौ पूजयेत्तं ततो बुधः ॥

इत्यादिस्कन्दवाक्यात् । तथा शिवपूजनमपि कलौ लिङ्गे वा स्थण्डिले वा कार्यम् ।

तथा च महाभारते ।

सदा तं यजते यस्तु श्रद्धया मुनिपुङ्गव ।
लिङ्गे वा स्थण्डिले वाऽपि शङ्करं विधिपूर्वकम् ॥
युगदोषं विनिर्जित्य रुद्रलोके प्रमोदते ॥ इति ।

युगं कलिस्तस्यैव सदोषत्वात् । लिङ्गं बाणलिङ्गं तस्य स्वतःसिद्धत्वात् । तथा भविष्ये ।

बाणलिङ्गानि राजेन्द्र ख्यातानि भुवनत्रये ।
न प्रतिष्ठा न संस्कारस्तेषामावाहनं तथेति ॥

तत्र प्रतियुगं विष्णुमूर्त्तिभेद उक्तो वाराहे ।

कृते नारायणः शुद्धः सूक्ष्ममूर्तिरुपासते ।
त्रेतायां विष्णुरूपेण वासुदेवश्च द्वापरे ॥
कृष्णवर्णः कलौ कृष्णः साङ्गोपाङ्गः सपार्षदः ।
पूज्यते मनुजै राजन् श्रेयसामीश्वरो हरिरिति ॥

अत्र नारायणादिदेवताकमन्त्राद्युपादानमनेनोक्तं तेन कलौ कृष्णदैवत्यमन्त्रेण तन्मन्त्रध्येयरूपः शालग्रामे कृष्णः पूज्यः । तत्रापि प्रतिवर्णं शालग्रामशिलाभेदो हेमाद्रौ शालग्रामशिलामाहात्म्ये अभिहितः ।

ब्राह्मणैर्वासुदेवस्तु नृपैः संकर्षणस्तथा ।
प्रद्युम्नः पूज्यते वैश्यैरनिरुद्धस्तु शूद्रजैरिति ॥

ब्राह्मणैर्वासुदेवादिलक्षणोपेतायां शालग्रामशिलायां कृष्णः पूज्य इत्यर्थः । तल्लक्षणं तु विष्णुधर्मोत्तरे ।

पञ्चचक्रो वासुदेवः षड्भिः प्रद्युम्नकः स्मृतः ।
सङ्कर्षणः सप्तचक्रोऽनिरुद्ध एकादशैः स्मृतः ॥

संख्याविशेषोऽप्युक्तस्तत्रैव ।

चत्वारो ब्राह्मणैः पूज्यास्त्रयो राजन्यजातिभिः ।
वैश्यैर्द्वावेव सम्पूज्यौ तथैकः शूद्रजातिभिरिति ॥

तच्चैवं मूर्त्यन्तराणां संख्यान्तराणां वानर्थक्यं, काम्यपूजायामुपादानात् ।

यत्तु

एकमूर्तिर्न पूज्यैव गृहीणा बुद्धिमिच्छता ।
अनेकमूर्त्तिसम्पन्नः सर्वकामानवाप्नुयादिति ॥
शालग्रामाः समाः पूज्या विषमा न कदा च न ।
समेषु द्वितयं नैव विषमेष्वेक एव हीति ॥

तत्संख्याविधिवाक्यैकवाक्यतया व्यवस्थाप्यम् । यथाविशेषविहितसंख्यायाः प्राबल्येन तदेकवाक्यतया तद्भिन्नविषयतया वा निषेधो व्यवस्थाप्य इति ।

ननु

शालग्रामशिलां वापि चक्राङ्कितशिलां तथा ।
ब्राह्मणः पूजयेन्नित्यं क्षत्रियादिर्न पूजयेत् ॥

इति विष्णुधर्मोत्तरे ।

प्रणवोच्चारणाच्चैव शालग्रामशिलार्चनात् ।
ब्राह्मणीगमनाच्चापि शूद्रश्चाण्डालतां व्रजेत् ॥

इत्यापस्तम्बीये च क्षत्रियादीनां शालग्रामपूजानिषेधेनानुपपन्नमिदमिति चेत् । मैवम् ।

ब्राह्मणस्यैव पूज्योऽहं शुचेरप्यशुचेरपि ।
स्त्रीशूद्रकरसंस्पर्शो वज्रस्पर्शाधिको मम ॥

इति लैङ्गवाक्ये उपक्रमोपसंहाराभ्यां विशेष्यसङ्गतैवकारेणान्ययोगव्यवच्छेदाच्च ब्राह्मणमात्रस्यैव स्पर्शवत्पूजायामधिकारो नान्येषामिति विशेषेण पूजामात्रनिषेधस्य सामान्यस्योपसंहारात् । यथाग्नेयं चतुर्द्धा करोतीति विशेषेण पुरोडाशं चतुर्द्धा करोतीति सामान्यस्योपसंहार इति ।

अत एव बृहन्नारदीये ।

स्त्रीणामनुपनीतानां शूद्राणां च जनेश्वर ।
स्पर्शने नाधिकारोऽस्ति विष्णोर्वा शङ्करस्य वा ॥
शूद्रो वानुपनीतो वा स्त्री वापि पतितोऽपि वा ।
केशवं वा शिवं वापि स्पृष्ट्वा नरकमश्नुते ।

इत्यनास्थया प्रत्येकं वा शब्देन क्षत्रियादीनामप्युपसंग्रहः । यद्येवं

समाचारविरोधस्तर्हि क्षत्रियादिरित्यत्रातद्गुणसंविज्ञानबहुव्रीहिणा शूद्रादेरेव ग्रहणमस्तु । अत एव पाद्मे ।

ब्राह्मणक्षत्रियवैश्यानां त्रयाणां मुनिसत्तमाः ।
अधिकारः स्मृतः सद्भिः शालग्रामशिलार्चने ॥
स्त्रीशूद्रपतितादीनां षण्णां नीचविकर्मिणाम् ।
नैवाधिकारो विज्ञेयः शालग्रामशिलार्चने ॥
दीक्षायुक्तैस्तथा शूद्रैर्मद्यपानविवर्जितैः ।
कर्तव्य ब्राह्मणद्वारा शालग्रामशिलार्चनम् ॥

इति स्पष्टं शूद्रादीनामेव ब्राह्मणद्वारा पूजाभिहितेत्यलं विस्तरेण ।

अथ पूजोपकरणानि । विष्णुधर्मोत्तरे ।

कलौ यच्छन्ति ये विष्णोस्तुलसीकाष्ठचन्दनम् ।
विष्णुप्रीतिकरं मर्त्या उत्तरा यान्ति ते भुवम् ॥
ये हि भागवता भूत्वा कलौ तुलसिचन्दनम् ।
नार्पयन्ति सदा विष्णोर्न ते भागवता नराः ॥
महाविष्णोः कलौ भक्त्या दत्वा तुलसिचन्दनम् ।
योऽर्चयेन्मालतीपुष्पैर्न भूयस्तनयो भवेत् ॥

स्कान्दे ।

अहो मुष्टास्ते नष्टास्ते पतिताः कलिकन्दरे ।
यैर्नाऽर्चितो हरिर्भक्त्या कमलैरसितैः सितैः ॥

पाद्मे ।

कार्तिके केतकीपुष्पं येन दत्तं हरेः कलौ ।
दीपदानं च देवर्षे तारितं तेन वै कुलम् ॥
अहो तुष्टा विनष्टास्ते पतिताः कलिकन्दरे ।
यैर्नार्चितो हरिर्भक्त्या कलमैः कार्तिके शुभैः ॥

स्कान्दे ।

ये कृष्णागरुणा कृष्णं धूपयन्ति कलौ नराः ।
सकर्पूरेण राजेन्द्र कृष्णतुल्या भवन्ति ते ॥

पाद्मे ।

कलौ गव्यघृतेनाथ तिलतैलेन वा पुनः ।
दीपदानं च यैर्दत्तं तारितं तैस्तु तत्कुलम् । इति ॥

पाद्मे ।

द्वारकाशैलसम्भूतं यश्चापं पिबते कलौ ।
पापानि तस्य नश्यन्ति शतजन्मार्जितान्यपि ॥
धृते शिरसि पीते च सर्वास्तुष्यन्ति देवताः ।
प्रायश्चित्तं हि पापानां कलौ पादोदकं हरेरिति ॥

अत्र द्वारावतीशिलासम्बन्धितोयपानविधानात् सापि कलौ शालग्रामवद्विशेषतः पूज्येति गम्यते ।

पाद्मे ।

दिवारात्रिकृतं पापं यत् किञ्चित् पूर्वजन्मभिः ।
तत्सर्वं विलयं याति माहात्म्यपठनात् कलौ ॥

माहात्म्यमिति सामान्योपादानेऽपि सहस्रनामस्तोत्रं पठनीयम् ।

तदुक्तं स्कान्दे ।

विष्णोर्नाम सहस्रं च कलिकाले पठेत्तु यः ।
वेदानां च पुराणानां फलमाप्नोति मानवः ॥

कलौ कर्मणां न्यूनातिरिक्ततापरिहारकं हरिस्मरणमेव ।

तदुक्तं बृहन्नारदीये ।

न्यूनातिरिक्ततासिध्यै कलौ वेदोक्तकर्मणाम् ।
हरिस्मरणमेवान्ते सम्पूर्णफलदायकम् ॥

अथ पूजेतिकर्तव्यता आग्नेये ।

अर्चनं सम्प्रवक्ष्यामि विष्णोरमिततेजसः ।
यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः ॥
आनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता ।
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ॥
प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे ।
तृतीयां वामपादे च चतुर्थीं दक्षिणे न्यसेत् ॥

पञ्चमीं वामजानौ तु षष्ठीं वै दक्षिणे न्यसेत् ।
सप्तमीं वामऊर्व्या तु अष्टमीं दक्षिणे तथा ॥
नवमीं नाभिमध्ये तु दशमीं हृदये तथा ।
एकादशीं करमध्ये द्वादशीं वामबाहुके ॥
त्रयोदशीं दक्षिणे तु तथैवास्ये चतुर्दशीम् ।
अक्ष्णोः पञ्चदशीं चैव विन्यसेत् मूर्ध्नि षोडशीम् ॥
यथा देहे तथा देवे न्यासं कृत्वा विधानतः ।
न्यासेन तु भवेत्सोऽपि स्वयमेव जनार्दनः ॥
एवं न्यासविधिं कृत्वा पाद्याद्यङ्गं समाचरेत् ।
पूर्वयावाहयेद्देवमासनं तु द्वितीयया ॥
पाद्यं तृतीयया चैव चतुर्थ्यार्घ्यं प्रदापयेत् ।
पञ्चम्याचमन दद्यात् षष्ठ्या स्नानं समाचरेत् ॥
सप्तम्या तु ततो वासोऽप्यष्टम्या चोपवीतकम् ।
नवम्या गन्धमेवं तु दशम्या पुष्पकं तथा ॥
एकादश्या तथा धूप द्वादश्या दीपमेव हि ।
नैवेद्यं तु त्रयोदश्या नमस्कारे चतुर्दशी ॥
प्रदक्षिणे पञ्चदशी वर्जने षोडशी तथा ।
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनं तथा ॥
हुत्वा षोडशभिर्मन्त्रैः षोडशाज्यस्य चाहुतीः ।
पुनः षोडशभिर्मन्त्रैर्दद्यात्पुष्पाणि षोडश ॥
तच्च सर्वं जपेद्विद्वः पौरुषं सूक्तमुत्तमम् ।
षण्मासात्सिद्धिमाप्नोति ह्येवमेव समर्चयन्निति ॥

ननु शालग्रामादावाहनविसर्जनयोरभावात् कथ षोडशोपचाराः कथं वा षोडशर्चविनियोगस्तत्र

शालग्रामार्चने नैव आवाहनविसर्जने ।
शालग्रामे हि भगवानाविर्भूतः सदा हरिः ॥

इति स्कान्दवाक्यात् । प्रतिमास्थानेष्वप्स्वग्नावावाहनविसर्जनवर्जं सर्वं समानमिति बौधायनस्मरणाच्चेति चेत् । सत्यम् । तयोः स्थण्डिलादिविषयत्वात् । तथा च भागवते ।

उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने ।
अस्थिराया विकल्पः स्यात्स्थण्डिले च भवेद्वयमिति ॥

ऋग्विनियोगस्तु तत्स्थानापन्नपुष्पाञ्जलौ ।

तथा च मन्त्रराजानुष्टुब्विधाने ।

आवाहनऋचा दद्यात्पूर्वं पुष्पाञ्जलिं हरेः ।
तस्यैवोन्मुखताप्राप्त्यै यागे चोद्वासने ऋचा ॥
अन्ते पुष्पाञ्जलिं दद्याद्यागसम्पूर्तिसिद्धय इति ।

तथा स्नानमपि प्रतिमादिभिन्नविषयः । तदाह व्यासः ।

प्रतिमापटयन्त्राणां नित्यं स्नानं न कारयेत् ।
कारयेत्पर्वदिवसे यदा मलनिवारणमिति ॥

वस्त्रोपवीतालङ्काराणां न प्रतिदिनमपूर्वत्वनियमः । अभ्युक्षणाच्छुद्धिरपरे तु दिने दिन इति तत्त्वसागरसंहितास्मरणात् । उपवीतालङ्कारयोश्च वस्त्रसमानत्वात् ।

यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठन्ति देवताः ।
न निर्माल्यं भवेत्तावद्वस्त्रत्वविभूषणम् ॥

इति विद्याकरस्मरणाच्च । अपरं तदेव प्रतिदिनं प्रोक्षणाच्छुद्धेदित्यर्थः । शालग्रामेण सह लिङ्गपूजने न शिवनिर्माल्यदोषः ।

तथा स्कान्दे ।

अग्राह्यं शिवनिर्माल्यं पत्रं पुष्पं फलं जलम् ।
शालग्रामस्य संसर्गात्सर्वं याति पवित्रतामिति ॥

अथ वैश्वदेवविधिः ।

स च स्वशाखोक्तेतिकर्त्तव्यतया कर्तव्यः । तदाह व्यासः

वैश्वदेवं प्रकुर्वीत स्वशाखाविहितं ततः ।
संस्कृतान्नैर्हि विविधैर्हविष्यव्यञ्जनान्वितैः ॥
तैरेवान्नैर्बलिं दद्याच्छेषमाप्लाव्य वारिणा ।
कृतापसव्यः स्वधया सर्वं दक्षिणतो हरेदिति ॥

ततो देवार्चनानन्तरमित्यर्थः । व्यञ्जनं तत्र घृतं न तु क्षारादि "जुहुयात्सर्पिषाभ्यक्तं तैलक्षारविवर्जितमिति" तेनैवाभिधानात् । स च गृह्ये लौकिके वाग्नौ कार्यः ।

शालाग्नौ लौकिके वापि जले भूम्यामथापि वा ।
वैश्वदेवस्तु कर्तव्यो देवयज्ञः स वै स्मृतः ॥

इतिकूर्मस्मरणात् । अत्र गृह्यलौकिकाग्न्योरैच्छिको विकल्पः ।

औपासने तु होतव्यं शालाग्नौ वा विजानता ।
विकल्पस्त्विच्छया कार्यो नास्त्येवात्र व्यवस्थितिः ॥

इति शौनकस्मरणात् । शालाग्निरत्र लौकिकजातकर्मादिसिध्यर्थं यो व्याहृतिभिराहृतः । "सोऽग्निः पौरुष इत्युक्तः शालाग्निर्लौकिकस्तथे"ति तेन परिभाषणात् ।

ननु शालाग्नौ वा पचेदन्नं लौकिके वापि नित्यशः । यस्मिन्नग्नौ पचेदन्नं तस्मिन् होमो विधीयत इत्यङ्गिरसा पाकव्यवस्थयैव होमव्यवस्थाभिधानात्कथमैच्छिको विकल्प इति चेत् । मैवम् । अमावास्यायां शान्तिकर्म कुर्वीतेत्यादिना आश्वलायनेन पचनाग्नेर्नियमितत्वेनाग्न्यन्तराप्राप्त्यैव तच्छाखीयान् प्रत्यस्य व्यवस्थापकत्वाभावात्। एतेनैव जातीयकान्यन्यान्यपि वाक्यानि व्याख्यातानि । सूत्रस्यासाधारणकर्मस्वरूपनिर्वाहकमन्त्रेतिकर्तव्यताप्रतिपादनेनाभ्यर्हितत्वात् । अत एवाह देवलः ।

मन्वादयः प्रयोक्तारो धर्मशास्त्रस्य कीर्तिताः ।
तत्प्रयुक्तप्रयोक्तारो गृह्यकाराः स्वमन्त्रत इति ॥

न चैषा निर्विशेषत्वम् । छन्दोगकात्यायनादिसूत्रपरिशिष्टसमानार्थतया तत्र सम्बन्धात् । अत एव वैश्वदेवमित्युपक्रम्य यज्ञत्रयमुक्तं व्यासादिभिः । तत्र होमो देवयज्ञो बलिर्भूतयज्ञः स्वधाकारः पितृयज्ञः ।

अत्र केचित् । स्वधाकारेणैव पितृयज्ञसिद्धेरन्वहं नित्यश्राद्धार्थं ब्राह्मणभोजनं न कार्यमेककार्यत्वादिति । तदपरे न सहन्ते तथा हि पितृभ्य इति सामान्योपादानाद्दिव्यपितृदेवताकमिदं निनयनं तत्र च जीव-

त्पितृकस्याप्यधिकारो निषेधाभावाद्वैश्वदेवविधिना वैश्वदेवशब्दोपात्तदेवभूतपितृयज्ञानां विधानाच्च । नित्यश्राद्धं तु मानुषपितृदेवताकम् ।

नित्यश्राद्धं तु यन्नाम दैवहीनं तदुच्यते ।
तत्तु षाट्पुरुषं ज्ञेय दक्षिणापिण्डवर्जितम् ॥

इति वचनात् । तथा च देवताभेदान्न निनयनेन श्राद्धसिद्धिः । किं च यदि निनयनमात्रेण नित्यश्राद्धसिद्धिः स्यात्तर्हि स्वविधाने कर्मद्वयाकरणे पृथक्प्रायश्चित्तविधानं नोपपद्येत तथा हि

यस्त्रिंशति जपेत्सूक्त त्रिवारं तु यदा द्विजः ।
वैश्वदेव विना भुङ्क्ते तदा पापात्स मुच्यत इति ॥

तथा ।

आर्चवत्र जपेन्मन्त्रं दशवारं तदा द्विजः ।
नित्यश्राद्धं यदा न्यूनं कुरुते नात्र संशय इति ॥

वैश्वदेवशब्देन कर्मत्रयमुच्यत इत्युक्तमेवेति । तच्चिन्त्यम् ।

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
श्राद्ध वा पितृयज्ञः स्यात्पित्र्यो बलिरथापि वा ॥

इति कात्यायनेन त्रयाणामपि पितृयज्ञत्वोपदेशादन्यतरेणापि तत्सिद्धेः ।

यत्तु पृथक्प्रायश्चित्तविधानं तन्नित्यश्राद्धवैगुण्ये न त्वकरणे न्यूनपदेन वैगुण्यस्यैवाभिधानात् । अकरणे तु पूर्वोक्तमेवेति तस्मात्सुष्ठूक्तं स्वधाकारेणैव पितृयज्ञसिद्धेर्नित्यश्राद्धार्थं ब्राह्मणभोजनं नावश्यकमिति । अत एव देवलस्तस्य यथाश्राद्धमनेककालतामाह ।

एतेन विधिना श्राद्धं कुर्यात्संवत्सरं सकृत् ।
त्रिश्चतुर्वा यथा श्राद्धं मासे मासे दिने दिने इति ।

एवं दर्शश्राद्धमप्यशक्तैः संवत्सरमध्ये सकृदेव कार्यम् । "मासिकं पार्वणं प्रोक्तमशक्तानां तु वार्षिकमि"त्याश्वलायनस्मरणात् । स चायं वैश्वदेवः सिद्धस्य हविष्यस्य तु जुहुयादित्यनेनान्नसंस्कारस्तानेतान् यज्ञानहरहः कुर्वीते"त्यनेन पुरुषसंस्कारश्चेति । यत्तूभयरूपतायां परस्परविरोधो

यथा अन्नसंस्कारत्वे ह्यन्नस्य प्राधान्यं वैश्वदेवस्य गुणता पुरुषार्थत्वे तु तद्विपर्ययस्तथाचैकस्यैव गुणत्वं प्रधानत्वं च विरुद्धमिति तत्संयोगपृथक्त्वन्यायेनैव परिहृतम् । यथा एकस्यैव दध्नः क्रत्वर्थत्वे गुणत्वं क्रतोश्च प्राधान्यं पुरुषार्थत्वे तु विपर्यय इति । यच्चान्नसंस्कारत्वपक्षे प्रतिपाकमावृत्तिः स्यात् "प्रतिप्रधानं गुणावृत्तिरिति" न्यायात् । तत्पुरुषार्थत्वेऽपि तुल्यम् । प्रतिपुरुषमावृत्तिप्रसङ्गात् । अथ यद्येकस्मिन्काले बहुधान्नं पच्येत गृहपतिर्महानसादेवैनं कुर्वीतेति गोभिलादिवाक्यात्तन्निवृत्तिस्तर्हि यद्येकस्मिन्काले पुनः पुनरन्नं पच्यते सकृदेव बलिं कुर्वीतेत्यस्यैव पूर्ववाक्यात्तन्निवृत्तिरपि प्रतीयताम् । किञ्च ।

> वैश्वदेवमपि प्रोक्तं पूर्वैरेव मनीषिभिः ।
> अन्नस्य चात्मनश्चैव संस्कारार्थं तदिष्यते ॥

इति शौनकेनोभयार्थत्वस्य स्पष्टीकरणात्क्व विचारावसरः । तच्च सायंप्रातः कर्तव्यम् । "अथ सायंप्रातःसिद्धस्य हविष्यस्य जुहुयादि"त्याश्वलायनस्मरणात् । सायंप्रातःकरणाशक्तौ प्रातरेव द्विरावृत्त्या सह वा कार्यं यथोक्तं तेनैव ।

> प्रातरेव द्विरावृत्त्य कुर्याद्वा सह तद्द्विजः ।
> सायं वा द्विज भुञ्जीयान्न कृत्वा जात्वपि स्वयमिति ॥

अथातिथ्यम् । तदेव च मनुष्ययज्ञः । नृयज्ञोऽतिथिपूजनमिति कात्यायनस्मरणात् । यद्ब्राह्मणेभ्योऽन्नं ददाति स मनुष्ययज्ञः सन्तिष्ठत इति श्रवणाच्च ।

तत्र भोजनीयस्यातिथेर्लक्षणमाह ।

**इष्टो वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा ।**
**सम्प्राप्तो वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः ॥ ४० ॥**

इष्टः सख्यादिः "भोजयेच्चागतान् काले सखिसम्बन्धिबान्धवानि"ति याज्ञवल्क्यस्मरणात् । द्वेष्योपादानं तु ।

> काममभ्यर्चयेन्मित्रं नाभिरूपमपि त्वरिम् ।
> द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् ॥

इति मनूक्तनिन्दापरिहाराय। तथैव मूर्खापादानमपि। "नष्टाशौचे व्रतभ्रष्टे विप्रे वेदविवर्जिते। दीयमानं रुदत्यन्नं किं मया दुष्कृतं कृतमि"ति स्मृत्यन्तरोक्तनिन्दापरिहाराय। पण्डितः सदसद्विवेककुशलः।

श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः।
अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम्॥

इति मनुस्मरणात्। अत्र वैश्वदेवशब्देन देवभूतपितृयज्ञा उच्यन्ते। "तस्माद्देवपितृभूतेभ्यो दत्त्वोदीचितागोदहनादि"ति हारीतस्मरणात्। तेषामन्ते घटिकापादमात्रे काले "मुहूर्तस्याष्टमं भागं निरीक्ष्यो ह्यतिथिर्भवेदि"ति मार्कण्डेयस्मरणात्। सम्प्राप्तः समागतस्तथा च तस्मिन् काले समागमनमेवातिथिलक्षणं नेतरद्विद्यादीत्युक्तं भवति। सङ्क्रम्यते अनेन सङ्क्रमः स्वर्गस्य सङ्क्रमः स्वर्गसङ्क्रमः स्वर्गप्राप्तिहेतुरिति यावत्। तथाचाश्वमेधिके।

क्षुत्पिपासाश्रमार्त्ताय देशकालागताय च।
सत्कृत्यान्नं प्रदातव्यं यज्ञस्य फलमिच्छतेति॥

तस्यैव लक्षणान्तरमाह।

**दूराध्वोपगतं श्रान्तं वैश्वदेव उपस्थितम्।**
**अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः॥ ४१॥**

दूरश्चासावध्वा च दूराध्वा तस्मादुपागत श्रान्त क्षुत्तृष्णाश्रमकर्षितम्।

आदूरादाशया प्राप्तः क्षुत्तृष्णाश्रमकर्षितः।
यः पूज्यतेऽतिथिः सम्यगपूर्वः क्रतुरेव सः॥

इति व्यासस्मरणात्। आदूरादतिदूरादाङोऽतिशयार्थत्वात्। वैश्वदेव उपक्रम्यमाणे न वैश्वदेवान्ते सम्प्राप्तो वैश्वदेवान्त इत्यनेन पौनरुक्त्यात्।

मध्याह्ने समये चैव वैश्वदेवे हुतेऽपि च।
अतिथिश्चैव सम्प्राप्तपांसुपादं समागतम्॥

इत्यादिपुराणे वैश्वदेवोपक्रमकालस्य मध्याह्नस्य वैश्वदेवान्तात्पृथगुपादानाच्च । एतेन वैश्वदेवान्तात्कालान्तरमतिथ्यागमने पूर्वावधित्वेनेदमुक्तं नातः पूर्वमागतोऽतिथिर्भवति किं तु वैश्वदेवकालागत एवेति

तदुक्तम् । भविष्यत्पुराणे ।

अचिन्त्यमानो नाहूतो वैश्वदेवमुपागतः ।
अतिथिं तं विजानीयान्न पुनः पूर्वमागतमिति ॥

लक्षणान्तरकरणे बीजमाह ।

**नैकग्रामीणमतिथिं संगृह्णीत कदा च न ।**
**अनित्यमागतो यस्मात्तस्मादतिथिरुच्यते ॥ ४२ ॥**

एकग्रामे भव ऐकग्रामीणस्तमतिथिं न विद्यते तिथिर्यस्यासावतिथिस्तं कदापि न संगृह्णीयात् यतोऽतिथिशब्दप्रवृत्तिनिमित्तमनित्यागतत्वं तेन तिथिविशेषे नियतागमने हि नातिथित्वम् । तिथिशब्दः पर्वोत्सवयोरप्युपलक्षणम् । तथा च यमः ।

तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना ।
सोऽतिथिः सर्वभूतानां शेषानभ्यागतान्विदुरिति ॥ तिथिर्दीपालिकाप्रतिपदादिः । पर्व होलाकापूर्णिमादि । उत्सवो विवाहादिस्तत्र यो नियमेन लिप्सयाभ्यागच्छति सोऽभ्यागतोऽन्यथातिथिरिति । अनेनेष्टादीनामैकग्रामीणत्वस्यापि सम्भवान्न तथातिथित्वं यथा दूराध्वोपगतस्येत्युक्तम् । लक्षणद्वयकरणं तूत्तराभावे पूर्वस्याप्यस्त्वित्येतदर्थम् ।

इदानीं आगतेऽतिथौ यत्कर्तव्यं तदाह ।

**अतिथिं तत्र सम्प्राप्तं पूजयेत् स्वागतादिना ।**
**तथासनप्रदानेन पादप्रक्षालनेन च ॥ ४३ ॥**

यत्र भार्या वाग्नयो वा विद्यन्ते तत्र सम्प्राप्तमतिथिं पूजयेद् "प्रस्थितगृहे विद्याद्भार्या यत्राग्नयोऽपि वेति" मनुस्मरणात् । स्वागतं तत्प्रश्नः आदिशब्देनार्घ्यादीनां ग्रहणम् । तदाह हारीतः "स तस्य स्वागतमर्घ्यं

पाद्याचमनीयमासनं च प्रदद्यादिति"। तथाशब्देनाभिगमनं समुच्चीयते "तस्मादतिथिमायान्तमभिगच्छेत्कृताञ्जलिरिति" वायवीयात्। आसनं वृष्ट्यादि तस्य प्रकर्षेण विनयादिना दानेन, पादयोः प्रक्षेपेन मलश्रमापहेन क्षालनेन चकारादभ्यञ्जनेन पूजयेच्चार्घ्यपाद्येन पादाभ्यञ्जनभोजनैरिति वायवीयात्।

किञ्च।

**श्रद्धया चान्नदानेन प्रियप्रश्नोत्तरेण च।**
**गच्छतश्चानुयानेन प्रीतिमुत्पादयेद्गृही ॥ ४४ ॥**

श्रद्धया आस्तिक्येन चकाराद्भक्त्या च।

पथि श्रान्तमविज्ञातमतिथिं क्षुत्पिपासितम् ॥
यो न पूजयते भक्त्या तमाहुर्ब्रह्मघातकम्।

इति व्यासस्मरणात्। प्रश्नोत्तरयोः समाहारः प्रश्नोत्तरं प्रियं च तत्प्रश्नोत्तरं च तेन स्वागतप्रश्नात्पृथगुपादानमन्येष्वपि प्रश्नोत्तरेषु प्रियत्वविधानार्थं चकाराच्चक्षुर्मनसोरपि दानेन। "चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृतामिति" व्यासस्मरणात्। गच्छतश्च स्वसीमावध्यनुगमनेन "अतिथिं श्रोत्रियं तृप्तमासीमान्तमनुव्रजेदिति" योगिस्मरणात्। एतेन व्यस्तेन समस्तेन वा गृहस्थोऽतिथेः प्रीतिमुत्पादयेन्न शास्त्रार्थमात्रानुष्ठानेन कृतार्थो भवेत्।

येन येन च तुष्येत नित्यमेव तथातिथिः।
अप्यात्मनः प्रदानेन तत्तत्कुर्याद्विचक्षणः ॥ इतिब्राह्मात्।

अतिथेः प्रीत्यनुत्पादने प्रत्यवायमाह।

**अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते।**
**पितरस्तस्य नाश्नन्ति दशवर्षाणि पञ्च च ॥ ४५ ॥**

यस्य गृहात् भार्याग्निनिवासस्थानादुक्तलक्षणोऽतिथिर्भग्नाशः सत्काराशारहितः परावर्तते तस्य पितरः पञ्चदशवर्षाणि तत्कृते श्राद्धादौ नाश्नन्ति चकाराद्देवा अपि।

तदुक्तं दानधर्मे ।

अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते ।
पितरस्तस्य देवाश्च अग्नयश्च तथैव च ॥
निराशाः प्रतिगच्छन्ति अतिथेरप्रतिग्रहादिति ।

किञ्च ।

**काष्ठभारसहस्रेण घृतकुम्भशतेन च ।**
**अतिथिर्यस्य भग्नाशः तस्य होमो निरर्थकः ॥ ४६ ॥**

यस्यातिथिर्भग्नाशस्तस्य काष्ठभारसहस्रेण घृतकुम्भशतेन च कृतोऽपि होमो यज्ञादौ निरर्थको भवति । तदुक्तमाश्वमेधिके ।

पाकयज्ञैर्महायज्ञैः सोमसस्थाभिरेव च ।
ये यजन्ति न चार्चन्ति गृहेऽप्यतिथिमागतम् ॥
तेषां यशोऽभिकामानां दत्त मिष्टं च यद्भवेत् ।
वृथा भवति तत्सर्वमाशया ह्यतिथेर्हतमिति ॥

एवं वचनद्वयेनातिथ्यर्चनाभावे देवपितृकर्मणोर्नैरर्थक्योक्त्या सर्वधर्मक्षय उक्तो भवति । तथा चाश्वलायनः ।

अनर्चितोऽतिथिस्तस्मै दत्वा दुष्कृतमात्मनः ।
गृहिणो तत्कृतान्धर्मान् सर्वानादाय गच्छतीति ॥

इदानीमतिथिसत्कारे फलप्रशंसामाह ।

**सुक्षेत्रे वापयेद्बीजं सुपात्रे निक्षिपेद्धनम् ।**
**सुक्षेत्रे च सुपात्रे च ह्युप्तं तन्न विनश्यति ॥ ४७ ॥**

यथा सुक्षेत्रे बीजवापः कर्तव्य इति लोकप्रसिद्धिस्तथा सुपात्रे धनं देयमित्यपि शास्त्रसिद्धान्तः । दृष्टान्तदार्ष्टान्तिकयोरवैशम्यमुपपादयति हि यतः सुक्षेत्रे सुपात्रे वोप्तं न विनश्यति महाफलं भवतीत्यर्थः । सुक्षेत्रदृष्टान्तो ब्राह्मणस्यापि सुक्षेत्रत्वप्रतिपादनाय । तथा च दानधर्मे ।

ब्राह्मणो हि महद्भूतं क्षेत्रभूत युधिष्ठिर ।
उप्यते तत्र यद्बीजं तद्धि पुण्यफल महदिति ॥

श्रद्धयाऽतिथिं पूजयेदित्युक्तं तत्र श्रद्धादिस्वरूपमाह ।

**न पृच्छेद्गोत्रचरणे न स्वाध्यायं श्रुतं तथा ।**
**हृदये कल्पयेद्देवं सर्वदेवमयो हि सः ॥ ४८ ॥**

गोत्रं वंशप्रवर्तक महर्षिसम्बन्धः चरणं कठबाह्वृचादिचरणव्यूहप्रसिद्धम् । तत्वाचारः । स्वाध्यायः शाखाविशेषः । श्रुतं मीमांसाव्याकरणादि तथाशब्देन देशनामकुलानां ग्रहणम् । अत एव यमः ।

न पृच्छेद्गोत्रचरणे देशं नाम कुलं श्रुतम् ।
अध्वनोऽभ्यागतं विप्रं भोजनार्थमुपस्थितमिति ॥

अतिथेरिदं न पृच्छेत् । एकेनैव निषेधेनार्थसिद्धौ निषेधान्तरोपादानमतिथेरपि तत्कथनिषेधार्थम् । तथा च विष्णुः ।

देशं गोत्रं कुलं विद्यामन्नार्थं यो निवेदयेत् ।
वैवस्वतेषु धर्मेषु वान्ताशी स प्रकीर्तितः ॥ इति ।

न केवलं गोत्रादिप्रश्नवर्जनं किं तु हृदि देवत्वेनापि भावनीयः । तथा च वैष्णवे ।

स्वाध्यायगोत्रचरणमपृष्ट्वा च तथा कुलम् ।
हिरण्यगर्भबुध्या तं मन्यताभ्यागतं गृही ॥

तादृशभावनाया हेतुमाह । "यतोऽसौ सर्वदेवमय" इति ।

तदुक्तं पुराणसारे ।

धाता प्रजापतिः शक्रो वन्हिर्वसुगणो यमः ।
प्रविश्यातिथिमेवैते भुञ्जतेऽन्नं द्विजोत्तम ॥ इति ।

एवमुत्तरपूर्वाभ्यामर्द्धाभ्यां भक्तिश्रद्धयोः स्वरूपमुपवर्णितं न तु वास्तवः प्रश्नाभावः तथा सति जात्याद्यज्ञानेनातिथ्यतारतम्यं न स्यात् ।

यथाह मनुः ।

आसनावसथौ शय्यामनुव्रज्यामुपासनम् ।
उत्तमे तूत्तमं कुर्याद्धीने हीनं समे सममिति ॥

यत्तु ।

देशं नाम कुलं विद्यां पृष्ट्वा पात्रं प्रयच्छति ।
न स तत्फलमाप्नोति दत्वा स्वर्गं न गच्छति ॥

इति यमस्मरणं तदपि विद्यादिपुरस्कारेण पूज्यत्वनिराकरणपरम् । अत एव वायवीये ।

न हि विद्यादयस्तस्मिन् पात्रता हेतवः स्मृताः ।
केवलेनातिथित्वेन स भवेत्पङ्क्तिपावनः ॥ इति ।

यदुक्तमनित्यागमनेनातिथित्वमिति तस्य क्व चिदपवादमाह ।

**अपूर्वः सुव्रती विप्रो ह्यपूर्वश्चातिथिस्तथा ।**
**वेदाभ्यासरतो नित्यं त्रयोऽपूर्वे दिने दिने ॥ ४६ ॥**

सुव्रती ब्रह्मचारी "सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्रताय चे"ति योगिस्मरणात् । स पूर्वोऽप्यपूर्व एव विप्रोऽप्यपूर्वो विप्रो विद्यावान् ।

जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते ।
विद्यया वापि विप्रत्व त्रिभिः श्रोत्रिय उच्यते ॥

इति स्मरणात् । वेदाभ्यासरतोऽपि तथा अपूर्व एव वेदस्य प्रणवप्रतिपाद्यस्य परब्रह्मणोऽभ्यासरतो निरन्तरं परिशीलनं नित्यं तन्निष्ठः

न वेदं वेदमित्याहुर्वेद्यं नाम परं पदम् ।
तत्पदाभ्यासनिरतो वेदाभ्यासरतो मतः ॥

इति स्मृत्यन्तरोक्तलक्षणोपपत्तिश्च । एते त्रयो दिने दिने प्रत्यहमागता अप्यपूर्वे अपूर्ववदर्चनीयाः । पुनरपूर्वे इति नित्यार्चनाय समुदायानुवादः । त्रय इति प्रचयशिष्टसंख्यानुवादो न परिसंख्या तेन आग्निहोत्रमखकृतोरपि प्राप्तिः । तदाह बृहत्पराशरः ।

पतिव्रत्यग्निहोत्री च तथा च मखकृद्द्विजः ।
सदैतेऽतिथयः प्रोक्ता अपूर्वाश्च दिने दिने इति ।

यत्तु

व्रती यतिर्वैकरात्रं निवसन्नुच्यतेऽतिथिः ।
यस्मादनित्यं वसति तस्मात्तमतिथिं विदुः ।

इति यमस्मरणं तद्यतिधर्मकथनाय "अनित्यां वसतिं वसेदिति" वसिष्ठवचनात्। यत्त्वतिथिदृष्टान्तेन यतिब्रतिनोरप्यत्र पूज्यतोच्यत इति। तन्न। त्रयोपूर्वे इति वाक्यशेषासङ्गतेः। अतिथिभोजनाशक्तौ भिक्षादानं विधास्यति।

तत्र वैश्वदेवात्प्रागागते भिक्षुके कथमित्यत आह।

**वैश्वदेवे तु सम्प्राप्ते भिक्षुके गृहमागते।**
**उद्धृत्य वैश्वदेवार्थं भिक्षुकं तु विसर्जयेत् ॥ ५० ॥**

वैश्वदेवे सम्प्राप्ते प्रसक्ते अकृत इति यावत्। भिक्षुके भिक्षावृत्तौ

ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः।
अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ॥

इति व्यासोक्तान्यतमे समागते वैश्वदेवार्थं वैश्वदेवोपयुक्तमन्नमुद्धृत्य पात्रान्तरे पृथक्कृत्य अवशिष्टादन्नाद्भिक्षां दत्त्वा भिक्षुकं विसर्जयेत्।

तदुक्तं नृसिंहपुराणे।

अकृते वैश्वदेवे तु भिक्षुके गृहमागते।
उद्धृत्य वैश्वदेवार्थं भिक्षां दत्त्वा विसर्जयेदिति ॥

अत्रातिथिभोजनप्रत्याम्नायस्य भिक्षादानस्य वैश्वदेवात् प्राक्करणेऽपि मनुष्ययज्ञसिद्धेर्न तदन्ते पुनरनुष्ठानमित्युक्त्या क्रमविशेषाभिधानेन वैश्वदेवान्त इतिपाठक्रमबाधात्। यथा दर्शपूर्णमासयोर्बर्हिरभिवासनोत्तरकालमाम्नातायाः वेदेः पूर्वेद्युरमावास्यायां "वेदिं करोती"त्यनेनापकर्षात् पाठक्रमबाधः पौर्णमास्यां तु पाठक्रम एव बाधकाभावात् तद्वदिहापि वैश्वदेवात् प्रागागते भिक्षौ श्रुत्या क्रमविशेषाभिधानात्पाठक्रमबाधोऽन्यत्र तु स एवेति। न च देवतापकर्षन्यायेन वैश्वदेवस्याप्यपकर्षः यथोक्तन्यायस्य तदपवादकत्वात्। उद्धृत्येत्यनेन वैश्वदेवस्य क्रमान्तरविधानाच्चेति।

भिक्षुविशेषप्रत्याख्याने प्रत्यवायविशेषमाह।

**यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ।**
**तयोरन्नमदत्त्वा तु भुक्त्वा चान्द्रायणं चरेत् ॥५१॥**

यतिब्रह्मचारिणोर्भिक्षामदत्वा भुञ्जानो वक्ष्यमाणलक्षणचान्द्रायणं चरेत्तयोः पक्वान्नस्वामित्वात् । अत्र पक्वान्नस्वामिनोरपाचकतयाऽनतिक्रमणीयत्वमुक्तमतस्तदतिक्रमेणान्यभोजनेऽपि प्रत्यवायस्तदवस्थ एव । तथा च यमः ।

अपचन्तमतिक्रम्य पचन्त यस्तु भोजयेत् ।
श्रौष्ट्रिकाणां भजेद्योनिं वर्षाणामधिकं शतमिति ॥

इदानीमतिथिभोजनाशक्तस्य भिक्षादाननियममाह ।

**दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणाम् ।**
**इच्छया च ततो दद्याद्विभवे सत्यवारितम् ॥ ५२ ॥**

परिव्राट् यतिः ब्रह्मचारिणामिति बहुवचनेन पूर्ववाक्योक्तयोर्यतिव्रतिनोर्मध्यस्थस्य विप्रस्य ग्रहणं तेन यतिविप्रव्रतिनां भिक्षात्रयं दद्यादेव तदाह मार्कण्डेयः ॥

भोजनं हन्तकारं वाप्यग्रं भिक्षामथापि वा ।
अदत्वा नैव भोक्तव्यं यथाविभवमात्मन इति ॥

भिक्षा च ग्रासमात्रा ।

ग्रासमात्रा भवेद्भिक्षा अग्रं ग्रासचतुष्टयम् ॥
अग्रं चतुर्गुणीकृत्य हन्तकारो विधीयते॥ इति मनुस्मरणात् ।

नेयं परिसङ्ख्या विभवे सतीच्छयाऽवारितं दद्यात्तदाह कूर्मः ॥

भिक्षां वै भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे ।
दद्यादन्नं यथाशक्ति ह्यर्थिभ्यो लोभवर्जित इति ॥

यतिभिक्षादाने प्रकारमाह ।

**यतिहस्ते जलं दद्याद्भैक्ष्यं दद्यात्पुनर्जलम् ।**
**तद्भैक्ष्यं मेरुणा तुल्यं तज्जलं सागरोपमम् ॥ ५३ ॥**

यतेर्भिक्षादाने आद्यन्तयोर्हस्ते जलं दद्यात्ततश्च भैक्ष्यजलयोर्मेरुसागरतुल्यता भवति ।

इदानीं राज्ञोऽप्यातिथ्यमाह ।

**यस्य च्छत्रं हयश्चैव कुञ्जरारोहमृद्धिमत् ।**
**ऐन्द्रस्थानमुपासीत तस्मात्तं न विचारयेत् ॥ ५४ ॥**

छत्रमातपवारणं, हयोऽश्वः, चकाराद्वालव्यजने आरुह्यतेऽस्मिन्नित्यारोहो रथशिबिकादिः कुञ्जरश्चारोहश्च तयोस्समाहारः कुञ्जरारोहं सेनाङ्गत्वादेकवद्भावः, ऋद्धिमद्राष्ट्र ऐन्द्रदैवत्य स्थानमासनं सिंहासनमिति यावत् तस्येन्द्रदैवत्यत्वात् । यस्येदं सर्वं तमुपासीत पूर्वोक्तस्वागतादिप्रश्नेन परिचरेत् लघुना राजपदेन तमनुपपादाय यद्विशेषणैस्तल्लक्षणं तत्क्षत्रियातिरिक्तस्यापि तद्गुणवतः पूज्यत्वप्रतिपादनाय राजानः शूद्रभूयिष्ठा इत्यादिना कलौ राज्ञा शूद्रभूयिष्ठत्वाभिधानात् । अत एवाह भगवान् ।

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्व मम तेजोंऽशसम्भवमिति ॥

तस्माद्राज्ञः सकाशादात्मानं न निवारयेन्न परिचरणरहितं कुर्यादिति ।

यदुक्तं "वैश्वदेवे तु सम्प्राप्ते" इति तत्रोपपत्तिमाह ।

**वैश्वदेवकृतं पापं शक्तो भिक्षुर्व्यपोहितुम् ।**
**नहि भिक्षुकृतान् दोषान् वैश्वदेवो व्यपोहति ॥५५॥**

तस्मादेव कृतत्वमत्रान्वेति प्रथममकृतेन वैश्वदेवेन कृतं पापं पूजितो भिक्षुर्व्यपोहितुं शक्नोति तस्य सर्वदेवमयत्वात् । अपूजितेन भिक्षुकेण कृतान्दोषान् प्राक्कृतोऽपि वैश्वदेवो न व्यपोहति । तस्य होमो निरर्थक इति प्रागुक्तेः ।

पञ्चानां कर्मवाक्यादस्य नित्यत्वं पूर्वमुक्तं तत्र वैश्वदेवस्य तन्निर्वाहायाकरणे प्रत्यवायमाह ।

**अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजाधमाः ।**
**सर्वे ते निष्फला ज्ञेया पतन्ति नरकेऽशुचौ ॥ ५६ ॥**

ये द्विजाधमाः द्विजेषु त्रैवर्णिकेषु अधमा वैश्वदेवमकृत्वैव भुञ्जते ते निष्फलास्तत्कर्मणः फलभाजो न भवन्तीति ज्ञेयम् । यद्वा द्विजाः त्रैवर्णिकाः अधमाः शूद्राश्च तेषामपि "नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेदिति" योगिना पञ्चयज्ञविधानात् । न तावन्मात्रमेव किन्त्वशुचौ नरके पतन्ति ।

वैश्वदेवातिथ्ययोरकरणे प्रत्यवायान्तरमाह ।

**वैश्वदेवविहीना ये आतिथ्येन बहिष्कृताः ।**
**सर्वे ते नरकं यान्ति काकयोनिं व्रजन्ति च ॥ ५७ ॥**

ये वैश्वदेवरहितास्सन्त आतिथ्येनापि रहितास्ते सर्वे रौरवादिनरकमनुभूय काकयोनिं व्रजन्ति । एवमन्यत्रापि कल्पनीयम् ।

तदाह व्यासः ।

पञ्चयज्ञांस्तु यो मोहान्न करोति गृहाश्रमी ।
तस्य नायं न च परो लोको भवति धर्मतः ॥ इति ।

अतिथित्वेन स्तुवन्नन्यानपि भोजनीयानाह ।

**पापी वा यदि चण्डालो विप्रघ्नः पितृघातकः ।**
**वैश्वदेवे तु सम्प्राप्तः सोऽतिथिः स्वर्गसङ्क्रमः ॥५८॥**

पापी गोवधाद्युपपातकी, चाण्डालो ब्राह्मण्यां शूद्रादुत्पन्नः, विप्रघ्नो ब्रह्महा पितृघातको मातापित्रोः प्रमापकः, यदि वा शब्दाभ्यां शत्रुश्वपाकयोरपि ग्रहणम् ॥

चाण्डालो वा श्वपाको वा शत्रुर्वा पितृघातकः ।
देशकाले ह्युपगतो भरणीयो मतो मम ॥

इति विष्णुधर्मोत्तरात् । एषामन्यतमो वैश्वदेवे वैश्वदेवकाले सम्प्राप्तोऽतिथिरतिथिवदन्नेन पूजनीयो नत्वशेषातिथ्यभाक् ।

तदुक्तमाश्वमेधिके ।

चाण्डालो वा श्वपाको वा काले यः कश्चिदागतः ।
अन्नेन पूजनीयश्च परत्र हितमिच्छता ॥ इति ।

सोऽपि स्वर्गप्राप्तिहेतुरिति ।

इदानीं भोजनविधिधर्मानाह ।

**यो वेष्टितशिरा भुङ्क्ते यो भुङ्क्ते दक्षिणामुखः ।**
**वामपादकरः स्थित्वा तद्वै रक्षांसि भुञ्जते ॥ ५९ ॥**

यः पुमानुष्णीषादिना वेष्टितशिरा यश्च दक्षिणदिङ्मुखो यश्च वामपादे करमारोप्य यश्च स्थित्वा भुङ्क्ते तत्सर्वं रक्षांसि भुञ्जते । वेष्टितशिरस्कत्वं तूत्सङ्गकृतभाजनैकवस्त्रनग्नसोपानत्कादीनामुपलक्षणम् ।

तदुक्तं ब्राह्मे ।

न वेष्टितशिराश्चापि नोत्सङ्गकृतभाजनः ।
नैकवस्त्रो दुष्टमध्यः सोपानत्कः सपादुक इति ॥

दुष्टमध्यो नग्नः दक्षिणाभिमुखत्वं विदिङ्मुखस्याप्युपलक्षणं ।

तथा च कौर्मे ।

यो भुङ्क्ते वेष्टितशिरा यश्च भुङ्क्ते विदिङ्मुखः ।
सोपानत्कश्च यो भुङ्क्ते सर्वं विद्यात्तदासुरमिति ॥

एतेन परिशेषतो दिक्त्रयाभिमुखत्वमुक्तम् । तदाह गोभिलः ।

प्राङ्मुखोऽवस्थितो विप्रः प्रतीच्यां वा यथामुखम् ।
उत्तरे पितृकार्ये तु दक्षिणे तु विवर्जयेत् ॥ इति ।

स चायं दक्षिणमुखत्वनिषेधो नित्यभोजनविषयः काम्ये तु ।

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।
श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः ॥

इति मानवे तद्विधानात् । वामपादकरत्वं प्रसारितपादस्याप्युपलक्षणम् ।

न प्रसारितपादस्तु पादारोपितपाणिमान् ।
न बद्धासनसंस्थश्च न च पर्यङ्कमास्थितः ॥ इति स्मरणात् ।

स्थितत्वं यानाद्यारूढस्याप्युपलक्षणम् ।

गजाश्वरथयानोष्ट्रमास्थितो नैव भक्षयेत् ।
श्मशानात्यन्तरस्थो वा देवालयगतोऽपि वा ॥
शयनस्थो न भुञ्जीत न पाणिस्थं न चासने ॥ इति ब्राह्मात् ।

इतरानपि भोजनधर्मान् षष्ठे वक्ष्यति ।

षट्कर्माभिरत इत्यनेन चातुर्वर्ण्यस्य साधारणान् धर्मान्विरूप्य सुपात्रे निक्षिपेद्वित्तमित्यादिना ब्राह्मणस्य प्रतिग्रहादींश्चासाधारणान् सम्सूच्येदानीं क्रमप्राप्तानभिषिक्तस्य क्षत्रियस्यासाधारणधर्मानाह ।

**अव्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः ।**
**तं ग्रामं दण्डयेद्राजा चौरभक्तप्रदो हि सः ॥६०॥**

व्रतानि ब्रह्मचारिधर्माः मधुमांसादिवर्जनादयस्तद्रहिताः स्वाध्यायमप्यनधीयाना द्विजास्त्रैवर्णिका ब्रह्मचारिणो यत्र भैक्ष्यमाचरन्ति त ग्राम राजाभिषिक्तः क्षत्रियो दण्डयेद् द्रव्यापहारादिना दमयेत् । ननु अव्रतादीनां भैक्षचरत्वे ग्रामस्य कोऽपराध इत्यत आह । यतोऽसौ ग्रामचौरेभ्य इव भक्तमन्न प्रददातीति । ननु एतेनाव्रतादिभ्योऽन्नदानं निषिद्धमिति गम्यते । तच्चानुपपन्न पापादीनामप्यन्नदानविधानात् । सत्यम् । यत्र भिक्षासौकर्यमदेन द्विजा नाधीयते न च व्रतमनुतिष्ठन्ति तस्य तादृशेभ्यो भिक्षादान निवार्य भिक्षादान त्वपूर्वेभ्यस्तादृशेभ्यो ऽपि विधीयत इति न विरोधः । "विद्वद्भोज्यान्यविद्वांसो येषु राज्येषु भुञ्जते । तान्यनावृष्टिमृच्छन्ति महद्वा जायते भयमिति" वसिष्ठेन तादृशानामदण्डने राजानिष्टप्रतिपादनात् । यद्यप्यत्र राजपदोपादानाद्राज्ञ एवायं धर्म इति प्रतीयते तथापि तस्य क्षत्रियमात्रपरत्वात्तद्धर्म एवायमिति । द्विविधो हि राजधर्मो दुष्टशिक्षा शिष्टपरिपालन च तत्राद्येन दुष्टशिक्षोक्ता ।

इदानीं शिष्टपरिपालनमाह ।

**क्षत्रियो हि प्रजा रक्षन् शस्त्रपाणिः प्रदण्डवान् ।**
**निर्जित्य परसैन्यानि क्षितिं धर्मेण पालयेत् ॥६१॥**

क्षत्रियः परेषा क्षतत्राणयोग्यो धर्मेण धर्मोऽयमिति मत्वा नार्थाद्विलोभेन क्षितिं पृथिवीं पालयेद्वृत्त्यर्थं धर्मार्थं च । तथा च याज्ञवल्क्यः । "प्रधानं क्षत्रिये कर्म प्रजानां परिपालनमिति" । पालन नाम व्याघ्रचौरशत्रुभ्यो भयापनयनं तत्र व्याघ्रादिभयापनयनोपाय शस्त्रपाणिपदेनाह ।

तेन शस्त्रधारणस्य दृष्टार्थत्वाद्व्याघ्रादीन् निहन्यादेवेति तस्यार्थः । चौरादिभयापनयनोपायमाह प्रदण्डवानिति । ततश्च देशकालानुबन्धापराधपरीक्षणरूपेण प्रकर्षेण चौरादिष्वष्टादशव्यवहारपदपराजितेषु धिग्वाग्धनवधान्यतमं दण्डं कुर्यादित्यर्थः । शत्रुभयापनयनोपायमाह निर्जित्येति पार्ष्णिग्राहादिभिर्निजप्रजा रक्षित्वा परेषामरितन्मित्रादीनां सैन्यानि हस्त्यश्वरथपदातिसहितानि सामादिप्रयोगासंभवे सेनाप्रयोगेण नितरां तद्राष्ट्रापपीडनादिभिर्जित्वा स्ववशमानयेदित्यर्थः । एतैश्चतुर्भिर्विशेषणैः सकलव्यवहाराध्यायप्रतिपाद्योऽर्थ उपलक्षितस्तस्य सर्वयुगसाधारणत्वात् अन्यथाऽऽचारप्रायश्चित्तवत्सोऽप्युच्छिद्येतेति ।

वृत्त्यर्थं क्षितिं पालयेदित्युक्तं तत्र वृत्त्युपायमाह ।

**पुष्पं पुष्पं विचिनुयान्मूलच्छेदं न कारयेत् ।**
**मालाकार इवारामे न यथाङ्गारकारकः ॥ ६२ ॥**

अत्र शक्तिलक्षणाभ्यां दृष्टान्तदार्ष्टान्तिके उभे अपि प्रतिपाद्येते यथा राजा पुष्पं पुष्पोपलक्षं फलं व्रीहियवादि वीप्सया तत्तत्कालोपपन्नं यथा स्वांशं विचिनुयाद्गृह्णीयान्न तु मूलस्य तज्जनकबीजवृक्षादेरुच्छेदमत्यन्तापहारं कुर्यात् । अत्र चान्वयदृष्टान्तो मालाकारो यथारामे यदा यदा यद्यत्पुष्पं विकसति तत्तद्विचिनोति तद्वदिति । व्यतिरेके त्वङ्गारकारो यथा वृक्षं समूलमुन्मूल्य दहति तथा न स्यादिति ।

तथाह मनुः ।

यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः ।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः कर इति ॥

अथ वैश्यासाधारणधर्मानाह ।

**लाभकर्म तथा रत्नं गवां च परिपालनम् ।**
**कृषिकर्म च वाणिज्यं वैश्यवृत्तिरुदाहृता ॥६३॥**

लाभो द्रव्यवृद्धिस्तदर्थं कर्म लाभकर्म वृद्ध्यर्थं धनप्रयोग इत्यर्थः । लोहकर्मेतिपाठे लोहानां सुवर्णरजतादीनां कर्माघादिपरिज्ञानमित्यर्थः ।

लोहाना तान्तवस्य चेति मानवात् । रत्न मणिमुक्तादि तस्य परीक्षणा क्रयविक्रयाः कर्मशब्दानुवृत्त्या गृह्यन्ते । तथाशब्देन गन्धरसादीनामर्घ्य- र्घादिपरिज्ञानं गृह्यते ।

तथा च मनुः ।

मणिमुक्ताप्रवालानां लोहाना तान्तवस्य च ।
गन्धाना च रसाना च विद्यादर्घबलाबलमिति ॥

गवा परितः शीतवर्षातपेभ्यः पालन तृणजलदानं बन्धमोक्षदो- हादि चकारादन्येषामपि पशूनाम् । तथा च वाराहे ।

स्वाध्यायं यजनं दान कुसीद पशुपालनम् ।
गोरक्षाकृषिवाणिज्य कुर्याद्वैश्यो यथाविधीति ॥

कृषिकर्म द्वितीयाध्याये वक्ष्यमाणलक्षणा चकाराद्भृतिभाषादिवि- ज्ञान च । तथा च मनुः ।

भृत्याना च भृतिं विद्याद्भाषाश्च विविधा नृणामिति ।

वाणिज्यं विक्रयद्रव्याणा क्रयविक्रयौ एषा सर्वा वैश्यस्य वृत्तिर्जीवनोपाय उदाहृत इति ।

अथ शूद्रासाधारणधर्मानाह ।

**शूद्रस्य द्विजशुश्रूषा परमो धर्म उच्यते ।**
**अन्यथा कुरुते किं चित् तद्भवेत्तस्य निष्फलम् ॥६४॥**

द्विजाना विप्राणा शुश्रूषा सेवा शूद्रस्य परमो धर्मो दृष्टादृष्टसा- धनत्वात् । अन्यथा विप्रसेवामन्तरेण यदि किं चित्पाकयज्ञादिक करोति तत्सर्वं तस्य निष्फलं भवति ।

तदाह मनुः ।

विप्रसेवैव शूद्रस्य साधनं कर्म कथ्यते ।
यदतोऽन्यद्धि कुरुते तद्भवेत्तस्य निष्फलम् ॥
स्वर्गार्थमुभयार्थं वा ब्राह्मणानेव राधयेत ।
जातब्राह्मणशब्दस्य सा ह्यस्य कृतकृत्यतेति ॥

यत्र शूद्रधर्मास्त्रिवर्णशुश्रूषेत्यादिदेवलवाक्ये क्षत्रियवैश्यसेवाश्र- वणं तत्केवलवृत्त्यर्थत्वेन । अत एव मनुः ।

शूद्रस्तु वृत्तिमाकाङ्क्षन् क्षत्रमाराधयेद्यदि ।
धनिनं वाप्युपाराध्य वैश्यं शूद्रो जिजीविषेदिति ॥

यदा द्विजशुश्रूषया न जीवति तदा किं कार्यमित्यत आह ।

**लवणं मधु तैलं च दधि तक्रं घृतं पयः ।**
**न दुष्येच्छूद्रजातीनां कुर्यात्सर्वेषु विक्रयम् ॥ ६५ ॥**

लवणं शम्भलादि मधु क्षौद्रं तैलादिस्नेह दधि प्रसिद्धम् । तक्रमुदश्विद् घृतं सर्पिः पयः क्षीरं चकारादन्यदपि फलपुष्पादि विक्रीयमाणं शूद्रजातीनाञ्च दूष्येन्न दोषमावहेत्तस्माच्छूद्रः सर्वेषु लवणादिषु विक्रयं कुर्यात् । शूद्रपदेनार्थसिद्धौ जातिपदोपादानं सूतादिप्रतिलोमजातीनामपि प्राप्त्यर्थं 'शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः" इति स्मरणात् । लवणादिपरिगणनेऽपि सर्वपदोपादानमप्रतिषिद्धानां सर्वेषामपि विक्रयप्राप्त्यर्थम् ।

तथा च कालिकापुराणे ।

विक्रयं सर्ववस्तूनां कुर्वन् शूद्रो न दोषभाक् ।
मधु चर्म सुरां लाक्षां मुक्त्वा मांसं च पञ्चममिति ।

मध्वत्र मद्यं तस्यैवात्र प्रतिषेधात् ॥

इदानीं शूद्रस्य वर्ज्यानाह ।

**विक्रीणन् मद्यमांसानि ह्यभक्षस्य च भक्षणम् ।**
**कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात् ॥ ६६ ॥**

मद्यं पानसादि द्वादशविधं तथा च पुलस्त्यः ।

पानसं द्राक्षमाधूकं खार्जूरं तालमैक्षवम् ॥
मधूत्थं सैरमारिष्टं मैरेयं नारिकेलजम् ।
समानानि विजानीयान्मद्यान्येकादशैव तु ॥
द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतमिति ।
मांसं भक्ष्यमभक्ष्यं च बहुवचनाच्चर्मलाक्षयोर्ग्रहणम् ॥

तदुक्तं कालिकापुराणे ।

विक्रयं सर्ववस्तूनां कुर्वन् शूद्रो न दोषभाक् ॥
मधु चर्म सुरां लाक्षां मुक्त्वा मांसं च पञ्चममिति ।

एतानि विक्रीणन्नभक्ष्यं गोमांसादि तस्य भक्षणमगम्या मातृभगिन्यादयस्तासां गमनं च कुर्वन् शूद्रस्तत्क्षणात् सद्यः सद्धिक्रयभक्षणगमनैरपि पतति द्विजातिपरिचर्यानर्हो भवति । तदाह व्यतिरेकमुखेन मनुः

यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः ।
तानि कर्माणि कुर्वीत शिल्पानि विविधानि चेति ॥

ननु मद्यादिविक्रयस्याभक्ष्यभक्षणादीनां च साधारणनिषेधेनैव सिद्धौ पुनर्निषेधो व्यर्थ इति चेन्न । सद्यः पातित्यप्रतिपादनार्थत्वात् । नन्वेवमप्यगम्यागमननिषेधो न कार्यस्तस्य सद्य एव पातित्यहेतुत्वादिति चेत् । मैवं मात्राद्यतिरिक्तपरदारमात्रगमनेऽपि तस्य पातित्याभिधायकत्वात् ।

अत एवाह योगीश्वरः भार्यारतिः । अयमत्रार्थः स्वदारनिरत इत्यनेन साधारणेनैव सिद्धौ पुनः शूद्राणां भार्यारतत्वाभिधानं पारदार्यमात्रे द्विजातिपरिचर्यानर्हत्वप्रतिपादनाय तदेव च स्पष्टिकृतमाचार्यैरिति ।

किञ्च ।

**कपिलाक्षीरपानेन ब्राह्मणीगमनेन च ।**
**वेदाक्षरविचारेण शूद्रश्चाण्डालतां व्रजेत् ॥ ६७ ॥**

कपिलाया गोः क्षीरस्य पानेन । यद्यप्येतद्धुतशेषाभावे ब्राह्मणस्य क्षत्रियवैश्ययोश्च जात्यैव निषिद्धम् ।

क्षत्रियश्चैव वृत्तस्थो वैश्यः शूद्रोऽपि वा पुनः ।
यः पिबेत्कपिलाक्षीरं न ततोऽन्योऽस्त्यपुण्यकृत् ॥

इत्यापस्तम्बस्मरणात् ।

कपिलायाः पिबेच्छूद्रो नरके स विपच्यते ॥
हुतशेषं पिबेद्विप्र सोऽपि स्यादन्यथा पशुः ।

इति भविष्यवचनाच्च । तथापि शूद्रचाण्डालतापादककर्मसामान्येनात्राभिहितम् । एकवचनं तु सकृत्कृतस्याप्यस्य जात्यन्तरापादकत्वं स्पष्टयितुम् । एवमुत्तरत्रापि जातिमात्रेण ब्राह्मणीगमनेन । न चागम्या-

गमननिषेधेनास्य पौनरुक्त्य शङ्क्यम् । प्रत्यवायभेदात् । तथा हि पूर्वं पातित्यमात्र प्रायश्चित्तापनोद्यमगम्यागमनेन जन्यत इत्युक्तमत्र तु चाण्डालत्वरूपजात्यन्तरत्व प्रायश्चित्तानपनोद्य ब्राह्मणीगमनेन जन्यत इत्युच्यत इति न पौनरुक्त्यम् । चकाराच्छालग्रामपूजनेन । तदाह आपस्तम्बः ।

प्रणवोच्चारणाच्चैव शालग्रामशिलार्चनात् ।
ब्राह्मणीगमनाच्चापि शूद्रश्चाण्डालतामियादिति ॥

विशेषस्त्वत्रोपपादितोऽधस्तात् । वेदाक्षराणा विचारेण विचारेणनामात्र ज्ञानम् ।

चरधातोर्गत्यर्थत्वात्तदर्थाना च ज्ञानार्थत्वात् । ज्ञान च श्रवणोच्चारणार्थजिज्ञासाभिर्जायत इति श्रवणादीना निषेधः । तथा च श्रूयते अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रपूरणमिति । पद्य वा एतच्छ्मशान यच्छूद्र इति भवति चोदाहरणे जिह्वाच्छेदो धारणे शरीरभेद इति । एतदेवाभिप्रेत्योक्तं व्यासेन श्रवणाध्ययनप्रतिषेधात् स्मार्तश्चेति । अर्थजिज्ञासा तु स्वाध्यायाध्ययनविधेरर्थज्ञानफलकत्वादध्ययननिषेधेनैव निषिद्धा अर्थज्ञाननिषेधे च तत्साधनानां पुराणन्यायमीमांसाधर्मशास्त्राङ्गानामपि निषेधः । तथा च कालिकापुराणे ।

मोहाद्वा कामतः शूद्रः पुराणं संहिता स्मृतिम् ।
पठन्नरकमाप्नोति पितृभिः सह कूदनम् ॥
पुराण धर्मशास्त्राणि संहिता च मुनीरिताः ।
नाध्यापयेन्नृपः शूद्रैर्विहितानि यदृच्छयेति ॥

कूदनं नरकविशेषः । धर्मशास्त्रपदेन न्यायमीमांसयोरपि ग्रहणं तयोरपि धर्मप्रतिपादकत्वात् । एवं वेदज्ञानसाधनाना श्रवणादीनां निषेधेऽपि पुराणश्रवणे प्रतिप्रसवो महाभारते "श्रावयेच्चातुरो वर्णान्कृत्वा ब्राह्मणमग्रत"इति । अत्र श्रावणस्य वृत्त्यर्थत्वेनाविधेयत्वाच्चतुर्णामपि वर्णाना श्रवण विधीयते । एतया निषादस्थपति याजयेदितिवत् । अत एव पुराणमुपक्रम्य

श्रोतव्यमिति शूद्रेण नाध्येतव्यं कदा चन ।
पुराण शृणुयान्नित्यं नरसिंहस्य पूजनम् ॥

इति भविष्यनारसिंहयोरप्युक्तम् ।

यत्तु

अध्येतव्यमिदं नित्यं विप्रैः पर्वणि पर्वणि ।
नाध्येतव्यमिदं शास्त्रं वृषलस्य च सन्निधौ ॥
योऽधीते चैव मोहात्मा स याति नरकान्बहून् ।

इति कौर्मेऽभिहितम् यच्च वायवीयसंहितायाम् ।

नावेदविद्भ्यः कथनीयमेतत्पुराणरत्नं पुरशासनस्य ।
नाभक्ताशिष्याय च नास्तिकेभ्यो दत्तं हि यत्तन्निरयं ददाति ॥

इति तद्भावयितुर्दोषाभिधानाय न श्रोतुरिति व्याख्येयम् । एतैः प्रत्येकमनुष्ठितैः शूद्रश्चाण्डालतां व्रजेत् । शूद्रजातिं परित्यज्य चाण्डालजातिं सर्वधर्मबहिष्कृतां प्राप्नोति ।

ननु नित्यामूर्ताया जातेरुपगमापगमौ न स्त इति चेत् । मैवं येषां प्रत्यक्षजातिस्तेषामस्तु तथा येषां तु शास्त्रैकसमधिगम्या तेषां यथाशास्त्रमुपगमापगमयोरपि स्वीकारात् । अन्यथा

जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा ।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम् ॥

इत्याद्यनेकवाक्योपप्लवः स्यादित्यादिविशेषमष्टमे वक्ष्यामः ।

प्रतप्तकनकच्छवि श्रियमवेक्ष्य वामाङ्गगाम्
अलक्ष्यतनुना समच्छवितया विधाय च्छलात् ।
यदीय(?)मसितद्युतिः श्रयति दक्षिणा कन्धरां
स मे दिशतु मङ्गलं सततमेव नारायणः ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृते विवृतोऽयमाद्यो
ऽध्यायः कलौ समुदितान्हिकनिर्णयाय ॥ २ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां प्रथमोऽध्यायः ।

श्रीगणेशाय नमः ॥

द्विजाङ्घ्रियुगमेकतो विधृतकौस्तुभं मध्यतो
रमाचरणपङ्कजस्खलितयावकं चान्यतः ॥
सुरोदितमुरो निजं सततमीक्षमाणं मुदा
सदाभिमतसिद्धये नमत माधवं साधवः ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृते विवृतिर्द्वितीया-
ध्याये विधीयत इहोदित वृत्तिसिद्ध्यै ॥ २ ॥

प्रथमाध्याये चतुर्णामपि वर्णानामैहिकामुष्मिकफलहेतू साधारणासाधारणधर्मौ निरूपितौ ।

इदानीं सर्ववर्णानां जीवनहेतुं साधारणधर्मं निरूपयितुं द्वितीयाध्यायमारभते ।

**अतः परं गृहस्थस्य कर्माचारं कलौ युगे ।**
**धर्मं साधारणं शक्त्या चातुर्वर्ण्याश्रयागतम् ॥ १ ॥**
**तं प्रवक्ष्याम्यहं पूर्वपराशरवचो यथा ।**

अतः परं चातुर्वर्ण्यस्यैहिकामुष्मिकफलहेतुसाधारणासाधारणधर्मनिरूपणानन्तरमैहिकफलहेतुधर्मनिरूपणेन बुद्धिस्थ गृहस्थस्यैव न ब्रह्मचारिवानप्रस्थसंन्यासिना, कर्मणो जीवनहेतुक्रियाया आचारः कर्तव्यतेति कृषिपदपरित्यागेन यत्कर्माचारपदोपादानं तद्युगान्तरे लौकिकव्यापारभूताया अपि कृषेः कलौ शास्त्रीयत्वबोधनाय, कर्माचारपदयोर्लोके लौकिकालौकिकव्यापाराभिधायकत्वात् । युगान्तरेषु कृषेर्वैश्यमात्रधर्मत्वात्सामान्येन गृहस्थाभिधानं कथमित्यत आह । कलौ युग इति । कलौ कृषेस्सर्ववर्णधर्मत्वात् । तदेव स्पष्टयति धर्मं साधारणमिति सर्ववर्णसाधारणः कृष्याचारो धर्मश्च शास्त्राभ्यनुज्ञात इत्यर्थः । साधारण्ये हेतुमाह

शक्त्येति । शक्त्या सामर्थ्येन कलौ विप्रादीना याजनादिस्वस्ववृत्त्या जीवनस्य दुर्लभत्वात् कृष्यादेश्चाल्पयत्नसिद्धत्वादित्यर्थः। चत्वारो वर्णाश्चातुर्वर्ण्यं तस्याश्रयेण पूर्वपूर्वकलियुगक्रमेणागतं सिद्धम् । आश्रम इति पदच्छेदे चतुर्णामप्याश्रमिणा तत्प्राप्तिर्गृहस्थमात्रपरत्वे तु पूर्वेण पुनरुक्तिश्चेति । तत्पूर्वप्रतिज्ञात कृषिधर्ममह पराशरः प्रकर्षेण दृष्टादृष्टेतिकर्तव्यताप्रतिपादनपुरस्सरं वक्ष्यामि । स्वोत्प्रेक्षामात्रमूलत्वशङ्कामपनुदति । पूर्वेति । पूर्वकल्पीयपराशरवचनानतिक्रमेणेत्यर्थः । प्रतिज्ञात धर्ममाह ।

**षट्कर्मसहितो विप्रः कृषिकर्म च कारयेत् ॥ २ ॥**

षड्भिः कर्मभिः पूर्वोक्तैः सन्ध्यादिभिः सहितो युक्तोऽपि विप्रः कृषिकर्म कर्षणं सेवकैः शूद्रैः कारयेत् "कृषिवाणिज्ये चास्वयङ्कृते" इति गौतमस्मरणात् । चकारात्तदभावे स्वयमपि कुर्यात् । तदाह कूर्मः ।

> स्वय वा कर्षणं कुर्याद्वाणिज्यं वा कुसीदकम् ।
> कष्टा पापीयसी वृत्तिः कुसीदे ता विवर्जयेत् ॥

बृहस्पतिरपि ।

> कुसीद कृषिवाणिज्य प्रकुर्वीत स्वयं कृतम् ।
> आपत्काले स्वय कुर्वाणैनसा युज्यते द्विजः ॥ इति ।

एतेन स्वय कर्षणनिषेधो युगान्तरविषय इति सिद्धम् ।

कृषौ वर्ज्यान् बलीवर्दानाह ।

**क्षुधितं तृषितं श्रान्तं बलीवर्दं न योजयेत् ।**
**हीनाङ्गं व्याधितं क्लीबं वृषं विप्रो न वाहयेत् ॥ ३ ॥**

क्षुधितो बुभुक्षितस्तृषितः पिपासितः श्रान्तः श्रमातुरः त बलीवर्दं हलोद्वहनादौ न योजयेत् । हीनाङ्गः पादविकलः व्याधितोऽतिसारादियस्तः क्लीबः पुंस्त्वरहितस्तमपि न हलादिक वाहयेत् ।

> तदुक्तमाश्वमेधिके ।
> 'न क्षुत्तृष्णाश्रमश्रान्त वाहयेद्विकलेन्द्रियमिति" ।

एकेनैव सिद्धौ निषेधद्वयोपादानमत्यन्तादरार्थम् ।

कीदृशस्तर्हि योज्य इत्यत आह ।

**स्थिराङ्गं नीरुजं दृप्तं सुनर्दं षण्ढवर्जितम् ॥**
**वाहयेद्दिवसस्यार्द्धं पश्चात्स्नानं समाचरेत् ॥ ४ ॥**

स्थिराङ्गम् ।

> द्वौ मासौ पाययेद्वत्सं द्वौ मासौ द्वौ स्तनौ दुहेत् ।
> द्वौ मासावेकवेलाया शेषकाले यथारुचि ॥

इत्यापस्तम्बोक्तरीत्या दृढाङ्गं न तु कोमलाङ्गं वत्सम् "अतष्यं सबलप्राणमनड्वाहं तु वाहयेदि"ति बृहत्पराशरस्मरणात् । नीरुजं निर्गता रुजा यस्य सुनर्दं शुभनर्दनं नादिनं षण्ढवर्जितं षण्ढैर्वृषभैस्तद्रूपासहनेन दूरतः परिहृतं न तु षण्ढत्ववर्जितं क्लीबनिषेधेनैव तदर्थसिद्धेः । तं दिवसस्यार्द्धमामध्याह्नं वाहयेत् । तदुक्तमाश्वमेधिके ।

> अन्हः पूर्वं द्वियामे वा धुर्याणां वाहनं स्मृतम् ।
> विश्राम्यन्मध्यमे भागे भागे चान्ते यथासुखमिति ॥

पूर्वप्रहरे प्रहरद्वयं वा वाहयित्वा मध्यमे प्रहरे विश्राम्य चतुर्थे प्रहरे इच्छयेत्यर्थः । बलीवर्दमित्यादावेकत्वमविवक्षितम् ।

> अष्टगवं धर्महलं षड्गवं जीवनार्थिनाम् ।
> चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम् ॥

इति हारीतेन संख्यान्तरविधानात् । दिवसार्द्धमित्युत्सर्गेण क्वचिदासायमपि वाहयेत् । तदुक्तमाश्वमेधिके ।

> यत्र वा त्वरया कृत्यं संशयो यत्र वाध्वनि ।
> वाहयेत्तत्र धुर्यांस्तु न स पापेन लिप्यत इति ॥

इदमप्यष्टगवाभिप्रायेण ।

> द्विगवं वाहयेत्पादं मध्याह्ने तु चतुर्गवम् ॥
> षड्गवं तु त्रिपादोक्तं पूर्णमष्टगवं स्मृतम् ।

इति अत्रिस्मरणात्। पश्चाद्बलीवर्द्दस्नापनानन्तरं स्वयं माध्याह्निकं स्नानं कुर्यात्। तथा च हारीतः। "स्नापयित्वानडुहोऽलङ्कृत्य ब्राह्मणान् भोजयेदि"ति सन्ध्यास्नानमित्यत्र प्रातःस्नानमुक्तमत्र तु माध्याह्निकमिति न पुनरुक्तिः।

प्रातर्मध्यान्हयोः स्नानं वानप्रस्थगृहस्थयोः।
यतेस्त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिणः॥

इति दक्षेण वानप्रस्थगृहस्थयोः स्नानद्वयाभिधानात्। तच्च प्रातःस्नानवदेव नित्यम्। "यथाहनि तथा प्रातर्नित्यं स्नायादनातुर"इति कात्यायनस्मरणात्। तद्विधिमाह संक्षेपेण योगियाज्ञवल्क्यः।

स्नानमन्तर्जले चैव मार्ज्जनाचमने तथा।
जलाभिमन्त्रणं चैव तीर्थस्य परिकल्पनम्॥
अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः।
स्नानाचरणमित्येतदुपदिष्टं महात्मभिरिति॥

मन्त्रास्तु प्रातःस्नानविधित एवावगन्तव्याः।

मध्यान्हस्नानानन्तरकृत्यमाह।

**जप्यं देवार्चनं होमं स्वाध्यायं चैवमभ्यसेत्।**
**एकद्वित्रिचतुर्विप्रान्भोजयेत्स्नातकान् द्विजः॥ ५॥**

जप्यं मध्याह्नसन्ध्याप्रधानत्वेन गायत्र्यास्तेनात्र सन्ध्योपासनमुपलक्ष्यते। तद्विधिरपि प्रागुक्तः मन्त्रेषु तु विशेषमाह नारायणः।

आपः पुनन्तु मन्त्रेण आपोहिष्ठेति मार्जनम्।
प्रक्षिप्य वाञ्जलिं सम्यगुदुत्यं चित्रमित्यपि॥
तच्चक्षुर्देव इति च हंसः शुचिषदित्यपि।
एतज्जपेदूर्ध्वबाहुः सूर्यं पश्यन्समाहितः॥
गायत्र्या तु यथाशक्ति उपस्थाय दिवाकरमिति।

देवार्च्चनं मध्यान्हेऽपि कर्तव्यमिति अपुनरुक्तिः। "प्रातर्मध्यं दिने सायं विष्णुपूजां समाचरेदिति"शौनकस्मरणात्। होमो वैश्वदेवस्तस्य पुनर्वचनं स्वाध्यायस्य तदुत्तरकालताबोधनार्थम्। तदाह बृहस्पतिः।

स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ।
वैश्वदेवावसाने च नान्यदत्र निमित्तत इति ॥

स्वाध्यायाभ्यसनं ब्रह्मयज्ञः "यत्स्वाध्यायमधीते स ब्रह्मयज्ञ"-इति स्मरणात् । स चापूर्वोऽत्रैव विधीयत कुर्यादिति यथायोग्य सम्बध्यते । एको वा द्वौ वा त्रयो वा चत्वारो वा इत्येकद्वित्रिचतुरास्त च ते विप्राश्चेत्येकाद्वित्रिचतुर्विप्राश्छान्दसः स्वरलोपस्तान् स्नातकानन्यान्वा यथाशक्ति भोजयेत् । एतच्च विप्रभोजन कर्षणोत्थप्राण्युपघातदोषापनयनायापूर्व विधीयते । अत एव हारीतः । स्नापयित्वानडुहोऽलङ्कृत्य ब्राह्मणान्भोजयेदिति ।

ननु यद्दोषापनयनाय प्रत्यह विप्रा भोज्यास्तदुत्पन्नाना धर्मोपयोगिता कथं स्यादित्यत आह ।

**स्वयं कृष्टे यथा क्षेत्रे धान्यैश्च स्वयमर्जितैः ।**
**निर्वपेत्पञ्चयज्ञांश्च क्रतुदीक्षां च कारयेत् ॥ ६ ॥**

यथा स्वय शिलोञ्छादिवृत्त्या अर्जितैर्द्रव्यैः श्रौतस्मार्तक्रियानुष्ठानमभ्युदयकारि तथा स्वयङ्कृष्टेऽपि क्षेत्रे चकाराद् भृतकादिद्वारा कर्षिते वार्जितैरुत्पन्नैर्द्रव्यैः पञ्चयज्ञान्निर्वपेत्क्रतूनामग्निहोत्रादीनां दीक्षां च कारयेत्कुर्यात् । ततश्च द्रव्यार्जनस्य तन्नियमानां वा पुरुषार्थत्वेन तदतिक्रमे पुरुषस्यैव प्रत्यवायो न क्रतुवैगुण्यमिति ।

अत एव कूर्मपुराणे ।

लब्धलाभः पितॄन्देवान् ब्राह्मणांश्चापि पूजयेत् ।
ते तृप्तास्तस्य तं दोषं शमयन्ति न संशयः ॥

इत्यर्जकस्यैव दोषमभिधाय तदभाव उपपादितः ।

वस्तुतस्तु कलौ कृषेरभ्यनुज्ञातत्वात्कर्षणस्यापि न दोष इति ॥

इदानीं कृष्युत्पन्नाना धान्याना धनार्थविक्रये विशेषमाह ।

**तिला रसा न विक्रेया विक्रेया धान्यतस्समाः ।**
**विप्रस्यैवंविधा वृत्तिस्तृणकाष्ठादिविक्रयः ॥ ७ ॥**

तिलाः श्यामा श्वताश्चाविशेषा न रसादयः गुडादयस्ते मूल्य-कल्पनया धनेन न गणनीयाः यदि धान्यान्तररहितस्य तिलादिविक्रयमन्तरेण दृष्टादृष्टकार्यं न सिध्यत्तर्हि धान्यतो धान्येन समास्तिलप्रस्थेन धान्यप्रस्थ इति प्रक्रियया विक्रया विमातव्याः । तदाह नारदः ।

अशक्तो भेषजस्यार्थे यज्ञे होमे तथैव च ।
यद्यवश्य तु विक्रेयास्तिला धान्येन तत्समा इति ।

एव रसादिविनिमयेोऽपि द्रष्टव्य. । तदाहापस्तम्बः । अन्नेन चान्नस्य मनुष्याणा च मनुष्यै रसाना च रसैर्गन्धाना च गन्धैर्विद्यया च विद्यानामि''ति। यत्तु काम वा स्वयमुत्पाद्य तिलान्विक्रीणीरन्निति वसिष्ठ-वचन तत्कथं चिद्विनिमयासम्भवे विक्रयाभ्यनुज्ञार्थम् । अत एव तिलतण्डु-लपक्वान्नविद्यामनुष्याश्च विहिताः परिवर्तकेनेति तेनैव स परिवर्तः पृथ-गभिहितः । योऽय तिलादिविनिमयस्तृणकाष्ठादिविक्रयश्च सेयमेवं विधाविप्रस्य वृत्तिर्जीवनोपायः । तथा च नारदः । ''ब्राह्मणस्य तु विज्ञेयं शुष्कदारुतृणादि चेति'' ।

इदानीं कर्षकस्य नैमित्तिक खलयज्ञ विधास्यन्नादौ निमित्तमुप-न्यस्यति ।

**ब्राह्मणश्चेत्कृषिं कुर्यात्तन्महादोषमाप्नुयात् ।**

भूमिकर्षणे तदाश्रितप्राणिहिंसाया अपरिहार्यत्वात्सावधानस्यापि कर्षकस्य ब्राह्मणस्य महान्दोषो भवत्येव । ब्राह्मणग्रहणं कृषिवृत्ते-र्वैश्यस्य तद्दोषाभावबोधनार्थम् । अत एव मनुः ।

वैश्यवृत्त्या तु जीवंस्तु ब्राह्मणः क्षत्रियोऽपि वा ।
हिंसाप्राया पराधीना कृषि यत्नेन वर्जयेत् ॥

इत्युभयोरेव तन्निषेधमुक्तवान् ।

उक्तदोषस्य महत्वं विशदयति ॥

**संवत्सरेण यत्पापं मत्स्यघाती समाप्नुयात् ॥ ८ ॥**
**अयोमुखेन काष्ठेन तदेकाहेन लाङ्गली ।**

मत्स्यघातेन जीवन् कैवर्त्तादिः संवत्सरेण यत्पापं प्राप्नोति तदयोमुखेन काष्ठेन हलेन भूमिं भिदन्नेकाहेन लाङ्गली कर्षकः प्राप्नोति । अत एव मनुः ।

कृषिं साध्विति मन्यन्ते सा वृत्तिः सद्भिर्गर्हिता ।
भूमिं भूमिशयांश्चैव हन्ति काष्ठमयोमुखम् ॥

इति कृषिं विनिन्द्य उक्तदोषस्य कर्षकमात्रे प्रसक्तौ विशेषमाह ।

**पाशको मत्स्यघाती च व्याधः शाकुनिकस्तथा ॥ ९ ॥**
**अदाता कर्षकश्चैव सर्वे ते समभागिनः ।**

वागुरया मृगग्राही पाशकः, मत्स्यघातिनः पुनरुपादानं पाशकादीनां तत्साम्यबोधनाय व्याधो मृगवधाजीवः शाकुनिकः पक्षिघाती अदाता खले राशिमूलमुपागतेभ्योऽप्रदाता ते सर्वेऽपि समानप्रत्यवायभागिनः ।

एवं निमित्तमभिधाय नैमित्तकमाह ।

**वृक्षं छित्वा महीं भित्वा हत्वा च कृमिकीटकान् ॥ १० ॥**
**कर्षकः खलयज्ञेन सर्वपापैः प्रमुच्यते ।**

वृक्षभूमिकृम्यादीनां छेदनभेदनहननैर्यानि पापानि भवन्ति तेषां सर्वेषां पापानां कर्षकस्य खलयज्ञप्रायश्चित्तं भवति ।

खलयज्ञस्वरूपमाह हारीतः ।

भूमिं भित्वौषधीः छित्वा हत्वा कीटपिपीलिकाः ।
पुनन्ति खलयज्ञेन कर्षका नात्र संशयः ॥
यूपोऽयं निहितो मध्ये मेढिर्नामा हि कर्षकैः ।
तस्मादतन्द्रितो दद्यादत्र धान्यार्थदक्षिणाम् । इति ।

खलयज्ञाकरणे प्रत्यवायविनाशमुपसंहरति ।

**यो न दद्याद्द्विजातिभ्यो राशिमूलमुपागते ॥ ११ ॥**
**स चौरः स च पापिष्ठो ब्रह्मघ्नं तं विनिर्दिशेत् ।**

यः कर्षको धान्यराशौ कृते समागतेभ्यो विप्रेभ्यो वक्ष्यमाणं त्र्यंशं भागं न ददाति स चौरो ब्रह्मभागहरणात् पापिष्ठः खलयज्ञाकरणाद्ब्रह्मघ्नः कृषिव्यासङ्गेन वेदाध्ययनपरित्यागात् । तदुक्तं शिवपुराणे ।

अदत्वा कर्षको देवि यस्तु धान्यं प्रवेशयेत् ।
तस्य तृष्णाभिभूतस्य देवि पापं ब्रवीम्यहम् ॥
दिव्यं वर्षसहस्रं तु दुरात्मा कृषिकारकः ।
मरुदेशे भवेद्वृक्षः स पुष्पफलवर्जिते ॥
तस्यान्ते मानुषो भूत्वा कदाचित्कालपर्ययात् ।
दरिद्रो व्याधितो मूर्खः कुलहीनश्च जायत इति ॥

देयधान्यपरिमाणमाह ॥

**राज्ञे दत्वा तु षड्भागं देवानां चैव विंशतिम् ॥१२॥**
**विप्राणां त्र्यंशकं भागं सर्वपापैः प्रमुच्यते ।**

खले राशीकृताद्धान्यात्षष्ठ भागमंश राज्ञे प्रजापालनाधिकृताय देवेभ्यश्च विंशतितम चकारात् पितृभ्य विंशतितमं विप्रेभ्यः त्र्यंशकं च भागं दत्वा पूर्वोक्तैः पापैः प्रमुच्यत इति पूर्वोक्तोपसंहारः ।

तथा च कूर्मः ।

देवेभ्यश्च पितृभ्यश्च दद्याद्भागं तु विंशकम् ।
त्रिंशं भागं ब्राह्मणानां कृषिं कुर्वन्न दुष्यतीति ॥

बृहस्पतिरपि ।

राज्ञे दत्वा तु षड्भागं देवानां चैव विंशकम् ।
त्रिंशद्भागं तु विप्राणां कृषिं कुर्वन्न दोषभागिति ॥

विप्रस्य सेतिकर्तव्यता कृषिमुक्त्वा वर्णान्तराणामपि तामाह ॥

**क्षत्रियोऽपि कृषिं कृत्वा देवान्विप्रांश्च पूजयेत् ॥ १३ ॥**
**वैश्यः शूद्रस्तथा कुर्यात्कृषिवाणिज्यशिल्पकम् ।**

क्षत्रियवैश्यशूद्रा अपि पूर्वोक्तेतिकर्तव्यतया कृषिं कृत्वा देवान् विप्रान् चकारात् राजानं विपाणिनश्च तथा यथोक्तभागकल्पनया पूजयेयुः । यद्यपि वैश्यस्य कृषिः पूर्वाध्याये विहिता तथाप्यत्रेतिकर्तव्यताविधानाय पुनरुपन्यासः कृषिवद्वाणिज्यशिल्पकर्मापि तथैव देवतादिभ्यो भागं दत्वा जीवनाय चत्वारोऽपि वर्णाः कुर्युः । वाणिज्यं क्रयविक्रयौ शिल्पं चित्रलेखनादि । भागकल्पना चोक्ता बृहत्पराशरेण ।

प्रतिग्रहचतुर्थांशं वणिग्लाभतृतीयकम् ।
कृषितो विंशतिं चैव ददतो नास्तिपातकमिति ॥

ननु शूद्रस्यापि कृष्यादिजीवनहेतुसद्भावे किं पराधीनया द्विजशुश्रूषयेत्यत आह ।

**विकर्म कुर्वते शूद्रा द्विजशुश्रूषवर्जिताः ॥ १४ ॥**
**भवन्त्यल्पायुषस्ते वै निरयं यान्त्यसंशयम् ।**

द्विजशुश्रूषावर्जिताः शूद्रा विकर्मरागद्वेषादि कुर्वते ततश्चाल्पायुषो भवन्ति अनन्तरं नरकं गच्छन्ति तेन कृष्यादिदर्पेणैहिकामुष्मिकश्रेयःप्रतिबन्धकं द्विजशुश्रूषाराहित्यं नाभ्युपगन्तव्यमित्यर्थः ।

अत एवानुशासिके ।

रागो द्वेषश्च मोहश्च पारुष्यं च नृशंसता ।
शाठ्यं च दीर्घवैरत्वमतिमानमनार्जवम् ।
अनृतं चातिवादं च पैशून्यमतिलोभता ॥
निकृतिश्चाप्यवज्ञानं जनने शूद्रमाविशत ।
दत्वा पितामहः शूद्रमभिभूतं तु तामसैः ॥
द्विजशुश्रूषणं धर्मं शूद्राणां तु प्रयुक्तवान् ।
नश्यन्ति तामसा भावाः शूद्रस्य द्विजभक्तितः ॥
द्विजशुश्रूषया शूद्रः परं श्रेयोऽधिगच्छति ।
अविहिंसकः शुभाचारो देवताद्विजपूजकः ॥
शूद्रो धर्मफलैरिष्टैः स्वधर्मेणैव पूज्यत इति ।

द्विजशुश्रूषायाः शूद्रदोषाभिभावकत्वमभिहितम् ॥

उक्तमध्यायार्थं निगमयति ।

**चतुर्णामपि वर्णानामेष धर्मः सनातनः ॥ १५ ॥**

ब्राह्मणक्षत्रियवैश्यशूद्राणामेष कृषिवाणिज्यशिल्पलक्षणो धर्मः सनातनः तेष्वपि कलियुगेषु पारम्पर्यागत इति ।

गोभिः स्वस्तन्यधाराधवलितवपुषः पुष्णतः कृष्णमूर्त्ते-
स्तारानाथस्य पारावतसदृशरुचः कान्तिमारादपाराम् ।

मुक्तादामाभिरामाभिनवमरकतश्यावमूर्त्तेर्मुहूर्तं
गोविन्दस्यास्तु भूत्यै सदृशमसदृशं दुग्धमुग्धं वपुर्नः ॥ १ ॥
धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृते विवृतो द्वितीयो
ऽध्यायः कलावुचितवृत्तिविनिर्णयाय ॥ २ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेय-विनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां द्वितीयोऽध्यायः ।

श्रीगणेशाय नमः ।

विश्वस्यालङ्करिष्णुस्त्रिभुवनजभरस्याप्यखिन्नः सहिष्णु-
र्वारं वारं भविष्णुर्निजभजनकृतामर्थसिद्धौ वरिष्णुः ।
भक्तानां वर्द्धयिष्णुर्दितितनयभुवा सम्पदामाहरिष्णु-
र्देवानां सञ्चरिष्णुः सहृदयहृदयेऽप्याविरास्तां स विष्णुः ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृते विवृतिस्तृतीया-
ध्याये विधीयत इहोदितशुद्धिसिद्धौ ॥ २ ॥

पूर्वोक्तधर्माणामपवादकमाशौच निर्णिनीषुस्तदपगमनोत्तम्भितां शुद्धिं प्रतिपादयितुं तृतीयाध्यायमारभते ।

तत्राध्यायार्थं प्रतिजानीते ।

अतः परं प्रवक्ष्यामि जनने मरणे तथा ।
दिनत्रयेण शुद्ध्यन्ति ब्राह्मणाः प्रेतसूतके ॥ १ ॥

अतः परं प्रथमाद्वितीयाध्यायाभ्यामैहिकामुष्मिकफलसाधनधर्मप्रतिपादनानन्तरं जननमरणयोर्नित्यनैमित्तिकादिकर्माधिकारपरिपन्थ्याशौचोपगमे, यथा पराशरवचः, यावता कालेन येन च स्नानादिना पूर्वं पराशरेण चतुर्वर्णशुद्धिरभिहिता तथा तां प्रवक्ष्यामि । तत्र ब्राह्मणानां शुद्धिकालमाह । प्रेतसूतके मरणाशौचे ब्राह्मणाः दिनत्रयेण शुध्यन्ति । ननु शुद्ध्येद्विप्रो दशाहेनेत्यादिवचनैर्विप्रस्य दशाहाशौचविधानात्त्रिरात्राशौच विरुद्धमिति चेत् । मैवम् । अस्य त्र्यहात्तूदकदायिन इति मनुवचनेन समानोदकविषयत्वात् । दशाहाशौचस्य तु सपिण्डविषयत्वेन वक्ष्यमाणत्वादित्याचार्याः । तच्चिन्त्यम् । (?) सयमतु दिनगेणाङ्गस्पर्शाभिप्रायम् । विशुद्धावङ्गस्पर्शविधिवशात् । वर्णाशौचोपक्रमभङ्गाच्च । तस्मादिदमेवं व्याख्येयम् । त्रयं च त्रयं च त्रयं चेति त्रयाणि, दिनं च त्रयाणि च तेषां

समाहारो दिनत्रय तेन च शब्दशक्त्यैव दशाहानि सिध्यन्ति । मनुरप्येवं दशाहपद व्याचष्टे ।

अह्ना चैकेन रात्र्या च त्रिरात्रैरेव च त्रिभिः ।
शवस्पृशो विशुध्यन्ति त्र्यहात्तूदकदायिनः ॥ इति ।

अत एवाह हारीतः ।

दशाह एव विप्रस्य सपिण्डमरणे सति ।
कल्पान्तराणि कुर्वाणः कलौ व्यामोहमृच्छतीति ॥

क्षत्रियादिशुद्धिकालमाह ।

**क्षत्रियो द्वादशाहेन वैश्यः पञ्चदशाहकैः ।**
**शूद्रः शुध्यति मासेन पराशरवचो यथा ॥ २ ॥**

क्षत्रियवैश्यशूद्रा द्वादशपञ्चदशत्रिंशद्दिनैः शुध्येयुरिति पूर्वपराशरवचनम् ।

यानि त्वेकादशाहाद्राजन्यो वैश्यो द्वादशभिस्तथा ।
शूद्रो विंशतिरात्रेण शुध्यते मृतसूतके ॥

इत्यादीनि शातातपादिप्रतिपादिताशौचसङ्कोचकराणि पक्षान्तराणि तानि युगान्तरविषयाणि । दाहकादिसंसर्गाभावे वा । सपर्कं चेत्कुर्वन्तीत्युपसंहारात् । सम्पर्के तु द्वय ह्याशौचेन जन्यते कर्मायोग्यत्वं स्पर्शायोग्यत्व च ।

तदुभयापवादे निमित्तमाह ।

**उपासने तु विप्राणामङ्गशुद्धिश्च जायते ।**
**ब्राह्मणानां विशुद्धौ तु देहस्पर्शो विधीयते ॥ ३ ॥**

उपासने गृह्याग्निहोमे स्वस्मिन्विप्राणामङ्गशुद्धिराशौचाभावो भवति । अत्र चरमोद्दिष्टस्यापि प्रेताशौचस्यास्पृश्यताधिक्येन प्रथमोपन्यासः । इयं चाङ्गशुद्धिः । द्रव्यस्य स्वत्वत्यागमात्रे, न तु सर्वेतिकर्तव्यताया तस्या अन्यनिष्पाद्यत्वात् ।

यथाह जाबालः ।

"शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैरिति" ।

पारस्करोऽपि । "शालाग्नौ चैके अन्य एतानि कुर्युरिति"। ब्राह्मणादीनामङ्गस्पर्शस्तु प्रेताशौचे, सति सपर्के विशुद्धाविवाशौचापगम एव नान्तरा, सपर्काभावे त्वस्थिसञ्चयनविशिष्टाशौचत्रिभागानन्तरम् ।

चतुर्थेऽहनि कर्त्तव्यमस्थिसञ्चयनं बुधैः ।
ततः सञ्चयनादूर्ध्वमङ्गस्पर्शो विधीयते ॥

इति स्मरणात् । न प्रथमद्वितीयतृतीयदिनकृतकेवलास्थिसञ्चयनानन्तरम् । "अस्थिसञ्चयनादूर्ध्वमङ्गस्पर्शनमेव चे"ति कलिवर्ज्यप्रकरणे निषेधात् । एतेन

दशाहादित्रिभागेन कृते सञ्चयने क्रमात् ।
अङ्गस्पर्शनमिच्छन्ति वर्णानां तत्त्वदर्शिनः ॥

इत्यादिदेवलादिवाक्यानामुक्तविषयत्वमाविष्कृतम् । जननाशौचे तु स्पर्शनिर्णयं वक्ष्यति ।

इदानीं जननेऽपि वर्णानां शुद्धिकालमाह ।

**जातौ विप्रो दशाहेन द्वादशाहेन भूमिपः ।**
**वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥ ४ ॥**

जातौ जनने विप्रक्षत्रियवैश्यशूद्राः दशद्वादशपञ्चदशत्रिंशद्दिनैः शुध्यन्ति कर्मार्हा भवन्ति । यत्तु "नाशौचं सूतके प्रोक्तं सपिण्डानां क्रियावतां"मित्यङ्गिरोवाक्यं तत्प्रथमषष्ठदशमदिवसेषु पुत्रजन्मनिमित्तकदानषष्ठीपूजासुवासिनीपूजादिविषयम् ।

तथा च व्यासः ।

प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा ।
त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि ॥ इति ।

द्विविधस्याप्यशौचस्य पुरुषविशेषे सङ्कोचमुपपादयति ।

**एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः ।**
**त्र्यहात्केवलवेदस्तु द्विहीनो दशभिर्दिनैः ॥ ५ ॥**

अग्निभिः श्रौतैर्वेदेन वेदाभ्यां वेदैरङ्गादिसहितेन च यः समन्वितो युक्तो विप्रः स एकाहाच्छुध्यति यस्तु केवलं वेदमात्रमेवाधीते नाग्निमान्

स त्र्यहाद् होमस्वाध्याययोरधिकारी भवति। यः पुनर्द्विहीनो द्वाभ्याम-प्यग्निवेदाभ्यां हीनस्स दशाहेन इति ।

तथा च दक्षः ।

सद्यः शौचं तथैकाहस्त्र्यहश्चतुरहस्तथा ।
षड्दशद्वादशाहाश्च पक्षो मासस्तथैव च ॥
मरणान्तं तथा चान्यद्दश पक्षाश्च सूतके ।
उपन्यासक्रमेणैव तन्मे निगदतः शृणु ॥
ग्रन्थार्थभावं जानाति वेदमङ्गैः समन्वितम् ।
सकल्पं सरहस्यं च क्रियावांश्चेन्न सूतकम् ॥
एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः ।
हीने हीनतरे वापि त्र्यहश्चतुरहस्तथा ॥
ततो हीनतमे चैव षडहः परिकीर्तितः ।
ये दशाहादयः प्रोक्ता वर्णानां ते यथाक्रमम् ॥
अस्नात्वा चाप्यहुत्वा च अदत्वाशनस्तथा द्विजः ।
एवं विधस्य विप्रस्य सर्वदा सूतकं भवेदिति ॥

अस्यार्थः । ग्रन्थार्थभावो भाष्यम् । अङ्गानि शिक्षादीनि । कल्पेति-हासः । रहस्यमुपनिषदः । क्रियावान्कर्मानुष्ठाता । एते वेदाध्यादयः षट्गुणाः । उपनिषदां वेदेष्वेवान्तर्भावः । एतैः षड्भिरुपेतो जननमरणयोः सद्यः स्नानेनैव शुध्यति । पञ्चभिर्युक्त एकाहेन चतुर्भिर्युक्तस्त्र्यहेण त्रिभि-र्युक्तश्चतुरहेण द्वाभ्यां युक्तः षडहेन द्वाभ्यामपि विहीनो दशाहादिना वर्णक्रमेणेति । एषां च षण्णां पक्षाणां मध्ये त्रय एव पक्षाः पराशरस्य संमता इत्युक्तं पराशरवचो यथेत्यनेन ।

यस्तु कलिवर्ज्येषु वृत्तस्वाध्यायसापेक्षोऽघसङ्कोचनिषेधस्सोऽवशि-ष्टसद्यः शुध्यादिपक्षत्रयाभिप्रायेणेति न विरोधः । यः स्मृत्यन्तरीयाशौ-चसङ्कोचस्स साम्प्रतं तु नेत्यर्थः । तुशब्दस्य निषेधार्थत्वात् । विधिनात्वे-कवाक्यत्वादितिवत् । वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथेति कलिवर्ज्ये स्मरणात् । इदमित्थमेव व्याख्येयमन्यथा कलिधर्मप्रवचनप्रवृत्तस्य कलि-वर्ज्यधर्माभिधानेनाचार्यस्याश्रद्धेयवचनता स्यात् । यत्तु एकाहाशौचम-श्वस्तनिकस्य त्र्यहाशौचं च त्र्याहिकस्य अग्निवेदसमन्वितत्वकेवलवेद-

त्वयोरुपादानमेकाहत्र्याहाशौचविधिस्तुत्यर्थत्वेनाधिकारिविशेषणत्वाभावादिति। तन्न। आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनितया तथेति कलावश्वस्तनिकादिवृत्तनिषेधात्। तस्माद्यथोक्तमेव साधीयस्तेन सर्वेषामविशेषेण दशाहाद्येवाशौचमिति।

एवं गुणोत्कर्षेणाशौचसङ्कोचमपोह्य गुणापकर्षेणादाशौचाधिक्यमपि अपवदति।

**जन्मकर्मपरिभ्रष्टः सन्ध्योपासनवर्जितः।**
**नामधारकविप्रस्तु दशाहं सूतकी भवेत्॥ ६॥**

जन्म निमित्त कर्म गर्भाधानजातकर्मादिसंस्कारस्तत्परिभ्रष्टः सन्ध्यावन्दनमुपासनं गृह्याग्निपरिचरणं ताभ्यां वर्जितः स नामधारको विप्रस्तस्य दशाहमेवाशौचमिति। नामधारकस्वरूपमाह व्यासः।

गर्भाधानादिभिर्मुक्तस्तथोपनयनेन च।
न कर्मविन्न वाधीते स भवेन्नामधारकः॥ इति।

यत्तु।

क्रियाहीनस्य मूर्खस्य महारोगिण एव च।
यथेष्टाचरणस्याहुर्मरणान्तमशौचकम्॥

इति कूर्मस्मरणं तत्, तन्निन्दार्थं न यावज्जीवाशौचविधायकं न वर्द्धयेदघाहानीति मनुस्मरणात्।

इदानीमसवर्णसपिण्डाशौचमाह।

**एकपिण्डास्तु दायादाः पृथक्दारनिकेतनाः।**
**जन्मन्यपि विपत्तौ च तेषां तत्सूतकं भवेत्॥ ७॥**

एक पिण्डो ब्राह्मणादेर्देह उत्पादको येषां ते एकपिण्डाः पृथक् भिन्नजातीया दाराः स्त्रियो निकेतनान्युत्पत्तिस्थानानि येषां ते पृथग्दारनिकेतनास्ते दायादाः दायं पिण्डमाददतीति दायादास्सपिण्डास्तेषामुत्तमवर्णसम्बन्धिनि जनने मरणे च तत्सूतकं तेषामुत्तमवर्णानां यत्सूतकमाशौचं तत्कालेनैव शुद्धिरिति। यद्यपि "कन्यानामसवर्णानां विवाहश्च द्विजा-

तिभिरि'त्यनेन कलावसवर्णकन्यापरिणयनिषेधेनैव विजातीयसपिण्डाभावेन तदाशौचाभिधानमनुपपन्नं तथापि पूर्वयुगोत्पन्नानामेव तेषामत्रापि कियत्कालमनुवृत्तेर्युक्तमेव तदाशौचाभिधानम् । एतेनासवर्णसापिण्ड्यवचनमनन्तरोच्यमानं व्याख्यातम् । तदाह देवलः ।

सर्ववर्णेषु दायादा ये स्युर्विप्रस्य बान्धवाः ।
तेषां दशाहमाशौचं विप्राशौचे विधीयते ॥ इति ।
एतच्चाविभक्तानां, विभक्तानां तु मातृजातीयमेव ।
तथाचापस्तम्बः ।
क्षत्रविट्शूद्रजातीनां स्पृश्चेन्मृतकसूतके ।
तेषां तु पैतृकाशौचं विभक्तानां तु मातृकमिति ॥

विभागः पितृमरणस्याप्युपलक्षणम् ।

तथा च जाबालः ।

नानाजातिषु पारक्यं पैतृकं जीवतः पितुः ।
अतीते मातृकं विद्यात्पारक्यमुभयोरपीति ॥

नानाजातिषु मूर्द्धावसिक्तादिष्वाशौचविशेषाभावात्पारक्यं तच्च जीवतः पितुः जीवति पितरि मातृकमुभयथाप्युभयोर्जननमरणयोः पारक्यमेवेति । एवं विजातीयपत्नीनामपि । तदाह हारीतः ।

मृतसूतेषु दासानां पत्नीनां चानुलोमतः ।
स्वामितुल्यं भवेच्छौचं मृते स्वामिनि यौतकमिति ॥

यौतकं स्वजातीयम् । एवमुत्तमस्याप्यधमाशौचे स्वकालेनैव शुद्धिः ।

तदुक्तं ब्राह्मे ।

ब्राह्मणेषु च विप्रस्य क्षत्रविट्शूद्रजातिषु ।
मृतेषु वाथ जातेषु दशाहाच्छुद्धिरिष्यते ॥
क्षत्रियस्याथ वैश्यस्तु वैश्यस्य वृषलस्तथा ।
जायते म्रियते बन्धुस्तत्राशौचं स्वकं भवेदिति ॥

इदानीं सवर्णासवर्णसापिण्ड्यनिर्णयमाह ।

**तावत्तत्सूतकं गोत्रे चतुर्थपुरुषेण तु ।**
**दायाद्विच्छेदमाप्नोति पञ्चमे वात्मवंशजः ॥ ८ ॥**

तेषा विजातीयानां सूतकमाशौचं तत्सूतकं तावत्पर्यन्तं प्राप्नोति यावच्चतुर्थपुरुषेण विच्छेदमाप्नोतीति सम्बन्धः। ततश्च चतुर्थपुरुषे सापिण्ड्यनिवृत्तिहेतुकाशौचाभावप्रतिपादनेन त्रिपुरुषमेव सापिण्ड्य विजातीयानामुक्तं भवति ।

तथा च वृद्धपराशरः ।

सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ।
सजातीयेषु वर्णेषु चतुर्थे भिन्नजाष्विति ॥

शङ्खोऽपि ।

यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः ।
एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्तते त्रिष्विति ॥

य एकस्माद् ब्राह्मणादेर्जाताः पृथक्क्षेत्रा विजातीयमातृकाः पृथग्जना विजातीयाः एकपिण्डाः सपिण्डाः पृथक्शौचाः विजातीयाशौचास्तेषां त्रिपुरुषमेव सापिण्ड्यमिति । आत्मवंशजस्समानजातीयस्तु पञ्चम एव दायात्पिण्डाद्विच्छेदं प्राप्नोति सापिण्ड्यान्निवर्तत इति । ततश्च चतुःपुरुषमेव सापिण्ड्यं समानजातीयानां सिध्यति, दायपदग्रहणाद्दायग्रहणेऽपि चतुःपुरुषमेव सापिण्ड्य गमयति ।

तदाह देवलः ।

अविभक्तविभक्तानां कुल्याना वसतां सह ।
भूयो दायविभागः स्यादाचतुर्थादिति स्थितिः ॥
तावत्कुल्याः सपिण्डा स्युः पिण्डभेदस्ततः परम् ।
सम तत्र सपिण्डाना दायार्थस्य विभाजनम् ॥ इति ।

वाशब्दस्त्वर्थः । न सप्तमादिपुरुषग्रहणार्थः । तत्र सापिण्ड्यनिमित्तपूर्णाशौचाप्रतिपादनात् । तथा च गौतमः । पिण्डनिवृत्तिः पञ्चम इति । यत्तु सप्तमे वेति तदीयमेव, यश्च मानवीयं यच्च बृहत्पराशरीयं सप्तमे विनिवर्तत इति तत्त्रितयमप्युक्तरीत्या न प्रकृतोपयोगि-युगान्तरविषयत्वात् । समानासमानजातीयसापिण्ड्य गोत्रैक्य एव पूर्णाशौचनिमित्तमिति वक्तुं गोत्रे इत्युक्तं तथा च शङ्खलिखितौ ।

सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी ।
पिण्डश्चोदकदानं तु शौचाशौचं तदानुगमिति ॥

गोत्रतो गोत्र एव सपिण्डता, पिण्डोदकपूर्णाशौचनिमित्तं न प्रत्येकमत एव दत्तपुत्रादिषु सत्यपि जनकसापिण्ड्ये सगोत्रत्वाभावाच्च परस्पराशौचादि ।

तथा च मनुः ।

गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥ इति ।

पुत्रं ददतः पितुस्तत्कृता स्वधा व्यपैति यतो गोत्राद्यनुगः पिण्ड इति । यद्वा वाशब्दो विकल्पार्थः । स च विवाहे षष्ठपरिग्रहार्थः । तदाह सत्यशङ्कः ।

चतुर्थीमुद्वहेत्कन्यां चतुर्थः पञ्चमोऽपि च ।
पाराशर्यमतात्षष्ठीं पञ्चमो न तु पञ्चमीमिति ॥

अस्यार्थः। चतुर्थीमुद्वहेत्कन्या चतुर्थ इति विजातीयसापिण्ड्यविषयम् । तेषा त्रिपुरुषसापिण्ड्याभिधानात् । स जातीयसापिण्ड्ये विशेषमाह । पञ्चमोऽपि निवृत्तसापिण्ड्योऽपि चतुर्थीं विद्यमानमूलपुरुषसापिण्ड्यां त्रीनतीत्य पितृत इति पैठीनसिस्मरणात् । त्रीनतीत्येति विजातीयसापिण्ड्याभिप्रायम् । पञ्चातीत्येति सजातीयसापिण्ड्ये ज्ञेयम् । तस्मात्सिद्धमाशौचे च नोद्वहेत् । असपिण्डः, असपिण्डामुद्वहेदिति नियमात् । स च नियमः याज्ञवल्कीये । असपिण्डाम्, एतैरेव गुणैर्युक्त इत्यत्र स्पष्टः। तदेव स्पष्टयति । पञ्चमः चतुर्थीमुद्वहेदिति । पञ्चपुरुषसापिण्ड्यपक्षे षष्ठः षष्ठीं तत्र त्रीनतीत्य मातृतः पञ्चातीत्य पितृतः षष्ठ पुरुषं विवाहे चतुर्थं पुरुषं पञ्चमपुरुषं वेति । पञ्चमो न पञ्चमीमुद्वहेदिति ।

एवमुक्तस्य सापिण्ड्यस्यान्वयव्यतिरेकाभ्यां पूर्णाशौचनिमित्ततामाह ।

**चतुर्थे दशरात्रं स्यात्षण्णिशाः पुंसि पञ्चमे ।**
**षष्ठे चतुरहाच्छुद्धिः सप्तमे तु दिनत्रयात् ॥ ६ ॥**

कूटस्थमारभ्य गणनया चतुर्थपुरुषं यावद्दशरात्रमाशौचं तावदेव सापिण्ड्यानुवृत्तेः । पञ्चमे षड्रात्रं षष्ठे चतूरात्र सप्तमे त्रिरात्रमिति । ननु "सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । दशाहं शावमाशौच सपिण्डेषु विधीयत' इत्यादिवाक्यैः सप्तमपुरुषं यावत्साण्डियं तन्निमित्तमाशौचं च बोधितमतः कथमिदं पञ्चमादीना षड्रात्रादिकमाशौचमिति । सत्यम् । पञ्चमादिषु सापिण्ड्यनिवृत्तिबोधनेन तन्निमित्तपूर्णाशौचाभावप्रतिपादनं न विरुध्यते निमित्ताभावे नैमित्तिकस्याप्यभाव इति न्यायात् । सापिण्ड्यनिवर्तकवचनविरोधस्य च युगभेदेनैव परिहृतत्वात् । नन्वेवं पञ्चमादीना समानोदकत्वेन त्र्यहात्तूदकदायिन इति त्रिरात्रमाशौचमेव स्यान्न षड्रात्रादिकमिति चेत् । सत्यम् । विशेषविधिना-त्रापोदितत्वन तस्य सप्तमादिपुरुषविषयत्वात् ।

उक्तस्य प्रेताशौचस्य क्व चिदपवादमाह ।

**भृग्वग्निमरणे चैव देशान्तरमृते तथा ।**
**बाले प्रेते च सन्यस्ते सद्यः शौचं विधीयते ॥ १० ॥**

भृगुप्रपाताग्निप्रवेशाभ्या चकारादनाशकादिभिश्च बुद्धिपूर्वकविहितप्रकारेण मरणे सद्य' शौचं कार्यम् । अविहितमरणे त्वाह च गौतमः । "गोब्राह्मणहतानामन्वक्ष राजक्रोधाच्चायुद्धे प्रायोऽनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्चेच्छतामिति ।

अन्वक्ष यावच्छवदर्शनमाशौचं नेदमाशौचान्तरविधानं किं तु प्राप्तदशाहाद्यपवादमात्रबोधनम् ।

व्यापादयेदिहात्मानं स्वयं योऽग्न्युदकादिभिः ।
विहितं तस्य नाशौच नापि कार्योदकक्रिया ॥

इत्यापस्तम्बेन विहिताशौचापवादबोधनात् । अयमप्याशौचापवादो यावत्संवत्सरमेव न सर्वात्मना ।

गोब्राह्मणहतानां च पतितानां तथैव च ।
उर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्द्ध्वदेहिकमिति ॥

षड्शन्मते संवत्सरानन्तरं सर्वौर्ध्वदेहिकविधानात् । संवत्सरानन्तरमौर्ध्वदेहिके विशेषं पञ्चमाध्याये स्वयमेव वक्ष्यति अभ्यनुज्ञातमरणे तु विशेषमाह शातातपः ।

वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥
तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः ।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेदिति ॥

स न प्रकृतोपयोगी "भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथेति" कलिवर्ज्यस्मरणात् । तथा च वायवीयसंहितायाम् ।

तथापि मरणं शस्तं भृग्वग्न्यनशनादिभिः ।
शास्त्रविश्रम्भधीरेण मनसा क्रीयते यतः ॥
पतिष्वन्यतमोपायं कथमप्यवलंब्य वा ।
सद्यः सिद्धिमवाप्नोति चान्यथा म्रियते यदि ॥
पशूनामिव तस्येह न कुर्यादौर्ध्वदेहिकम् ।
नैवाशौचं प्रसज्ज्येत तत्पुत्रादेर्विशेषतः ॥
अथैनमपि चोद्दिश्य कर्म चेत् कर्तुमीप्सितम् ।
कल्याणमेव कुर्वीत भक्त्या भक्तांश्च पूजयेत् ॥ इति ।

कल्याणं महोत्सवं शैववैष्णवादिपूजनमिति यावत् । देशान्तरमृते तथा असपिण्डे श्वशुरश्यालादौ देशान्तरमृते सद्यः शौचम् । तदाह मनुः ।

बाले देशान्तरस्थे च पृथक्पिण्डे च संस्थिते ।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ॥ इति ।

अत्र देशान्तरस्थेनासपिण्डो विशेष्यते । अन्यथा "विगतं तु विदेशस्थमि"त्यनन्तरेण पौनरुक्त्यं स्यात् । देशान्तरलक्षणं तु मनुराह ।

महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः ।
वाचो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥ इति ।

बृहस्पतिरपि ।

देशान्तरं वदन्त्येके षष्ठियोजनमायतम् ।
चत्वारिंशद्वदन्त्यके त्रिंशदन्ये तथैव चेति ॥

योजनलक्षणं तु स्मृत्यन्तरेऽभिहितम् ।

तिर्यग्यवोदराण्यष्टावूर्ध्वा वा व्रीहयस्त्रयः ॥
प्रमाणमङ्गुलस्योक्तं वितस्तिर्द्वादशाङ्गुलः ।
वितस्तेर्द्विगुणोऽरत्निस्तस्मात्किष्कुस्ततो धनुः ॥
धनुःसहस्रे द्वे क्रोशो योजनं तच्चतुष्टयमिति ।

बाले अजातदशाहे प्रेते मृते तत्सपिण्डानां सद्यः शौचम् । तथा च कात्यायनः ।

अनिवृत्ते दशाहे तु पञ्चत्वं परिगच्छति ।
सद्य एव विशुद्धिः स्यान्न प्रेतं नोदकक्रियेति ॥
इयं च सद्यः शुद्धिः प्रेताशौच एव न सूत्याशौचेऽपि ।
दशाहाभ्यन्तरे बाले प्रमीते तस्य बान्धवैः ।
शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते ॥

इति हारीतस्मरणात् । एवं मृतजातेऽपि जातमृते मृतजाते वा सपिण्डानां सद्यः शौचमिति स्मरणात् । एतच्च नाभिच्छेदनादूर्ध्वं वेदितव्यम् ।

यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम् ।
छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते ॥

इति जैमिनिस्मरणात् ।

नाभिच्छेदनात्पूर्वं बृहन्मनुराह ॥

जीवञ्जातो यदि ततो मृतः सूतक एव तु ।
सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकमिति ॥

सन्यस्ते प्रव्रजिते मृते तत्सपिण्डानां सद्यः शौचं चकारात् क्लीबवैखानसयोरपि ग्रहणम् ।

देशान्तरमृतं श्रुत्वा क्लीबे वैखानसे यतौ ।
मृते स्नानेन शुध्यन्ति गर्भस्रावे च गोत्रिणः ॥

इति स्मरणात् ।

इदानीं प्रोषितसपिण्डमरणाशौचमाह ।

**देशान्तरगतः कश्चित्सगोत्रः श्रूयते यदि ।**
**न त्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेत् ॥११॥**

सगोत्रः सपिण्डः पूर्वोक्तलक्षणो देशान्तरगतो नेति यदि श्रूयते मृतः श्रूयत इति यावत् । तदा दशाहानन्तरं त्रिपक्षं यावत्त्रिरात्रं, तदूर्ध्वं षण्मासं यावत्पक्षिणी, सा च एकरात्रमध्यस्थिताहर्द्वयमेकदिनमध्यस्थितरात्रिद्वयं वोपलक्ष्यते । तदूर्ध्वमानवममहोरात्रं तदूर्ध्वं सद्यः स्नानेन शुद्धिस्तत्सपिण्डानां भवति । तदाह वृद्धविष्णुः ।

अर्वाक्त्रिपक्षात्त्रिनिशं षण्मासाच्च दिवानिशम् ।
अहस्संवत्सरादर्वाग्देशान्तरमृते सतीति ॥

दिवानिशं पक्षिणी ।

देवलोऽपि ।

आत्रिपक्षात्त्रिरात्रं स्यात्षण्मासात्पक्षिणी ततः ।
परमेकाहमावर्षादूर्ध्वं स्नानेन शुध्यतीति ॥

स्नानमुदकदानस्याप्युपलक्षणम् । "सर्वेषां संवत्सरे पूर्णे स्नात्वा दत्वोदकं शुचिरिति" स्मरणात् । यत्तु दूरदेशमृते जाते सद्यः शौचमुदाहृतमिति बृहस्पतिवाक्यं तदूर्ध्वं वेदितव्यम् । दशाहान्तःश्रवणे तु शेषाहोभिरेव शुद्धिः ।

विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् ।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥

इति मनुस्मरणात् । एतच्च ज्ञातिमात्रविषयम् ।

पितृविषये तु ।

पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः ।
श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् ॥

इतिपैठीनसिना विशेषस्मरणात् । दशाहान्तस्तु पित्रोरपि मरणश्रवणे शेषाहोभिरेव शुद्धिः ।

असमीपे पितुः प्रेतं श्रुत्वा देशान्तरे सुतः ।
तिलमिश्रोदकं कृत्वा तच्छेषेण विशुध्यति ॥

इति शातातपस्मरणात् । सपत्नमातरि तु दशाहानन्तरं त्रिरात्रमेव तदाह दक्षः ।

पितृपत्न्यामपेतायां मातृवर्जं द्विजोत्तमः ।
संवत्सरेऽप्यतीतेऽपि त्रिदिनमशुचिर्भवेदिति ॥

एतच्चातिक्रान्ताशौचमुपनीतोपरम एव ।

तथा च व्याघ्रः ।

तुल्यं वयसि सर्वेषामतिकान्ते तथैव च ।
उपनीते तु विषमं तस्मिन्नेवातिकालजमिति ॥

आदन्तजन्मनः सद्य इत्यादिवक्ष्यमाणमिदं चातिक्रान्तमाशौचं सर्ववर्णसाधारणं उपनयनानन्तरं स्वस्वजातिविहितमतिक्रान्ताशौच चेत्यर्थः । जनने त्वतिक्रान्ताशौचं नास्ति "नाशुद्धिः प्रसवाशौचे व्यतीतेषु दिनेष्वपीति" देवलस्मरणात् । पुत्रजन्मश्रवणे तु पितुः स्नानमस्त्येव ।

निर्दश ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च ।
सवासा जलमाप्लुत्य शुद्धो भवति मानवः ॥

इति मनुस्मरणात् । इदं दशाहान्तस्तत्रापि शेषाहोभिरेव शुद्धिः ।

देशान्तरगतं श्रुत्वा कल्याणं मरणं तथा ।
यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ॥ इति शङ्खस्मरणात् ।

इदानीं प्रोषितमरणात्तिथ्याद्यज्ञाने कदा श्राद्धादि कार्यमित्यत आह ।

**देशान्तरं गतो विप्रः प्रवासात्कालकारितात् ।**
**देहनाशमनुप्राप्तस्तिथिर्न ज्ञायते यदि ॥ १२ ॥**
**कृष्णाष्टमी त्वमावास्या कृष्णा चैकादशी च या ।**
**उदकं पिण्डदानं च तत्र श्राद्धं च कारयेत् ॥ १३ ॥**

पूर्वोक्तलक्षणे देशान्तरे गतो यो विप्रोऽन्यो वा क्षत्रियादिर्देहनाशं मरणमनुप्राप्तस्तत्र तस्मिन्मृते कालेन पञ्चदशवर्षादिना कारित कालकारितं प्रतीक्षणमिति शेषस्तस्मात्कालकारितात्प्रतीक्षणादनन्तरमर्थात् प्रवसत्यस्मिन्काले इति प्रवासो मासपक्षतिथ्यादिस्तस्मादिति ल्यब्लोपे पञ्चम्यन्त प्राप्य उदकमुदकदानं पिण्डदान चकाराद्दाहाशौचादि च कारयेत्कुर्यात् ।

तदाह जातूकर्ण्यः ।

प्रोषितस्य पितुर्यत्र न वार्ता नैव चागमः ।
ऊर्ध्वं पञ्चदशाद्वर्षात्कृत्वा तत्प्रतिरूपकम् ॥
कुर्यात्तस्य च सस्कार यथोक्तविधिना ततः ।
तदानीमेव सर्वाणि प्रेतश्राद्धानि कारयेदिति ॥

तदानीं तत्प्रवासतिथावित्यर्थः ।

जाबालिरपि ।

यन्मासे यत्र दिवसे यो गतस्तस्य तद्दिने ।
कुर्यात्प्रतिकृतेर्दाह दिनाज्ञानेऽपि तत्कुहूरिति ॥

प्रोषितमृतस्य तु यदि तिथिर्यान्मरणतिथिर्न ज्ञायते तिथिमात्रस्य विशिष्योपादानान्मासो विज्ञायत इति सिध्यति । तथा च मरणमासे ज्ञाते तिथिमात्रे चाज्ञाते यास्तन्मासकृष्णपक्षाष्टम्येकादश्यमावास्यास्तत्र तासु श्राद्ध मासिकवार्षिकादि चकारात्पूर्वोक्त दाहाशौचादिकमपि कारयेत्कुर्यात् ।

तदाह बृहस्पतिः ।

न ज्ञायते मृताहश्चेत्प्रमीते प्रोषिते सति ।
मासश्चेत्प्रतिविज्ञातस्तद्दर्श स्यात्तदाब्दिकमिति ॥

मरीचिरपि

श्राद्धविघ्ने समुत्पन्ने त्वविज्ञाते मृताहनि ।
एकादश्या तु कर्तव्य कृष्णपक्षे विशेषतः ॥
मार्गशीर्षे तदा मासि माघे वा तद्दिनं भवेदिति ।

तदा मार्गशीर्षे मासीति वायवः। एतदुभयाज्ञाने प्रवासमासतिथावित्युक्तं प्रवासादित्यनेन।

तथा च बृहस्पतिः।

दिनमासौ न विज्ञातौ मरणस्य यदा पुनः।
प्रस्थानदिनमासौ तु ग्राह्यौ पूर्वोक्तया दिशेति॥

प्रस्थानदिनमासयोरप्यन्यतराज्ञाने तन्मासदर्शादावाषाढादिमासेषु वा तद्दिनमिति पूर्वोक्तादितिदिक्। सर्वाज्ञाने तु श्रवणदिन एव। तदाह प्रचेताः। अपरिज्ञातेऽमावास्याया श्रवणदिवसे चेति।

इदानीं दशाहानन्तरं बालमरणे कथमित्यत आह।

**अजातदन्ता ये बाला ये च गर्भाद्विनिःसृताः।**
**न तेषामग्निसंस्कारो नाशौचं नोदकक्रिया॥ १४॥**

न जाता उत्पन्ना दन्ता येषां ते अजातदन्ता बालास्तेषां मरणे अग्निना संस्कारो दाहः आशौचमुदकक्रियोदकदानं च न कर्तव्यमिति तदाह विष्णुः। "एवं अजातदन्ते बाले प्रेते सद्य एव नाग्निसंस्कारो नोदकक्रियेति"। असंस्कार्यप्रसङ्गेन मृतमाह। ये च गर्भाद्गर्भकोशाद्विनिसृताः पतितास्तेषामपि पूर्वोक्तदाहादि न कर्तव्यम्।

तथा च ब्रह्मपुराणे।

स्त्रीणां तु पतितो गर्भः सद्यो जातो मृतोऽथ वा।
अजातदन्तो मासैर्वा मृतः षड्भिर्गतैस्तथा॥
वस्त्राद्यैर्भूषितं कृत्वा प्रक्षेप्तव्यः स काष्ठवत्।
खनित्वा तु शनैर्भूमिं सद्यः शौचं विधीयते॥ इति।

चकारस्त्वकृतचूडत्रिवर्षयोरपि दाहोदकक्रियानिषेधज्ञापनार्थः। पक्षे तदभावस्य वक्ष्यमाणत्वात्। आशौचे तु तयोर्विशेषमादन्तजन्मन इत्यत्र स्वयमेव वक्ष्यति।

इदानीं मातुर्गर्भस्रावाद्याशौचमाह।

**यदि गर्भो विपद्येत स्रवते चापि योषितः।**
**यावन्मासस्थितो गर्भो दिनं तावत्तु सूतकम्॥ १५॥**

यदि गर्भो विपद्येत पतेत् स्रवेत वा तदा योषितो मातुर्यावन्मासो गर्भस्रावदिनं सूत्याशौचं भवेत् । तथा चादित्यपुराणे ।

षण्मासाभ्यन्तरं यावद्गर्भस्रावो भवेद्यदि ।
तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ॥ इति ।

इयं च माससमसंख्यदिनैः शुद्धिर्मासत्रयादूर्ध्वं ज्ञेया । तत्र त्रिरात्रादिस्मरणात् ।

तथा च मरीचिः ।

गर्भसूत्यां यथामासमचिरेतूत्तमे त्रयः ।
राजन्ये तु चतूरात्रं वैश्ये पञ्चाहमेव तु ॥
अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्तिता ॥ इति ।

अचिरे आद्यमासत्रये उत्तमे ब्राह्मणे त्र्यहम् । इदं च स्रावाशौचं मातुरेव न सपिण्डानां, पाते तु तेषां त्रिरात्रम् ।

स्रावे मातुस्त्रिरात्रं स्यात्सपिण्डाशौचवर्जनम् ।
पाते मातुर्यथामासं पित्रादीनां दिनत्रयम् ॥

इति मरीचिस्मरणात् ।

इदानीं स्रावपातौ लक्षयति ।

**आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।**
**इत उर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत् ॥ १६ ॥**

मासचतुष्टयाभ्यन्तरे गर्भनाशः स्रावः, पञ्चमषष्ठयोर्गर्भनाशः पात इति स्वशास्त्रे व्यवहाराय संज्ञा क्रियते प्रसङ्गात्प्रसूतिमपि लक्षयति अतः षष्ठमासादूर्ध्वं सप्तममासमारभ्यागर्भनिर्गमः प्रसूतिस्तत्र सर्वेषां दशाहं सूत्याशौचं भवेत् ।

इदानीं तस्याग्निसंस्करणे आशौचमाह ।

**दन्तजातेऽनुजाते च कृतचूडे च संस्थिते ।**
**अग्निसंस्करणे तेषां त्रिरात्रमशुचिर्भवेत् ॥ १७ ॥**

जाता दन्ता यस्यासौ दन्तजातः, आहिताग्न्यादित्वात्पूर्वनिपातः ।

अनुपश्चाज्जात जन्म प्रकरणाद्दन्तानां, यस्यासावनुजातः । अजातदन्त इति यावत्, कृता चूडा चौल यस्य तस्मिन्नस्थिते मृते तेषामग्निसंस्कारपक्षे तत्सपिण्डः पित्रादिस्त्रिरात्रमशुचिर्भवेदिति । अयमभिसन्धिः । जातदन्तस्याकृतचूडस्य दाहे त्र्यहमाशौचम् । तदाहाङ्गिराः ।

यद्यप्यकृतचूडो वै जातदन्तस्तु संस्थितः ।
दाहयित्वा तथाप्येनमाशौचं त्र्यहमाचरेत् ॥ इति ।

अजातदन्तस्य तु कृतचूडस्य दाहे त्रिरात्रम् । तदाह षट्त्रिंशन्मते ।

यद्यप्यजातदन्तः स्यात्कृतचूडस्तु संस्थितः ।
तथापि दाहयेदेन त्र्यहमाशौचमाचरेत् ॥ इति ।

कृतचूडस्य दाहे त्रिरात्र "निवृत्तचूडकाना तु त्रिरात्राच्छुद्धिरिष्यत" इति मनुस्मरणात् । यद्यप्यत्र नित्यवदग्निसंस्कारः सर्वेषु वाक्येषु श्रुतस्तथापि कृतचूडेऽसौ नित्योऽन्यत्र पाक्षिक इति द्रष्टव्यम् ।

"तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव च ।
सर्वेषां कृतचूडानामन्यत्रापीच्छया द्वयम् ॥

इति लौगाक्षिस्मरणात् ।

करणपक्षे कालविशेषमाह मनुः ।

नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया ।
जातदन्तस्य वा कुर्याच्चाम्नि वापि कृते सति ॥

एवं च जातदन्ताजातदन्तयोश्चूडाकरणाग्निसंस्काराभावे आशौचान्तरमिति सिद्धम् ।

तदेव वयोविशेषेणाह ।

**आदन्तजन्मनः सद्य आचूडान्नैशिकी स्मृता ।**
**त्रिरात्रमाव्रतादेशाद्दशरात्रमतः परम् ॥ १८ ॥**

दन्तोत्पत्तेः प्राक् शिशौ प्रेते सपिण्डानां सद्यः स्नानमात्रेण शुद्धिः । "अजातदन्ते बाले प्रेते सद्य एव नास्याग्निसंस्कारो नोदकक्रियेति"

विष्णुस्मरणात् । यद्यप्यजातदन्ता ये बाला इत्यनेनेदं पुनरुक्तं सद्यः-शौचं तथापि तत्र दाहाभावप्रतिपादनायैवाजातदन्तानामुपादानं न सद्यःशौचविधानायात्र तु प्राधान्येनाशौचविधानमेवेति न पौनरुक्त्यम् । दन्तोत्पत्त्यनन्तरमाचूडाकरणान्नैशिकी निशयाहोरात्रेण भवा शुद्धिः । "दन्तजातेऽप्यकृतचूडे त्वहोरात्रेण शुद्धिरिति" विष्णुस्मरणात् । चौला-भावेऽपि वर्षत्रयादूर्ध्वमाव्रतादेशादोपनयनात्त्रिरात्रमाशौचम् ।

चौलं न क्रियते यस्य स्वकाले तन्मृतावपि ।
चतुर्थवर्षमारभ्य चौलाभावे त्र्यहं समम् ॥

इति षडशीतिस्मरणात् ।

अत उपनयनानन्तरं दशरात्रम् । दशरात्रमिति स्वस्वाशौचका-लोपलक्षणं "स्वजात्युक्तमतः परमिति" ब्रह्मस्मरणात् । इदमाशौचवै-लक्षण्यं सपिण्डानां पित्रोस्तु दशाहानन्तरमोपनयनात्त्रिरात्रमेव ।

निरस्य तु पुमान् शुक्रमुपस्पृश्य विशुध्यति ।
बैजिकादभिसम्बन्धादनुरुन्ध्यादघं त्र्यहम् ॥

इति मनुस्मरणात् । बैजिकः सम्बन्धो जन्यजनकभावः । तदपि पुमपत्यमरणे स्त्र्यपत्ये तु विशेषमाह ब्रह्मपुराणे ।

आजन्मनस्तु चौलान्तं कन्या यदि विपद्यते ।
सद्यः शौचं भवेत्तत्र सर्ववर्णेषु नित्यशः ॥
ततो वाग्दानपर्यन्तं यावदेकाहमेव हि ।
ततः परं प्रवृद्धाया त्रिरात्रमिति निश्चयः ॥
वाक्प्रदाने कृते तत्र ज्ञेयं चोभयतस्त्र्यहम् ।
पितुर्वरस्य च ततो दत्तानां भर्तुरेव हि ॥
स्वजात्युक्तमशौचं स्यान्मृतके जातके तथा ॥ इति ।

पित्रोस्तत्रापि त्रिरात्रमेव ॥

प्रत्ताप्रत्तासु योषित्सु संस्कृतासंस्कृतासु च ।
मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधि ॥

इति शङ्खस्मरणात् । वाग्दत्तादत्तयोः कृतचूडाचूडयोश्चेत्यर्थः ।

अदन्तासु तु विशेषमाह कार्ष्णाजिनिः । "अजातदन्तासु पित्रोरेकरात्रमिति" । ऊढानां पितृगृहे प्रसवमरणयोः पित्रोस्त्रिरात्रमन्येषामेकाहः ।

दत्ता नारी पितुर्गेहे सूयते म्रियते तथा ।
तद्बन्धुवर्गस्त्वेकेन शुध्येत्तज्जनकस्त्रिभिः ॥

इति ब्रह्मपुराणात् । पितुरुपरमे तु तासां त्रिरात्रम् ।

पित्रोरुपरमे स्त्रीणामूढानां तु कथं भवेत् ॥
त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्यमः ॥

इति वृद्धमनुस्मरणात् । तथा मातामहीमातामहाचार्यर्त्विग्गुरुभागिनेयदौहित्रमातृपितृष्वसृतत्सुतजामातृश्वशुरश्यालकसहाध्यायीभगिनीमातुलमातुलानीमित्रश्रोत्रियादिषु स्वगृहमरणे त्रिरात्रमन्यत्र पक्षिणी देशान्तरादौ त्वेकाह इति विवृत षडशीतिविवृतौ शुद्धिचन्द्रिकायामस्माभिरिति नेहोच्यते ।

उक्ताशौचस्य पुरुषविशेषेणापवादमाह ।

**ब्रह्मचारी गृहे येषां हूयते च हुताशनः ।**
**सम्पर्कं चेन्न कुर्वीत न तेषां सूतकं भवेत् ॥ १९ ॥**

ब्रह्मचारी उपकुर्वाणको नैष्ठिकस्यात्राभावात् । चकारात्सन्यस्तस्य ग्रहणं तेषां सपिण्डजननमरणयोराशौचं नास्ति । तदाह देवलः ।

नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् ।
नाशौचं सूतके प्रोक्तं शावे वापि तथैव च ॥ इति ।

चकाराच्छैववैष्णवदीक्षावतोऽपि शिवविष्ण्वर्चने नाशौचम् ।

तदाह वृद्धविष्णुः ।

शिवविष्ण्वर्चने दीक्षा यस्य चाग्निपरिग्रहः ।
ब्रह्मचारियतीनां च शरीरे नास्ति सूतकम् ॥ इति ।

ब्रह्मचारिण आशौचाभावः पित्रोरन्यत्र ब्रह्मचारिभावमिच्छतः ।

न त्यजेत्सूतके कर्म ब्रह्मचारी स्वयं क्वचित् ।
न दीक्षणात्परं यज्ञे न कृच्छ्रादितपश्चरन् ॥

पितर्यपि मृते नैषां दोषो भवति कर्हि चित् ।
अशौचं कर्मणोऽन्ते स्यात्त्र्यहं वा ब्रह्मचारिणाम् ॥ इति ।

येषां गृहे हुताशनो गृह्याग्निर्हूयते तेषामप्याशौचं नास्ति यद्यप्येतत्सामान्येनोक्तं तथापि गृह्याग्निहोमे स्वद्रव्यत्यागमात्रे नाशौचमिति यं त स्यानन्यसाध्यत्वात् । हावनविधानाच्च । तथा च बृहस्पतिः ।

सूतके मृतके चैव अशक्तौ श्राद्धभोजने ।
प्रवासादिनिमित्तेषु हावयेन्न तु हापयेत् ॥ इति ।

तेषामप्याशौचे व्यतिरेकमुखेन निमित्तमाह । यद्याशौचिभिः सह संपर्कमेकत्र शय्यासनभोजनादिरूपञ्च कुर्वन्ति तदैवाशौचाभावोऽन्यथा त्वाशौचमेवेति

सम्पर्कस्यान्वयव्यतिरेकाभ्यामाशौचापादकत्वमुपपादयति ।

**सम्पर्काद् दुष्यते विप्रो जनने मरणे तथा ।**
**सम्पर्काच्च निवृत्तस्य न प्रेतं नैव सूतकम् ॥ २० ॥**

सम्पर्कादुक्तलक्षणाद्विप्रो ब्रह्मचार्यादिः सपिण्डजननमरणयोर्दुष्यत्यशुचिर्भवति तन्निवृत्तौ च न शावसूत्याशौचभागिति ।

अनेन सपिण्डानामपि ब्रह्मचार्यादीना सम्पर्कासम्पर्काभ्यामाशौचानाशौचप्रतिपादनेनासपिण्डानामाशौचिसम्पर्के कैमुतिकन्यायेनैवाशौचसिद्धिरभिहिता ।

अत एव बृहस्पतिः ।

यस्तैः सहासपिण्डोऽपि प्रकुर्याच्छयनासने ।
बान्धवोऽबान्धवो वापि स दशाहेन शुध्यतीति ॥

सपिण्डानां तु सूतकान्नभोजने न दोषः ।

सूतके तु कुलस्यान्नमदोषं मनुरब्रवीत् । इति यमस्मरणात् ।

किं च ।

**शिल्पिनः कारुका वैद्या दासी दासाश्च नापिताः ।**
**राजानः श्रोत्रियाश्चैव सद्यः शौचाः प्रकीर्तिताः ॥ २१ ॥**

शिल्पिनश्चित्रकाराद्याः कारुकाः सूपकाराद्याः, वैद्याश्चिकित्सकाः, दासीदासाः गर्भदासाद्याः, नापिताः केशश्मश्रुकर्त्तारः, राजानोऽभिषिक्ताः क्षत्रियाः, श्रोत्रिया अध्यापनैकवृत्तयस्ते सर्वे सद्यः शुद्धाः स्वस्वकर्मसु न तु धर्मादौ। तथा च विष्णुः। "आशौचं न राज्ञां राजकर्मणि न व्रतिनां व्रते न सत्त्रिणा सत्त्रे न कारूणां कारुकर्मणि न राजाज्ञाकारिणां तदिच्छायामिति"।

किं च।

**सव्रतः सत्त्रपूतश्च आहिताग्निश्च यो द्विजः।**
**राज्ञश्च सूतकं नास्ति यस्य चेच्छति पार्थिवः॥ २२॥**

व्रतेन कृच्छ्रचान्द्रायणादिना सह वर्तमानः सव्रतः सत्त्रे गवामयनादौ पूतो दीक्षितः। शस्त्रपूत इति पाठे शस्त्रविद्योपजीवी आहिताग्निरग्निहोत्री राज्ञः पुनरुपादानं पार्थिवमात्रस्य सद्यः शुद्धिबोधनाय यस्य च पार्थिवो मन्त्रिपुरोहितादेः शुद्धिमिच्छति तेषां सर्वेषामशौचं नास्ति तत्तत्कर्ममात्रे न तु सर्वत्र तेनाहिताग्नेरप्यग्निहोत्रहोममात्रे शुद्धिः।

वर्जयेत्सूतके कर्म नित्यनैमित्तिकादिकम्।
आहिताग्नेः सदा शुद्धिः सद्य एव विधीयते॥
अग्निहोत्रस्य होमार्थं स्नानोपस्पर्शनात्परम्। इति स्मरणात्।

किं च।

**उद्यतो निधने दाने आर्तो विप्रो निमन्त्रितः।**
**तदैव ऋषिभिर्दृष्टं यथाकालेन शुद्ध्यति॥ २३॥**

निधने उद्यतो मुमूर्षुः आर्तो व्याधिपीडितः तयोर्दाने मरणकालकर्तव्ये वैतरण्यादिधेनुदाने व्याध्युपशामकज्वरकुम्भादिदाने च तदैव तावन्मात्रकार्ये शुध्यतीति ऋषिभिः पूर्वैर्दृष्टं यथाकालेन दशाहादिना तथेति।

जन्मप्रभृतिपापानां निरासे च मरिष्यतः।
उत्क्रान्तिवैतरण्यादिदाने प्रेताहुतिष्वपि॥

इति षडशीतिस्मरणात् ।

दाने विशिष्टे आर्तस्य व्याधिना शुद्धतोच्यते ।
यो नित्यदोऽपि यो वस्तु दातु हेमादि वाञ्छति ॥

इति स्मृत्यन्तरस्मरणाच्च । नित्यदो मया दानव्यतिरेकेण न भोक्तव्यमिति कृतसङ्कल्पः, विप्रो निमन्त्रितः श्राद्धे दत्तकेतनः सद्यः शुद्ध इति ।

निमन्त्रितस्य विप्रस्य स्वाध्यायाद्विरतस्य वा ।
देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्व चित् ॥

इति स्मृत्यन्तरस्मरणात् । तदैवेत्युपादानात्तत्कालमात्रकर्तव्येऽनन्यगतिके ग्रहणस्नानदानादावप्याशौचाभावो ध्वनितः। अत एव वसिष्ठः ।

सूतके मृतके चैव न दोषो राहुदर्शने ।
तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते ॥ इति ।

एवमन्यत्राप्यनन्यगतिके कर्मणि सद्यः शुद्धिरूहनीया न्यायसाम्यात् ।

जातो विप्र इत्यनेन सपिण्डाना जननाशौचमुक्त्वा पित्रोस्तदाह।

**प्रसवे गृहमेधी तु न कुर्यात्सङ्करं यदि ।**
**दशाहाच्छुध्यते माता त्ववगाह्य पिता शुचिः ॥२४॥**

प्रसवे प्रसवाशौचे गृहमेधी गृहस्थः पिता यदि सूतिकया सह संसर्गं सहशय्यासनभोजनादिरूपं तद्गमनं वा न करोति तदा अवगाह्य स्नात्वा शुचिः स्पर्शयोग्यो भवति माता तु दशाहेनैव तदाह संवर्त्तः ।

जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ।
माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः ॥ इति ।

गृहमेधीतिविशेषणादाश्रमान्तरगतस्य तन्नेति सूचितं "वनस्थानां यतीना च नाशौचमिति" देवलस्मरणात् ।

न कुर्यात्सङ्करमित्यनेन सङ्करे दशाहमस्पृश्यत्वं सूचितं तच्च स्वयमेव वक्ष्यति । अत एव वसिष्ठः ।

नाशौचं विद्यते पुंसः संसर्गं चेन्न गच्छति ।
रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते ॥ इति ।

मातृपदोपादानात्सर्ववर्णसूतिकानां दशाहमेवास्पृश्यत्वमुक्तम् । तदाह प्रचेताः ।

सूतिका सर्ववर्णानां दशरात्रेण शुध्यति ।
ऋतौ च न पृथक् शौचं सर्ववर्णेष्वयं विधिः ॥ इति ।

तुशब्दात्सपत्नमातॄणामपि स्नानमुक्तम् । "अन्याश्च मातरस्तद्वृत्त-द्वेहं न व्रजन्ति चेदिति" ब्रह्मपुराणात् । तद्वृत्पितृवत्स्नानेन शुद्धास्तद्गेहगमने तत्सम्पर्के पितृवदेव दशाहम् । अन्येषां सूतिकास्पर्शे स्नानमात्रमेव

सूतके सूतिकावर्जमङ्गस्पर्शो न दुष्यति ।
सस्पर्शे सूतिकायास्तु स्नानमेव विधीयते ॥

इत्यङ्गिरःस्मरणात् ।

ब्राह्मणानां विशुद्धिरित्यनेन प्रेताशौचे स्पर्शे निर्णीय सूत्याशौचे तन्निर्णयमाह ।

**सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् ।**
**सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः ॥ २५ ॥**

यथा शावं शवनिमित्तमाशौचं स्पर्शायोग्यत्वं सर्वेषां सपिण्डानां तथा सूतकं सूतिनिमित्तमस्पृश्यत्वं मातापित्रोरेव न सपिण्डानां तदाह पैठीनसिः ।

जनौ सपिण्डाः शुचयो मातापित्रोस्तु सूतकमिति" । शुचयः स्पृश्याः "सूतके तु सपिण्डानामङ्गस्पर्शो न दुष्यतीति" कौर्मात् । तत्रापि विशेषमाह सूतकेऽस्पृश्यत्वमात्यन्तिकं मातुरेव "पित्रोस्तु सूतकं मातुस्तदसृग्दर्शनाद् ध्रुवमिति" याज्ञवल्क्यस्मरणात् । पितुस्तु स्नानानन्तरमुपस्पर्शमाचमनं यावत् । तथा च पैठीनसिः । "सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिरिति" यद्यप्ययमर्थः पूर्वश्लोकेऽभिहित एव तथापि, मातापित्रोस्तु सूतकमित्युक्तिं विवरीतुं पुनरुपन्यस्तः । तदुक्तिस्तु सपिण्डानामस्पृश्यत्वाभावबोधनायेति ।

अथ वा यदुक्तं "मातापित्रोरेवास्पृश्यत्वमिति तत्र हेतुमाह सूतकं सूतिभवं रजस्तन्मातुरेव यतो नान्येषां तदेव चास्पृश्यतानिमित्तं पितुस्तदभावात्सम्पर्काभावे स्नानाचमनाभ्यां शुद्धिरिति । तदाह वसिष्ठः ।

नाशौचं विद्यते पुंसः ससर्गं चेन्न गच्छति ।
रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते ॥ इति ।

नन्वेवं पितुः स्नानात्प्रागप्यस्पृश्यत्वं न स्यान्निमित्तद्वयाभावादिति चेन्न जनकतारूपतृतीयनिमित्तसद्भावात् । तथा च बौधायनः । मातापित्रोरेव ससर्गसाम्यादिति ॥

न कुर्यात्सङ्करमित्यनेन सङ्करे आशौचान्तरं सूचितं तदाह ।

**यदि पत्न्यां प्रसूतायां सम्पर्कं कुरुते द्विजः ।**
**सूतकं तु भवेत्तस्य यदि विप्रः षडङ्गवित् ॥ २६ ॥**

यदि सूतिकया पत्न्या सह पतिः सम्पर्कमुक्तलक्षणं कुर्यात्तदा शिक्षादिषडङ्गवेदविदुषोऽपि तस्य सूतकं सूतिनिमित्तमस्पृश्यत्वं पूर्णं भवति । तथा च सुमन्तुः । मातुरेव सूतकं स्पृशतश्च नेतरेषामिति ।

ननु जनकसम्बन्धेन पितुरस्पृश्यत्वे स्नानानन्तरमपि तत्स्यादित्यत आह ।

**सम्पर्काज्जायते दोषो नान्यो दोषोऽस्ति वै द्विजे ।**
**तस्मात्सर्वप्रयत्नेन सम्पर्कं वर्जयेद्बुधः ॥ २७ ॥**

द्विजे संसर्गादेव दोषोऽस्पृश्यत्वमात्यन्तिकं जायते जनकतासम्बन्धेन तु स्नानात्प्रागेवास्पृश्यत्वं नात्यन्तिकं यस्मादन्यो दोषो जननिमित्तं रजस्तन्नास्ति तस्मात्सर्वप्रयत्नेन बुधस्सम्पर्कमन्वयव्यतिरेकाभ्यामस्पृश्यतापादकं वर्जयेत् । तथा चात्रिः ।

सम्पर्काज्जायते दोषः पारक्ये मृतजन्मनि ।
तद्वर्जनात्पितुरपि सद्यः शौचं विधीयते ॥ इति ।

पुरुषविशेषेणाशौचमपोह्य द्रव्यविशेषेण तदपवदति ।

**विवाहोत्सवयज्ञेषु त्वन्तरामृतसूतके ।**
**पूर्वसङ्कल्पितं द्रव्यं दीयमानं न दुष्यति ॥ २८ ॥**

विवाहश्चौलादीनामुपलक्षणं संस्कारत्वाविशेषात् । उत्सवो देव-प्रतिष्ठारामोत्सर्गादिः यज्ञो ज्योतिष्टोमादिस्तस्मिन्पूर्वं प्रवृत्ते "यज्ञे सभृत-सम्भारे विवाहे श्राद्धकर्मणीति" स्मरणात् । अन्तरा मध्ये मृत सूतक च तयोः समाहारस्तस्मिन्सति पूर्वं विवाहाद्यारम्भकाल एव सङ्कल्पित व्ययितव्यत्वेनावधारित देवब्राह्मणेभ्यो दीयमान स्वयमपि त्यज्यमान न दूष्यति न दोषमावहति "पूर्वसङ्कल्पित द्रव्यं दीयमानं न दूष्यतीति" कूर्मस्मरणात् ।

विवाहोत्सवयज्ञेषु यात्रायां तीर्थकर्मणि ।
न तत्र सूतक तद्वत्कर्म यज्ञादि कारयेत् ॥

इति पैठीनसिस्मरणाच्च । यत्तु

द्रव्याणि स्वामिसम्बन्धादघानि त्वशुचीनि च ॥
स्वामिशुध्यैव शुध्यन्ति वारिणा प्रोक्षितानि च ॥ इति ।

तत्सङ्कल्पितद्रव्यविषयम् । क्वचिदसङ्कल्पितेऽपि द्रव्ये शुद्धिमाह मरीचिः ।

लवणे मधुमांसे च पुष्पमूलफलेषु च ।
शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयस्यपि ॥
तैलौषध्याजिने चैव पक्वापक्वे स्वय ग्रहः ।
पुण्येषु चैव सर्वेषु नाशौच मृतसूतके ॥ इति ।

पक्वं सिकतादिना भ्राष्ट्रादिषु भर्जितं न तु पक्वान्न "भुक्त्वा पक्वान्न-मेतेषां त्रिरात्र तु पयः पिबेदि"ति तत्र प्रायश्चित्तस्मरणात् । इदमपि तद्वृत्ते, परदत्त तु न दोषः ।

विवाहोत्सवयज्ञादिष्वन्तरामृतसूतके ।
शेषमन्न परैर्देयं दातॄन् भोक्तॄंश्च न स्पृशेत् ॥ इतिस्मरणात् ।

आशौचसन्निपाते प्रतिनिमित्तनैमित्तिकावृत्तिमपवदति ।

**अन्तरा तु दशाहस्य पुनर्मरणजन्मनी ।**
**तावत्स्यादशुचिर्विप्रो यावत्तस्यादनिर्दशम् ॥ २९ ॥**

दशाहस्य जननमरणनिमित्तदशाहाशौचस्यान्तरा मध्ये यदि पुनर्दशाहाशौचनिमित्ते त्र्यहाद्याशौचनिमित्ते वा जननमरणे स्यातां तदा तावद्विप्रोऽन्यो वाऽशुचिः स्याद्यावत्पूर्वप्रवृत्तमाशौचमनिर्दशं निर्गतं दशभ्यो ऽहोरात्रेभ्य इति निर्दश तच्च भवतीत्यनिर्दशमसमाप्तदशाहमिति यावत् पूर्वाशौचशेषेणैव शुद्धिर्न पुनर्दशाहमित्यर्थः । तथा च विष्णुः । जननाशौचमध्ये यद्यपरं जननं स्यात्तत्र पूर्वाशौचव्यपगमे शुद्धिः, मरणाशौचमध्ये ज्ञातिमरणेप्येवमिति । दशाहपदोपादानात्त्र्यहाद्याशौचमध्ये दशाहपाते न पूर्वेण शुद्धिः किं तु स्वकालेनैवेति ध्वनितं तदाहोशनाः ।

> स्वाशौचस्य मध्ये तु दीर्घाशौच भवेद्यदि ।
> न पूर्वेण विशुद्धिः स्यात्स्वकालेन विशुद्ध्यति ॥ इति ।

मरणजन्मनी इत्यत्र मरणपदस्य पूर्वप्रयोगेण मरणाशौचेन जननाशौचमपैति न जननाशौचेन मरणाशौचमिति ध्वनितम् । तथा च षड्शन्मते ।

> शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् ।
> शावेन शुद्ध्यते सूतिर्न सूतिः शावशोधिनी ॥ इति ।

अन्तरा तु दशाहस्येति सामान्यविधानेऽप्यानवमदिनादाशौचान्तरपाते पूर्वशेषेण शुद्धिरिति ध्येयम् । अथ यदि दशरात्राघसन्निपाते पुराघं दशरात्रमाशौचमानवमादिति बौधायनस्मरणात् । दशमदिवसे आशौचान्तरपाते द्व्यहेन रात्रिचतुर्थयामे तु त्र्यहेण शुद्धिः, तदाह देवलः ।

> पुनः पाते दशाहात्प्राक् पूर्वेण सह गच्छति ।
> दशमेऽन्हि पतेद्यस्य त्र्यहात्स तु विशुध्यति ॥
> प्रभाते स त्रिरात्रेण दशरात्रेष्वय विधिः ॥ इति ।

इयं च पूर्वशेषेण शुद्धिः सपिण्डाशौचस्य, पित्राशौचस्य तु स्वकालेनैव

> पूर्वेण वा परेणापि पित्रोः शावेन हीतरत् ।
> आशौचं शुद्धिमायाति न पित्रोः शावमन्यतः ॥

इति षडशीतिस्मरणात् पित्राशौचयोः परस्परसन्निपाते तु विशेषमाह शङ्खः ।

मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता ।
पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीम् ॥ इति ।

पितुः शेषेण पित्राशौचशेषेणैव न पूर्वशेषेण, पित्राशौचमध्ये मातृमरणे तु पित्राशौचकालात्पक्षिण्यधिकेत्यर्थः । उक्तदशाहाशौचमन्यत्राप्यपवदति ।

**ब्राह्मणार्थे विपन्नानां बन्दिगोग्रहणे तथा ।**
**आहवेषु विपन्नानामेकरात्रमशौचकम् ॥ ३० ॥**

ब्राह्मणार्थे ब्राह्मणस्य प्राणरक्षार्थं तथा बन्दिग्रहणे गोग्रहणे च सति तन्मोचनार्थेकरात्रमशौचकम् ।

आहवे सङ्ग्रामे च ये विपन्ना विपदं शस्त्रप्रहारं प्राप्ताः कालान्तरे च मृतास्तेषां सर्वेषामेकरात्रमशौचम् । सम्मुखमरणे तु ।

गोब्राह्मणस्य चैवार्थे यस्य देहाति भूमिपः ।
शस्त्रेणाभिमुखो यस्तु वध्यते तत्रकर्मणा ॥
सद्यः सन्तिष्ठते यज्ञः सद्यः शौचं विधीयते ।

इति मनुयमाभ्यां सद्यः शौचस्मरणात् । यत्तु सङ्ग्रामे देशान्तरगतानां जातदन्तानां त्रिरात्रेणेति कश्यपस्मरणम्, तत्पराङ्मुखस्य पलायनसमये हतस्येति ज्ञेयम् । यद्यपि परोद्देशात्मसन्त्याग इत्यनेन गोब्राह्मणाद्यर्थे बुद्धिपूर्वं आत्मत्यागनिषेधेनेदमाशौचाभिधानं विरुद्धम्, तथापि कथं चित्प्रवृत्तस्य ग्रामादिकमरणे आशौचाकाङ्क्षायामिदमुच्यत इति न विरोधः । बुद्धिपूर्वं प्रवृत्तस्य निषेधातिक्रमेणात्मघातितया यावदब्दं तदाशौचाभावात् ।

रणहतस्यैकाहाशौचविधिशेषतयाऽऽहवहतं प्रशंसति ।

**द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।**
**परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥ ३१ ॥**

अष्टाङ्गयोगयुक्तः परिव्राजकस्तपोयोगेनैव कलेवरं मुञ्चन्नर्चिरादिमार्गेण गच्छन्नादित्यमण्डलं भित्वा ब्रह्मलोकं प्रयातीति श्रुतिस्मृतिसिद्धं तद्वदेव संग्रामहतोऽपीति योगिरणहतयोः सहोपन्यासः । नन्वतिप्रयाससाध्येन योगेन दैवसम्पादितं रणमरणं कथं समानमित्यत आह । अभिमुख इति देहादिसकलदुर्जयविषयपराङ्मुख एव शत्रुसम्मुखो योगसम्मुखश्च भवतीति समानायासवत्त्वेनोपपन्नं साम्याभिधानम् ।

ननु कुत्र देशे रणहतस्य ब्रह्मलोकावाप्तिरित्यत आह ।

**यत्र तत्र हतः शूरः शत्रुभिः परिवेष्टितः ।**
**अक्षयान् लभते लोकान् यदि क्लीबं न भाषते ॥ ३२**

यत्र यस्मिन् रणाङ्गणे शत्रुभिः परितस्समन्ताद्वधार्थं परिवेष्टित आवृतः शूरः शत्रुतो निर्भयस्तत्रैव रणाङ्गणे न ततः पलायमानो हतः प्राणैर्वियोजितोऽक्षयाश्चिरकालावस्थायिनो लोकान् ब्रह्मलोकावान्तरविशेषान् लभते । तथा च याज्ञवल्क्यः ।

य आहवेषु वध्यन्ते भूम्यर्थमपराङ्मुखाः ।
अकूटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथा ॥ इति ।

अपलायनस्यापि काकुभाषणेन तत्फलमाह यदि क्लीबमनूर्जितं मुञ्च मामतिदीनं दीनतरकुटम्बमेकपुत्रं त्वच्छरणागतमित्यादि न भाषते ।

रणहतस्य सूर्यमण्डलभेदने दृष्टान्तसिद्धिं परिहरति ।

**सन्यस्तं ब्राह्मणं दृष्ट्वा स्थानाचलति भास्करः ।**
**एष मे मण्डलं भित्वा परं स्थानं प्रयास्यति ॥ ३३ ॥**

संन्यस्तं सन्यासयोगवन्तं ब्राह्मणमालोक्य भास्करो मण्डलाधिष्ठात्री देवता स्थानाच्चित्तस्थैर्याच्चलति चञ्चलचित्तो भवतीति यावत् । तत्र हेतुमाह । एष योगी मे मदधिष्ठितं मण्डलं भित्वा परं स्थानं ब्रह्मलोकाभिधं प्रयास्यतीति । एतच्चानिष्टं देवानां यन्मनुष्याणां स्वोपरिवर्तनमिति । अत एव व्यासः ।

क्रियावद्भिर्हि कौन्तेय देवलोकः समावृतः ।
न चैतदिष्टं देवानां मर्त्यैरुपरिवर्त्तनम् ॥ इति ।

रणमरणाभावेऽपि स्वीयपरित्राणे तदेव फलमाह ॥

**यस्तु भग्नेषु सैन्येषु विद्रवत्सु समन्ततः ।**
**परित्राता यदा गच्छेत्स च क्रतुफलं भवेत् ॥ ३४ ॥**

यो योद्धा स्वसैन्येषु भग्नेषु पराभवात्पराङ्मुखेषु समन्ततो दिक्षु विदिक्षु च स्वत्राणपरायणतया विशेषतो द्रवत्सु तेषां परित्राणाय यदा गच्छेत्तस्मादेकैकपदप्रक्षेपेण क्रतोरश्वमेधस्य फलं लभते तदाह याज्ञवल्क्यः "पदानि क्रतुतुल्यानि भग्नेष्वविनिवर्त्तिनामिति" ।

शस्त्रक्षतस्य कालान्तरमरणेऽपि तथैवेत्याह ।

**यस्य छेदक्षतं गात्रं शरमुद्गरयष्टिभिः ।**
**देवकन्यास्तु तं वीरं हरन्ति रमयन्ति च ॥ ३५ ॥**

यस्य योद्धुः शरमुद्गरयष्टिभिर्गात्रं कलेवरं छेदैर्हस्तपादादिच्छेदनैः क्षतं लूनं तं कालान्तरमृतमपि देवकन्या नीत्वोत्तमभोगै रमयन्ति ॥

तत्कालमरणे फलविशेषमाह ।

**देवाङ्गनाः सहस्राणि शूरमायोधने हतम् ।**
**त्वरमाणाः प्रधावन्ति मम भर्त्ता ममेति च ॥ ३६ ॥**

देवाङ्गना अप्सरसः सहस्राणि सहस्रसंख्याः आयोधने रणे हतं शूरं मम भर्त्ता मम भर्तेत्यहम्पूर्विकया ग्रहीतुमतित्वरिताः प्रधावन्तीति ।

नन्वननुष्ठितयज्ञादीनां योधानां युद्धमरणे कथं युगपदनेकविशिष्टफलोपभोग इत्यत आह ।

**ये यज्ञसंघैस्तपसा च विप्राः**
**स्वर्गैषिणो यत्र यथैव यान्ति ।**
**क्षणेन यान्त्येव हि तत्र वीराः**
**प्राणान् सुयुद्धेन परित्यजन्तः ॥ ३७ ॥**

यज्ञसङ्घैर्यज्ञसमूहैर्ज्योतिष्टोमादिपूगैस्तपसा कृच्छ्रचान्द्रायणादिना स्वर्गैषिणः स्वर्गकामा निष्कामतयानुष्ठितैस्तैरेव मोक्षकामा वा विप्रा यथैव तत्तत्कर्मफलमनुभूय फलान्तरमुपभुञ्जते तत्कर्मोपभोगानन्तरं मोक्षभाजो वा भवन्ति तथैव सुयुद्धेन धर्मयुद्धेन क्षणेन तत्कालमेव प्राणान्परित्यजन्तो वीराः स्वर्गलोके तत्तत्सुखमनुभूय ब्रह्मभूयं प्राप्नुवन्तीति नानेकफलभोगविरोध इति ।

नन्वेवं स्वर्गादिफलकामेन तत्फलक साधनान्तरमेवानुष्ठीयतां किं सर्वानिष्टेन रणमरणेनेत्यत आह ।

**जितेन लभ्यते लक्ष्मीर्मृतेनापि सुराङ्गना ।**
**क्षणध्वंसिनि कायेऽस्मिन् का चिन्ता मरणे रणे ॥ ३८ ॥**

जितेनेति कर्तरि तृतीया ततश्च यदि शत्रु जयति तदा तदीया लक्ष्मीं लभते यदि च तेन हतो म्रियते तदा सुराङ्गनामित्यैहिकामुष्मिकफलसाधन सङ्ग्राममरणमन्वयव्यतिरेकाभ्यामतो न कर्मान्तरतुल्यताऽस्येति । न चास्य कर्मान्तरवच्चिरकालसाध्यतापीत्याह । अथ प्रत्यक्षपरिदृश्यमानः कायो देहः क्षणेनैव ध्वसतीति रणमरणं न चिरकालसाध्यम् । अनेन रणमरणाभावेऽप्यस्य विनश्वरत्वमाविष्कृतम् । ननु यथा रणप्रहारैः स्वर्गो भवति तथा तज्जन्यासृजो मुखप्रवेशे नरकोऽपि स्यादित्यत आह ।

**ललाटदेशे रुधिरं स्रवच्च**
**यस्याहवे तु प्रविशेच्च वक्त्रम् ।**
**न सोमपानेन किलास्य तुल्यं**
**संग्रामयज्ञे विधिवच्च दृष्टम् ॥ ३९ ॥**

आहवे सङ्ग्रामे ललाटदेशे प्रहारेण स्रवद्रुधिरं यस्य वक्त्रमनुप्रविशेत्तदस्य सोमपानेन तुल्य सङ्ग्रामलक्षणे यज्ञे तत्प्रतिपादकविधिना दृष्ट बोधितमिति नात्र नरकशङ्कापि ।

अनाथविप्रवहनादौ सद्यः शौचविधेर्र्थवादमाह ।

**अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः ।**
**पदे पदे यज्ञफलमानुपूर्व्या लभन्ति ते ॥ ४० ॥**

अनाथं मरणदेशकालयोर्बन्धुविहीनमसम्बन्धिनं ब्राह्मणमदृष्टार्थं ये द्विजा..ो वहन्ति ते पदे पदे यज्ञानामग्निष्टोमादीना फलान्यानुपूर्व्या क्रमेण प्राप्नुवन्ति ॥

इदानीं सद्यः शौचविधिमाह ।

**न तेषामशुभं किंचित्पापं वा शुभकर्मणाम् ।**
**जलावगाहनात्तेषां सद्यः शौचं विधीयते ॥ ४१ ॥**

तेषामनाथब्राह्मणवाहकानामशुभं केशवापनादि पापं वा शवस्पर्शादिनिमित्त नास्ति यतस्ते शुभकर्माणो विहितानुष्ठातारोऽतस्तेषा जलावगाहनात्स्नानमात्रात्सद्यः शौचं भवति ।

तदाह बृहत्पराशरः ।

प्रेतस्पर्शनसंस्कारैर्ब्राह्मणो नैव दुष्यति ।
वोढा चैवाग्निदाता च सद्यः स्नात्वा विशुद्ध्यति ॥ इति ।

वहनदहनसमुच्चयेऽधिकं प्राणायाममाह ।

**असगोत्रमबन्धुं च प्रेतीभूतं द्विजोत्तमम् ।**
**वहित्वा दाहयित्वा च प्राणायामेन शुद्ध्यति ॥४२॥**

न समानं गोत्रं यस्यासावसगोत्रस्स च सपिण्डसोदकसगोत्रभिन्नस्तेषां समानगोत्रत्वात् । अबन्धुं मातापितृभ्रातृबन्धुभिन्नं द्विजोत्तमं ब्राह्मणं प्रेतीभूतं मृतं वहित्वा दहित्वा च चकारात्स्नानाग्निस्पर्शनाभ्यां सह प्राणायामेन शुद्ध्यति । तदाहाङ्गिराः ॥

यः कश्चिन्निर्हरेत्प्रेतमसपिण्डः कथं च न ।
स्नात्वा सचैलं स्पृष्ट्वाग्निं तस्मिन्नेवान्हि वै शुचिः ॥ इति ।

असगोत्रमित्यनेन समानगोत्रयोः सोदकसगोत्रयोर्दहनवहनयोर्दशाहमित्युक्तम् । तदाह देवलः ।

यः समानोदकं प्रेतं वहेद्वापि दहेत वा ।
तस्याशौचं दशाहं स्यादन्येषां तु त्र्यहं विदुः ॥ इति ।

अन्येषां दाहकादिव्यतिरिक्तानां, समानोदकपदं सगोत्रस्याप्युपलक्षणं समानगोत्रत्वाविशेषात् । सपिण्डाना तु वहनाद्यभावेऽपि दशाहमस्त्येवेति न तन्निमित्तमाधिक्यम् । अत एव देवलः ।

विहितं तु सपिण्डाना प्रेतनिर्हरणादिकम् ।
तेषा करोति यः कश्चित्तस्याधिक्य न विद्यते ॥ इति ।

अबन्धुमित्यनेन बन्धुत्रयवहनादौ त्रिरात्रमुक्तम् । तदाह मनुः ।

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
विशुद्ध्यति त्रिरात्रेण मातुराप्ताश्च बान्धवान् ॥ इति ।

बन्धुवत्स्नेहातिशयेन, मातृबान्धवाः पितृबान्धवाद्युपलक्षकाः सम्बन्धसाम्यात् ।

अनुगमनाशौचमाह ।

**अनुगम्येच्छया प्रेतं ज्ञातिमज्ञातिमेव वा ।**
**स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्यति ॥४३॥**

ज्ञातिं सपिण्डाद्व्यतिरिक्तं समानजातीयं ब्राह्मणं पूर्वानुवृत्तेः, इच्छया कामतोऽनुगम्य सचैलं स्नात्वाग्निं स्पृष्ट्वा घृतं प्राश्य विशुध्यति । तदाह कूर्मः ।

प्रेतीभूतं द्विजं विप्रो योऽनुगच्छेत्तु कामतः ।
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति ॥ इति ।

अज्ञातिमेव वा असमानजातीयं क्षत्रियादिकमप्यनुगम्येदमेव वक्ष्यमाणेन समुच्चितं शुद्धिहेतुरिति वक्तुमज्ञातिमेव वेत्युक्तम् । घृतप्राशनं च शुध्यर्थमिति न भोजननिवर्तकं तत्कार्यकारित्वाभावात् ।

विप्रस्य क्षत्रियानुगमनाशौचमाह ।

**क्षत्रियं मृतमज्ञानाद्ब्राह्मणो योऽनुगच्छति ।**
**एकाहमशुचिर्भूत्वा पञ्चगव्येन शुध्यति ॥ ४४ ॥**

यो ब्राह्मणो मृतं क्षत्रियमज्ञानान्मौर्ख्यादनुगच्छति स एकाहमशौचं कृत्वा परदिने सचैलं स्नात्वाग्निं स्पृष्ट्वा पञ्चगव्यं पीत्वा शुध्यति। अत्र घृतपञ्चगव्ययोः शुध्यर्थत्वेन समानकार्यत्वाद् घृतप्राशननिवृत्तिः।

विप्रस्य वैश्यानुगमनाशौचमाह ।

**शवं तद्वैश्यमज्ञानाद्ब्राह्मणो ह्यनुगच्छति ।**
**कृत्वाशौचं द्विरात्रं च प्राणायामान् षडाचरेत् ॥४५॥**

यो ब्राह्मणो मृतं वैश्यमज्ञानान्मौर्ख्यादनुगच्छति स द्विरात्रमाशौचं कृत्वा परदिने सचैलं स्नात्वाग्निं स्पृष्ट्वा पञ्चगव्यं प्राश्य षट् प्राणायामानाचरेत् पूर्वत्र पञ्चगव्येन घृतस्य निवर्तनात्तदेवानुवर्तते न घृतम् ।

विप्रस्य शूद्रानुगमनाशौचमाह ।

**प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः ।**
**अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ॥ ४६ ॥**
**त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम् ।**
**प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति ॥४७॥**

यो ब्राह्मणो ज्ञानदुर्बलो मूर्खो मृतं शूद्रं स्मशानं नीयमानमनुगच्छेत्स त्रिरात्रमाशौचं कृत्वा परदिने समुद्रगां नदीं गत्वा सचैलं स्नात्वाग्निं स्पृष्ट्वा प्राणायामशतं विधाय घृतं प्राश्य विशुध्यति ।

अत्र घृतोपादानं मध्ये पञ्चगव्येन निवर्त्तितस्य पुनः प्राप्त्यर्थम् । एवं क्षत्रियस्य वैश्यशूद्रानुगमने एकरात्रद्विरात्रे वैश्यस्य शूद्रानुगमने एकाह इत्यूहनीयम् ।

एवं शूद्रानुगमननिषेधे द्विजैस्ते कथमनुसरणीया इत्यत आह ।

**विनिवर्त्य यदा शूद्रा उदकान्तमुपस्थिताः ।**
**द्विजैस्तदानुगन्तव्या एष धर्मः सनातनः ॥ ४८ ॥**

उदकान्तमुदकक्रियान्तं विनिवर्त्य कृत्वा आशौचसमाप्ताविति यावत् यदा उपस्थिताः स्थितास्तदा द्विजैस्त्रैवर्णिकैरनुगन्तव्याः शोकापनोदायानुसर्त्तव्या इति । शूद्रस्य त्रैवर्णिकानुगमने तु सत्योक्तिः "स्पर्शं विना-

नुगमने शूद्रो नक्तेन शुध्यति" इति पारस्करस्मरणात् । रात्रौ चेत्सूर्योदयेन । एवं ब्राह्मणस्य ब्राह्मणार्थन्तद्गृहं गत्वा रोदनेऽहोरात्रमन्यथार्वागस्थिसंचयात्स्नानमूर्ध्वमाचमन क्षत्रियवैश्यार्थं तद्गृहे गत्वा रोदने द्विरात्रमन्यथार्वागस्थिसञ्चयादहोरात्रमूर्ध्वं सज्योतिः शूद्रार्थे तद्गृहङ्गत्वा रोदने त्रिरात्रमन्यथार्वागस्थिसञ्चयाद् द्विरात्रमूर्ध्वमेकाह इति । एवमेवानन्तरैकान्तरार्थे रोदनेऽन्येषामपि ज्ञेयं प्रातिलोम्येन रोदने तु स्नानमेव सर्वेषामित्यादि षडशीतिविवृतौ शुद्धिचन्द्रिकायामेवाविष्कृतमिति नेहोच्यते ।

चेतश्चञ्चलचारुचित्रविषया भुक्तिर्यदि श्रेयसी
मुक्तिर्वा यदि वाञ्छिताऽभयपरा ऽऽनन्दात्मिका स्थेयसी ।
तल्लक्ष्मीनिलयं विमृश्य सलयं गङ्गाम्भसः सर्वदा
तिष्ठ श्रीमधुसूदनाङ्घ्रिकमलासक्त हि नक्तन्दिवम् ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु—
श्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृते विवृतस्तृतीयो-
ऽध्यायः कलावुचितशुद्धिविनिर्णयाय ॥ २ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां तृतीयोऽध्यायः ॥

THE UNIVERSITY LIBRARY.
RECEIVED ON
31 JAN 1925
ALLAHABAD.

॥ श्रीगणेशायनमः ॥

सुरालयनिवासिनां मरकतप्ररोहभ्रमो
भुवस्तलनिवासिनामसितरत्नयूपभ्रमः ।
अधोभुवनवासिनां रविसुताजलौघभ्रम-
स्त्रिविक्रमपदक्रमो जयति यत्र सोऽभूत्क्रमः ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु–
श्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृते क्रियते चतुर्था–
ऽऽध्याये प्रकीर्णकसुतादिविनिर्णयोऽत्र ॥ १ ॥

अथोक्तवक्ष्यमाणयोराचारप्रायश्चित्तकाण्डयोः शेषान् धर्मान् अन्तरा प्रतिपादयितुं सङ्करकाण्डमारभते । तत्र पूर्वाध्यायान्ते हीनवर्णेश-वानुगमनरूपप्रकीर्णप्रायश्चित्ताभिधानेन बुद्धिस्थे प्रकीर्णक एवोद्बन्ध-नमृतोद्वहनादि प्रायश्चित्तं विधातुं तच्चिन्तामाह ।

अतिमानादतिक्रोधात्स्नेहाद्वा यदि वा भयात् ।
उद्बन्धनीयात् स्त्री पुमान् वा गतिरेषा विधीयते ॥१॥

मानमतिक्रान्तोऽतिमानो नीचाधिक्षेपादिस्तस्मादतिक्रोधः पौनः-पुन्येन मर्म्मोद्घाटनादौ क्रोधावेशः स्नेहभययोरप्यतिशब्दानुषङ्गेणाति-स्नेहस्य द्रोणदशरथादिमरणहेतुत्वमतिभयस्य च महापराधिभृत्यादिमर-णहेतुत्वं स्फुटी भवति ततश्च स्त्री पुमान्वा जातिविशेषानादरेण यद्युद्बन्धनीयादुद्बन्धनेन गलपाशेन म्रियेत तदैषा वक्ष्यमाणा गतिर्नरक-प्राप्तिर्भवति उद्बन्धनीयादिति क्र्यादेर्बन्धबन्धन इत्यस्माद्धातोर्विधिलिङि श्नाप्रत्यये कृते व्यत्ययो बहुलमित्यनेन द्विविकरणतायां शपि कृते निष्पद्यते ।

प्रतिज्ञातां गतिं दर्शयति ।

**पूयशोणितसंपूर्णे त्वन्धे तमसि मज्जति ।**
**षष्टिवर्षसहस्राणि नरकं प्रतिपद्यते ॥ २ ॥**

पूयशोणिताभ्यां सम्पूर्णेऽन्धे तमसि अन्धतामिस्राख्ये नरकविशेषे षष्टिवर्षसहस्राणि मज्जति तत्र च नरकयातनां तावत्कालमेव प्रतिपद्यते प्राप्नोति । तथा चेशावास्यश्रुतिः ।

असूर्या नाम ते लोका अन्धेन तमसा वृत्ताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महता जनाः ॥ इति ।

वक्ष्यमाणप्रायश्चित्तनिमित्त निषेधति ।

**नाशौचं नोदकं नाग्निं नाश्रुपातं च कारयेत् ।**

आशौचं दशाहादि उदकमुदकदानमग्निमग्निदानमश्रुपातो रोदनं चकाराद्वहनादि न कारयेत्र कुर्यात्प्रत्येकं निषेधेन तदतिक्रमाणामपि प्रत्येकमेव प्रायश्चित्तनिमित्तता गम्यते । अत्र प्रकरणार्थमाह ब्रह्म पुराणे ।

क्रोधात्प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम् ।
गिरिवृक्षप्रपातं च ये कुर्वन्ति नरा धमाः ॥
महापातकिनो ये च पतितास्ते प्रकीर्तिताः ।
पतितानां न दाहः स्याचान्त्येष्टिर्नास्थिसंचयः ॥
न चाश्रुपातः पिण्डो वा कार्यं श्राद्धादिकं क्वचित् ॥ इति ।

उक्तनिषेधातिक्रमे प्रायश्चित्तमाह ।

**वोढारोऽग्निप्रदातारः पाशच्छेदकरास्तथा ॥ ३ ॥**
**तप्तकृच्छ्रेण शुध्यन्तीत्येवमाह प्रजापतिः ।**

ये तादृशशवस्य वोढारो वाहका अग्निप्रदातारो दाहकाः पाशच्छेदकरा गलपाशान् छेत्तारस्तथाशब्देनाशौचोदकदानादिकर्तारश्च ते सर्वे वक्ष्यमाणलक्षणेन तप्तकृच्छ्रेण शुध्यन्तीति प्रजापतिराह । एतच्चाकमतो दाहादिकरणे कामतस्तु द्विगुणं तदुक्तं ब्राह्मे ।

एतानि पतितानां तु यः करोति विमोहितः ।
तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा ॥ इति ।

एतानि दाहादीनि पूर्वप्रकृतत्वात्, विमोहितो मूर्खः, यद्यप्यत्रोभयत्रापि कामाकामपदे न स्तस्तथाप्येकगुणद्वैगुण्यश्रवणादेव तयोः कामाकामविषयत्वं सिध्यति । "विहितं यदकामानां कामात्तद्द्विगुणं भवेदिति" स्मरणात् । उपपातकिसंस्कारे प्रायश्चित्तमाहात्रिः ।

उपपातकसंयुक्तो मानवो म्रियते यदि ।
तस्य संस्कारकर्त्ता च प्राजापत्यं समाचरेत् ॥ इति ।

उद्बन्धनन्यायमन्यत्राप्यतिदिशति ।

**गोभिर्हतं तथोद्बन्धं ब्राह्मणेन तु घातितम् ॥ ४ ॥**
**संस्पृशन्ति तु ये विप्रा वोढारश्चाग्निदाश्च ये ।**
**अन्ये ये चानुगन्तारः पाशच्छेदकराश्च ये ॥ ५ ॥**
**तप्तकृच्छ्रेण शुद्धास्ते कुर्युर्ब्राह्मणभोजनम् ।**
**अनडुत्सहितां गां च दद्युर्विप्राय दक्षिणाम् ॥ ६ ॥**

यथोद्बन्धनमृतं तथा गोहतं ब्राह्मणहतं चेति व्याख्येयमन्यथा पौनरुक्त्यात् । गोग्रहणं शृङ्ग्याद्युपलक्षणम् । तदाह ब्रह्मपुराणे ।

शृङ्गिदंष्ट्रिनखिव्यालविषवह्निमहाजलैः ।
सुदूरात्परिहर्त्तव्यैः कुर्वन् क्रीडां मृतस्तु यः ॥
नागानां विप्रियं कुर्वन् दग्धश्चाप्यथ विद्युता ।
निगृहीतः स्वयं राज्ञा चौरदोषेण कुत्र चित् ॥
परदारान्हरन्तश्च रोषात्तत्पतिभिर्हताः ।
असमानैश्च सङ्कीर्णं चण्डालाद्यैश्च विग्रहम् ॥
कृत्वा तैर्निहितास्तद्वच्चण्डालादीन्समाश्रिताः ॥ इति ।

अत्र गवादिभिः क्रीडन् नागानां विप्रियं कुर्वन्, इत्यादिना आततायितया बुद्धिपूर्वप्रवृत्त्या मृतानामाशौचाद्यभाव उच्यते । प्रामादिकमरणे तु पातित्याभावादस्त्येवाशौचम् ।

यदि कश्चित्प्रमादेन म्रियतेऽग्न्युदकादिभिः ।
तस्याशौचं विधातव्य कर्त्तव्याचोदकक्रिया ॥

इत्यङ्गिरः स्मरणात् । तदेतान्ये संस्पृशन्ति वहन्ति दहन्ति वा ये चान्येऽनुगच्छन्ति पाशादिकं च्छिदन्ति ते सर्वे तप्तकृच्छ्रं कुर्युरित्यतिदिश्य ब्राह्मणान्भोजयित्वा गोमिथुन दद्युरित्युपदिश्यते । तदाह च्यवनः । आत्मघातकस्पर्शनदहनवहने तप्तकृच्छ्रं चरेद्गुत्सगावो दक्षिणा ब्राह्मणेष्विति ।

तप्तकृच्छ्रस्यानेकरूपत्वात्स्वाभिमतस्य स्वरूपमाह ।

**त्र्यहमुष्णं पिबेद्वारि त्र्यहमुष्णं पयः पिबेत् ।**
**त्र्यहमुष्णं पिबेत्सर्पिर्वायुभक्षो दिनत्रयम् ॥ ७ ॥**
**षट्पलं तु पिबेदम्भस्त्रिपलं तु पयः पिबेत् ।**
**पलमेकं पिबेत्सर्पिस्तप्तकृच्छ्रं विधीयते ॥ ८ ॥**

नीरक्षीरघृतवातानामेकैकं प्रतित्र्यहं षट्त्र्येकपलपरिमितं पिबेदेवं द्वादशाहसाध्यस्तप्तकृच्छ्रो भवति । तथा च मनुः ।

तप्तकृच्छ्रं चरेद्विप्रो जलक्षीरघृतानिलान् ।
प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः ॥ इति ।

तप्तपदं च समानकालद्रव्य शीतकृच्छ्रं व्यावर्त्तयति । तथा च यमः ।

त्र्यहं शीतं पिबेत्तोय त्र्यहं शीतं पयः पिबेत् ।
त्र्यह शीतं घृतं पीत्वा वायुभक्षः परं त्र्यहम् ॥ इति ।

त्रिरात्रं चोष्णमारुतमिति मूलपाठे तु त्रिवारमास्य पूरणमुष्णोदकवाष्पं पिबेदित्यर्थः ।

पतितसंसर्गे प्रायश्चित्त विधातुं तन्निन्दामाह ।

**यो वै समाचरेद्विप्रः पतितादिष्वकामतः ।**
**पञ्चाहं वा दशाहं वा द्वादशाहमथापि वा ॥ ९ ॥**
**मासार्धमासमेकं वा मासद्वयमथापि वा ।**
**अब्दार्धमब्दमेकं वा भवेदूर्ध्वं तु तत्समः ॥ १० ॥**

यो विप्रोऽन्यो वा पतितादिषु पतिता ब्रह्महादयो वक्ष्यमाणा-श्चत्वार आदिशब्देनातिदिष्टपातित्यानां पतितापत्यादीनां ग्रहणं "पति-तात्पन्नः पतितो भवतीति" वसिष्ठस्मरणात्। तेषु च पञ्चाहं दशाहं द्वाद-शाहं पक्षं मासं मासद्वयं षण्मास संवत्सरं वा समाचरेत्सम्यगाचारं वक्ष्यमाणासनादिभिर्व्यवहारं कुर्यात्सोऽपि पापभाग्भवतीति सम्बन्धः। तथा च वक्ष्यति द्वादशान्ते।

आसनाच्छयनाद्यौनात्सम्भाषासहभोजनात्।
सङ्क्रामन्तीह पापानि तैलबिन्दुरिवाम्भसि ॥ इति।

संवत्सरादूर्ध्वं तु पतितसंसर्गेण तत्समः पतितसमो भवेन्नतु पतितः, राजसमो मन्त्रीतिवत्।

तथा च पाद्मे। महापातकिन उपक्रम्य
एतैः सह समायोगं यः करोति दिने दिने।
तुल्यतां याति सोऽप्याशु कलौ संवत्सरे गते ॥ इति।

एतैः पूर्वोक्तैर्महापातकिभिः सह दिने दिने प्रतिदिन समायोगं संसर्गं यः करोति सोऽपि कलौ संवत्सरे गतेऽतीते स ह्याशु स्वल्पसंस-र्गेणापि तुल्यतां साम्यं यातीत्यर्थः। ननु "संवत्सरेण पतति पतितेन सहाचरन्नि"त्यादिशङ्खादिवाक्यैः संवत्सरमात्रसंसर्गेण पातित्यस्यैवाभि-धानात्कथं संवत्सरानन्तरं संसर्गेण पतितसाम्यमेव न पातित्यमिति चेत्। सत्यम्। युगभेदेन व्यवस्थितविषयाणां स्मृतीनामेकमूलत्वासम्भवेनैक-वाक्यात्वाभावात् संवत्सरेण पातित्योत्पत्तौ वक्ष्यमाणषाण्मासिकप्राय-श्चित्तानुपपत्तेश्चात्र सम्पूर्णमहापातकप्रायश्चित्ताभावात्। न च तदन्य-थानुपपत्त्या संवत्सरशब्दः किं चिन्न्यूनसंवत्सरपरः कल्प्यः। मुख्यार्थे बाध-काभावेन लक्षणाया अन्याय्यत्वात्। न च वचनान्तरविरोधो बाधकः। तस्यैतच्छास्त्रोत्पत्तिप्रयोजनप्रपञ्चनेनैव परिहृतत्वात्। पातित्यं तु उत्पा-दकाभावादेव न, कलौ पतति कर्मणेत्यभिधानात्। संसर्गपातित्यस्य युगान्तरविषयत्वेन चिपाद्यां व्यवस्थापनात्। अत एव संसर्गदोषः पापे-

ष्विति कलिवर्ज्यप्रकरणेऽभिहितमित्यलम् । पृथक् पृथक् व्यवस्थितप्रायश्चित्तविधानार्थमनेकपक्षोत्कीर्त्तनं विधित्सितप्रायश्चित्तस्याल्पताबोधनायाकामत इत्युक्तम् ।

इदानीमुक्तपक्षेषु प्रायश्चित्तान्याह ।

**त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत् ।**
**तृतीये चैव पक्षे तु कृच्छ्रं सान्तपनं चरेत् ॥ ११ ॥**
**चतुर्थे दशरात्रं स्यात्पराकः पञ्चमे मतः ।**
**कुर्याच्चान्द्रायणं षष्ठे सप्तमे त्वैन्दवद्वयम् ॥ १२ ॥**
**शुद्ध्यर्थमष्टमे चैव षण्मासान् कृच्छ्रमाचरेत् ।**

तल्लक्षणमाह विष्णुः । अथ कृच्छ्राणि भवन्ति त्र्यहं नाश्नीयादिति । द्वितीयपक्षे दशाहसंसर्गे कृच्छ्रं प्राजापत्यमाचरेत् । निरुपपदः कृच्छ्रशब्दः प्राजापत्यमाचष्टे कृच्छ्रं प्राजापत्यमिति देवलवचनात् । तत्स्वरूपमाह मनुः ।

त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् ।
त्र्यहं परं तु नाश्नीयात्प्राजापत्यं चरन् द्विजः ॥ इति ।

यद्यपि प्राजापत्यं स्वयमप्युपरिष्टाद्वक्ष्यति तथापि तस्य प्राजापत्यद्वयस्यानीयत्वाच्चेहोपयोगः । तृतीयपक्षे द्वादशाहसंसर्गे सान्तपनकृच्छ्रमाचरेत् । तल्लक्षणमाह जाबालिः ।

गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम् ।
एकैकं प्रत्यहं पीत्वा त्वहोरात्रमभोजनम् ॥
कृच्छ्रं सान्तपनं नाम सर्वपापप्रणाशनम् ॥ इति ।

यद्यपि

गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम् ।
जग्ध्वा परेऽह्न्युपवसेत्कृच्छ्रं सान्तपनं चरन् ।

इति याज्ञवल्कीयं द्विरात्रिकमपि कृच्छ्रं सान्तपनमस्ति तथापि तच्च प्रकृतोपयोगि द्वितीयपक्षोक्तात्प्राजापत्याच्यूनत्वात् । न चोदाहृतस्यापि सप्ताह-

साध्यत्वात्प्राजापत्यन्यूनतास्त्वयेति वाच्यम् । त्रिरात्रोपवासवतः प्राजापत्यादस्य सप्ताहोपवासात्मकस्य पञ्चगव्याशनक्लेशेनाधिकत्वादिति । चतुर्थे पक्षे पक्षसंसर्गे दशाहमुपवासमाचरेत् । यद्यप्यत्रोपवासो न श्रुतस्तथापि वक्ष्यमाणपराकसाहचर्यात्कल्पनीयः । तथाविधव्रतान्तराभावात् । पञ्चमपक्षे माससंसर्गे पराकः कर्तव्यतया मतः । तत्स्वरूपमाह याज्ञवल्क्यः । द्वादशाहोपवासेन पराकः परिकीर्त्तित इति । षष्ठपक्षे मासद्वयसंसर्गे वक्ष्यमाणलक्षणं चान्द्रायणं कुर्यात् । सप्तमपक्षे षाण्मासिकसंसर्गे ऐन्दवं चान्द्रायणं तयोर्द्वय कुर्यात् । अष्टमपक्षे संवत्सरसंसर्गे षण्मासपर्यन्तं नैरन्तर्य्येण कृच्छ्रं प्राजापत्यमभ्यसेत् । षण्मासाभ्यासेन च पञ्चदशसंख्योऽसौ संपद्यते । शुध्यर्थमिति सर्वशेषः । संवत्सरश्चात्र सावनमानेन षष्ठ्यधिकशतत्रयाहोरात्रो गृह्यते । ततश्चाब्दमेक वेत्यादावत्यन्तसंयोगवाचिन्या द्वितीयया नैरन्तर्याभावेऽप्यन्तरितदिवसगणनया षष्ठ्यधिकशतत्रयदिवसव्यापित्वं संसर्गे साधनीयमेव च पञ्चाहादिषाण्मासिकान्तेषु सर्वेषु पक्षेषु ज्ञेयम् । एते च प्रायश्चित्तकल्पा अकामतः संसर्गे ज्ञेयास्तथोपक्रमात् । कामतः संसर्गे तु धर्मप्रदीपोक्ताः ।

पञ्चाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकम् ।
द्वादशाहे तु संसर्गे उपवासो दशाचरेत् ॥
पराकस्त्वर्द्धमासे स्यान्मासे चान्द्रायणं चरेत् ।
मासत्रये तु कुर्वीत कृच्छ्रं चान्द्रायणोत्तरम् ॥
षाण्मासिके तु संसर्गे कृच्छ्रं त्वब्दार्द्धमाचरेत् ।
संसर्गे चाब्दिके कुर्यादर्द्धं चान्द्रायणोत्तरम् ॥
अत ऊर्ध्वं तु संसर्गे षडब्दं व्रतमाचरेत् ॥ इति ।

ननु निमित्तपरिगणने नवमोऽपि पक्ष उपन्यस्तो "भवेदूर्ध्वं तु तत्सम इति तत्कथमत्र प्रायश्चित्तं नोपदिष्टमिति चेत् । सत्यम् । समत्वाभिधानेनैव तस्योक्तत्वात् । यथा हि पतितसंसर्गो न पातित्यहेतुः कलौ पतति कर्मणेत्यभिधानात् संसर्गदोष इति कलिवर्ज्ये निषेधाश्च । महापातकप्रकरणे तत्प्रायश्चित्तानभिधानाच्च । ततश्च महापातकत्वा-

भावे पापहेतुत्वे च सति समत्वाभिधानेन प्रायश्चित्तमतिदेशेनागच्छ-त्यवान्तरव्यवहितत्वादर्द्धमेव भविष्यति गुर्वधिक्षेपादिष्विव। तथा च स्मरन्ति संग्रहकाराः ।

व्रतादिदेशे पादोनं समे त्वर्धं प्रकीर्तितम् ।
अतिदेशे स्वतः प्राप्तिः समत्वे चानुमानिकी ॥ इति ।

अत एव धर्मप्रदीपे वर्षाधिकसंसर्गेऽपि षडब्दमेवोक्तम्। अत ऊर्ध्वं तु संसर्गे षडब्दव्रतमाचरेदिति । अनेन कामतोऽपि वर्षाधिकसंसर्गे षड-ब्दाभिधानेनाकामतस्तादृशसंसर्गेऽर्द्धं प्रायश्चित्तं कैमुतिकन्यायेनैव दर्शि-तमिति सर्वं सुस्थम् । एतेन प्रकीर्णकप्रायश्चित्तप्रस्तावे पतितसंसर्गस्य महापातकस्य प्रायश्चित्ताभिधानमसंगतमिति चोद्यं निरस्तम् । उक्तक-ल्पानां प्रकीर्णत्वात् ।

ननु

पापेन पतितैर्नैषां संसर्गं याति मानवः ।
स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धये ॥

इति मन्वादिभिः पूर्णप्रायश्चित्ताभिधानात्कथमिदमर्द्धं प्रायश्चि-त्तमुच्यते । सत्यम् । "संवत्सरेण पतति पतितेन सहाचरन्" त्यनेन पूर्वपातित्यमभिधाय तदभिधानात् पातित्ये च पूर्णं प्रायश्चित्तं युक्तमेव । प्रकृते च न पातित्यमभिमतमित्युक्तमेव । नचैवमेभिस्तु संवसेद्यो वै वत्सरं सोऽपि तत्सम इति याज्ञवल्क्यवाक्येऽप्यर्द्धं प्रायश्चित्तं व्याख्यायेत समत्वाभिधानादिति वाच्यम्। एते महापातकिनो यश्च तैः सह संवसेदित्यनेनाहत्य संसर्गिणोऽपि तत्र महापातकित्वोपदेशात् । उक्तपक्षेषु प्रायश्चित्तानुष्ठानानन्तरं तदङ्गतया पक्षसंख्याप्रमाणेन प्रथ-मपक्षे किं चित्सुवर्णं द्वितीये तद्द्विगुणं तृतीये तत्त्रिगुणमित्यादि-क्रमेण दक्षिणा दातव्या सुवर्णानीति नपुंसकनिर्देशाद्यत्किं चित् परि-माणं सुवर्णं षोडशमाषपरिमितं तस्य पुल्लिङ्गसुवर्णशब्दवाच्यत्वा-दिति । पतितोत्पन्नत्वमपि संसर्गविशेषः। तदाह वसिष्ठः। पतितोत्पन्नः

पतितो भवति अन्यत्र स्त्रियाः सा हि परगामिनी तामरिक्थामुपेया दिति। कन्योद्वाहे विशेषमाह हारीतः। पतितस्य कन्यां विवस्त्रामाप्ला-व्याहोरात्रोपोषितां प्रातः शुक्लेन वाससाच्छाद्य नाहमेतेषां न ममैत इति त्रिरुच्चैरभिदधानां तीर्थेषु गृहेषु वोद्वहेदिति। उपोषितां प्रायश्चित्ता-नन्तरं प्रायश्चित्त त्वाह बौधायनः। अशुचिशुक्रोत्पन्नानां तेषां शुद्धिमि-च्छतां प्रायश्चित्त पतनीयानां तृतीयोंशः स्त्रीणामंशात्तृतीयानामिति। पतितोत्पन्नानां शुद्धिमिच्छतां पतितप्रायश्चित्तस्य तृतीयोंशः प्रायश्चित्तं स्त्रीणां तु तृतीयस्यापि तृतीयोंश इत्यर्थः। तत्संसर्गे तु पूर्वोक्तकालेषु पूर्वोक्ता एव प्रायश्चित्तकल्पाः कामाकामाभ्यां विज्ञेयाः।

वर्षाधिकसंसर्गे तु तत्रापि मुख्यप्रायश्चित्तार्द्धमेव साम्याभिधानसा मर्थ्यात्। एव मुपपतकयादिसंसर्गेऽप्यूह्येयम्।

एवमुपदिष्टप्रायश्चित्तानि निमित्तान्यभिधायेदानीमूह्येयप्रायश्चि त्तान्यपि कानि चिन्निमित्तान्याह।

ऋतुस्नाता तु या नारी भर्त्तारं नोपगच्छति।
सा मृता नरके याति विधवा च पुनः पुनः॥ १४॥

रजोदर्शनदिनादारभ्य षोडशदिनानि ऋतुस्तत्र चतुर्थदिवसे स्नाता या स्वयमेव भर्त्राहूता वा मैथुनाय नोपसर्पति सा मरणानन्तरं नरकम-नुभूय पश्चादनेकजन्मसु पुनः पुनर्विधवा भवति। तथा च नारदीये।

आहूता या तु वै भर्त्रा नानुयाति त्वरान्विता।
सा ध्वाङ्क्षी जायते पुत्रि दशजन्मानि पञ्च च॥ इति।

अत्र चानन्तरवक्ष्यमाणार्द्धं कृच्छ्रार्द्धं पादकृच्छ्रमूह्येयम्। स्त्रीणामर्द्धं प्रकीर्तितमिति न्यायात्।

न केवलं स्त्र्येव प्रत्यवैति किं तु पुरुषोऽपीत्याह।

ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः॥ १५॥

यः पुमान्स्वविधौ विद्यमानः स्वस्थोऽपि सन् द्वेषादिना ऋतुस्नाता भार्यां चतुर्थदिनादारभ्याषोडशादन्यतमायां रात्रौ नोपगच्छति स घोरायां भ्रूणहत्यायां गर्भहननप्रत्यवायेन युज्यत इति न संदेहः । तथा च देवलः ।

यः स्वदारान् ऋतुस्नाता स्वस्थः सन्नोपगच्छति ।
भ्रूणहत्यामवाप्नोति प्रजां प्राप्तां विनाश्य सः ॥ इति ।

अत्रोचेयं प्रायश्चित्तमाह बृहस्पतिः । ऋतौ न गच्छेद्यो भार्यां सोऽपि कृच्छ्रार्द्धमाचरेदिति ।

न केवल ऋत्वतिक्रमे स्त्रियाः प्रत्यवायः किं तु भर्त्रतिक्रमेऽपीत्याह ।

**दरिद्रं व्याधितं धूर्त्तं भर्त्तारं यावमन्यते ।**
**सा शुनी जायते मृत्वा शूकरी च पुनः पुनः ॥ १६ ॥**

नानाविधभोगकामनया दरिद्रं निस्वं निरन्तरं तच्चित्तानुरञ्जनासामर्थ्यसम्भवात्क्रोधाद्व्याधितं दीर्घतीव्रामयग्रस्तं परस्त्रीसम्भोगसम्भवान्मत्सराद्धूर्त्तं परस्त्रीलम्पटं भर्त्तारं स्वपतिं या स्त्र्यवमन्यते तिरस्करोति सा मृत्वा शुनी भूत्वा पुनः पुनः शूकरी जायते । तथा च ब्रह्माण्डपुराणे ।

कामाद्द्वेषान्मत्सराद्वा भर्त्तारं याऽवमन्यते ।
सा सप्तजन्मकं यावन्नारकी स्यान्न संशयः ॥ इति ।

अत्रोचेयं प्रायश्चित्तमाहापस्तम्बः । भर्तुर्व्यतिक्रमे कृच्छ्रमिति व्यतिक्रमस्तिरस्कारो न व्यभिचारस्तत्र यत्पुंसः परदारेषु तच्चैना चारये द्व्रतमित्यनेन प्रायश्चितान्तराम्नानेन कृच्छ्रप्रायश्चित्तासम्भवात् ।

न केवलंपत्यवमानेनैव स्त्री प्रत्यवैति किं तु तच्छुश्रूषापरिहारेण व्रताद्यनुष्ठानेनापीत्याह ।

**पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् ।**
**आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत् ॥ १७॥**

जीवति पत्यौ या स्त्री उपवासव्रतयात्रादिकमनुतिष्ठेत्सा भर्तृप्रतिकूलानुष्ठानेन तदायुर्हरति स्वयं च निषिद्धानुष्ठानेन नरकं प्राप्नोति । अत एवाहात्रिः ।

न व्रतेनोपवासेन धर्मेण विविधेन च ।
नारी स्वर्गमवाप्नोति प्राप्नोति पतिपूजनात् ॥ इति ।

तर्हि पतिशुश्रूषाया अविरोधेन तदनुष्ठाने को बाध इत्यत आह ।

**अपृष्ट्वा चैव भर्त्तारं या नारी कुरुते व्रतम् ।**
**सर्वं तद्राक्षसान् गच्छेदित्येवं मनुरब्रवीत् ॥ १८ ॥**

या स्त्री पतिं पितरं पुत्रं वाऽपृष्ट्वा अननुमान्य व्रताद्याचरेत्तदनुष्ठितं व्रतादि सर्वं राक्षसांस्तर्पयति नास्याभिमतं फलं साधयतीति मनुराह । तदाह मार्कण्डेयः ।

नारी खल्वननुज्ञाता पित्रा भर्त्रा सुतेन वा ।
निष्फलं तु भवेत्तस्या यत्करोति व्रतादिकम् ॥ इति ।

अस्यापि भर्त्रतिक्रमरूपत्वात्पूर्वोक्तकृच्छ्रमेव प्रायश्चित्तम् । एवं च पतिशुश्रूषाया अविरोधेन तदनुज्ञयानुष्ठित व्रतादि धर्मजनकं स्त्रिया इति पूर्वोत्तरवाक्याभ्यामुक्तं भवति । तदेतत्स्पष्टमाहतुः शङ्खलिखितौ । न व्रतोपवासनियमेज्यादानं दमो वानुग्रहकरः स्त्रीणामन्यत्र पतिशुश्रूषायाः कामं तु भर्तुरनुज्ञया व्रतोपवासनियमादीनामन्यतमः स्त्रीधर्म इति ।

इदानीं स्त्रीणामव्यवहार्यतानिमित्तमाह ।

**बान्धवानां सजातीनां दुर्वृत्तं कुरुते तु या ।**
**गर्भपातं च या कुर्यान्न तां सम्भाषयेत्क्वचित् ॥१९॥**

या स्त्री बान्धवानामसपिण्डानां सजातीनां सपिण्डानां च दुर्वृत्तं प्राणवियोगानुकूलं विषप्रयोगाभिचारादिव्यापारं करोति या च गर्भपातमौषधादिप्रयोगेण करोति तां द्विविधामपि क्वचिदपि निमित्ते न सम्भाषयेन्न सम्भाषणादिभिर्व्यवहरेत्तस्यास्त्याज्यत्वात् । तथा च याज्ञवल्क्यः ।

व्यभिचारादृतौ शुद्धिर्गर्भे त्यागो विधीयते ।
गर्भभर्तृवधादौ च तथा महति पातके ॥ इति ।

भर्तृपदं तद्वन्धूनामप्युपलक्षणं "न भर्त्तारं तद्वन्धून् वा द्विष्यादिति' शङ्खलिखितस्मरणात् ।

ननु यथोक्तप्रायश्चित्तानुष्ठाने कुतो न व्यवहार्येतेत्यत आह ।

**यत्पापं ब्रह्महत्यायां द्विगुणं गर्भपातने ।**
**प्रायश्चितं न तस्याः स्यात्तस्मात् त्यागो विधीयते ॥२०॥**

यद्ब्रह्महनने पापं तद्गर्भपातने द्विगुणं भवति ब्राह्मणगर्भविषयमेतत् । ब्रह्महत्यापापद्वैगुण्याभिधानात् ततश्चायमर्थः । यत्र गर्भत्व न तत्र ब्राह्मण्य यथा क्षत्रियगर्भे, यत्र ब्राह्मण्य न तत्र गर्भत्वं यथो त्पन्ने, ब्राह्मणगर्भे चोभयमपीति परस्परासङ्कीर्णमेकत्र विद्यमानं पापद्वैगुण्यनिमित्तं भवति पृथग्निषेधविषयत्वात् । यथा सवनस्थब्राह्मणवधे "द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेदिति" तद्द्वैगुण्यात् । अत एव गोगर्भवधेऽप्यङ्गप्रत्यङ्गसपूर्णे द्विगुणं गोव्रतं चरेदिति व्रतद्वैगुण्यं वक्ष्यति । एवं क्षत्रियादिगर्भेष्वप्यूह्यम् । नन्वेवं पापद्वैगुण्य प्रायश्चित्तद्वैगुण्यमस्तु द्विगुणं गोव्रतं चरेदिति न्यायादत आह । तस्या ब्राह्मणादिगर्भघातिन्याः प्रायश्चित्त व्यवहारापादकं नास्ति ।

नीचाभिगमनं गर्भपातनं भर्तृहिंसनम् ।
विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवम् ॥

इति योगिस्मरणात् । तस्मात्तस्यास्त्याग एव विधीयते । तथा च योगीश्वरः । गर्भे त्यागो विधीयते गर्भभर्तृवधादौ च तथा महति पातक इति । त्यागश्च धर्मकार्यसम्भोगयोरेव न त्वात्यन्तिकः ।

पतितानामेष एव विधिः स्त्रीणां प्रकीर्तितः ।
वासो गृहान्तिके देयमन्नं वासः सरक्षणम् ॥

इति तस्यैव स्मरणात् । ननु हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेदिति मनुना ब्रह्महत्याव्रतातिदेशात्कथं तदभाव इति चेत् ।

सत्यम् । तस्यामुष्मिकनरकादिनिवर्तकत्वेऽप्यैहिकव्यवहारानापादकत्वात् । तथात्वे त्याग विधिविरोधस्य दुष्परिहरत्वात् । तस्मात्प्रायश्चित्ताचरणेऽपि तस्या व्यवहार्यत्व नास्तीति सर्ववचनानामविरोधः । प्रायश्चित्त च गर्भगतवर्णानुसारेण कल्प्यम् । गर्भहा च यथावर्णमिति

स्मरणात् । एतदप्यनिर्णीतस्त्रिपुल्लिङ्गे । हत्वा गर्भमविज्ञातमिति स्मरणात् । विज्ञाते तु तत्तद्वधनिमित्तमेव । एतदपि स्वपतिनिहितगर्भविषयम् । जारगर्भवधे तु प्रायश्चित्तविशेषश्चतुर्विंशतिमतेऽभिहितः ।

गर्भपाते विनिर्दिष्टं यथावर्णे विधिव्रतम् ।
जारगर्भे विशेषः स्याद्यथोक्तमृषिभिः पुरा ॥
ब्रह्मगर्भवधे कृच्छ्रमब्दं सान्तपनाधिकम् ।
क्षत्रगर्भवधे चैव चरेच्चान्द्रायणद्वयम् ॥
वैश्यस्य चैन्दवं प्रोक्तं पराकः शूद्रघातने ।
प्रायश्चित्तमिदं प्रोक्तं गर्भपाते विशेषतः ॥ इति ।

इदानीं नास्तिक्ये तूपपातके प्रायश्चित्तमुक्तेतुं तन्निन्दामाह ।

**न कार्यमावसथ्येन नाग्निहोत्रेण वा पुनः ।**
**स भवेत्कर्मचण्डालो यस्तु धर्मपराङ्मुखः ॥ २१ ॥**

यः श्रुतिस्मृत्युक्तधर्मेभ्यः पराङ्मुखस्तेषामैहिकामुष्मिकफलसाधकत्वाभावाङ्गीकारेणाननुष्ठाता स जन्मना ब्राह्मणादिरपि कर्मणा चण्डालो भवेत् यतस्तस्यैवमुक्तिरावसथ्येन स्मार्ताग्निना अग्निहोत्रेण वा न कार्यं न प्रयोजनं प्रत्यक्षेण फलानुपलम्भात् । को हि तद्वेद यदमुष्मिन् लोकेऽस्ति वा नवेति श्रुत्या च संशयाविष्करणात्तत्फलसद्भावे किं प्रमाणमिति । अत्रोचेयं प्रायश्चित्तमाह वसिष्ठः । नास्तिकः कृच्छ्रं द्वादशरात्रं चरित्वा विरमेन्नास्तिक्यान्नास्तिकवृत्तिस्त्वतिकृच्छ्रमिति । सकृदसकृन्नास्तिक्ये कृच्छ्रातिकृच्छ्रावित्यर्थः । अत्यन्ताभ्यासे तु शंखः । नास्तिके नास्तिकवृत्तिः संवत्सरं ब्राह्मणगृहे भैक्ष्यं चरेदिति ।

नास्तिकनिन्दाप्रसङ्गेन बीजिक्षेत्रिणोः पित्रोरपि तामुक्तेतुं पुत्रभेदकथने लौकिकौ तौ दृष्टान्तयति ॥

**ओघवाताहृतं बीजं यस्य क्षेत्रे प्ररोहति ।**
**स क्षेत्री लभते बीजं न बीजी भागमर्हति ॥ २२ ॥**

ओघो जलप्रवाहो वातो वात्या तयोरन्यतरेण परक्षेत्रादाहृतं

शाल्यादिबीजं यस्यान्यस्य क्षेत्रे प्ररोहति स क्षेत्री बीजं बीजजन्यं फलं लभते न तु बीजीति लोके प्रसिद्धमेवेति ।

एवं दृष्टान्तमुक्त्वा दार्ष्टान्तिकमाह ।

**तद्वत्परस्त्रियाः पुत्रौ द्वौ सुतौ कुण्डगोलकौ ।**
**पत्यौ जीवति कुण्डस्तु मृते भर्तरि गोलकः ॥ २३ ॥**

परेण सङ्गता स्त्री परस्त्री तस्याः परस्त्रियाः सकाशात्परबीजेन सुतावुत्पन्नौ यौ द्वौ कुण्डगोलकौ पुत्रौ तावपि तद्वत्पूर्वोक्तन्यायेन यस्य भार्यायामुत्पन्नौ तस्यैव नोत्पादकस्येति । यथा

गोऽश्वोष्ट्रदासीषु महिष्यजाविकासु च ।
नोत्पादकः प्रजाभागी तथैवान्याङ्गनास्वपि ॥

इति मनुस्मरणात् । तावेव लक्षयति जीवति पत्यौ जारोत्पन्नः कुण्डः कुण्डसंज्ञः, मृते तस्मिन् जारोत्पन्नो गोलकसंज्ञश्चेति । "अमृते च मृते चैव जारजौ कुण्डगोलकाविति" स्मरणात् । तयोश्च यद्यपि वर्णलक्षणाभावेनासंस्कार्यत्वं प्रतीयते तथापि वचनात्संस्कारः कार्यः । तथा च ब्रह्मपुराणे । षण्ढादीनुपक्रम्य "एवमेव द्विजैर्जातौ संस्कार्यौ कुण्डगोलकाविति" स्मरणात् । तयोर्मध्ये जारस्य गर्भोत्पादने वक्ष्यमाणपारदार्यप्रायश्चित्ताद्द्विगुणं प्रायश्चित्तम् ।

गमने तु व्रतं यत्स्याद्गर्भे तु द्विगुणं भवेदित्युशनःस्मरणात् । क्षेत्रिणस्तु द्वादशान्ते वक्ष्यमाणं सामान्यं प्रायश्चित्तम्,

चान्द्रायणं यावकं च तुलापुरुष एव च ।
गवां चैवानुगमनं सर्वपापप्रणाशनम् ॥

इतिज्ञेयम् । व्यभिचारिण्यास्तु दशमे वक्ष्यति ।

तर्हि बीजिनः कः पुत्र इत्यत आह ।

**औरसः क्षेत्रजश्चैव दत्तः कृत्रिमकः सुतः ॥**
**दद्यान्माता पिता वापि स पुत्रो दत्तको भवेत् ॥ २४ ॥**

यः क्षेत्रजः स्वक्षेत्रे संस्कृते स्वयमुत्पादितः स औरसः स एव बीजिनो मुख्यः पुत्रस्तदाह मनुः ।

स्वक्षेत्रे संस्कृतायां तु स्वयमुत्पादितश्च यः ।
तमौरसं विजानीयात्पुत्रं प्राथमकल्पिकमिति ॥

ननु क्षेत्रजः पृथगेव कथं न गण्यते तस्याप्यन्यत्र पुत्रत्वेन परिगणनादिति चेन्नैवम् । कलौ नियोगनिषेधेनैव तस्याप्रसक्तेः ।

क्षेत्रजश्चैव बीजी च द्वावेतौ निरयं गतौ ।
न रक्षति च यो दारान् परदाराश्च गच्छति ॥

इति महाभारते कलिप्रक्रमे निन्दाश्रवणाच्च । तस्माद्यथापूर्वमेव साधीयः । तर्हि तदभावे कथमित्यत आह । दत्त इति दत्तो मातापितृभ्यामन्यतरेण वान्यस्मै । तल्लक्षणमाह मनुः ।

माता पिता वा दद्यातां यमद्भिः पुत्रमापदि ।
सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः ॥ इति ।

आपदि प्रतिग्रहीतुरपुत्रत्वे, सपुत्रत्वे तु तस्यैव दोषः ।

अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिस्तथा ।
पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात्प्रयत्नतः ॥

इत्यत्रिस्मरणात् । आपदि दुर्भिक्षादौ । अनापदि दाने दातुर्दोष इति प्राञ्चः । स च भ्रातृपुत्र एव कार्यः ।

भ्रातृणामेकजातानामेकश्चेत्पुत्रवान्भवेत् ।
सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत् ॥

इतिमनुस्मरणात् । नेदं यथा श्रुतमर्थवत् । अपुत्रदायाधिकारिक्रमे भ्रातृपुत्राणां पञ्चमस्थानस्थितिविरोधात् । पिण्डाधिकारेऽपि पत्नी भ्राता च तज्जश्चेति तृतीयस्थानस्थितिविरोधाच्च । किं तु पुत्रीकरणे भ्रातृपुत्रस्य सम्भवे नान्यस्येत्येवमर्थम् ।

तथा च बृहत्पराशरः ।

अपुत्रस्य पितृव्यस्य तत्पुत्रो भ्रातृजो भवेत् ।
स एव तस्य कुर्वीत पिण्डदानोदकक्रियामिति ॥

तस्मात्स एवादौ पुत्रः कार्यः । एवं चैकस्यापि तस्यानेकैरपि भ्रातृभिः

पुत्रीकरणमनेन सिद्धम् । ततश्च न त्वेवैकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वेति निषेधस्यात्रानवकाशः । तेनेत्येकत्वनिर्देशात् । तदसम्भवे त्वदूरबान्धव बन्धुसन्निकृष्ट एव प्रतिगृह्णीयादिति च वसिष्ठोक्तो ज्ञेयः । अदूरबान्धवमित्यत्यन्तदेशभाषाविप्रकृष्टस्य निषेधः । तद्धर्मानाह मनुः ।

गोत्ररिक्थे जनयितुर्न भजेद्दत्त्रिमः सुतः ।
गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा ॥ इति ।

अस्यार्थः, दत्तः पुत्रो जनकस्य गोत्ररिक्थे न भजते तन्निमित्तदशाहादि न प्राप्नोतीर्थः । अनेनान्यगोत्रस्यापि पुत्रीकरणमनुज्ञातं पुत्रं ददतश्च जनकस्य दत्तपुत्रकर्तृकस्वधा श्राद्धमपैति दत्तस्य जनकश्राद्धे नाधिकार इत्यर्थः । यतो गोत्ररिक्थानुगः पिण्ड इति । पुत्रान्तराभावे तु तस्यापि रिक्थश्राद्धाधिकारोऽस्त्येव ।

अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः ।
उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥

इति न्यायसाम्यात् ।

दत्तः पुत्रः पितुः कुर्याज्जनकस्य मृतेऽहनि ।
गङ्गाया च ततोऽन्यत्र न पुत्रान्तरसन्निधौ ॥

इति शातातपस्मरणाच्च । इदमपि दानानन्तरं जनकस्यापुत्रत्वे, दानकाले त्वेकस्य दाननिषेधात् । भ्रातृपुत्रस्य त्वेकस्याप्यनेकपुत्रत्वे विशेषमाहापस्तम्बः । यदि द्विपितास्यादेकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षयेदिति । द्विपितेति द्विपितामहद्विप्रपितामहस्याप्युपलक्षणं न्यायसाम्यात् । द्वौ द्वाविति वीप्साश्रवणाच्च । एवमन्येषामपि द्विपितृकाणां द्रष्टव्यम् । क्षयाहव्यतिरिक्तेषु सर्वश्राद्धेष्वयं विधिर्ज्ञेयः । तस्योभयत्रापि सापिण्ड्यन्त्रिपुरुषमेव ।

दत्तकानां तु पुत्राणां सापिण्ड्यं स्यात्त्रिपूरुषम् ।
जनकस्य कुले तद्वद्गृहीतुरिति धारणा ॥

इतिस्मरणात् ।

त्रिपुरुषमात्मानं विहायात्मना सह चतुःपुरुषं ज्ञेयम् ।

त्रयाणामुदकं कार्यं त्रिषु पिण्डः प्रवर्तते ।
चतुर्थः सम्प्रदातैषां पञ्चमो नोपपद्यते ॥

इति मनुस्मरणात् । आपस्तम्बेन प्रपितामहपर्यन्तमेव द्वयोः पिण्डदानस्मरणाच्च । एकत्रावयवान्वयरूपं सापिण्ड्यमपरत्र निर्वाप्य पिण्डान्वयरूपमिति विशेषः । तस्य गोत्रद्वयेऽप्यनुद्वाहः ।

द्व्यामुष्यायणका ये स्युर्दत्तकक्रीतकादयः ।
गोत्रद्वयेऽप्यनुद्वाहः शुङ्गशैशिरयोर्यथा ॥

इति स्मरणात् ।

तस्य परिवेदनदोषोऽपि नास्ति दत्तत्वात् ।
भिन्नोदरे च दत्ते च पितृव्यतनये तथा ।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने ॥

इति गौतमस्मरणाच्च । तथा परिवित्तिदोषोऽपि न समत्वात् । तथा मातामहा अपि तस्य प्रतिग्रहीतृमातृपितर एव पितामहन्यायस्य मातामहेष्वपि तुल्यत्वादिति दिक् । तर्हि तस्याप्यभावे कथमित्यत आह कृत्रिमक इति कृत्रिमकः स्वयमेव त्वं मे पुत्र इति कृतः । तल्लक्षणमाह मनुः ।

सदृशं तु प्रकुर्याद्यं गुणदोषविवर्जितम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु कृत्रिमः ॥ इति ।

एतच्च मातापितृविहीनस्य तदनुज्ञातस्य वा सम्भवति अन्यथा पारतन्त्र्यात् । ततश्चान्योत्पन्नाना मध्ये कलावेतौ द्वावेवाभ्यनुज्ञायेते व्यभिचारोत्पन्नत्वाभावात् । ननु ।

अप्रशस्तास्तु कानीनगूढोत्पन्नः सहोढजः ।
पौनर्भवश्च नैवैते पिण्डरिक्थांशभागिनः ॥

इति विष्णुस्मरणाद्गूढोत्पन्नः कानीनपौनर्भवसहोढजानां व्यभिचारोत्पन्नत्वेनाप्रशस्तत्वेऽपि पुत्रिकापुत्रक्रीतोत्सृष्टदत्तात्मनामतथात्वेन कुतो न परिगणनमिति चेत् ।

सत्यम् । तथापि दोषान्तरकलङ्कितत्वेनापरिग्रहस्तेषामिति वदामः । तथा हि दत्तायाः कन्यायास्तत्पुत्रस्य वा परिग्रहे फलप्रत्यावृत्तिर्भवति यथा दत्ताया गोः स्वक्षीरादेर्वा प्रत्यावृत्तिरिति सा च निन्दिता वसिष्ठेन । अभ्रातृका: पुंसः पितॄनभ्येति प्रतीचीनं गच्छति पुत्रत्वमिति अभ्रातृका कन्या प्रतिग्रहीतुः पुंसः सकाशात्स्वरूपेण फलद्वारा वा पितॄनेवाभ्युपैति तेन प्रतीचीनमेव विपरीतमेव पुत्रत्वं प्राप्नोतीति नासावुत्कृष्टेति । क्रीतस्तु क्रयेणैव दुष्टः । तथा हि पुत्रोत्पत्त्यर्थं क्रीताया भार्याया अपि यत्र निन्दितत्वं तत्र किं साक्षात् क्रीतस्य पुत्रस्य वक्तव्यम् । तदुक्तम्

क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते ।
न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः ॥ इति ।

स्वयंदत्तोत्सृष्टयोस्तु मातृपितृपरित्यागनिदानानेकदोषोत्प्रेक्षणादेव दुष्टत्वमिति ।

अत एव मनुः ।

मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् ।
आत्मानं स्पर्शयेद्यस्मै स्वयन्दत्तस्तु स स्मृतः ॥
मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा ।
यं पुत्रं परिगृह्णीयादपविद्धः स उच्यते ॥

इति द्वयोरपि मातापितृपरित्यागेनैव स्वरूपमुदकीर्तयत् । तस्मादुक्तरीत्या अन्योत्पन्नेषु द्वावेव पुत्रावुत्कृष्टावित्याचार्याभिप्रायः सिद्धः । तयोरपि दत्तक एव कलावुत्कृष्ट इत्यभिप्रेत्य तल्लक्षणमाह । यं मातापितरौ दद्यातां दत्तक इति । अनेन च दत्तकलक्षणकरणेन पुत्रप्रतिनिधिषु दत्तकस्यैव मुख्यत्वं नान्यस्येति सूचितम् ।

अनेकधा कृताः पुत्राः ऋषिभिर्ये पुरातनैः ।
न शक्यास्तेऽधुना कर्तुं शक्तिहीनतया नरैः ॥

इति बृहस्पतिस्मरणात् । दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रह

इत्यन्यनिषेधाच्च । कृत्रिमपरिगणनं त्वत्र कथं चिद्गौणतामाश्रित्येति किं बहुना ।

एवं प्रसक्तानुप्रसक्तं परिसमाप्य प्रक्रान्तं प्रायश्चित्तमेवानुस्मरन्नुपपातके परिवेदने तद्विधातुमादौ तन्निन्दामाह ।

**परिवित्तिः परिवेत्ता च यया च परिविद्यते ।**
**सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥ २५ ॥**

ज्येष्ठेऽनूढे कनीयानुद्वहन्परिवेत्ता ज्येष्ठः परिवित्तिः यया कन्यया परिविद्यते कनीयान्सा परिवेदिनी यश्च तां ददाति पित्रादिः स परिदायी यश्च तत्र याजकस्स परियष्टा ते सा च तौ च ते दातृसहितौ याजको दातृयाजकः स पञ्चमो येषां ते सर्वे नरकभाजो भवन्ति । तथा च हारीतः । ज्येष्ठेऽनिविष्टे कनीयान्निविशन्परिवेत्ता भवति परिवित्तिर्ज्येष्ठः परिवेदिनी कन्या परिदायी दाता परियष्टा याजकस्ते सर्वे पतिता इति । पतिता इत्यत्र नरकेष्विति शेषो योजनीयो वास्तवपातित्ये वक्ष्यमाणप्रायश्चित्तानुपपत्तेः । ज्येष्ठश्च सोदरो विवक्षितः "सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रह"मिति गर्गस्मरणात् । यमयोस्तु ज्येष्ठनिर्णयमाह मनुः ।

जन्मज्येष्ठेषु चाह्वानं सुब्राह्मण्यास्वपि स्मृतम् ।
यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता ॥ इति ।

यस्यादौ गर्भोत्पत्तिः स ज्येष्ठः । तथा च स्मृत्यन्तरम् ।

यदा विशेद्द्विधाभूतं बीजं शुक्रं परिक्षरत् ।
तदा भवेद्द्विधा गर्भः सूतिर्वंशविपर्ययादिति ॥

इदानीं तत्र प्रायश्चित्तमाह ।

**द्वौ कृच्छ्रौ परिवित्तेस्तु कन्यायाः कृच्छ्र एव च ।**
**कृच्छ्रातिकृच्छ्रौ दातुस्तु होता चान्द्रायणं चरेत् ॥२६॥**

परिवित्तेर्द्वौ कृच्छ्रौ प्राजापत्यौ शुध्यर्थं चरणीयौ तु शब्दः परिवेत्तुरप्येतत्प्रायश्चित्तप्राप्त्यर्थः ।

अत एव यमः ।

कृच्छ्रौ द्वयोः पारिवित्त्ये कन्यायाः कृच्छ्र एव च ।
अतिकृच्छ्रं चरेद्दाता होता चान्द्रायणं चरेदिति ॥

द्वयोः परिवित्तिपरिवेत्रोः कन्यायाः परिवेदिन्याः कृच्छ्रः शोधकः कन्यादातुः कृच्छ्रातिकृच्छ्र', तल्लक्षणमाह याज्ञवल्क्यः । कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिमिति । होता हावयिता याजकः, चान्द्रायणं वक्ष्यमाणलक्षणं चरेदिति। परिवेत्तुः प्रायश्चित्तानन्तरं कर्तव्यमाह वसिष्ठः । "परिविन्दानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्विशेत तां चैवोपयच्छेतेति" । तस्मै ज्येष्ठाय तामूढां कन्यां दत्वा निवेद्य तदनुज्ञातः पुनर्निविशेत पुनरुद्वहेत् कामित्याकाङ्क्षायां तामेवोपयच्छेतेति । अयमेव न्यायो ज्येष्ठकनिष्ठयोराधानव्युत्क्रमे भगिन्योर्विवाहव्युत्क्रमे चानुसन्धेयः । अत एव गौतमः । परिवित्तिपरिवेतृपर्याहितपर्याधात्रग्रेदिधिषूपतीनां संवत्सरं प्राकृतं ब्रह्मचर्यमिति । अग्रेदिधिष्वादौ विशेषमाह वसिष्ठः । अग्रेदिधिषूपतिः कृच्छ्रन्द्वादशरात्रं चरित्वा निविशेत तां चैवोपयच्छेद्दिधिषूपतिः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्निविशेतेति । अग्रेदिधिषूपतिः कनिष्ठापतिस्तां परित्यज्य प्राजापत्यं कृत्वा निविशेत उद्वहेत् । कामित्याकाङ्क्षायां तां चैवेति स्वपरिणीतामेवेति दिधिषूपतिर्ज्येष्ठापतिस्तां तस्मै कनिष्ठापतये पूर्ववद्दत्वा कृच्छ्रातिकृच्छ्रौ कृत्वा पुनः स्वपरिणीतामेवोद्वहेदिति । यत्तु परिवित्तिपरिवेतृकन्यादातृयाजकानां द्वादशरात्रं सक्तुप्राशनं ब्राह्मणतर्पणं च तां पुनर्भुवमाचक्षते न भूयश्चैनामभिगच्छेदिति सुमन्तुवचने पुनस्तदुपगमननिषेधनं तज्ज्येष्ठस्य कनिष्ठोढाविवाहनिषेधार्थं न कनिष्ठस्यैव स्वोढाविवाहनिषेधार्थं तां चैवोपयच्छेदिति वसिष्ठस्मरणात् ।

ततश्च तस्मै दत्वेत्यनेनोपकल्पनमात्रमिति सिध्यति । एतेन परिवेदिन्यग्रेदिधिष्वादीनां भार्यात्वमेव नोत्पद्यते व्युत्क्रमविवाहादिति परास्तम् । तां पुनर्भुवमाचक्षत इति लिङ्गात् अग्रेदिधिष्वादेर्लक्षणमाह देवलः ।

ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेऽनुजा ।
सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृतेति ।

चकारात् पितृष्वस्रादिदुहितृपरिणयनेऽपि स्मृत्यन्तरोक्तं प्रायश्चित्तमभ्यनुज्ञातम् । तदाह सुमन्तुः । पितृस्वसृसुतां मातुलसुतां मातृसगोत्रां समानार्षेयां विवाह्य चान्द्रायणं चरेत् परित्यज्यैनां बिभृयात् । शातातपोऽपि ।

परिणीय सगोत्रां तु समानप्रवरां तथा ।
कृत्वा तस्यास्तु संसर्गमतिकृच्छ्रं समाचरेत् ॥
मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।
समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेदिति ॥

व्युत्क्रमविवाहे तु प्रायश्चित्तमाह शातातपः । ब्राह्मणो राजन्यापूर्वां द्वादशरात्रं चरित्वा निविशेत तां चैवोपयच्छेद् वैश्यापूर्वस्तप्तकृच्छ्रं शूद्रापूर्वां कृच्छ्रातिकृच्छ्रमिति । राजन्यापूर्वो अकृतब्राह्मणीविवाह एव राजन्यां परिणीतेत्यर्थः । एवमन्यत्राप्यूह्यम् । तांश्चैवोपयच्छेदिति परिवेदनेन व्याख्यातम् ।

उक्तस्य परिवेदनप्रत्यवायस्य क्वचिदपवादमाह ।

**कुब्जवामनषण्ढेषु गद्गदेषु जडेषु च ।**
**जात्यन्धे बधिरे मूके न दोषः परिविन्दतः ॥ २७ ॥**

कुब्जो वक्रपृष्ठवंशः वामनः खर्वः षण्ढो नपुंसको गद्गदोऽस्पष्टवाक् जडो विकलान्तःकरणः । जात्यन्धो जन्मान्धः बधिरः श्रोत्रेन्द्रियविकलः मूको वागिन्द्रियरहितः चकाराद्देशान्तरस्थादीनां ग्रहणम् । तथा च कात्यायनः ।

देशान्तरस्थक्लीबैकवृषणानसहोदरान् ।
वेश्याभिसक्तपतितशूद्रकल्पातिरोगिणः ॥
जडमूकान्धबधिरकुब्जवामनकुण्ठकान् ।
अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च ॥
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा ।

कुलटोन्मत्तचौराश्च परिविन्दन्न दुष्यति ॥ इति ।
देशान्तरस्थस्य प्रतीक्षाकालमप्याह ।

स एव ।

धनवार्धुषिकं राजसेवकं कर्षकं तथा ।
प्रोषितं च प्रतीक्षेत वर्षत्रयमपि त्वरन् ॥

अत्रापिशब्दसूचितं कालान्तरमाह वसिष्ठः । अष्टौ द्वादश वा वर्षाणि ज्येष्ठभ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्ती भवतीति । एकवृषणोऽण्डवृद्धिमान् कुब्जो भग्नपादः अभार्यो मृतभार्यो नैष्ठिकब्रह्मचारी वा कामकारीच्छया विवाहनिवृत्तो वेदमार्गनिवृत्तो वा तदेतान्परिविन्दतो न दोष इति । ननु जडमूकादीनां मन्त्रोच्चारणसामर्थ्याभावात् उपनयनमेव न सम्भवति कुतस्तरां विवाहः कुतस्तमां च परिवेदनदोषो यस्यायमपवाद इति चेत् । नैवम् । ब्रह्मपुराणे तेषामप्युपनयनस्मरणेन विवाहसम्भवात् । तथा हि ।

ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः ।
तस्माच्च षण्ढबधिरकुब्जवामनपङ्गुषु ।
जडगद्गदरोगार्त्तशुष्काङ्गविकलाङ्गिषु ॥
मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये ।
ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम् ॥
संस्कारमन्त्रहोमादीन् करोत्याचार्य एव तु ।
उपनेयांश्च विधिवदाचार्यः स्वसमीपतः ॥
आनीयाग्निसमीपं वा सावित्रीं संस्पृशन् जपेत् ।
कन्यास्वीकरणादन्यत्सर्वं विप्रेण कारयेदिति ॥

तस्मादस्त्येव तेषामपि विवाहप्रसक्तिरिति तत्कनीयसां परिवेदनदोषापवादो युक्त एवेत्यलं विस्तरेण ।

किंच ।

**पितृव्यपुत्रः सापत्नः परनारीसुतस्तथा ।**
**दाराग्निहोत्रसंयोगे न दोषः परिवेदने ॥ २८ ॥**

पितृव्यस्य पुत्रः सापत्नः सपत्नीपुत्रः परनारीसुतो दत्तकादिर्ज्येष्ठोऽपि कनिष्ठस्य दारसंयोगे विवाहे अग्निसंयोगे आन्याधाने तदुभयरूपे परिवेदने न दोषो न दोषाधायकः । तथा च यमः ।

पितृव्यपुत्रान्सापत्नान् परनारीसुतास्तथा ।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने ॥
गौतमोऽपि ।
भिन्नोदरे दत्तके च पितृव्यतनयेऽग्रजे ।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने ॥ इति ।

दाराग्निहोत्रसंयोग इत्यनेन परिवेदने निमित्तद्वयमुपन्यस्तम् । तदाह मनु ।

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।
परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥ इति ।

तत्र दारसंयोगे निर्णयः पूर्वमुक्तः । इदानीमग्निसंयोगे निर्णयमाह

**ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत् ।**
**अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा ॥ २६ ॥**

ज्येष्ठो भ्राता सोदरः स्वयमाधानाधिकारी तिष्ठेच्चेत्कनिष्ठेन त्वनुज्ञां विनाऽग्न्याधान न कार्यम् । यदि ज्येष्ठोऽनुजानाति तदा तदनुज्ञया कनीयानग्न्याधानं कुर्वीतेति विवाहादग्न्याधाने विशेषाभिधानाय शङ्खस्य महर्षेर्वचनम् ।

तथा च वसिष्ठः ।

अग्रजस्तु यदानग्निरादध्यादनुजः कथम् ।
अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधीति ॥

अनग्निरसत्यधिकारेऽनाहिताग्निः । अधिकारिणः पितुरस्त्वनुज्ञयापि नाधानाधिकारः । तथा च चतुर्विंशतिमते ।

ज्येष्ठभ्रात्रा त्वनुज्ञातः कुर्यादग्निपरिग्रहम् ।
अनुज्ञातोऽपि सन्पित्रा नादध्यान्मनुरब्रवीदिति ॥

अनधिकारिणि पितरि त्वनुज्ञा विनापि पुत्रस्याधानाधिकारो भवति तथा च सुमन्तुः ।

पितुर्यस्यान्यनाधानं कथं पुत्रस्तु कारयेत् ।
अग्निहोत्राधिकारोऽस्ति शङ्खस्य वचनं यथा ॥ इति ।

नन्वस्तु परिवेदने कन्याया ज्येष्ठसमर्पणानन्तरं पुनस्तेनैव विवाहो वाग्दानानन्तरमनिष्पन्ने विवाहे तु वरवैगुण्ये ज्ञाते कथमित्यत आह ।

**नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।**
**पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ॥ ३० ॥**

वाग्दानानन्तरं पाणिग्रहात्प्राक् पतावुत्पत्स्यमानपतित्वे पूर्वस्मिन्वरे नष्टे दूरदेशगमनेनापरिज्ञातवृत्तान्ते नारीणां कन्यानामन्यः पतिर्विधीयते । तदाह नारदः ।

परिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत् ।
त्रीनृतून्समतिक्रम्य कन्यान्यं वरयेद्वरम् ॥
स्त्रीपुंसयोस्तु सम्बन्धाद्वरणं प्राक् विधीयते ।
वरणाद्ग्रहणं पाणेः संस्कारोऽपि विचक्षणैः ॥
तयोरनियतं प्रोक्तं वरणं दोषदर्शनादिति ।

अयमर्थः । यो वरो वाचा दत्ता कन्यां स्वीकृत्य केन चिद्योगेन देशान्तरं गतस्तं वरं त्रीनृतून् षण्मासानधार्यत्वे कन्यायाः प्रतीक्ष्य धार्यत्वे तु वर्षमात्रमपि ।

प्रदाय शुल्कं कन्याया गच्छेद्यः स्त्रीधनं तथा ।
धार्या सा वर्षमेकं तु देयान्यस्मै विधानतः ॥

इति नारदवाक्यात्प्रतीक्ष्य अनन्तरमन्यं वरं सा कन्या वरयेत्तामन्यस्मै दद्यादित्यर्थः । तत्र हेतुमाह स्त्रीपुंसयोः सम्बन्धात् समागोत्प्राक् त्रितयं क्रियते तत्रादौ वरणं कन्याया वरेण भार्यात्वाय प्रार्थनं वरस्य च सम्प्रदानत्वाय कन्यादात्रा तदेव च वाग्दानं तदनन्तरपाणिग्रहणं ततोऽप्यनन्तरसंस्कारः सप्तपदप्रक्रमस्तयोः पाणिग्रहणसप्तपदक्रमयोरपेक्षया वरणमेवानियतमनियामकं पतिपत्नीसम्बन्धस्य कृतेऽपि "प्रवरणे पतिसम्बन्धः

परावर्तते न पाणिग्रहणादावित्यर्थः। तयोरेव भार्यात्वोत्पादकत्वात्। अत एव मनुः।

पाणिग्रहणमन्त्रैस्तु नियतं दारलक्षणम्।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥ इति।

तत्रापि हेतुमाह दोषदर्शनादिति वरणपरावृत्तौ वरदोषदर्शनमेव हेतुरित्यर्थः। तदाह गौतमः। "प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यादिति"। तस्माद्वाग्दानानन्तरं पाणिग्रहणात्प्राक् पूर्ववरे नष्टे वरान्तरेण तत्परिणयनं कार्यमिति सिद्धम्। यद्यन्यस्मै दत्तायां कन्यायां पूर्ववरोप्यायाति तदा अनूढा तां स एव लभते ऊढाया तु स्वदत्त द्रव्यमेव लभते न कन्यां तदाह कात्यायनः।

अनेकेभ्योऽपि दत्तायामनूढायां तु तत्र वै।
पुरागतश्च सर्वेषां लभते तदिमां सुताम्॥
अथागच्छेत वोढायां दत्तं पूर्ववरो हरेत्॥ इति।

एव मृतेऽपि पूर्ववरे वरान्तरेण तद्विवाहः कार्यः।

तथा च वसिष्ठः।

अद्भिर्वाचा च दत्तायां म्रियेतादौ वरो यदि।
न च मन्त्रोपनीतास्यात्कुमारी पितुरेव सा॥ इति।

मन्त्रोपनयनं पाणिग्रहणादिकं विना वाचा दानमिवाद्भिरपि दानं न भार्यात्वोत्पादकमित्यर्थः।

अत एव यमः।

नोदकेन न वा वाचा कन्यायाः पतिरुच्यते।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे॥ इति।

नन्वस्तु वाग्दत्तायां नष्टे पत्यौ पत्यन्तरविधानं मृते तु तन्नोपपद्यते।

यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः।
तामनेन विधानेन निजो विन्देत देवरः॥

इति मानवे देवरेण तदुद्वहनस्मरणात्। नचैतावतापि समी-

हितर्सिद्भिरविशिष्टैवेति वाच्यम् । देवराच्च सुतोत्पत्तिरित्यनेन कलौ तन्नि-षेधात् । न च निषेधस्य विवाहानन्तरविधवाविषयत्वमस्तु तस्य नान्य-स्मिन् विधवानारी नियोक्तव्याद्विजातिभिरित्यनेन मनुनैव पूर्वं साधारण्-तया निषिद्धत्वेन कलौ विशिष्य तन्निषेधानुपपत्तेः । तस्माद्वाग्दानानन्तरं मृते पत्यौ पत्यन्तरविधानमुपपन्नमिति चेत् । सत्यम् । तादृशविवाहस्य वाचनिकत्वेन देवरस्य पतित्वानुपपत्तेर्विशेषनिषेधाच्च । नासावभ्यनुज्ञायते किं तु पतिशब्दस्य मिथ्यापतित्वयोग्योऽभ्यनुज्ञायत इति न किञ्चि-दूषणम् । अथ वा मृते मृतकल्पे दीर्घतीव्रापद्ग्रस्त इति व्याख्येयम् । दासो दीर्घामयोऽपि वेति वक्ष्यमाणकात्यायनस्मरणात् । तथा प्रव्रजिते वाग्दा-नानन्तरं वैराग्यातिशयेन सन्यस्ते पूर्वपरे वरान्तराय सा देया । अत एव कात्यायनः ।

दूरस्थानामवेद्यानां मोक्षमार्गानुसारिणाम् ।
शूराणां निर्वृतानां च न देया कन्यका बुधैः ॥ इति ।

अवेद्या अज्ञेयाः । निर्वृता भोगेषु निर्विण्णाः । तथा क्लीबे निर्बीजे पूर्ववरे वरान्तरमन्वेषणीयम् ।

तथा च नारदः ।

अपत्यार्थं स्त्रियः सृष्टाः स्त्रीक्षेत्रं बीजिनो नराः ।
क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हतीति ॥

तथा पतिते महापातकाद्यभिभूते पूर्ववरे वरान्तरं कार्यम् । तथा च गौतमः । प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यादिति । चकाराद-न्यजातीयादेर्ग्रहणम् । तथा च कात्यायनः ।

स तु यद्यन्यजातीयः पतितः क्लीब एव वा ।
विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा ॥
ऊढापि देया सान्यस्मै सहावरणभूषणेति ।

अत्रोढापीत्यपिशब्दः कैमुतिकन्यायेन वाग्दत्ताया एवान्यस्मै-दानमाचष्टे न तु ऊढायास्तथात्वे सगोत्राया अपि पुनर्विवाहः प्रसज्जेत

तथा सति च मातृवत्परिपालयेदिति विरुध्येत पञ्चस्विति प्रचयशिष्ट सख्यानुवादो न परिसख्या। नन्वेवं वाचा दत्ता मनोदत्ता अग्निपरिगता सप्तम पद नीता भुक्ता गृहीतगर्भा प्रसूतावेति सप्तविधा पुनर्भूस्ता गृहीत्वा न प्रजाधर्मं विन्देतेति बौधायनवचो विरोधः स्यादिति चेन्मैवम्। तस्य निर्दुष्टवरविषत्वात्। अत एव नारदः।

दत्ता न्यायेन यः कन्या वराय न ददाति ताम्।
अदुष्टश्चेद्वरो राज्ञा स दण्ड्यस्तत्र चोरवत्॥

इति तत्र दण्ड विधत्ते। तस्मादेवविधेषु विषयेषु कृतेऽपि वाग्दाने वरान्तराय दान भवतीति सिद्धम्। इदमित्थमेव व्याख्येयम्।

उद्वाहितापि सा कन्या न चेत्सम्प्राप्तमैथुना।
पुनः सस्कारमर्हन्ती यथा कन्या तथैव सा॥

इत्यादिनारदादिवाक्यैकवाक्यतयोढायाः पुनरुद्वाहविषयत्वेन व्याख्याने तु।

कुलठायाः पुनरुद्वाह ज्येष्ठांशं गोवधं तथा।
कलौ पञ्च न कुर्वीत भ्रातृजाया कमण्डलुम्॥

इत्यादि पुराणवचनविरोधो दुर्परिहरः स्यात्। न च युगान्तरीयधर्मकीर्तनमेवेदमिति शङ्कनीय शास्त्रोत्पत्तिप्रयोजनविरोधादित्यास्तामतिविस्तरेण।

नन्वस्तु वाग्दानानन्तरं विवाहात्प्राक् पूर्वपतिनाशे पत्यन्तरविधानं विवाहानन्तरं तु तन्नाशे किं कार्यमित्यत आह।

**मृते भर्तरि या नारी ब्रह्मचर्यव्रते स्थिता।**
**सा मृता लभते स्वर्गं यथा ते ब्रह्मचारिणः॥ ३१॥**

विवाहानन्तर भर्तरि उत्पन्नभर्तृत्वे मृते या नारी ब्रह्मचर्यव्रते तिष्ठति सा मृता स्वर्गं लभते यथा ते नैष्ठिका ब्रह्मचारिणो ब्रह्मचर्येणैव स्वर्गं लभन्त इति। तथा च याज्ञवल्क्यः।

मृते जीवति वा पत्यौ या नान्यमुपगच्छति।
सेह कीर्तिमवाप्नोति मोदते चोमया सहेति॥

अनेन विवाहानन्तरं भर्तृमरणे ब्रह्मचर्यमेव न तु पत्यन्तरविधानमुक्तं भवति ।

तथा च मनुः ।

कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः ।
न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य त्विति ॥

मृते भर्तरि ब्रह्मचर्यं स्वर्गसाधनं ततोऽपि स्वर्गातिशयसाधनमनुगमनमित्याह ।

**तिस्रः कोट्योऽर्धकोटी च यानि लोमानि मानुषे ।**
**तावत्कालं च ते स्वर्गे भर्तारं याऽनुगच्छति ॥ ३२ ॥**

अध्यर्द्धास्तिस्रः कोट्यो मनुष्यदेहे रोमाणि भवन्ति तावदब्दसहस्रं स्वर्गे ता गता भवति या स्त्री भर्तारमनुगच्छति तेन सहाग्निमारोहतीति ।

तथा च हारीतः ।

मृते भर्तरि या नारी धर्मशीला दृढव्रता ।
अनुगच्छति भर्तारं शृणु तस्यास्तु तत्फलम् ॥
तिस्रः कोटयोऽर्द्धकोटी च यानि लोमानि मानुषे ।
तावन्त्यब्दसहस्राणि स्वर्गलोके महीयते ॥
मातृकं पैतृकं चैव यत्र कन्या प्रदीयते ।
कुलत्रयं पुनात्येषा भर्तारं यानुगच्छति ॥

शङ्खः ।

मृते भर्तरि या नारी समारोहेद्धुताशनम् ।
सारुन्धतीसमाचारा स्वर्गे लोके महीयते ॥ इति ।

नचात्र तस्मादुह न पुरायुषः स्वःकामी प्रेयादित्याद्यात्महननप्रतिषेधकश्रुतिविरोधः शङ्क्यः । तस्य सामान्यशास्त्रस्यानुगमनविधायकविशेषशास्त्रविषयपरिहारेण प्रवृत्तेः । नचेदमनुगमनं ब्राह्मण्यातिरिक्तविषयम् ।

मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् ।
इतरेषां तु वर्णानां स्त्रीधर्मोऽयं परः स्मृतः ॥

इति पैठीनस्यादिवचनादिति वाच्यम् । तस्य पृथक्चितिविषयत्वात् । तथाचोशनाः ।

पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति ।
अन्यासां चैव नारीणां धर्मोऽयं परमः स्मृतः ॥

इति । स चायमगर्भिणीनामबालापत्यानामाचण्डालान्तसाधारणो धर्मः । तथा च स्मृत्यन्तरे ।

बालसंवर्द्धनं मुक्त्वा बालापत्या न गच्छति ।
व्रतोपवासनिरता रक्तेद्गर्भे च गर्भिणीति ॥

गर्भिण्या अनुगमने यथावर्णं गर्भहननप्रायश्चित्तमेव भवति । लग्नगर्भाया विशेषः स्मृत्यन्तरे ।

आद्वादशाब्दं नारोहेल्लग्नगर्भा हुताशनम् ।
इत ऊर्ध्वं समारोहेद्व्रतं कृत्वादिकं स्वयमिति ॥
अदृष्टरजसोऽपि निषेधो बृहन्नारदीये ।
मृतानुगमनं कार्यं नादृष्टरजसा स्त्रियेति ॥

न केवलमनुगमनं स्त्रिया एवाभ्युदयहेतुः किं तु भर्तुरपीत्याह ।

**व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् ।**
**एवं स्त्री पतिमुद्धृत्य तेनैव सह मोदते ॥ ३३ ॥**

व्यालं सर्पं गृह्णातीति व्यालग्राही कुहकः स्वमन्त्रबलावष्टम्भेन बिलस्थं सर्पं यथोद्धरति तथानुगमनसुकृतबलेनापि नरकपतितमपि पतिमुद्धृत्य तेन सहावशिष्टसुकृतशेषमुपभुङ्क्ते इति । तथा च व्यासः ।

यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः ।
संप्राप्तो यातनास्थानं गृहीतो यमकिङ्करैः ॥
तिष्ठते विवशो दीनो वेष्ट्यमानः स्वकर्मभिः ।
व्यालग्राही यथाव्यालं बलादुद्धृत्यशङ्कितः ॥
तद्वद्भर्त्तारमादाय दिवं याति च सा बलात् ।
या भर्तृपरमा नित्यं स्तूयमानाप्सरोगणैः ॥
क्रीडते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश ।

ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः ।
पुनात्यविधवा नारी तमादाय मृता तु या ॥ इति ।

भजन्त्वजिनसूत्रभृध्धृतकमण्डलुं स्वच्छया
त्रिवृद्रशनया वृत्त विधृतदण्डकौपीनकम् ।
बलिं छलयितुं मुधा कलितपञ्चषाब्दक्रम
महः किमपि मोहनं कपटवामन पावनम् ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दुश्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृते विवृतश्चतुर्थोऽध्यायः प्रकीर्णकसुतादिविर्णयाय ॥ १ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां चतुर्थोऽध्यायः ।

॥ श्रीगणेशायनमः ॥

वामेनोत्क्षिप्य गोवर्द्धनमभिसुरभिन्यस्तदृष्टिः करेण
प्रत्यालम्ब्यावनम्रीभवदिव सहसा दक्षिणेन स्वमध्यम् ।
प्रावाराबद्धशुद्धासुकरपरिकरस्तत्क्षणेनाम्बुजाक्षः
पायादायासखिन्नः पतिरतिसदयश्रीधरः श्रीधरो वः ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
संस्कारसिद्धमभिधातुमिहाहिताग्ने-
रारभ्यते विवरणं किल पञ्चमेऽपि ॥ २ ॥

चतुर्थेऽपि प्रकीर्णकपातकप्रायश्चित्तप्रसक्तानुप्रसक्त्या पुत्रभेदादिसहगमनान्तनिरूपणेन बुद्धिस्थमाहिताग्निसंस्कारं प्रपञ्चयितुं पञ्चमाध्यायमारभते। तत्र प्रकीर्णकप्रायश्चित्तप्रकरणाविच्छेदाय तदेव तावदाह ।

**वृकश्वानशृगालाद्यैर्दष्टो यस्तु द्विजोत्तमः ।**
**स्नात्वा जपेत्स गायत्रीं पवित्रां वेदमातरम् ॥ १ ॥**

वृक आरण्य. श्वा कुक्कुरः शृगालो जम्बुकः । आदिशब्देन वानरवराहादीनां ग्रहणम् । एतैर्दष्टो द्विजोत्तमो ब्राह्मणः स्नानानन्तरमष्टोत्तरशतवारं गायत्रीं जपेत् । तदाहोशनाः । दंष्ट्र्यादिदष्टो गायत्र्यष्टशतं चेति । यत्तु श्वशृगालमहिषाजाविकसूकररासभनकुलमार्जारमूषिकासर्वकाकपुरुषदष्टानामापोहिष्ठादिभिः स्नानं प्राणायामत्रयं चेति सुमन्तुस्मरणात्तन्नाभेरधः प्रदेशे दंष्ट्रदंशविषयं नाभेरूर्ध्वं सम्यग्दंशे तु मूलोक्तमेव द्विगुणाद्विकल्पनीयम् । तथा चाङ्गिराः ।

नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत् ।
स्यादेतत्त्रिगुणं वक्त्रे मस्तके तु चतुर्गुणमिति ॥

गायत्र्याः पावित्र्यातिशयद्योतनाय विशिनष्टि वेदमातरमिति

वेदानां माता "गायत्री छन्दसां मातेति" स्मरणात् । वेदा मातरो यस्याः सेति वा ।

त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ।
तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः ॥

इति मनुस्मरणात् । एतश्च गृहस्थविषयं परिशेषाद्गम्यते स्नातकादेरग्रे विशेषाभिधानात् ।

एवं ब्राह्मणस्य प्रायश्चित्तमुक्त्वा क्षत्रियादीनां तदाह ।

**गवां शृङ्गोदकैः स्नानान्महानद्यास्तु सङ्गमे ।**
**समुद्रदर्शनाद्वापि शुना दष्टः शुचिर्भवेत् ॥ २ ॥**

गवां शृङ्गोदकस्नान नाम गायत्र्या शतवाराभिमन्त्रितेन गोशृङ्गपूरितेनोदकेन स्नान तस्मात्, तदाह हारीतः । गोशृङ्गेन शत स्नानं गायत्र्येति । समुद्रगे महानद्यौ, अनयोः सङ्गमे निकटवर्त्तिनि स्नानात्सन्निहितस्य समुद्रस्य दर्शनाद्वा श्वादिदष्टक्षत्रियादिः शुचिर्भवेद् वा शब्दो व्यवस्थितविकल्पार्थः । यद्यप्यत्र क्षत्रियादिपदं न श्रूयते तथाऽपि पूर्वत्र ब्राह्मणस्य प्रायश्चित्ताभिधानादवशिष्टानां स्थानप्रमाणेन क्षत्रियादिविषयत्वं पर्यवस्यति चातुर्वर्ण्यधर्मप्रवचनस्य प्रतिज्ञातत्वात् । एतदसम्भवे हारीतोक्तम् ।

श्वानो वा क्रोष्टुको वापि नारी वा यदि वा नरः ।
आखुर्नकुलमार्जारो वानरग्राम्यसूकराः ॥
एतैर्दष्ट द्विजस्याङ्गे प्रायश्चित्त कथं भवेत् ।
स्नानं कुर्यात्सचैलं तु विप्राणामनुशासनात् ॥
प्रोक्षी गोभिस्तु तिसृभिः कारयेन्मार्जन द्विजः ।
प्राण यामत्रय कुर्याद्द्वद्याद्गोम्तरणं नरः ॥
सह द्विजैस्तु भुक्तेन शुध्यते नात्र सशयः ।

इति द्रष्टव्यम् । शूद्रस्य तु

शूद्राणां चोपवासेन शुद्धिर्दानेन वा पुनः ।
गा च दत्वा वृषं चैकं ब्राह्मणाय विशुध्यति ॥

इतिबृहदङ्गिरसोक्तं ज्ञेयम् ।

स्नातकस्य विशेषमाह ।

**वेदविद्याव्रतस्नातः शुना दष्टो द्विजो यदि ।**
**स हिरण्योदकैः स्नात्वा घृतं प्राश्य विशुध्यति ॥ ३ ॥**

वेदविद्याश्चतुर्दश पुराणाद्याः समाप्य स्नातो व्रतानि महानाम्न्यादीनि सौम्यप्रजापत्यादीनि वा समाप्य स्नातः उभयं वा समाप्य स्नातो द्विजस्त्रैवर्णिकः श्वादिदष्टश्चेद्धिरण्यसंसृष्टैरुदकैः स्नात्वा घृतं प्राश्य विशुध्यति । एतदसम्भवे बौधायन आह

> वेदविद्याव्रतस्नातः शुना दष्टस्तु ब्राह्मणः ।
> शतपर्यायमावर्त्य गायत्रीं शुद्धिमाप्नुयादिति ॥
> ब्राह्मण इति त्रैवर्णिकोपलक्षणम् ।
> ब्रह्मचारिणो विशेषमाह ।

**सव्रतस्तु शुना दष्टो यस्त्रिरात्रमुपावसेत् ।**
**घृतं कुशोदकं पीत्वा व्रतशेषं समापयेत् ॥ ४ ॥**

सव्रतो ब्रह्मचारी यदि श्वादिभिर्दष्टस्स त्रिरात्रमुपोष्य चतुर्थेऽहनि घृतकुशोदकं च पीत्वा व्रतशेषं समापयेत्समावर्त्तयेत् । एतदसम्भवे बौधायनोक्तम्

> सव्रतस्तु शुना दष्टस्त्रिरात्रमुपवासयेत् ।
> सघृतं यावकं पीत्वा व्रतशेषं समापयेत् ॥

इति द्रष्टव्यम् ।

उक्तप्रायश्चितान्तकर्तव्यमाह ।

**अव्रतः सव्रतो वापि शुना दष्टो भवेद्द्विजः ।**
**प्रणिपत्य भवेत्पूतो विप्रैश्चक्षुर्निरीक्षितः ॥ ५ ॥**

अव्रतो गृहस्थादिर्दष्टः पूर्वोक्तप्रायश्चित्ताचरणानन्तरं ब्राह्मणान् प्रणिपत्य तैर्विप्रैश्चक्षुर्भिर्निरीक्षितः पूतो भवति ।

ब्राह्मणासम्भवे दर्शनं स्वयमेव कार्यम् । तदाहाङ्गिराः ।

अव्रती सव्रती चापि शुना दष्टस्तु यो द्विजः ।
दध्याग्नीन् हूयमानांस्तु सद्य एव शुचिर्भवेत् ॥ इति ।

इदं स्वतन्त्रं प्रायश्चित्तान्तरमिति न शङ्कनीयम् । अन्यानर्थक्यन्यायेन पूर्वोक्तप्रायश्चित्तानर्थक्यप्रसङ्गात् । तस्मात्प्रकरणात्पूर्वोक्तप्रायश्चित्तानामुत्तराङ्गमिति ।

दंशाभावे श्वादिघ्राणाद्युपघाते विशेषमाह ।

**शुना घ्रातावलीढस्य नखैर्विलिखितस्य च ।**
**अद्भिः प्रक्षालनं प्रोक्तमग्निना चोपचूलनम् ॥ ६ ॥**

यस्तु श्वादिभिर्दष्टो न किं तु केवलं नासिकया घ्रातो जिह्वया वावलीढो नखैर्वा विलिखितः स सर्वोऽपि तं देशं प्रक्षाल्य वन्हिना पर्यग्नीकृत्य शुद्धः स्यात् ।

स्त्रीणां विशेषमाह ।

**ब्राह्मणी तु शुना दष्टा जम्बूकेन वृकेन वा ।**
**उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ॥ ७ ॥**

श्वादिदष्टा ब्राह्मणी रात्रावुदितान् सोमभौमादीन् ग्रहानश्विन्यादीनि नक्षत्राणि चावलोक्य शुद्धा भवति कृच्छ्रादिव्रतस्यायां विशेषोऽन्यत्र दर्शितः ।

त्रिरात्रमेवोपवसेच्छुना दष्टा तु सव्रता ।
सघृतं यावकं भुक्त्वा व्रतशेषं समापयेत् ॥ इति ।
रजस्वलायां विशेषमाह पुलस्त्यः ।
रजस्वला यदा दष्टा शुना जम्बूकरासभैः ।
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति ॥
ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं स्मृतम् ॥

चतुर्गुणं मूर्ध्नि दष्टेऽन्यत्रसोमस्तुतिर्भवेत् ॥ इति ।

अन्यत्रारजस्वलावस्थायां सोमस्तुतिर्भवेत् तच्च मूलेऽप्युपलक्षितमेवेति ।

कृष्णपक्षादौ सोमदर्शनासम्भवे किं कार्यमित्यत आह ।

**कृष्णपक्षे यदा सोमो न दृश्येत कदा च न ।**
**यां दिशं व्रजते सोमस्तां दिशं चावलोकयेत् ॥ ८ ॥**

कृष्णपक्षे कदा च न दुर्दिनादौ च यदा सोमो न दृश्यते कदाचन या दिश व्रजते तदा यस्यां दिशि सोमः सम्भाव्यते प्राच्यां प्रतीच्यां वा ता दिशमवलोकयेत् । सोमदर्शने पञ्चगव्यप्राशनस्याप्युपलक्षणम् । अत एवाङ्गिराः ।

ब्राह्मणी तु शुना दष्टा सोमे दृष्टिं निपातयेत् ।
यदा न दृश्यते सोमः प्रायश्चित्तं कथं भवेत् ॥
या दिशं तु गतः सोमस्तां दिशं चावलोकयेत् ।
सोममार्गेण सा पूता पञ्चगव्येन शुध्यतीति ॥
सोमदर्शनाद्वा शुद्धिस्तदाह बौधायनः ।
ब्राह्मणी तु शुना दष्टा सोमे दृष्टिं निपातयेत् ॥
समुद्रदर्शनाद्वापि शुना दष्टा शुचिर्भवेत् ।

उक्तप्रायश्चित्ताचरणानन्तरं ब्राह्मणप्रणिपाततच्चिरीक्षणाभ्यां शुद्धिरित्युक्तम् । ब्राह्मणासन्निधाने तु कथमित्यत आह ।

**असद्ब्राह्मणके ग्रामे शुना दष्टो द्विजोत्तमः ।**
**वृषं प्रदक्षिणीकृत्य सद्यः स्नात्वा शुचिर्भवेत् ॥ ९ ॥**

यस्मिन् ग्रामे ब्राह्मणा न सन्ति तत्र श्वादिदष्टो ब्राह्मणः स्नानानन्तरं वृषभं प्रदक्षिणीकृत्य शुद्धः स्यात् । नन्विदं श्वादिदंशे प्रायश्चित्तमनुपपन्नं तस्य विधिप्रतिषेधातिक्रमरूपत्वाभावेन प्रत्यवायाजनकत्वात् । तदभावे च तद्विनाशकप्रायश्चित्तमनर्थकमिति चेत् । सत्यम् । प्रायश्चित्तविधानान्यथानुपपत्त्या प्रत्यवायसद्भावे कल्पनीये ऐहिकतदभावनिश्चये जन्मान्तरीयकारणजन्यप्रत्यवायसद्भवकल्पनादिति नानुपपत्तिः ।

एवं नवभिः श्लोकैः श्वादिदंशप्रायश्चित्तमभिधायाधुना दुर्मृतस्याहिताग्नेः संस्कारमाह ।

**चण्डालेन श्वपाकेन गोभिर्विप्रो हतो यदि ।**
**दहेत्तं ब्राह्मणं विप्रो लोकाग्नौ मन्त्रवर्जितम् ॥ १० ॥**

ब्राह्मण्यां शूद्राज्जातश्चाण्डालः ।

ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा ।
शूद्राज्जातस्तु चाण्डालः सर्वधर्मबहिष्कृतः ॥

इति योगिस्मरणात् । क्षत्तायामुग्राज्जातः श्वपाकः "उग्रात्तु जातः क्षत्ताया श्वपाक इति कीर्तित इति मनुस्मरणात् । ताभ्यां गोभिर्वा यद्याहिताग्निर्विप्रो हतः मृतः प्राणैर्वियुक्तः यदि वा विशेषविषादिना आत्मनैव हतो मृतस्तदोभयथापि सपिण्डः कश्चित् विप्रो लौकिकेनाग्निना मन्त्रैर्विवर्जितं दहेत् ।

नन्वेतादृशस्य दहन पूर्वाध्यायादौ निषिद्धमिति कथमिहोच्यत इत्यत आह ।

**स्पृष्ट्वा वोढ्वा च दग्ध्वा च सपिण्डेषु च सर्वथा ।**
**प्राजापत्यं चरेत्पश्चाद्विप्राणामनुशासनात् ॥ ११ ॥**

पूर्वोक्त चण्डालादिहतमात्महतं वा सपिण्डेष्वेवान्यतमो विप्रः स्पृष्ट्वा वोढ्वा दग्ध्वा व पश्चाद्विप्रानुशासनाद्विप्राज्ञया सर्वथा प्राजात्यं चरेत् ।

अनेन पश्चात्सर्वथेतिपदद्वयप्रयोगेण बुद्धिपूर्वकं निषेधातिक्रमेण दाहादिक कृत्वा प्रायश्चित्त कार्यमिति गम्यते न तु प्रामादिके तत्करणप्रायश्चित्तमनेनोच्यत इति । तथा च दग्ध्वास्थीनि पुनर्दहेदिति नित्यवत् पूर्वदाहानुविधानमपि नोपपद्येत । नच चतुर्थाध्यायादौ दुर्मृतवहनादिप्रायश्चित्तविधानादेतस्य पुनरुक्तत्व वाच्यम् । एतस्याहिताग्निविषयत्वकल्पनात् । प्राजापत्याचरणानन्तरं किं कार्यमित्यत आह ।

**दग्ध्वास्थीनि पुनर्गृह्य क्षीरेण क्षालयेद् द्विजः ।**
**स्वेनाग्निना स्वमन्त्रेण पृथगेतत्पुनर्दहेत् ॥ १२ ॥**

उक्तरीत्या दुर्मृतमात्महतं च दग्ध्वा तदीयान्यस्थीनि पुनर्गृह्य गृहीत्वा क्षीरेण प्रक्षाल्य द्विजो विप्रादिः स्वेन श्रौतेन स्मार्तेन वाग्निना स्वमन्त्रेण स्वकल्पोक्तमन्त्रकलापेन पृथक् कालान्तरे संवत्सरान्ते पुनर्दहेत् । तदेतत्सर्वमाह हारीतः ।

ब्राह्मणाद्वधसम्प्राप्तौ चण्डलास्य करेण वा ।
आत्मना शस्त्रपाते च शूद्रवद्दाहयेद्द्विजम् ॥
प्राजापत्यं चरेत्पश्चात्सपिण्डेषु वसन्नुमान् ।
तद्भस्मास्थि गृहीत्वैव विप्राणामनुशासनात् ॥
क्षीरप्रक्षालनं कुर्यात्तदस्थि प्रेतवद्गृहे ।
पुनर्दहेत मन्त्रैश्च यथाविधि समाचरेत् ॥
एवमेव विधिं कुर्यान्मरणे गर्हितस्य चेति ।
सवत्सरात्तदित्युक्तं षट्त्रिंशन्मते ।
गोब्राह्मणहतानां च पतितानां तथैव च ।
उर्ध्वं सवत्सरात्कुर्यात्सर्वमेवौर्ध्वदेहिकम् ॥
तच्च नारायणबलिपूर्वकं कार्यमित्याह छागलेयः ।
नारायणबलिः कार्यो लोकगर्हाभयान्नरैः ।
तथा तेषा भवेच्छेचं नान्यथेत्यब्रवीद्यमः ॥ इति ।
नारायणबलिस्वरूप च वैष्णवेऽभिहितम् ।
एकादशीं समासाद्य शुक्लपक्षस्य वै तिथिम् ।
विष्णुं समर्चयेद्देवं यमं वैवस्वतं तथा ॥
दश पिण्डान् घृताभ्यक्तान् दर्भेषु मधुसंयुतान् ।
तिलमिश्रान् प्रदद्याद् द्वौ संयतो दक्षिणामुखः ॥
विष्णुं बुद्धौ समासाद्य नद्यम्भसि ततः क्षिपेत् ।
नामगोत्रग्रहं गन्धपुष्पैरभ्यर्चनं तथा ॥
धूपदीपप्रदानं च भक्ष्यभोज्यं ततः परम् ।
निमन्त्रयेत विप्रान् वै पञ्च सप्त नवापि वा ॥
विद्यातपःसमृद्धान्वै कुलोत्पन्नान् समाहितः ।
अपरेऽहनि सम्प्राप्ते मध्यान्हे समुपोषितः ॥

विष्णोरभ्यर्चनं कृत्वा विप्रांस्तानुपवेशयेत् ।
उदङ्मुखान् यथाज्येष्ठं पितृरूपमनुस्मरन् ॥
नमो निवेश्य विष्णौ तु सर्वं कुर्यादतन्द्रितः ।
आवाहनादि यत्प्रोक्तं दैवपूर्वन्तदाचरेत् ॥
तृप्तान् ज्ञात्वा ततो विप्रान् तृप्तिं पृष्ट्वा यथाविधि ।
हविष्यव्यञ्जनेनैव तिलादिसहितेन च ॥
पञ्च पिण्डान् प्रदद्याद् द्वै दैवरूपमनुस्मरन् ।
प्रथमं विष्णवे दद्याद् ब्रह्मणे च शिवाय च ॥
यमाय सानुचराय चतुर्थं पिण्डमुत्सृजेत् ।
मृतसंकीर्तमनसा गोत्रपूर्वमतः परम् ॥
विष्णोर्नाम गृहीत्वैवं पञ्चमं पूर्ववत् क्षिपेत् ।
विप्रानाचम्य विधिवद्दक्षिणाभिः समर्चयेत् ॥
एकं प्रेतवृतं विप्रं हिरण्येन समर्चयेत् ।
गवा वस्त्रेण भूम्या च प्रेतं तं मनसा स्मरन् ॥
ततस्तिलाम्भो विप्रास्तु हस्तैर्दर्भसमन्वितैः ।
क्षिपेयुर्गोत्रपूर्वं तु नाम बुद्धौ निवेश्य च ॥
हविर्गन्धतिलाम्भस्तु तस्मै दद्युः समाहितः ।
मित्रभृत्यजनैः सार्द्धं पश्चाद् भुञ्जीत वाग्यतः ॥
एवं विष्णुमते स्थित्वा यो दद्यादात्मघातिने ।
समुद्धरति तं क्षिप्रं नात्र कार्या विचारणेति ॥
सर्पदंशे मनुना विशेषोऽभिहितो भविष्यत्पुराणे ।
सुवर्णभारनिष्पन्नं नागं कृत्वा तथैव च ।
गां व्यासाय तथा दत्वा विधिवत्पुण्यमाप्नुयात् ॥ इति ।

ननु दुर्वृत्तानां लौकिकाग्निना दाहोऽनुपपन्नः । तद्देहस्य गङ्गादौ प्रतिपत्तिस्मरणात् । तथा च स्मृत्यन्तरम् ।

आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया ।
तेषामपि तथा गङ्गातोये संस्थापनं हितमिति ॥
तथा स्वाग्निना पुनर्दाहोऽप्यनुपपन्नः ।
वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे ॥

पात्राणि च दहेदग्नौ यजमाने तथा मृते ।

इत्यनेन तदग्नीनां प्रतिपत्तिविधानादिति चेद् बाढम् । मूलोक्तकल्पादनयोः कल्पान्तरविधायकत्वेनानुपपत्तिपरिहारात् । तर्हि कल्पान्तरेऽप्यौर्ध्वदेहिकस्य देहाग्न्योः प्रतिपादितत्वेन न दाहसम्भव इति चेत् सत्यम् । देहाग्निप्रतिपत्त्या दाहलोपेन तदुत्तरकालीनोदकादिक्रियायास्तत्रेष्टत्वात् । अत एव त्रिकाण्डमण्डनः अग्नौ सति स्याद्यदेहक्लृप्तिरथास्थि चेदग्निरपेक्षणीय अस्थ्यग्न्यभावे त्वशरीरस्य मरणादि न अथ देहास्थ्यभावे पलाशवृन्तादिभिर्देहः कल्पनीयः । देहास्थिसद्भावे प्रेताधानादिना विच्छिन्नोऽप्यग्निराहरणीयः । प्रतिपत्त्यादिना देहास्थ्नोरग्नेश्चाभावे तूदकक्रियामारभ्यैवौर्ध्वदेहिकं कार्यम् । उभयप्रतिपत्त्या दाहस्य लुप्तत्वात् । अत एव गौतमोऽपि । तस्य प्राणान्तिकं प्रायश्चित्त स मृतः शुध्येत्तस्मिन्नुदकादीनि सर्वाणि प्रेतकार्याणि इत्युदकादीनीत्येवोक्तवान्न तु दाहादीनीति ।

नन्व दाहाभावे शरीरसंस्काराभावादुत्तरक्रियास्वप्यनधिकार इति वाच्यम् । सन्यासिने निखननस्यैवात्र गङ्गादितोये प्रक्षेपस्यैव तत्संस्कारत्वात् । नचोर्ध्वं संवत्सरात् कुर्यात्] सर्वमेवौर्ध्वदेहिकमिति सर्व श्रुतिविरोधः शङ्कनीयः । सर्वत्वमाधिकारिकमिति न्यायेन दाहातिरिक्तस्यैवाधिकृतस्य सर्वशब्देन परामर्शादित्यलमतिविस्तरेण ।

एवं सार्धश्लोकत्रयेण दुर्मृतस्याहिताग्नेः संस्कारोऽभिहित इदानीं प्रोषितस्य देहक्लृप्तिं सार्द्धदशभि श्लोकैराह ।

**आहिताग्निर्द्विजः कश्चित्प्रवसन्कालचोदितः ॥**
**देहनाशमनुप्राप्तस्तस्याग्निर्वर्तते गृहे ॥ १३ ॥**
**प्रेताग्निहोत्रसंस्कारः श्रूयतां ऋषिपुङ्गवाः ।**

आहिताग्निः श्रौताग्निमान् द्विजस्त्रैवर्णिकः कालेन चोदितो वशीकृतः प्रवसन् देशान्तरस्थ एव देहनाशं मरणं प्राप्तस्तस्य चाग्निर्गार्हपत्यादिर्गृहे वर्तते मृताग्निहोत्रादिविधिना पाल्यमानः तिष्ठति च

तदा प्रेतस्याहिताग्नेर्गृहे विद्यमानस्याग्निहोत्रस्याग्नित्रयस्य च संस्कारस्स भो व्यासप्रमुखा ऋषिपुङ्गवाः श्रूयताम् । प्रायश्चित्तप्रस्तावे आहिताग्निसंस्कारस्यासङ्गतिपरिहाराय पुनरवधानदानं मरणादिशब्देनैवार्थसिद्धौ देहनाशशब्दोऽस्याद्यलाभसूचनाय तदभाव एव पालाशप्रतिकृतिविधानात् । अत एव छन्दोगपरिशिष्टे ।

> विदेशमरणेऽस्थीनि आहृत्याभ्यज्य सर्पिषा ।
> दाहयेदूर्णया ऽऽच्छाद्य पात्रन्यासादिपूर्ववत् ॥
> अस्थ्नामभावे पर्णानि सकलान्युक्तयावृत्तेति ।

प्रतिज्ञातं प्रेतसंस्कारमाह ।

**कृष्णाजिनं समास्तीर्य कुशैस्तु पुरुषाकृतिम् ॥ १४ ॥**

कृष्णमृगस्याजिने स्वास्तीर्य कुशैः पुरुषस्याकारं कुर्यात् । कुशपुत्रकदाहेन तस्य स्यादवधारणमिति लिङ्गात् ।

कुशाभावे द्रव्यान्तरमाह ।

**कार्या प्रतिकृतिस्तस्य पलाशानां च पत्रतः ।**
**षट्शतानि शतान्यानि पालाश्यः समिधस्तथा ॥ १५ ॥**
**चत्वारिंशच्छिरे दद्याच्छन्तं कण्ठे तु विन्यसेत् ।**

कुशाभावे तस्मिन्नेव कृष्णाजिने षट्शतानि शतं चेत्येवं तानि सप्तशतानि पलाशानां पलाशपत्राणां सार्वविभक्तिकः सित्तसिल् । यथोक्तविभागेन विन्यसेत् पलाशवृन्ताना कुशसमानकार्यत्वेन च शब्दस्य वा शब्दार्थतया विकल्पाभिधानात्पर्यायान्तरमेतच्च "एवं पर्णशरं दग्ध्वेति लिङ्गात् । विभागे सङ्ख्यामाह । शिरे शिरसि चत्वारिंशत् कण्ठे च शतं दद्यादिति अङ्गान्तरेष्वपि तामाह ।

**बाहुभ्यां च शतं दद्यादङ्गुलीषु दशैव तु ॥ १६ ॥**
**दद्यादष्टौ वृषणयोः पञ्च मेण्ढ्रे तु विन्यसेत् ।**
**एकविंशतिमूरुभ्यां द्विशतं जानुजङ्घयोः ॥ १७ ॥**

पादाङ्गुष्ठेषु दद्यात्षट् यज्ञपात्रं ततो न्यसेत् ।

बाहुद्वयेशतं शतमिति शतद्वयं पादद्वये ऽप्येवं पादाङ्गुलीषु पञ्च पञ्चेत्येवं दश कराङ्गुलिषु प्रत्येकमेवं दश जघने शतमुदरे शतद्वयं, वृषणयोः प्रत्येकं चत्वारि चत्वारीत्येवमष्टौ ऊरुषु दश "विभागेन समं स्यादश्रुतत्वादिति भावः । जानु च जङ्घा च तद्वये प्रत्येकं शतमेवं शतद्वयं पादाङ्गुष्ठेषु पञ्च मुखे पलाशै र्देहाकृतिं निर्माय तदुपरि यज्ञपात्राणि विन्यसेत् ।

तमेवं यज्ञपात्रविन्यासमाह ।

शम्यां शिश्ने विनिक्षिप्य अरणीं मुष्कयोरपि ॥ १८ ॥
जुहूं च दक्षिणे हस्ते वामे उपभृतं न्यसेत् ।
पृष्ठे चोलूखलं दद्यात्पृष्ठे च मुसलं न्यसेत् ॥ १९ ॥
उरसि क्षिप्य दृशदं तण्डुलाज्यतिलान्मुखे ।
श्रोत्रे च प्रोक्षणीं दद्यादाज्यस्थालीं च चक्षुषोः ॥ २० ॥
कर्णे नेत्रे मुखे घ्राणे हिरण्यशकलं न्यसेत् ।

अग्निहोत्रोपकरणमशेषं तत्र निक्षिपेत् ॥ २२ ॥
असौ स्वर्गाय लोकाय स्वाहेत्येकाहुतिं सकृत् ।
दद्यात्पुत्रोऽथ वा भ्राताप्यन्यो वापि च बान्धवः॥२३॥
यथा दहनसंस्कारस्तथा कार्यो विचक्षणैः ।

शिश्ने शम्यां मुष्कयोरण्डकोशयोररणिं दक्षिणेतरयोर्हस्तयोर्जुहूपभृतावुलूखलमुसले पृष्ठे उरसि दृशदं मुखे तण्डुलाज्यतिलान् श्रोत्रे प्रोक्षणीं चक्षुषोः स्थालीं कर्णाक्षिघ्राणमुखेषु हिरण्यशकलमेवं स्वकर्मानुसारेणाशेषमग्निहोत्रोपकरणं स्फ्यशूर्पचमसादि तत्र तत्र निक्षिप्यासावित्याज्याहुतिं शवदेहे हुत्वा पुत्रास्त्रिवर्त्ताः स्वशाखोक्तरीत्या जुहुयुरिति । ये तु

देशान्तरगते विप्रे विपन्ने कालपर्ययात् ।
शरीरनाशे कल्पः स्यादाहिताग्नेर्विशेषतः ॥

कृष्णाजिनमुपास्तीर्य पुरुषाकृतिमेव च ।
त्रिणि षष्ठशतं वृन्तान् पलाशास्तु समाहितः ॥
अशीत्यर्द्धं शिरे दद्याद् ग्रीवायां दश चैव हि ।
बाहुभ्या च शतं दद्यादङ्गुल्योर्दश एव च ॥
उरसि त्रिशतं दद्याज्जठरे विंशतिं तथा ।
ऊरुभ्यां तु शतं दद्यात्त्रिशतं जानुजङ्घयोः ॥
पादाङ्गुल्योर्दश दद्यादेतत्प्रेतस्य लक्षणम् ।

तथा ।

नारिकेलं शिरस्येव कपाले ताम्रभाजनम् ।
चक्षुषोर्मौक्तिकं दद्यादोष्ठे दद्यात्प्रवालकम् ॥
दन्तेषु दाडिमीबीजं केशेषु चमरं तथा ।
कस्तूरिका च ग्रीवया कर्णयोः शिबिका तथा ॥
नखे कपर्दकान् दद्याच्छिश्ने च कदलीफलम् ।
वृन्ताक मुष्कयोर्दद्याद्रक्ते चेङ्गुलक तथा ॥
वीर्ये च पारदं दद्याद्धरिताल मनः शिलाम् ।
मज्जायां वृक्ययोश्चैव जम्बीरफलमेव च ॥
उर्णासूत्रेण सवेष्ट्य यवपिष्टेन लेपयेत् ।
नामगोत्रं समुच्चार्य वस्त्रेणाच्छादयेदपि ॥
पुनः प्राणेति मन्त्रेण प्राणान्संवेश्य तत्तथा ।
एवं पर्णशरं कृत्वा देहे च विधिपूर्वकम् ॥

इत्यादयो हारिताद्यभिहिताः संख्याविनियोगविशेषास्तेऽपि शाखाभेदेन युगभेदेन वा व्यवस्थापनीयाः । यद्यप्यत्राहिताग्निमुपक्रम्याय विधिराम्नातस्तथाप्ययं भवति अनाहिताग्नेरपि ।

अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना द्विजैः ।
तदभावे पलाशानां पत्रैः कार्यः पुमानपि ॥

इति ब्रह्मपुराणात् । यदि पर्णशरदाहे क्रियमाणे तदस्थीनि लभ्यन्ते तदार्धदग्धकाष्ठानि निर्मन्थितेनाग्निना तान्यपि दहेत् समाप्ते तु दाहेऽर्धदग्धकाष्ठाभावे तानि जले प्रक्षिपेत् । तदाह ब्रह्मपुराणे ।

अथ पर्णशरे दग्धे पात्रन्यासे कृते सति ।
गतेष्वग्निषु तद्देहो यद्यर्द्धे लभ्यते क्वचित् ॥
तदार्द्धदग्धकाष्ठानि तानि निर्मथ्य तं दहेत् ।
यद्यर्द्धदग्धकाष्ठं तु तदीयं च न लभ्यते ॥
तदा तदस्थिखण्डं तु निक्षेप्तव्यं महाजले । इति ।
तत्र विधेरन्वयव्यतिरेकाभ्या फलमाह ।

**ईदशं तु विधिं कृत्वा ब्रह्मलोके गतिः स्मृता ॥२४॥**
**दहन्ति ये द्विजास्ते तु ते यान्ति परमां गतिम् ।**
**अन्यथा कुर्वते कर्म त्वात्मबुध्या प्रचोदिताः ॥ २५ ॥**
**भवन्त्यल्पायुषस्ते वै पतन्ति नरकेऽशुचौ ।**

यस्याहिताग्नेरीदृशं विधिं कुर्यात्तस्य ब्रह्मलोकगतिः स्मृता पूर्वैः । ये तु तमाहिताग्निमुक्तरीत्या दहन्ति तेऽपि परां गतिं यान्ति आत्मबुध्यान्यथाकारिणामल्पायुर्नरकपातश्चेति

नेत्रे निद्रेवजिह्वां रस इव मधुरः प्रेममूर्च्छेव चेतः
श्रोत्रे चञ्चद्विपञ्चीनिनद इव नृणां भक्तिसक्तिभाजम् ।
दृष्टः सङ्कीर्त्तितो वा हृदि तु कथमपि ध्यात आकर्णितो वा
तत्तत्सम्पर्कमात्रादमलयतितरां तं हृषीकेशमीडे ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृते खलु चाहिताग्ने-
रध्याय एष विवृतः किलपञ्चमोऽपि ॥ २ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां पञ्चमोऽध्यायः ॥ शुभमस्तु ।

श्रीगणेशाय नमः ।

संवर्तोद्वेलदुग्धांबुधिबहलरयप्रोच्छलद्वगच्छत्
क्षीराग्रव्यस्तवीचीचलदमलपदः शेषभोगभ्रमेण ।
व्यामीलन्नेत्रयुग्मः श्लथवपुरुदयद्योगनिद्रावगाढो
क्षीणः पद्माकटाक्षैः प्रथयतु भगवान् पद्मनाभः श्रियं नः ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
व्याख्यायते हि मलिनीकरणादिशुद्धिं
वक्तुं पराशरकृताविह षष्ठ एषः ॥ २ ॥

चतुर्थपञ्चमाभ्यां प्रकीर्णकप्रायश्चित्तं तत्प्रसङ्गागतं चान्यदपि निरूपितम् । इदानीं मलिनीकरणसङ्कुलीकरणयोः स्वरूपमाह । मनुः—

कृमिकीटवयोहत्या मद्यानुगतभोजनम्
फलैधः कुसुमस्तेयमधैर्यं च मलावहम् ।
खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा
सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य चेति ॥

उपपातकस्वरूपपरिशिष्टं वक्ष्यामः । तदेवमध्यायार्थं तावद्वक्तुं प्रतिजानीते ।

**अतः परं प्रवक्ष्यामि प्राणिहत्यासु निष्कृतिम् ।**
**पराशरेण पूर्वोक्तामन्वर्थेऽपि च विस्तृताम् ॥ १ ॥**

अतः परं प्रकीर्णकप्रायश्चित्ताभिधानानन्तरं प्राणिनां हत्यासु बहुवचनेन मलिनीकरणसङ्करीकरणोपातकरूपत्वेन बहुविधासु पराशरेण पूर्वस्मिन् युगे कलियुगोक्तामभिहितामन्वर्थे सूक्ष्मेऽप्यर्थे सङ्करापात्रकृत्यासु मासः शोधनमैन्दवः । मलिनीकरणीयेषु पक्षः स्याद्यावकस्त्वह-मित्याद्यनेकोपाधिना प्रायश्चित्ताभिधानसंभवेऽपि विस्तृतां प्रतिपदोक्तां निष्कृतिं प्रायश्चित्तरूपां वक्ष्यामि ।

तत्र मलिनीकरणे प्रायश्चित्तमाह ।

**क्रौञ्चसारसहंसांश्च चक्रवाकं च कुक्कुटम् ।**
**जालपादं च शरभं हत्वाऽहोरात्रतः शुचिः ॥ २ ॥**

क्रौञ्चः क्रुङ् सारसो लक्ष्मणः हंसचक्रवाककुक्कुटाः प्रसिद्धाः । अजालपादा अपि हंसाः सन्तीति पृथगुपात्तः । शरभः एतान् हत्वा अहोरात्रत एकोपवासेन हन्ता शुचिर्भवति । चकारात्तित्तिरिशुकसारिकादीनामपि समुच्चयः, तथा च सर्वतः ।

चक्रवाकं तथा क्रौञ्चं तित्तिरं शुकसारिकां ।
श्येनं गृध्रमुलूकं च तथा पारावतान्यपि ॥
टिटिभं जालपादं च मद्गुं कुक्कुटमेव वा ।
एवं पक्षिषु सर्वेषु दिनमेकमभोजनमिति ॥

एतेन मन्वाद्युक्त गोदानमप्रत्यादिष्टम् । बलाकादिषु विशेषमाह

**बलाकाटिट्टिभौ वापि शुकपारावतावपि ।**
**अटोनबकघाती च शुध्यते नक्तभोजनात् ॥ ३ ॥**

बलाका प्रसिद्धा । टिट्टिभस्तच्छब्दानुकारी शुकः कपोतः परावतः एतान्हत्वेति पूर्वेणानुषज्यते अटीनः शरारी बकः प्रसिद्धस्तौ हन्ति इति तद्घाती च दिवाभोजनपरिहारेण नक्तभोजनाच्छुध्यति । यत्तु पूर्वोक्तसर्वत्तवाक्येनोपवासश्रवणं तत्कामकारादिविषयं "विहितं यदकामाना कामात्तद्द्विगुणं भवेदि"तिवचनात् । उपवासस्य भोजनद्वयपरिहारात्मकत्वेन दिवा भोजनाभावसक्तनक्तभोजनाद्द्विगुणत्वात् । यत्तु तेनैवोक्तम् ।

हंस बक बलाकां च श्वाविधं बर्हिणस्तथा ।
सारस चाषभासाश्च हत्वा त्रीन्दिवसान् क्षिपेत् ॥

इति तदत्यन्ताभ्यासविषयम् ।

किञ्च

**वृककाककपोतानां सारीतित्तिरिघातकः ।**
**अन्तर्जल उभे सन्ध्ये प्राणायामेन शुध्यति ॥ ४ ॥**

वृकः पक्षिविशेषः पक्षिसमभिव्याहारात्त्वारण्यः श्वा, तस्याप्य वक्ष्यमाणत्वात् । काककपोतौ प्रसिद्धौ । एतेषां घातकः समस्तस्याप्यस्य बुध्यावच्छिन्नस्यात्रान्वयात् । सारीतित्तिरौ प्रसिद्धौ तयोश्च घातकोऽन्तर्जले जलमध्ये उभे सन्ध्ये सायं प्रातः सन्ध्ये अत्यन्तसंयोगे द्वितीयाश्रवणात्ते अभिव्याप्य प्राणायामेन तावत्कालाभ्यस्तेन शुध्यतीति ।

किञ्च ।

**गृध्रश्येनशशादीनामुलूकस्य च घातकः ।**
**अपक्काशी दिनं तिष्ठेत्त्रिकालं मारुताशनः ॥ ५ ॥**

गृध्रो दाक्षाय्यः, श्येनः पक्षी शशादस्तदवान्तरजातिः, उलूकः पेचकस्तेषां घातकः, एकस्मिन् दिने अपक्वं कन्दमूलफलमशित्वा ततः परदिने कालद्वयेऽपि तृतीयदिने तु दिवा मारुतमेवाशित्वा रात्रौ भुञ्जीतेत्येवं सार्द्धदिनद्वयं प्रायश्चित्तं भवति । अत्राशक्तस्य कश्यप आह । बकबलाकासारसकारण्डवचक्रवाककुररगृध्रश्येनखञ्जरीटटिट्टिभोलूकसारिकातित्तिरिमयूरकुरमुखामेजनककलविङ्कपारावतादीनां वधे प्रायश्चित्तमहोरात्रोपोषितः सर्वबीजानि च दद्यादिति ।

किञ्च ।

**वल्गुलीटिट्टिभानां च कोकिलाखञ्जरीटयोः ॥**
**लाविकारक्तपक्षाणां शुद्ध्यते नक्तभोजनात् ॥ ६ ॥**

वल्गुली पक्षिविशेषः । टिट्टिभस्य पुनर्वचनमवान्तरजातिभेदाद्विप्रापणार्थं कोकिला परभृता अत्र सर्वत्र लिङ्गमविवक्षितमुद्देश्यगतत्वात् । खञ्जरीटः खञ्जनः लाविका लावः, रक्तपक्षाः लोहितपक्षाः, एतेषां पूर्ववाक्यादनुशक्तो घातको नक्तभोजनाच्छुध्यति ।

किञ्च ।

**कारण्डवचकोराणां पिङ्गलाकुररस्य च ॥**
**भारद्वाजादिकं हत्वा शिवं संपूज्य शुध्यति ॥ ७ ॥**

कारण्डवः प्लवः चकोरपिङ्गले प्रसिद्धे कुररं उत्क्रोशः भारद्वाजो व्याघ्राटः। आदिशब्देनोक्तातिरिक्तानामन्येषामपि ग्रहणम्। एतान् हत्वा शिवं विधिवत् सपूज्य शुध्यति।

किञ्च।

**भेरुण्डचाषभासांश्च पारावतकपिञ्जलान्॥**
**पक्षिणां चैव सर्वेषामहोरात्रमभोजनम्॥ ८॥**

भेरुण्डः पक्षिविशेषः चाषः किकीदिवः भासः पक्षिविशेषः पारावतस्य पुनर्वचनं प्रायश्चित्तविकल्पार्थं कपिञ्जलः पक्षिविशेषः एतान् हत्वेत्यनुषङ्गः पक्षिजातीनामानन्त्यात्पृष्टाकोटिन्यायेन वक्तुमशक्तेरेकोपाधिना तेषु प्रायश्चित्तमाह। पक्षिणां चैव सर्वेषां हनन इति शेषः। अहोरात्रमभोजनमेकाहोपवास इति। एवं मलिनीकरणविशेषे प्रायश्चित्तविशेष आचार्यैरुक्तः। अवशिष्टे कृमिकीटवधादौ प्रायश्चित्तं स्मृत्यन्तरोक्तं द्रष्टव्यम्। तदाह।

मलिनीकरणीयेषु तप्तः स्याद्यावकस्त्र्यहमिति।

इदानीं सङ्करीकरणे प्रायश्चित्तमाह।

**हत्वा मूषकमार्जारसर्पाजगरडुण्डुभान्।**
**कृसरं भोजयेद्विप्रान् लोहदण्डं च दक्षिणा॥ ९॥**

मूषकादयोऽजगरान्ताः प्रसिद्धाः डुण्डुभो राजिलश्चकारान्नकुलश्चैतान् हत्वा कृसरं तिलमुद्गमिश्रमोदनं त्रीन् ब्राह्मणान् भोजयित्वा लोहदण्डदक्षिणां दद्यादिति। तथा च विष्णुः। हत्वा मूषकमार्जारनकुलडुण्डुभाजगराणामन्यतमं कृसरान्नं भोजयित्वा लोहदण्डं दक्षिणां दद्यादिति।

किञ्च।

**शिशुमारं तथा गोधां हत्वा कूर्मं च शल्यकम्।**
**वृन्ताकफलभक्षी चाप्यहोरात्रेण शुध्यति॥ १०॥**

शिशुमारः सूसिः गोधा कृकलासानुकारिणी कूर्मः कच्छपः शल्यकः

तथाशब्देन कृकलासनकुलयोर्ग्रहणम् । एतान् हत्वा वृन्ताकफलमात्रभक्षोऽहोरात्रेण चकारात् पूर्वोक्तं लोहदण्डं च दत्वा शुध्यति । तथा च कश्यपः । कृकलाससर्पनकुलगोधाशल्यकवधे अहोरात्रोषितश्चीर्णान्ते लोहं दद्यादिति । ननु ।

स्वट्वावार्ताककुम्भीकव्रश्चनप्रभवाणि च ।
एतेषां भक्षणं कृत्वा प्राजापत्यं चरेद्द्विजः ॥

इति वृद्धयमेन सर्वथा निषिद्धस्य वृन्ताकभक्षणस्य शोधकत्वं विरुद्धमिति चेत् । मैवं सुरां पीत्वा हि मोहादग्निवर्णां सुरां पिबेदिति मनुनानिषिद्धस्यापि सुरापानस्य शोधकत्ववदस्याविरुद्धत्वात् । नच सुरापानमात्रं न तत्र शोधकं किं तु अग्निवर्णसुरापानेनास्यदाहान्मरणमेव मुखे तयार्वाङ् निर्दोषो मृतः शुद्धिमवाप्नुयादिति स्मरणादित्ययं विषमो दृष्टान्त इति वाच्यम् । वृन्ताकमात्रभक्षणेनाहारान्तरपरिहारस्य क्लेशरूपस्य शोधकस्य अत्रापि तुल्यत्वादिति । यत्तु वृन्ताकफलभक्षी चेत्यस्यापि निमित्तसमर्पकत्वेनाहोरात्रोपवासमात्रमेव प्रायश्चित्तं न वृन्ताकभक्षणमिति तन्न । प्राणिवधप्रायश्चित्तप्रस्तावेऽभक्ष्यभक्षणप्रायश्चित्तस्यासङ्गतेर्वृन्ताकभक्षणप्रायश्चित्तस्यैकादशे वक्ष्यमाणत्वेन पौनरुक्त्याच्च । तस्माद्यथोक्तमेव साधीय इत्याचार्यस्वरसः ।

किं च ।

**वृकजम्बुकऋक्षश्वतरक्षूणां च घातकः ।**
**तिलप्रस्थं द्विजे दद्याद्वायुभक्षो दिनत्रयम् ॥ ११ ॥**

वृकः ईहामृगः जम्बुकः शृगालः ऋक्षो भल्लूकः श्वा कुक्कुरः तरक्षुर्मृगादनः, एषां घातकः स्त्रिरात्रं वायुभक्षश्चतुर्थदिने तिलप्रस्थं षोडशपलपरिमितांस्तिलान् ब्राह्मणाय दत्वा शुध्यति । तथा च विष्णुः । श्वानं हत्वा त्रिरात्रमुपवसेदिति ।

किं च ।

**गजस्य च तुरङ्गस्य महिषोष्ट्रस्य घातने ।**
**प्रायश्चित्तमहोरात्रं त्रिसन्ध्यमवगाहनम् ॥ १२ ॥**

गजतुरङ्गयोर्महिषश्चोष्ट्रश्च तयोः समाहारो महिषोष्ट्रं तस्य च घातने प्रमापणे अहोरात्रमुपवासः त्रिसन्ध्यमवगाहनं प्रायश्चित्तं शोधकं भवति ।

किं च ।

**कुरङ्गं वानरं सिंहं चित्रं व्याघ्रं च घातयन् ।**
**शुध्यते स त्रिरात्रेण विप्राणां तर्पणेन च ॥ १३ ॥**

त्रिरात्रोपवासेन ब्राह्मणत्रयभोजनेन च शुध्यति । तथा च संवर्त्तः ।

> व्याघ्रं श्वानं खरं सिंहं मृगसूकरमेव च ।
> एतान् हत्वा द्विजः कुर्याद्ब्राह्मणानां च भोजनमिति ॥

किं च ।

**मृगरोहिवराहाणामवेर्बस्तस्य घातकः ।**
**अफालकृष्टमश्नीयादहोरात्रमुपोष्य सः ॥ १४ ॥**

मृगः कुरङ्गेतरस्तस्य पूर्वमुपात्तत्वात् रोही मृगविशेषः वराहः सूकरः अविरुरभ्रः बस्तः छागः । एषां घातको ऽहोरात्रमुपोष्य परेद्युरफालकृष्टं नीवारादिकमश्नीयादिति ।

मृगजातीनामानन्त्यात्प्रतिव्यक्ति व्रतविशेषाभिधानाशक्तेरेकोपाधिना प्रायश्चित्तमाह ।

**एवं चतुष्पदानां च सर्वेषां वनचारिणाम् ।**
**अहोरात्रोषितस्तिष्ठेज्जपन्वै जातवेदसम् ॥ १५ ॥**

वनचारिणां सर्वेषां चतुष्पदानां पूर्वानुक्तानां घातको जातवेदसे सुनवाम सोममिति मन्त्रं जपन् अहोरात्रोषितस्तिष्ठेन्नोपविशेद्दिवमित्यनेनाफालकृष्टाशनं परदिनेऽतिदिश्यते वनचारिविशेषणेन ग्राम्याणां प्रतिपदोक्तादन्यत्र स्मृत्यन्तरोक्तं द्रष्टव्यमित्युक्तम् । तदाह शङ्खः ।

> पशून् हत्वा तथा ग्राम्यान्व्यहमेतद्व्रतं चरेत् ।
> सर्वांश्च प्राणिनः स्थूलान् मण्डूकनकुलेष्वहः ॥ इति ।

बहुवचनेनैव सर्वप्राप्तौ सर्वपदोपादानमवशिष्टेषु खरमीनादिति कश्यपस्मरणात्तद्ग्रहार्थम् ।

इदानीं केषु चिदुपपातकेषु प्रायश्चित्तमाह ।

**शिल्पिनं कारुकं शूद्रं स्त्रियं वा यस्तु घातयेत् ।**
**प्राजापत्यं द्वयं कृत्वा वृषैकादशदक्षिणा ॥ १६ ॥**

शिल्पी चित्रकारादिर्यद्यप्येतयोर्जातिविशेषानादरेण कर्मविशेषपुरस्कारेणोपादानात्सर्वजातीयत्व प्रतीयते तथापि मत्वर्थे सत्ताया वर्त्तमानत्वे सज्ञाया चेनुणो: प्रत्यययो: श्रवणात्स्वसमानधर्मकशूद्रमभिव्याहाराच्च तदेककत्यो: सङ्करजात्योरेव ग्रहणं युक्तम्। शूद्रो जातिमात्र गुणविशेषेण व्रतविशेषस्य च वक्ष्यमाणत्वात् । स्त्री गुणदोषरहिता जातिमात्रेण ब्राह्मणी क्षत्रियादिहनने व्रतविशेषस्य स्मृत्यन्तरादूहनीयत्वात् । एतान्यो घातयेत्तेन मूलोक्त प्राजापत्यद्वयं यथोक्तविधिना कृत्वा वृष एकादशो यासु ता वृषैकादशास्ताश्च ता दक्षिणा चेति वृषैकादशदक्षिणा देयेत्यर्थः । यद्यप्यत्र सख्येयं नोपात्त तथाप्यनिर्दिष्टसंख्येया सख्या गोगामिनीति न्यायाद्वृषसाहचर्याच्च गाव एव । शूद्रवधं प्रकृत्याह गौतमः "वृषभैकादशाश्च गा दद्यादिति" । अत्रैकादशानां गावामेकादश प्राजापत्या: द्वौ च प्रतिपदोक्तौ ताभ्यां च कृच्छ्रचतुष्टयसिद्धिरित्येवं पञ्चदशकृच्छ्राणि मपद्यन्ते, एव च षड्भिर्मासैर्भवति षाण्मासिकमेव व्रतमापद्यते । इदमेवाभिप्रेत्य सूतादिसङ्करजातिहनने षाण्मासिकादिव्रतमाह ब्रह्मगर्भः । अन्तरप्रभवाणा तु सूतादीना चतुर्द्विषडिति । अत्र मास इत्यनुवर्तते तेन सूतवधे षण्मासा: वैदेहकबधे वत्वारश्चण्डालबधे द्वौ मागधवधे चत्वारः क्षत्त्रवधे द्वौ आयोगववधेऽपि "आयोगववधेपि द्वाविति । जातिमात्रशूद्रवधे तु मूलवचनादेव षण्मासिकव्रतं ज्ञेयम्। तथा कामाकामाभ्या जातिमात्रब्राह्मणीवधे प्रचेतसापि वार्षिकषाण्मासिके व्रते अभिहिते अनृतुमतीं ब्राह्मणीं तु हत्वा कृच्छ्राब्दं षण्मासान्वेति । क्षत्रियादिबधेऽपि स एवाह । क्षत्रियां हत्वा षण्मासान्मासत्रयं वा वैश्यां हत्वा

मासत्रयं सार्द्धमासं वा शूद्रा हत्वा मासमर्द्धमासं वा शूद्रा हत्वा-मासार्द्धमाससार्द्धद्वाविंशत्यहानि चेति। कामाकामाभ्यां पक्षद्वयोरुपन्यासो व्यवस्थाप्यः। सवनस्याग्निहोत्रियात्रेयादिवधे तु ब्रह्महत्याव्रतमिति। अत्यन्तव्यभिचरितब्राह्मण्यादिवधे तु याज्ञवल्क्योक्तम्।

दुर्वृत्तब्रह्मविट्क्षत्रशूद्रयोषाः प्रमाप्य तु।
दृतिं धनुर्बस्तमविं क्रमाद्दद्याद्विशुद्धये॥

इति द्रष्टव्यं, दृतिश्चर्मपात्रं बस्तः छागः।

क्षत्रियादिवधे प्रायश्चित्तमाह।

**वैश्यं वा क्षत्रियं वापि निर्दोषं यस्तु घातयेत्।**
**[१]सोऽपि कृच्छ्रद्वयं कुर्याद्गोविंशद्दक्षिणां ददेत्॥ १७॥**

दोषोऽत्र विहिताकरणं प्रतिषिद्धसेवनं च तभ्यां रहितौ निर्दोषौ क्षत्रियवैश्यौ घातयेत् सोऽपि कृच्छ्रद्वयं यथोक्तविधिना कृत्वा विंशद्विशतिगा दक्षिणां दद्यात्। अत्राप्युक्तरीत्या चतुर्विंशतिः प्राजापत्यानि भवन्ति तानि च द्वादशदिनोनदशमाससाध्यानि इति दशमासिकं व्रतमुपदिष्टं तदपेक्षया गुणदोषतारतम्येन व्रततारतम्यं स्मृत्यन्तरादूहनीयम्। तत्र सर्वक्षत्रियादिवधे चतुर्विंशतिमतेऽभिहितम्।

क्षत्रियस्य वधं कृत्वा चरेच्चान्द्रायणत्रयम्।
वैश्यस्य तु द्वयं कुर्याच्छूद्रस्यैन्दवमेव च॥ इति।

अत्यन्तदुष्टेषु तेषु संवर्त्त आह।

निपात्य क्षत्रियं मोहात्त्रिभिः कृच्छ्रैर्विशुध्यति।
कुर्यादेवानुपूर्व्येण त्रीन्कृच्छ्रांस्तु यथाविधि॥
वैश्यहत्यां तु संप्राप्य कथं चिन्मूढचेतनः।
कृच्छ्रातिकृच्छ्रौ कुर्वीत स नरो वैश्यघातकः॥
कुर्याच्छूद्रवधे विप्रः कृच्छ्रं सातपनं तथा॥ इति।

अकामकृतक्षत्रियादिवधविषयमेतद्, मोहादिपदश्रवणात्। याग-

---

१ सोऽतिकृच्छ्रद्वयमित्यपि पाठः।

स्यवक्षत्रियादिवधे तु ब्रह्महत्याव्रतातिदेशे वक्ष्यते, वृत्तस्थक्षत्रियादिवधे मनूक्तमेव ।

तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः ।
वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडश ॥ इति द्रष्टव्यम् ।

वृत्तशब्देनात्मगुणादिकमुच्यते

गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः ।
प्रवर्तनं हितानां च तत्सर्वं वृत्तमुच्यते ॥ इतिस्मरणात् ।

ब्रह्महत्याशब्देनात्र वक्ष्यमाणब्रह्महत्याव्रतस्येत्यनुबधमननस्य योजनेन प्राजापत्यकल्पनया सिद्धा प्राजापत्यसंख्या ग्रहीतव्या तस्य चतुर्थाष्टमषोडशांशसंख्यासमिताः प्राजापत्याः क्रमेण क्षत्रियादिवधेषु योजनीयाः ।

इदानींसद्वृत्तयोर्वैश्यशूद्रयोर्दुर्वृत्तविप्रस्य च वधे प्रायश्चित्तमाह ।

**वैश्यशूद्रं क्रियासक्तं विकर्मस्थं द्विजोत्तमम् ।**
**हत्वा चान्द्रायणं कुर्यात्त्रिंशद्गाश्चैव दक्षिणाम् ॥ १८॥**

क्रियासु नित्यनैमित्तिकासु आभिमुख्येन कार्यान्तरपरिहारेणापि सक्तं वैश्यं शूद्रं च विरुद्धे लोकशास्त्रनिषिद्धे कर्मणि पातकादौ निरन्तरं तिष्ठतीति विकर्मस्थः तादृशं द्विजोत्तम विप्रं च हत्वा चान्द्रायणं वक्ष्यमाण यथोक्तविधिना कृत्वा त्रिंशद्गा दक्षिणां दद्यात् । एतच्च वैश्येष्टमांशो वृत्तस्य इति मनूक्तेन समानमेव । अत्रैव विषये ब्रह्महा संवत्सरं कृच्छ्रं चरेदधः शायी त्रिषवणी कर्मावेदकी भैक्षाहारो दीर्घनदीपुलिनसङ्गमाश्रमपर्वतप्रस्रवणतपोवनविहारी स्थानवीरासनी सङ्गमाश्रमगोष्ठपर्वतप्रस्रवणतपोवनवीहारी स्यात्स्थानवीरासनी सवत्सरे पूर्णे हिरण्यमणिगोधान्यतिलभूमिसर्पींषि ब्राह्मणेभ्यो ददत्पूतो भवतीति सुमन्तुवचन योजनीयम् । उक्तरीत्याष्टत्रिंशत्प्राजापत्यसमानत्वात् ।

यत्तु द्विजोत्तमशब्देन वैश्यापेक्षयोत्तमत्वविवक्षया क्षत्रियमपि संगृह्णाति विकर्मस्थे तस्मिन्नप्येतदेव व्रतमिति चतुर्वर्णसाधारण्यमस्य

व्रतस्य वर्णित तदयुक्तम् । निर्दोषक्षत्रियवधोक्तप्रायश्चित्तादस्याधिकत्वात् । तस्माद्यथोक्तमेव सुस्थम् ।

चण्डालवधे प्रतिवर्णं प्रायश्चित्तमाह ।

**चाण्डालं हतवान् कश्चिद्ब्राह्मणो यदि कञ्चन ।**
**प्राजापत्यं चरेत्कृच्छ्रं गोद्वयं दक्षिणा ददेत् ॥ १९ ॥**
**क्षत्रियेणापि वैश्येन शूद्रेणैवेतरेण वा ।**
**चण्डालस्य वधे प्राप्ते कृच्छ्रार्द्धेन विशुद्ध्यति ॥ २० ॥**

यदि कश्चित् सगुणो निर्गुणो वा जातिमात्रेण ब्राह्मणः कश्चित् सगुणं निर्गुणं जातिमात्रेण ब्राह्मण्यां शूद्राज्जातं हन्ति स प्राजापत्यमकं कृच्छ्रं यथोक्तविधिना कृत्वा गोद्वयं दक्षिणा ददेत् । यद्वा कञ्चन शूद्रप्रतिलोमजत्वसाम्येनात्रायोगव इत्यर्थः एतदप्यज्ञानपूर्वकवधे । ज्ञानपूर्वके तु पराकः । तदाह लौगाक्षिः ।

हनने प्रतिलोमानां शूद्रजानां कथं भवेत् ।
ज्ञानपूर्वे पराकः स्यादज्ञाने त्वैन्दवं तथा ॥ इति ।

अत्रोक्तरीत्या मूल्य गोचतुष्टय भवति । एतदेवेति मूलोक्तेन समानविषयम् । "चान्द्रायणमकुर्वाणाः कुर्युः कृच्छ्रचतुष्टयमिति" स्मरणात् । यद्यपि पराके गोत्रयप्रत्याम्नायत्वपक्षे चान्द्रायणादपि न्यूनत्वं तथापि पराके पञ्चधेनव इति स्मरणादैन्दवादधिकत्वं ज्ञेयम् । यद्वा कञ्चन प्रतिलोमजत्वसाम्यात्सूतादिक वेत्यर्थः । तदाह याज्ञवल्क्यः । "चान्द्रायणं चरेत्सर्वानवकृष्टान्निहत्यत्विति" । अवकृष्टाः प्रतिलोमजाः क्षत्रियवैश्यशूद्रैरितरेणानुलोमजेन मूर्द्धावसिक्तादिना प्रतिलोमजेन सूतादिना वा चण्डालादिप्रतिलोमजवधे कृते कृच्छ्रार्द्धेन तत्पूर्वापरवर्त्तिभ्यां पादत्रयैकपादाभ्यां क्रमेण शुद्धता कार्या ।

तदाह लौगाक्षिः ।

सर्वं त्रिपादं मध्यं च पादं चैव व्रतं चरेत् ।
वर्णक्रमादन्तराणां हिंसागमनभोजने ॥ इति ।

अतश्च ब्राह्मणादिक्रमेण चत्वारोऽपि वर्णाः कृच्छ्रं त्रिपादमर्द्धपादं च कुर्युरिति सिध्यति कृच्छ्रविभागवद्दक्षिणाविभागोऽप्यूह्यः । तदुक्तत्वा-त्तस्य ।

दुष्टचण्डालादिवधे प्रायश्चित्तान्तरमाह ।

**चोरः श्वपाकश्चण्डालो विप्रेणाभिहतो यदि ।**
**अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति ॥२१॥**

यदि चौर्यासक्तः श्वपाकः चत्तायामुग्राज्जातश्चण्डालश्च पूर्वोक्तो विप्रेणाभिहतस्तदा स विप्रोऽहोरात्रोपोषितः परेद्युः स्नात्वा पञ्चग-व्यपानेन शुद्ध्यति अनेन निर्दोषश्वपाकवधेऽपि पूर्वोक्तं प्रायश्चित्तमि-त्युक्तं भवति चण्डालसाम्यात् । चण्डालवधस्योपपातकत्वाभावेन तु व्यवधानसाम्यात् प्रसङ्गेनाभिधानमविरुद्धम् ।

इदानीं चण्डालवधप्रसङ्गात्तद्विषयेषु प्रकीर्णेष्वपि केषु चित्प्राय-श्चित्तमाह ।

**श्वपाकं वापि चाण्डालं विप्रः संभाषते यदि ।**
**द्विजसंभाषणं कुर्यात्सावित्रीं च सकृज्जपेत् ॥ २२ ॥**

पूर्वोक्तलक्षणं श्वपाकं चण्डालं वा यदि विप्रः संभाषते तदा द्विजस्य ब्राह्मणस्य संभाषणं कुर्यात्तदभावे सावित्रीं सकृज्जपेत् । चका-रस्य विकल्पार्थत्वात् ।

अत एव एव हारीतः ।
चाण्डालैः सह संभाष्य द्विजसंभाषणाच्छुचिः ।
सावित्रीं व्याहरेद्वापि इति ।

उच्छिष्टस्य त्रिरात्रमाह स एव । "उच्छिष्टः सह संभाषेत्त्रिरा-त्रेणैव शुद्ध्यतीति ।

किं च ।

**चण्डालैः सह सुप्ते तु त्रिरात्रमुपवासयेत् ।**
**चण्डालैकपथं गत्वा गायत्रीस्मरणाच्छुचिः ॥ २३ ॥**

चण्डालैरिति बहुवचनं तत्समानधर्मणामन्येषामपि श्वपाकादीना प्राप्त्यर्थम् ।

आरूढपतितापत्यं ब्राह्मण्यां यश्च शूद्रजः ।
सगोत्रोढासुतश्चैव चण्डालास्त्रय एव ते ॥

इति त्रित्वाभिप्रायं वा, तैः सहैकशय्याया सुप्ते त्रिरात्रमुपवासये-दुपवसेत् णिचः स्वार्थिकत्वात् । चण्डाल एव एकः परिदृश्यमानः पथि यस्मिन्नसौ चण्डालैकपथस्तं गत्वा गायत्र्याः स्मरणादनभिव्यक्ताक्षरप्रतिसन्धानाच्छुचिर्भवेत् । अनेन सार्थसमुदायान्तर्गते चण्डाले न दोष इति ध्वनितम् ।

किं च ।

**चण्डालदर्शने सद्य आदित्यमवलोकयेत् ।**
**चण्डालस्पर्शने चैव सचैलं स्नानमाचरेत् ॥ २४ ॥**

चण्डालस्य दर्शने सद्यस्तत्कालमेवादित्यमवलोकयेत् । तदाह सुमन्तुः । चण्डालस्पर्शने सूर्यदर्शन भाषणे ब्राह्मणव्यवहारः सस्पर्शने सचैलस्नानमिति एतश्च दिवा रात्रौ चेज्ज्योतिर्दर्शनं "दर्शने ज्योतिषां दर्शनमि"त्यापस्तम्बस्मरणात् । चण्डाल इति चित्याद्युपलक्षम् । तथा चतुर्विंशति मते ।

चितिं च चितिकाष्ठं च श्वपाकं शवदाहकम् ।
स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेदिति" ॥

एषां स्पर्शने सचैलं स्नात्वा शुध्येत् । चकाराच्छवकाष्ठं च स्पृष्ट्वा ।

श्वपाकं पतितं द्रव्यमुन्मत्तं शवदाहकम् ।
सूतकं सूतिका नारीं रजसा च परिप्लुताम् ॥
श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः ।
सचैलं सशिराः स्नात्वा तदानीमेव शुद्ध्यति ॥

इति देवलस्मरणात् । अवस्थाविशेषेण स्पर्शे विशेषमाह शातातपः ।

येन केन चिदभ्यक्त चण्डालं संस्पृशेद्यदि ।
अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुद्ध्यति ॥
अशुचिः स्वयमप्येतानशुद्धांश्च यदि स्पृशेत् ।
विशुद्ध्यत्युपवासेन त्रिरात्रेण ततः शुचिः ॥
उच्छिष्टः संस्पृशेद्विप्रो मद्यं मूत्र शुनोऽशुचीन् ।
अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुद्ध्यति ॥
चण्डालश्वपचैः स्पृष्टो विण्मूत्र तु कृते द्विजः ।
त्रिरात्र तत्र कुर्वीत भुक्तोच्छिष्टस्तथैव च ।

किं च ।

**चण्डालखातवापीषु पीत्वा सलिलमग्रजः ।**
**अज्ञानादेकभक्तेन त्वहोरात्रेण शुद्ध्यति ॥ २५ ॥**

चण्डालेन खातासु खानितासु वापीषु बहुवचन कूपतडागादिग्रहणाय अग्रजो ब्राह्मणः सलिल पीत्वा पान स्नानाद्युपलक्षणम् । अज्ञानादेकभक्तेन ज्ञानादहोपवासेन शुध्यति । अतएवापस्तम्बः ।

अन्त्यजैः खनिताः कूपास्तडागा वाप्य एव च ।
तत्तोयं यः पिबेद्विप्रः कामतोऽकामतोऽपि वा ॥
अकामादेकभोजी स्यादहोरात्रेण कामतः ॥ इति ।

नक्तैकभक्तयोर्विकल्पः शक्ताशक्तायोर्ज्ञेयः । यत्तु तेनैवोक्तम् ।

प्रपास्वरण्ये कटके च सैरे द्रोण्या जलं केशविनिःसृतं वा ।
श्वपाकचण्डालपरिग्रहेषु पीत्वा जलं शुध्यति पञ्चगव्यात् ॥

तदप्येकभक्तेन समानं पराकविषयं वा अत्यन्तकृतत्तत्फलभोगे तु न दोषः ।

अन्त्यजानां तु ये वृक्षा बहुमूलफलोपगाः ।
उपभोग्याश्च ते सर्वे स्वल्पेषु च फलेषु च इत्यत्रिस्मरणात् ।

किं च ।

**चण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् ।**
**गोमूत्रयावकाहारस्त्रिरात्राच्छुद्धिमाप्नुयात् ॥ २६ ॥**

कूपस्थमेव जलं यदि चण्डालेनोद्धरणार्थे प्रक्षिप्तेन भाण्डेन संस्पृष्टं तदा तत्पीत्वा गोमूत्रपाचितयावकमात्रमाहारस्त्रिरात्रान्ते शुद्धिं प्राप्नोति ।

किं च ।

**चण्डालघटसंस्थं तु यत्तोयं पिबति द्विजः ।**
**तत्क्षणात्क्षिपते यस्तु प्राजापत्यं समाचरेत् ॥२७॥**
**यदि न क्षीयते तोयं शरीरे यस्य जीर्यति ।**
**प्राजापत्यं न कर्तव्यं कृच्छ्रं सान्तपनं चरेत् ॥ २८ ॥**

चण्डालस्य घटे सम्यक् चिरं कालं तिष्ठतीति चण्डालघटसंस्थं यत्तोयं तच्चेदज्ञानात्पूर्वं द्विजः पिबत्यनन्तरं ज्ञात्वा पश्चात्तापेन तत्कालमेव क्षीयते वमति तदा प्राजापत्यं कुर्यात् । यदि तु तृषातुरत्वेन तत्कालमज्ञानेन वा तत्तोयं न क्षीयते न वमति । किं तु शरीर एव जीर्यति परिणमते तदा पूर्वोक्तं प्राजापत्यमेव न कर्तव्यं किन्तु उक्तलक्षणं कृच्छ्रं सान्तपनं कुर्यात् । तथा चाङ्गिराः ।

चण्डालपरिगृहीतमज्ञानादुदकं पिबेत् ।
तस्य शुद्धिं विजानीयात्प्राजापत्येन नित्यशः ॥
यस्तु चण्डालसंस्पृष्टं पिबेत् किंचिदकामतः ।
स तु सान्तपनं कृच्छ्रं चरेच्छुद्ध्यर्थमात्मनः ॥ इति ।

बुद्धिपूर्वं तत्पाने प्रतिवर्णं प्रायश्चित्तभेदमाह ।

**चरेत्सान्तपनं विप्रः प्राजापत्यमनन्तरम् ।**
**तदर्द्धं तु चरेद्वैश्यः पादं शूद्रस्तथाचरेत् ॥ २९ ॥**

यदि चण्डालभाण्डस्थं जलं बुद्धिपूर्वं ब्राह्मणः पिबति तदा सान्तपनं चरेत् । अनन्तरः क्षत्रियो वैश्यः शूद्रश्च तत्रैव प्राजापत्यं तदर्द्धं तत्पादं च यथार्थं कुर्यात् । तदाहापस्तम्बः ।

चण्डालकूपभाण्डस्थं नरः कामाज्जलं पिबेत् ।
प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत् ॥
चरेत्सान्तपनं विप्रः प्राजापत्यं तु भूमिपः ।
तदर्द्धं तु चरेद्वैश्यः पादं शूद्रे विनिर्दिशेदिति ॥

इदानीं प्रसङ्गादन्त्यजजलादिपानेऽपि प्रायश्चित्तमाह ।

**भाण्डस्थमन्त्यजानां तु जलं दधि पयः पिबेत् ।**
**ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः ॥ ३० ॥**
**ब्रह्मकूर्चोपवासेन द्विजातीनां तु निष्कृतिः ।**
**शूद्रस्य चोपवासेन तथा दानेन शक्तितः ॥ ३१ ॥**

यदिप्रमादतोऽज्ञानाद्ब्राह्मणक्षत्रियवैश्यशूद्रा अन्त्यजाना रजकादीना

रजकश्चर्मकारश्च नटो वरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः ॥

इतिस्मरणात् ।

भाण्डस्थानि जलदधिपयांसि पिबन्ति तदा वक्ष्यमाणलक्षणब्रह्मकूर्चसहितेनोपवासेन द्विजाः शुध्यन्ति । शूद्रस्य तु

पञ्चगव्य पिबेच्छूद्रो ब्राह्मणश्च सुरा पिबेत् ।
उभौ तु तुल्यदोषौ हि सपाख्ये नगरे मतौ ॥

इत्यङ्गिरा ब्रह्मकूर्चपानाधिकाराभावबोधनात्तत्पाने यथा शक्तिदानेनोपवासेन च शुद्धिरिति । आमाचादिषु पात्रपर्यावर्त्तने न दोषः । तथा चतुर्विंशतिमते ।

आम मास घृतं क्षौद्र स्नेहाश्च फलसम्भवाः ।
अन्त्यभाण्डस्थिता ह्येते निष्क्रीताः शुचय. स्मृताः ॥ इति ।

इदानीमज्ञानाच्चण्डालान्नभोजने प्रायश्चित्तमाह ।

**भुङ्क्तेऽज्ञानाद्द्विजश्रेष्ठश्चण्डालान्नं कथंचन ।**
**गोमूत्रयावकाहारो दशरात्रेण शुध्यति ॥ ३२ ॥**

यो द्विजश्रेष्ठो ब्राह्मणो अज्ञानाच्चण्डालस्यान्न कथञ्चन आपदादिना भुङ्क्ते स दशरात्रं गोमूत्रपाचितयावक भुक्त्वा शुध्यति । ज्ञानपूर्वं त्वङ्गिरा आह ।

अन्त्यावसायिनामन्नमश्नीयाच्चैव कामतः ।
चतुश्चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वेति ॥

अन्त्यावसायिनश्चण्डालादयः । तदाह स एव ।
चण्डालः श्वपचः क्षत्ता सूतो वैदेहिकस्तथा ।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः ॥ इति ।

तत्र सिद्धान्नविषयमामान्ने तु त्रिरात्रमेव । तथा च विष्णुः । चण्डालान्नं भुक्त्वा त्रिरात्रमुपवसेत् सिद्धं भुक्त्वा पराक इति । पराकश्च मूलोक्तेन दशाहगोमूत्रयावकाहारेण समान एव । क्षत्रियादीनां तु हारीत आह ।

चण्डालान्नं प्रमादेन यदि भुञ्जीत वै द्विजः ।
ततश्चान्द्रायणं कुर्यान् मासमेकं व्रतं चरेत् ॥
शूद्रो वाप्यर्द्धमासं वै भुक्त्वा चैवाजितेन्द्रियः ।
त्रिरात्रमुपवासं च ब्राह्मणांस्तर्पयेच्छुचिरिति ॥

भोज्यद्रव्यपरिमाणमाह ।

**एकैकं ग्रासमश्नीयाद् गोमूत्रं यावकस्य च ।**
**दशाहनियमस्थस्य व्रतं तत्तु विनिर्दिशेत् ॥ ३३ ॥**

यद्गोमूत्रयावकस्याश्नीयात्तदेकैकं ग्रासमित्यशनानुवादेन ग्राससङ्ख्याविधानान्न पौनरुक्त्यम् । नच गोमूत्रयावकाशनस्य विशिष्टस्यानुवादे वाक्यभेद इति शङ्कनीयम् । मूमहे हविषोविशेषणं निर्विषेणामिति न्यायेन निर्विशेषणस्याशनस्योद्देश्यत्वासिद्धेः । यदुक्तं विनिर्दिशेत्तद्विनियमस्यस्येत्यपि गुणविधानमेवेति न पौनरुक्त्यम् । नियमस्वरूपमाह याज्ञवल्क्यः ।

स्नानमौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः ।
नियमा गुरुशुश्रूषा शौचाक्रोधाप्रमादता ॥ इति ।

इदानीं चण्डालेन सहैकस्मिन् गृहे संव्यवहर्तुर्नवभिः श्लोकैः । प्रायश्चित्तमाह ।

**अविज्ञातस्तु चण्डालो यत्र वेश्मनि तिष्ठति ।**
**विज्ञातरूपं सन्न्यस्य द्विजाः कुर्युरनुग्रहम् ॥ ३४ ॥**

विज्ञातरूपं चण्डालवेशाभरणादि संन्यस्य त्यक्त्वा वेशान्तरादिसंपादनेनाविज्ञातश्चण्डालत्वेनानिर्णीतो यत्र यदि वेश्मनि तिष्ठति तदा द्विजा ब्राह्मणाः पर्षत्त्वेनाभियोजिता अनुग्रहं वक्ष्यमाणप्रायश्चित्तोपदेशं कुर्युर्यद्वा त द्विजा स्त रूपचण्डालं विन्यस्य ग्रहाचिर्वास्य पर्षत् प्रायश्चित्तमुपदिशेत् । अनेन पर्षदुपसत्तिर्विहिता । सात्र यद्यपि सर्वदोषसाधारणीति नात्र विशेषतोऽभिधीया तथापि विज्ञातदोषे त्वत्रावश्यमेव कर्त्तव्यतया सा विधीयते । तेन रहस्येऽपि कृतपापे पर्षदुपदिष्टमेव प्रायश्चित्त कार्यं न रहस्यपापवत्स्वयमेव ज्ञात्वेति ।

पर्षत्स्वरूपमाह ।

**मुनिवक्त्रोद्गतान् धर्मान् गायन्तो वेदपारगाः ।**
**पतन्तमुद्धरेयुस्ते धर्मज्ञाः पापसङ्करात् ॥ ३५ ॥**

वेदाना वेदयोर्वेदस्य वा पार गच्छन्तीति वेदपारगाः यद्यप्यध्येतव्योऽप्येकदेशो यदि सर्वो न शक्यत इत्यनेन चैकदेशाध्ययनेन ब्राह्मण्यमक्षतं भवति तथापि वेदपारग एव पर्षत्त्वेन विवक्ष्यते धर्मज्ञा धर्मशास्त्रकुशला मुनीना पराशरादीना वक्त्रेभ्य उद्गतान् धर्मान् धर्मशास्त्राणि तत्तत्प्रायश्चित्तविधायकवाक्यानि गायन्तः पठन्तः अनेन प्रायश्चित्तोपदेशस्तत्र वाक्यमुच्चार्य्यैव कर्तव्यो न प्रतिवञ्चकवाक्यैरित्युक्तं भवति । उक्त च भट्टपादैः ।

> प्रतिवञ्चकरूपेण पूर्वशास्त्रार्थगोचरम् ।
> यदन्यत्क्रीयते तस्य धर्मप्रत्ययमानीता ॥ इति ।

पतितं चण्डालसम्पर्केण आत्यन्तिकससर्गेण पातित्योपन्यासः ।
चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्य च गच्छतीति मनुस्मरणात् ॥

पापाना सङ्करात्समूहादुच्यमानप्रायश्चित्तोपदेशेनोद्धरेयुः । यद्यपि चण्डालेन सह एकमेव पाप मेकप्रायश्चित्तनिमित्तत्वात् तथापि प्रतिपदोक्तप्रायश्चित्तनिमित्तानां दर्शनस्पर्शनादीनामपि सत्त्वात्सङ्कराभिधानम् । यद्वा पापसङ्करं पापसम्बन्धस्तस्मादिति व्याख्येयम् ।

पर्षदभिधेयं प्रायश्चित्तमाह ।

**दध्ना च सर्पिषा चैव क्षीरं गोमूत्रयावकम् ।**
**भुञ्जीत सह भृत्यैश्च त्रिसन्ध्यमवगाहनम् ॥ ३६ ॥**

क्षीरेण संयुक्तगोमूत्रयावकमिति समासान्तर्गतक्रियाप्रदर्शनेन दधिसर्पिषोरप्यत्र सम्पर्कादर्शनतस्तेन दध्ना सर्पिषा च संयुक्तमित्यर्थः सिद्धमिति तद्भृत्यैर्भरणीयैः पुत्रपत्न्यादिभिः संसर्गिभिः सह वक्ष्यमाणप्रकारेण गृहस्वामी भुञ्जीत त्रिसन्ध्यमवगाहनं च कुर्यात् ।

अन्त्यजैः सहेति सहयोगे तृतीयया भृत्यानामप्राधान्येन प्रधानकर्त्तुर्गृहस्याश्रमिण एव प्रायश्चित्तपूर्वोत्तराङ्गानुष्ठानं प्रधानं च सर्वेषामिति गम्यते ।

गोमूत्रयावकेन दध्यादीनां संयोगे समाहारप्राप्तौ विशेषमाह ।

**त्र्यहं भुञ्जीत दध्ना च त्र्यहं भुञ्जीत सर्पिषा ।**
**त्र्यहं क्षीरेण भुञ्जीत एकैकेन दिनत्रयम् ॥ ३७ ॥**

अत्र यद्यपि भुजिकर्म न श्रूयते नापि दध्यादि तृतीययावरोधात् तथापि सहायतृतीयान्तेन तत्संस्कारकेण दध्यादिना आक्षिप्तस्य स्वसंस्कार्यस्य गोमूत्रयावकस्य पूर्ववाक्यादनुवृत्तिर्ज्ञेया । ततश्च दध्ना संयुक्तं गोमूत्रयावकं दिनत्रयं भुञ्जीत । एवं घृतेन क्षीरेण चेति योज्यम् । तेन नवदिनानि भवन्ति पुनश्चैकेन दध्यादिना युक्तं गोमूत्रयावकमेकैकस्मिन् दिने भुञ्जीतेति त्रीणि दिनानि सम्पद्यन्ते तानि च पूर्वैर्नवभिर्मिलित्वा द्वादश भवन्ति तेन च द्वादशरात्रसाध्यं व्रतं सम्पद्यत इति ।

ननु कीदृशं यावकं कियता च दध्यादिना युक्तं भोज्यमित्यपेक्षायामाह ।

**भावदुष्टं न भुञ्जीत कृमिभिर्दूषितं तथा ।**
**दधिक्षीरस्य त्रिपलं पलमेकं घृतस्य तु ॥ ३८ ॥**

भावेन चित्तवृत्त्या दुष्टं यस्मिन्दृष्टे अमेध्यादिभावो बुद्धिविषयो भवतीत्यर्थस्तादृशं यच्च भवति यच्चान्योच्छिष्टं क्रिमिभिर्वा दूषितं ना

भवति तद्भुञ्जीत । दधि च क्षीरं चेति दधिक्षीरं तयोः प्रत्येकं पलत्रयं परिमाणं घृतस्य चैकं पलं यावकस्य च गोग्रासमात्रमिति ।

मनुष्यशुद्धिमुक्त्वा द्रव्यशुद्धिमाह ।

**भस्मना तु भवेच्छुद्धिरुभयोस्ताम्रकांस्ययोः ।**
**जलशौचेन वस्त्राणां परित्यागेन मृन्मयम् ॥ ३९ ॥**

ताम्रकांस्ययोर्भस्मावघर्षणेन शुद्धिः । वस्त्राणां जले प्रक्षालनेन शुद्धिर्मृन्मयं घटीत्यादि परित्यागेनैव । इयं च तृतीया प्रकृत्यादिभ्यो विवक्षिता ततश्च मृन्मयं परित्याज्यमित्यर्थो भवति । अन्यथा अन्वयासम्भवात् ।

गृहधान्यादीनां शुद्धिमाह ।

**कुसुम्भगुडकार्पासलवणन्तैलसर्पिषी ।**
**द्वारे कृत्वा तु धान्यानि दद्याद्वेश्मनि पावकम् ॥४०॥**

कुसुम्भं तैलसाधनं धान्यं धान्यानि यवव्रीह्यादीनि इतरत्सर्वं प्रसिद्धम् । एतानि कुसुम्भादीनि गृहद्वारे दाह्यत्वेन निक्षिप्य गृहेऽग्निं दद्यात् गृहदाहस्तृणगृहविषयः पाषाणादिगृहे तु तदसम्भवान्मार्जनलेपनाभ्यामेव, गृह मार्जनलेपनादिति योगिस्मरणात् । भूमेस्तु शुद्धिः स्वयमेव वक्ष्यति

शुद्धिसंपादनानन्तरं किङ्कर्तव्यमित्यत आह ।

**एवं शुद्धस्ततः पश्चात्कुर्याद्ब्राह्मणतर्पणम् ।**
**विंशतिं गा वृषं चैकं दद्याद्विप्रेषु दक्षिणाम् ॥ ४१ ॥**

एवमुक्तप्रकारेण शुद्धो भूत्वा अनन्तरमेकविंशतिब्राह्मणान् भोजयित्वा सन्निहितत्वात्तेभ्य एव विप्रेभ्यो वृषभैकविंशतिगा दक्षिणां दद्यात् । यद्यपि ब्राह्मणसंख्या न श्रुता तथाप्येका एकस्य दातव्या न सर्वैकस्येतिन्यायादनेन देयसंख्ययैव सम्प्रदानसंख्या नियमितेति न पृथगुपात्ता । यद्यपि च भोक्तृभ्य एव दक्षिणादानमित्याहत्य नोक्तं तथापि यथा दर्शपौर्णमासयोर्ब्राह्मणास्तर्पयितव्या इत्यनेन विहिते ब्राह्मणभोजने प्रकृत-

त्वादृत्विज एवोपतिष्ठन्ते तथा ऽत्रापि भोक्तार एव सम्प्रदानतयोपतिष्ठन्ते। अन्यथा प्रकृतहानाप्रकृतकल्पनेति दोषद्वयापत्तेरिति ।

भूमिशुद्धौ विशेषमाह ।

**पुनर्लेपनखातेन होमजप्येन शुध्यति ।**
**आधारेण च विप्राणां भूमिदोषो न विद्यते ॥ ४२॥**

लेपनखननयोर्दाहानन्तर्यबोधनाय पुनः शब्दः तेन दाहादयः पञ्चाप्युपलक्षिताः । तदाह देवलः ।

चण्डालाध्युषितं यत्र यत्र विष्ठादिसङ्कृतिः ।
एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्तिता ॥

पञ्चधा चतुर्धा च भूरमेध्या विशुध्यतीति पञ्चधेति दाहकालगोक्रमणसेकोल्लेखनैरित्यर्थः । तदनन्तरं तत्र जपहोमौ कृत्वा ब्राह्मणानुप्रवेश्य भूमेरुक्तो दोषो नास्तीति शुध्यति दोषाभावकीर्तनं च शुध्यतिशयज्ञापनाय । इदं च मूलोक्तं प्रायश्चित्तं द्वादशरात्रं चण्डालसहवासे द्रष्टव्यम् । द्वादशरात्रसाध्यप्रायश्चित्ताम्नानात् । अत एव पक्षसंसर्गे पक्षं माससंसर्गे च मासं गोमूत्रयावकाशनं वक्ष्यति मासाधिकसहवासे तु हारीतोक्तं द्रष्टव्यम् ।

चण्डालैः सह संवासे दीर्घकालमकामिकम् ।
विज्ञानान्मृन्मयं पात्रं सर्वं त्यजति तद्गृहात् ॥
बालकृच्छ्रं ततः कुर्यात्तप्तकृच्छ्रं तथैव च ।
ब्राह्मणांस्तर्पयेत्पश्चाद्ब्रह्मकूर्चेन शुध्यति ॥

अत्रैव विषये गोशतं सर्वस्वं वा दक्षिणामाह च्यवनः । चण्डालसङ्करे स्वभवने दहनं सर्वमृद्भाण्डभेदनं दारवाणां तु तक्षणं शङ्खशुक्तिसुवर्णरजतचैलानामद्भिः प्रक्षालनं कांस्यताम्रपात्राणामाकरे शुद्धिः क्षीरदध्योर्दधितक्राणाम्परित्यागो गोमूत्रयावकाहारो मासं चरेत् । बालवृद्धस्त्रीणामर्द्धं प्रायश्चित्तमाषोडशाद्बालाः सप्तत्यूर्द्ध्वं गता वृद्धाः चीर्णे प्रायश्चित्ते ब्राह्मणभोजनं गोशतं दद्यादभावे सर्वस्वमिति । बालकृच्छ्र

स्यहं भुञ्जीतेत्यादिना मूलोक्तः । आकरमुत्पत्तिस्थानं तेनोल्लेखनादि लक्ष्यते सौवीरं बदरं, चण्डालसम्पर्कवति गृहे भुक्तवतस्तद्गृहे च भुक्तवतोऽन्यस्यापि प्रायश्चित्तमाहापस्तम्बः ।

अविज्ञातस्तु चण्डालो यत्र वेश्मनि तिष्ठति ।
सविज्ञातस्तु कालेन तत्र कार्यं विशोधनम् ॥
प्राजापत्यं तु शूद्राणां तेषां तदनुसारतः ।
यैस्तत्र भुक्तं पक्वान्नं कृच्छ्रार्द्धं तेषु दापयेत् ॥
तेषामपि गृहे भुक्तो पादमेकं विधीयते ।
कूपैकपानैर्दुष्टस्तु स्पर्शसम्पर्कदूषितः ॥
सर्वो ह्येकोपवासेन पञ्चगव्येन शुध्यति ।
बालापत्या तथा नारी गर्भिणी या तु दूषिता ॥
तेषां नक्तं प्रदातव्यं प्रहरद्वयसञ्ज्ञितमिति ।

इदानीं चण्डालसम्पर्के कालविशेषेण प्रायश्चित्तमाह ।

**चण्डालैः सह संपर्कं मासं मासार्द्धमेव च ।**
**गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥ ४३ ॥**

चण्डालैरिति बहुवचनाच्छ्वपाकपुल्कसयोर्ग्रहणम् । एतैः सह यो मासं मासार्द्धं वा सम्पर्कं करोति स शेषं सर्वं च कारयेदित्यये उपसंहारादत्रापि पूर्वोक्तप्रकारेण दध्यादिसंयुक्तं गोमूत्रयावकमाहारीकृत्य मासार्द्धेन मासश्चार्द्धं च तयोः समाहारो मासार्द्धं तेन शुध्यति । माससम्पर्के मासव्रतेनार्द्धमाससम्पर्केऽर्द्धमासव्रतेन शुद्धिरित्यर्थः । तथा च संवर्त्तः ।

चण्डालैः सङ्करे विप्रः श्वपाकैः पुल्कसैरपि ।
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यतीति ॥

अत्र व्रताधिक्यवद्दक्षिणाधिक्यमपि कल्पनीयम् । तद्यथोक्तव्रते व्रतदिनसंख्यातो द्विगुणसंख्याष्टमांशन्यूना गावो भवन्ति तथा पक्षसम्पर्के त्रिपञ्चाशच्च गावो देया इति ।

इदानीं रजक्यादिसहवासे प्रायश्चित्तमाह ।

**रजकी कर्मकारी तु लुम्बकी वेणुजिविनी ।**
**चातुर्वर्ण्यस्य च गृहे त्वविज्ञाता तु तिष्ठति ॥ ४४ ॥**

ज्ञानात्तु निष्कृतिं कुर्यात्पूर्वोक्तस्यार्द्धमेव हि ।
गृहदाहं न कुर्वीत शेषं सर्वं च कारयेत् ॥ ४५ ॥

रजको वस्त्रादिरागकृत् सङ्कीर्णसङ्करस्तज्जातीया स्त्री रजकी एवं चर्मकारी लुब्धकी व्याधजातीया स्त्री वेणुजीविनी वंशपत्रादिनिर्माणकरजातीया आसामन्यतमाऽविज्ञातजातिस्वरूपा यदि ब्राह्मणाद्यन्यतमवर्णगृहे वसति तदा तज्ज्ञानानन्तरं पूर्वोक्तस्यैव प्रायश्चित्तस्यैव दध्ना च सर्पिषा चेत्याद्युक्तस्य द्वादशाहसाध्यस्यार्द्धं षड्रात्रसाध्यव्रतं कुर्वीत तत्र च दधिसर्पिःक्षीरैः प्रत्येकं युक्तं गोमूत्रयावकं त्र्यहं त्र्यहं भुञ्जीतेत्येवं षड्रात्रव्रतं कृत्वा गृहदाहातिरिक्तं शेषं सर्वं तथैवार्द्धं कृत्वा ब्राह्मणभोजनं वृषभैकादशगावो दक्षिणादानं कुर्यादिति ।

इदानीं चण्डालस्य सकृद्गृहप्रवेशे शुद्धिमाह ।

गृहस्याभ्यन्तरं गच्छेच्चण्डालो यदि कस्य चित् ।
तमागाराद्विनिःसार्य मृद्भाण्डं च परित्यजेत् ॥ ४६ ॥
रसपूर्णं तु मृद्भाण्डं न त्यजेत्तु कदाचन ।
गोमयैर्न तु संमिश्रैर्जलैः प्रोक्षेद् गृहं तथा ॥ ४७ ॥

यदि कस्य चिद्ब्राह्मणाद्यन्यतमस्य गृहमध्ये चण्डालो गच्छेत्तदा तं गृहान्निःसार्य मृद्भाण्डं त्यक्त्वा रसपूर्णान्यत्यक्त्वैव गोमयोदकेन सर्वं गृहं प्रोक्षेत्तथा तत्र गोश्च प्रवेशं कुर्यात् । तदाह हारीतः ।

गृहस्याभ्यन्तरे यस्य चण्डालो यदि गच्छति ।
पार्थिवानां परित्यागः सर्वेषां सद्य एव हि ॥
अनष्टरसभाण्डानां ग्रहणं मन्यते तथा ।
अजस्य गोः प्रवेशाद्धि शुध्यते नात्र संशयः ॥

इति । न नष्टो रसो येषां तान्यनष्टरसानि तानि च तानि भाण्डानीति

इदानीं कृम्युपहतदेहस्य शुद्धिमुपदिशन्नाह ।

ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे ।
कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत् ॥ ४८ ॥

**गवां मूत्रपुरीषेण दधिक्षीरेण सर्पिषा ।**
**त्र्यहं स्नात्वा च पीत्वा च कृमिदष्टः शुचिर्भवेत् ॥४६॥**

विप्रस्य व्रणे पूयशोणितपूरिते यदि कृमिरुत्पद्यते तत्र प्रायश्चित्तं कथं कुर्यादित्युपघोषः स्मृत्यन्तरोक्तप्रायश्चित्तविप्रतिपत्तिव्यवस्थापनार्थः । गोसम्बन्धिना मूत्रपुरीषेण मूत्रपुरीषयोः समाहारेण तथैव दधिक्षीरेण समाहारप्रदर्शनं पञ्चानामपि गव्यानां समाहारप्रदर्शनं च स्नाने गोमूत्रगोमययोरेव पाने च पञ्चानामपि प्राप्त्यर्थम् । ततश्च गोमूत्रगोमयाभ्यां त्रिसन्ध्यं त्रिरात्रं स्नात्वा पञ्चगव्यं च पीत्वा अधोनाभेः कृमिदष्टः शुद्धो भवति । तदाह मनुः

> ब्राह्मणस्य व्रणद्वारे पूयशोणितसम्भवे ।
> कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत् ॥
> गवां मूत्रपुरीषेण त्रिसंध्यं स्नानमाचरेत् ।
> त्रिरात्रं पञ्चगव्याशी शोधनात्तैर्विशुध्यति ॥ इति ।
> नाभेरूर्ध्वं तु कृम्युत्पादे स एवाह ।
> नाभिकण्ठान्तरोद्भूतव्रणे चोत्पद्यते कृमिः ॥
> षड्रात्रं तु तदा प्रोक्तं प्राजापत्यं शिरोव्रणे ॥ इति ।

क्षत्रियादीनां विशेषमाह ।

**क्षत्रियश्च सुवर्णस्य पञ्चमाषान्प्रदाय तु ।**
**गोदक्षिणां तु वैश्यस्याप्युपवासं विनिर्दिशेत् ॥५०॥**
**शूद्राणां नोपवासः स्याच्छूद्रो दानेन शुद्ध्यति ।**

कृमिदष्टः क्षत्रियः पञ्चमाषपरिमितं सुवर्णं दत्त्वा शुचिर्भवेत् वैश्यस्तूपवासान्ते गामेकां दत्त्वा शूद्रो नोपवासेन किं तु गोदानमात्रेण शुध्यतीति । एतेन क्षत्रियादीनां विप्रोक्तमेव प्रायश्चित्तं पादपादन्यूनं कल्पनीयमिति निरस्तम् ।

ननु क्रियमाणे प्रायश्चित्ते कर्मस्वाभाव्यादवश्यं भाविन्यूनातिरेकादोषे कथं कार्यमित्यत आह ।

**अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः ।**
**प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलं हि तत् ॥ ५१ ॥**

क्षितिदेवता ब्राह्मणा यदच्छिद्रमिति वाक्य वदन्ति तत् प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलं हि तत् प्रणम्य नम्रीभूय शिरसा ग्राह्यं यतोऽग्निष्टोमफलं साधयतीति छिद्रपूरकत्व प्रशंसेति । अत एवापस्तम्बः ।

पूर्णेऽपि कालनियमैर्न शुद्धिर्ब्राह्मणैर्विना ।
अपूर्णेष्वपि कालेषु पूरयन्ति द्विजोत्तमाः ॥ इति ।

न केवलं विप्रवचन प्रायश्चित्तस्यैव छिद्रपूरकमपि तु सर्वत्रापीत्याह ।

**जपच्छिद्रं तपच्छिद्रं यच्छिद्रं यज्ञकर्मणि ।**
**सर्वं भवतु निश्छिद्रं ब्राह्मणैरुपपादिते ॥ ५२ ॥**

जपतपोयज्ञादिकर्मणामच्छिद्रमस्त्विति द्विजैरुक्त एव सर्वं निःच्छिद्रं भवतीति यद्यप्यस्य सर्वप्रशेषत्वादन्तेऽभिधानमुचितं तथापि देहलीदीपन्यायेन मध्येऽभिहितमप्युभयोरुपकारि भवत्येवेति न दोषः ।

ननु निमित्तिनोऽनुष्ठानाशक्तौ कथं पापक्षय इत्यत आह ।

**व्याधिव्यसनिनिश्रान्ते दुर्भिक्षे डामरे तथा ।**
**उपवासो व्रतं होमो द्विजसंपादितानि वा ॥ ५३ ॥**

व्याधिना राजयक्ष्मादिना व्यसनी ग्रस्तः यद्वा व्यसन पित्रादिशुश्रूषणं श्रान्तो दूराध्वगमनादिना दुर्भिक्ष दैविकदोषोपलक्षणम् । डामरो राज्योपद्रवो राष्ट्रिकमात्रोपलक्षणम् ।

एतेषु उपवासव्रतहोमादीनि दक्षिणादानसंतोषितैर्द्विजैः संपादितान्यपि निमित्तिनः पापाक्षयं कुर्वन्तीति । अत एवापस्तम्बः ।

अशंस्यापि समर्थस्य विप्रो वा यदि वा गुरुः ।
तद्व्रत तस्य गृह्णीयात् ततो मुच्येत किल्बिषादिति ॥

अत्यन्तापदि पक्षान्तरमाह ।

**अथ वा ब्राह्मणाः स्तुष्टाः सर्वं कुर्वन्त्यनुग्रहम् ।**
**सर्वान्कामानवाप्नोति द्विजसंपादितैरिह ॥ ५४ ॥**

अथवा अत्यन्तापद्गतस्तस्य पूर्वसेवादिना तुष्टा ब्राह्मणाः ब्रह्मनिष्ठाः पर्षत्त्वेन नियुक्ता अस्यामापदि एतस्मात्पापादस्मद्वचनेन एतं मुक्तमिति सर्वथैवानुगृह्णीयुस्तावतैव वास्य शुद्धिर्भवति यतो द्विजैर्महापुरुषैः संपादितैराशीर्विशेषैः सर्वान् पशुपुत्रादिकामानपि प्राप्नोति किं तत्र पापक्षयमिति द्विजवचनप्रशंसेति । तथाचाथर्वणे श्रूयते य यं लोकं मनसा सम्भवति विशुद्धमनस्कः कामयते याश्च कामान् । तं तं लोकं जनयेत्तांश्च कामांस्तस्मादात्मावज्ञां न कारयेद् भूतिकाम इति । सर्वमनुग्रहमिति च तदा पक्षान्तरं तत्र सूचितम् । तदाह हारीतः ।

पादत्रयमथाप्यर्द्धं पादं वापि विधानतः ।
ज्ञात्वा बलाबलात्कार्यं प्रायश्चित्त प्रकल्पयेदिति ॥

एषां चतुर्णामपि पक्षाणां देशकालवयोवस्थानुबन्धाद्यनुसारेण व्यवस्था कार्या । यथाह याज्ञवल्क्यः ।

देशं कालं वयः शक्तिं पापं चावेक्ष्य यत्नतः ।
प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिरिति ॥

अन्वयव्यतिरेकाभ्यामनुग्रहविषयमाह ।

**दुर्बलेऽनुग्रहः कार्यस्तथा वै बालवृद्धयोः ।**
**ततोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रहः स्मृतः ॥ ५५ ॥**

धनविद्याभिजनबलैर्हीनो दुर्बलस्तस्मिन् तथाशब्देन स्त्रीषु बालवृद्धयोराषोडशाद्बालः सप्तत्यूर्ध्वं गतो वृद्ध इति च्यवनोक्तलक्षणयोर्यथासम्भवमनुग्रहः । अन्यथोक्तातिरेकेणानुग्रहे क्रियमाणे दोषो भवेत्तस्मादनुग्रहो नेष्यते पूर्वैरिति । अनुग्राहकस्वरूपमाहाङ्गिराः ।

कृत्वा पूर्वमुदाहारं यथोक्तं धर्मकर्तृभिः ।
पश्चात्कार्यानुसारेण शक्त्या कुर्युरनुग्रहम् ॥
प्रायश्चित्त यथोदिष्टमशक्यं दुर्बलादिभिः ।
इष्यते ऽनुग्रहस्तेषां लोकसंग्राहकारणात् ॥
एको नार्हति तत्कर्तुमनूचानोऽप्यनुग्रहम् ।
धर्मज्ञा बहवो विप्राः कर्तुमर्हन्त्यनुग्रहमिति ॥

उक्तातिरेकेणानुग्रहे प्रत्यवायं विवक्षयति ।

स्नेहाद्वा यदि वा लोभाद्भयादज्ञानतोऽपि वा ।
कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति ॥ ५६ ॥

स्नेहात्पुत्रमित्रादौ लोभाद्धनिकेषु अज्ञानतः पण्डितंमन्यतया यस्मिन्कस्मिंश्चिद्दुर्बलादिव्यतिरिक्तेऽपि येऽनुग्रहं कुर्वन्ति तेषु तत्प्रकृतपापं सक्तं भवतीति । ननु परपापस्य परस्मिन् संक्रमो नोपपद्यते अमूर्तत्वात्सत्यम् । शास्त्रवैयर्थ्यान्यथानुपपत्त्या तत्सजातीयपापान्तरोत्पत्त्या तत्सक्तमितिव्यवहारादिति ।

यथा समर्थानुग्रहे प्रत्यवायस्तथा दुर्बलाननुग्रहेऽपीत्याह ।

शरीरस्यात्यये प्राप्ते वदन्ति नियमं तु ये ।
महाकार्योपरोधे च न स्वस्थस्य कदाचन ॥

शरीरस्यात्यये विनाशावस्थायां वयसा रोगादिना वा प्राप्तायां सत्यामपि महाकार्ये वृद्धमातापित्रादिशुश्रूषा तदुपरोधस्तद्विनाशस्तस्मिश्च सति ये यथोपदिष्टमेव नियमं प्रायश्चित्तं तदङ्गभूतं स्नानमौनोपवासादिकं वानुग्रहव्यतिरेकेणैव वदन्त्युपदिशन्ति न पुनः स्वस्थस्य तथा किन्तु सानुग्रहमेव तस्य वदन्ति तेष्वपि तत्पापं गच्छतीति पूर्ववाक्यादनुषज्यते ।

उक्तप्रतिनिधेर्व्यतिरेकमाह ।

स्वस्थस्य मूढाः कुर्वन्ति वदन्ति नियमं च ये ।
तेनास्य विघ्नकर्तारः पतन्ति नरकेऽशुचौ ॥ ५८ ॥

ये मूढाः प्रतिनिधिनियामकं शास्त्ररहस्यमजानन्तः स्वस्थस्यापि विहितं नियमं प्रायश्चित्तं कुर्वन्ति स्वयमनुतिष्ठन्ति ये च स्वस्थस्यापि प्रतिनिधिं वदन्ति ते सर्वेऽपि तस्य निमित्ततः पापनिवृत्तौ विघ्नं कुर्वन्त्यशुचौ रौरवादिनरके पतन्ति च ।

इदानीं विप्रवाक्यव्यतिरेकेण स्वयमेव व्रतानुष्ठाने प्रत्यवायमाह ।

स्वयमेव व्रतं कृत्वा ब्राह्मणं यो ऽवमन्यते ।
वृथा तस्योपवासः स्यान्न च पुण्येन युज्यते ॥ ५६ ॥

यः पण्डितं मन्यतया ब्राह्मणमवमत्य स्वयमेव रहस्येऽपि पापे व्रतमाचरति तस्योपवासादिनियमो वृथा भवेन्न च पुण्यं प्राप्नोति । अत एव शातातपः ।

यदि नो धर्मशास्त्रेण प्रायश्चित्तं विधीयते ।
न तेन शुद्धिमाप्नोति प्रायश्चित्ते कृतेऽपि स इति ॥

कीदृशं तर्हि व्रतं कार्यमित्यत आह ।

स एव नियमो ग्राह्यो यमेकोऽपि वदेद्द्विजः ।
कुर्याद्वाक्यं द्विजानां वै त्वन्यथा भ्रूणहा भवेत् ॥ ६० ॥

प्रायश्चित्तोपदेशे पर्षदेषा दशावरेत्यादिवक्ष्यमाणतया बहूनां विप्राणां प्रायश्चित्तविधायकत्वे च मुख्यः कल्पः बहुविप्राभावे कथं चिदेकस्यापि तद्विधायकत्वमित्यनुकल्पः सर्वथापि विप्रानुज्ञातमन्तरेण स्वयमेव शास्त्रपर्यालोचनया रहस्यपापेऽपि प्रायश्चित्तं कुर्वन् भ्रूणहा भवतीति ।

विप्रवाक्यस्य शोधकत्वे हेतुमाह ।

ब्राह्मणा जङ्गमं तीर्थं तीर्थभूता हि साधवः ।
तेषां वाक्योदकेनैव शुध्यन्ति मलिना जनाः ॥ ६१ ॥

विशिष्टमातापितृजन्या ब्राह्मणा जङ्गममभीष्टदेशे यानायानाभ्यामभीष्टसंपादकतया स्थावरं प्रयागादिविलक्षणतीर्थं शोधकं न केवलं ब्राह्मणा एव किं तु साधवोऽन्येऽपि क्षत्रियादयस्तीर्थभूता एव यतस्तेषां ब्राह्मणसाधूनां च वाक्यमेवोदकं तेनैव मलिना पापिष्ठाः शुध्यन्ति ।

ननु ब्राह्मणस्य तीर्थत्वेऽपि मनुष्यत्वाविशेषात्कथं वचनसिद्धिरित्यत आह ।

ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः ॥
सर्वदेवमया विप्रा न तद्वचनमन्यथा ॥ ६२ ॥

वेदविदो ब्राह्मणा यान्यवाच्यान्यपि पशुपुत्रादीनि शुभानि शोक-भयादीन्यशुभानि वा यस्मै भावन्त आशासते तानि देवतास्तथैवानुमन्यन्ते तेषां वचनवशवर्तिदेवतात्वेन सर्वदेवमयानां विप्राणां वचनमन्यथा विसंवादि न भवतीति प्रायो वादोऽनृतधादिनो वाग्गितिवत् ।

तथा च श्रूयते "यावतीर्वै देवतास्तास्सर्वा वेदविदि ब्राह्मणे वसन्तीति"। स्मृत्यन्तरेऽप्यङ्गिरसा ब्राह्मणा देवताः सर्वाः स च सर्वस्य दैवतमिति ।

ननु प्रतिनिधिनाऽनुष्ठापयितुर्न्यूनफलतायां तद्विधानमनादरणीय स्यादित्यत आह ।

उपवासो व्रतं चैव स्नानं तीर्थं जपस्तपः ।
विप्रैः संपादितं यस्य संपूर्णं तस्य तत्फलम् ॥ ६३ ॥

द्रव्यदानादिना सन्तोषितैर्विप्रैर्यस्यासमर्थस्य यजमानस्य कर्तव्यमुपवासादिकं सम्पाद्यते तस्य तेषामुपवासादीनां फलं संपूर्णमेव भवति नान्यनिर्व्यादितत्वेन न्यूनमिति ।

अत एवाह जैमिनिः । तस्मिन्त्व फलदर्शनादित्यनेन प्रतिनिधातुरेव फलं न प्रतिनिधेरिति ।

इदानीं कृम्युपहतदेहशुद्धिप्रसङ्गेन केशादिदूषितान्नशुद्धिमाह ।

अन्नाद्यकीटसंयुक्ते मक्षिकाकेशदूषिते ।
तदन्तरा स्पृशेच्चापस्तदन्नं भस्मना स्पृशेत् ॥ ६४ ॥

अन्नमोदन आद्यं यस्येत्यन्नाद्य तस्मिन्नोदनादौ अन्नयोग्यमाद्यमन्नं च तदाद्यं चान्नाद्यं पक्वमन्नं न त्वामं तस्मिन् वा किटैः पिपीलिकादिभिः संयुक्ते मक्षिकाकेशाभ्यां वा दूषिते तस्यान्नस्यान्तरा मध्ये आपः स्पृशेदिति । कीटसंयोगेन गोघ्रातादिकमुपलक्ष्यते ।

अत एव बृहस्पतिः ।

गोघ्राते ऽन्नहुते वाचे मक्षिकाकेशदूषिते ।
मृद्भस्मसलिलं चैव प्रक्षेप्तव्यं विशुद्धये ॥

मृदः पृथगुपादानं स्वतन्त्राया अपि शोधकत्वज्ञापनार्थम् । अत एव मनुः

पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम् ।
दूषितं केशकीटैश्च मृत्प्रक्षेपेण विशुध्यतीति ॥

अवधूत वस्त्रावधूननरेणुस्पृष्टम् । अवक्षुत मुखोत्पन्नबिन्दुस्पृष्टम् । भस्मसलिलयोः समस्तत्वेन मिलितयोरेव शोधकत्वम् । यत्तु सलिलं भस्ममृद्वापीति विकल्पाभिधानं तदन्यतरस्यापि शोधकत्वज्ञापनार्थमिति।

भोजनकालीनाचशुद्धिप्रसङ्गेन बुद्धिस्थान् भोजनधर्मानाह ।

**भुञ्जानश्चैव यो विप्रः पादं हस्तेन संस्पृशेत् ।**
**स्वमुच्छिष्टमसौ भुङ्क्ते यो भुङ्क्ते भुक्तभाजने ॥ ६५॥**
**पादुकास्थो न भुञ्जीत न पर्यङ्कस्थितोऽपि च ।**
**श्वचण्डालोदक्यदृष्टश्च भोजनं परिवर्जयेत् ॥ ६६ ॥**

भोजनकाले यो विप्रो वामहस्तेन पादं स्पृशति वामहस्तेन भोजनपात्रमनवलम्ब्य वा भुङ्क्ते स स्वोच्छिष्टभोजनप्रत्यवाय लभते । अनेन स्वोच्छिष्टभोजनप्रायश्चित्तमेवात्रापि भवतीति वक्तुं प्रथमाध्यायोक्तस्यास्य पुनरुपन्यास इति न पौनरुक्त्य पादुकापर्यङ्कस्थितौ श्वचाण्डालोदक्यदर्शने च भोजनमेव त्यजेत्तु स्वोच्छिष्टभोजनप्रायश्चित्तं कुर्यादिति । प्रायश्चित्तं चोक्तं चातुर्विंशतिमते ।

स्वमुच्छिष्टं तु यो भुङ्क्ते यो भुङ्क्ते भुक्तभाजने ।
एव वैवस्वते प्राह भुक्त्वा चान्द्रायणं चरेदिति ॥

इदं च प्रायश्चित्त भोजनमध्ये पात्रत्यागविषयं पात्रमनालभ्यैव भोजने तु न प्रायश्चित्तं तस्य वैकल्पिकत्वात् । यथाहापस्तम्बः ।

यावद्ग्रासं चयवस्कन्दयन्नापजिहीतायाजीहीताय वा क्लृप्त ग्रासङ्ग्यसीतेति पक्षद्वयेऽपि भोजनपात्रमितिशेषः ।

इदानीमन्नशुद्धिमेव प्राधान्येन वक्तुं प्रतिजानीते ।

**यदन्नं प्रतिषिद्धं स्यादन्नशुद्धिस्तथैव च ।**
**यथा पराशरेणोक्तं यथैवाहं वदामि वः ॥ ६७ ॥**

यदन्नमुपहत्य भोजने प्रतिषिद्धं तस्योपहतौ या चान्नशुद्धिरुक्ता पूर्वस्मिन् कलिधर्मप्रवचने पराशरेण तथैवाहमस्मिन्नपि कलियुगे भो व्यासादयो महर्षयो वो युष्मभ्यं वदामि पुनः पराशरपरामर्शः संम्प्रदायविच्छेदसूचनार्थेति ।

सिद्धान्नशुद्धिं दर्शयति ।

शृतं द्रोणाढकस्यान्नं काकश्वानोपघातितम् ।
केनेदं शुध्यते चापि ब्राह्मणेभ्यो निवेदयेत् ॥ ६८ ॥

वक्ष्यमाणलक्षणद्रोणाढकाभ्यां परिमितं शृतं पक्कमन्नं च काकाद्युपहतमिदं केन प्रकारेण शुध्येदिति ब्राह्मणेऽसौ निवेदयेत्पृच्छेत । निवेदनवचनेन स्वयमेव ज्ञात्वा कृतापि शुद्धिर्न निष्पद्यत इत्युक्तं भवति । ब्राह्मणवक्तव्यं प्रतिवचनमाह ।

काकश्वाद्यवलीढं तु द्रोणान्नं न परित्यजेत् ।

श्वकाकाद्यवलीढमन्नं द्रोणाढकपरिमितं नेत्परित्यजेदिति विप्राणां ब्रह्मघोषेण भोज्यं भवति तल्लक्षणादित्यनागतेन सम्बन्धाद्विप्रैः प्रतिवचनं देयमिति सिध्यति

इदानीं द्रोणाढकयोः परिमाणमाह ।

वेदवेदाङ्गविद्विप्रैर्धर्मशास्त्रानुपालकैः ॥ ६९ ॥
प्रस्थद्वात्रिंशतिर्द्रोणः स्मृतो द्विप्रस्थ आढकः ।
ततो द्रोणाढकस्यान्नं श्रुतिस्मृतिविदो विदुः ॥ ७० ॥

पञ्चकृष्णलको माषः तैश्चतुः षष्टिभिः पलम् ।
पलैर्द्वात्रिंशद्भिः प्रस्थो मार्गोधनुप्रकीर्तितः ॥

इति । शतपथब्राह्मणप्रतिपादितलक्षणैर्द्वात्रिंशद्भिः प्रस्थैर्द्रोणो द्वाभ्यां प्रस्थाभ्यामाढक इति ।

वेदवेदाङ्गधर्मशास्त्रकुशलैर्विप्रैः स्मृतं वेदविस्त्वादिविशेषणं च तत्तद्देशीयप्रातिस्विकव्यवहारनिर्वाहकत्वाविच्छिन्नपरिमाणस्यैव व्यवहारप्रयोजकतामाह । तस्माच्छास्त्रीयादेव परिभाषाद् द्रोणाढकयोरन्नपरित्या-

ज्यत्वेन विवचितमिति श्रुतिस्मृतिविदो विदुः । श्रुतिस्मृतिकुशला मन्यन्ते ॥

तर्हि तन्न्यूनपरिमाणे कथमित्यत आह ।

काकश्वावलीढं तु गवाघ्रातं खरेण वा ।
स्वल्पमन्नं त्यजेद्विप्रः शुद्धिर्द्रोणाढके भवेत् ॥७१॥

श्वकाकगोखरैरवलीढं द्रोणाढकन्यूनपरिमाणं द्रव्यं परित्यजेद् द्रोणाढकपरिमाणे तु वक्ष्यमाणप्रकारेण शोधयेत् धनिकाधनिकविषयत्वेन वा द्रोणाढकयोर्व्यवस्था कार्या ॥

इदानीं विवक्षितां शुद्धिमाह ।

अन्नस्योद्धृत्य तन्मात्रं यच्च लालाहतं भवेत् ।
सुवर्णोदकमभ्युक्ष्य हुताशेनैव तापयेत् ॥ ७२ ॥
हुताशनेन संस्पृष्टं सुवर्णसलिलेन च ।
विप्राणां वेदघोषेण भोज्यं भवति तत्क्षणात् ॥७३॥

उक्तपरिमाणान्नस्य यावदुपहतं यावच्च श्वादिलालास्पृष्टं तावदपनीयावशिष्टं सुवर्णसंयुक्तेनोदकेनाभ्युक्ष्याग्निना परिताप्यानन्तरं विप्राणां शुद्धमिदमुपहतं न परित्याज्यमिति पूर्वोक्तघोषेण ब्राह्मणः पवमानः सुवचन इत्यनुवाकस्य घोषेण च तत्कालमेव भोज्यं भवतीत्याह बौधायनः । सिद्धहविषां महतांश्च वायसप्रभृत्युपहतानां तदन्नं पिण्डमात्रमुद्धृत्य पवमानः सुवर्चन इत्यनेनाभ्युक्षणमिति ।

अन्नशुद्धिमुक्त्वा रसशुद्धिमप्याह ।

स्नेहो वा गोरसो वापि अन्नशुद्धिः कथं भवेत् ।
अल्पं परित्यजेदन्नं स्नेहस्योत्पवनेन च ॥ ७४ ॥
अनलज्वालया शुद्धिर्गोरसस्य विधीयते ॥ ७५ ॥

स्नेहो घृततैलादिर्गोरसः क्षीरादिस्तयोः श्वकाकाद्यवलीढयोः न पूर्वोक्तैरेव शुद्धिस्तस्या अल्पविषयत्वादिति प्रकारान्तरम् । किं तु द्रोणाढकपरिमाणादल्पत्वे त्यागोऽधिकत्वे च स्नेहस्योत्पवनेन गोरसस्याग्निज्वालया पाकेन शुद्धिरिति ।

तदाह शङ्खः ।

प्लावनं घृततैलानां पाचनं गोरसस्य च ।

भाण्डानि प्लावयेदद्भिः शाकं मूलं फलानि चेति ॥

एतेनोत्पवनतापेन विलीनस्नेहादिविषये घनीभूतयोस्तु तन्मात्रोद्धरणम् । तदाह शातातपः ।

तापनं घृततैलानां मधुनो गोरसस्य च ।

तन्मात्रमुद्धृतं शुध्येत्कठिनं तु पयोदधि ॥

अवलीन तथा सर्पिर्विलीनं पवनेन त्विति ।

धूलीभिर्धूसराङ्गो व्रजभुवि सततं रिङ्गणोद्धृष्टजानुः

किं चित् पांश्वाकुलाक्षः करतलनवनीतानुलिप्ताखिलास्यः ॥

शक्तश्चेद्याहि वालेत्यभिहितवचसोलूखले वत्सदाम्ना

बद्धो मात्रापि रिङ्गन् स्मितललितमुखः पातु दामोदरो वः ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु—

श्रीरामपण्डितसुतेन विनायकेन ।

शास्त्रे पराशरकृते विवृतोऽत्र षष्ठो

ऽध्यायो मलाक्तविशुद्धिविनिर्णयाय ॥ २ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां षष्ठोऽध्यायः ॥

श्रीगणेशाय नमः ॥

दध्ना बध्नाति कस्याप्यभिलपनमयं कस्यचिद् धेनुदुग्धं
पाय पायं सखायं कमपि खलु बलात् तक्रवक्त्रं वितन्वन् ।
लीलाकीलालसेकैर्वदनकदनकृद्गोपकन्यासु, कुर्वन्
वार्त्तसार्त्तिं विहन्या न्निजभवनगतो वासुदेवः सदा नः ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
द्रव्येषु शुद्धिमभिधातुमिहाखिलेषु
व्याख्यायते बहुविधामपि सप्तमोऽयम् ॥ २ ॥

षष्ठाध्यायान्तेऽन्नरसशुद्धिप्रतिपादनेन बुद्धिस्थामवशिष्टद्रव्यशुद्धिं विवक्षुः सप्तमाध्यायमारभते ।

तत्राध्यायार्थं वक्तुं प्रतिजानीते ।

**अथातो द्रव्यशुद्धिस्तु पराशरवचो यथा ।**
**दारवाणां तु पात्राणां तक्षणाच्छुद्धिरिष्यते ॥ १ ॥**

अथान्नरसशुद्धिप्रतिपादनानन्तरमवशिष्टद्रव्यशुद्धिरवश्य वर्णनीया । अतोऽसौ यथा पूर्वपराशरवचनमभिधीयते तत्र दारुमयाना पात्राणां लौकिकानां च स्रुवादीनामुच्छिष्टवासिताना तक्षणात्तावन्मात्रावयवापाकरणाच्छुद्धिरिष्यते पूर्वैः । तदाह बौधायनः, दारुमयानां पात्राणामुच्छिष्टसमन्वारब्धानामवलेखनं लेपोपहतानां तक्षणमिति । अल्पोपघाते तु मृज्जलाभ्यां गन्धलेपावपनेयौ ।

यावन्नापैत्यमेध्याक्तो गन्धो लेपश्च तत्कृतः ।
तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु ॥

इति सामान्यशुद्धिविधानात् ।

स्नेहाक्तपात्रशुद्धिमाह याज्ञवल्क्यः
चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन वारिणेति ।

यज्ञकाले शुद्धिविशेषमाह मनुः ।
मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि ।
चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु ॥
स्फ्यशूर्पशकटानां च मुसलोलूखलस्य च ।
अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ॥

इति मनुस्मरणात् ।

धातुपात्रशुद्धिमाह ।

**भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति ।**
**रजसा शुध्यते नारी विकलं या न गच्छति ॥ १ ॥**

प्रतिदिन भुक्तोच्छिष्टानुलिप्तं कांस्य भस्मना शुध्यति ताम्रमम्लेन शुध्यति नारीरीतिका रीतिकापित्तलं नरनारीतिधन्वन्तरिस्मरणात् । सा रजसा भूपरागेण शुध्यति । तत्रोच्छिष्टादिलेपनापनोदकानां भस्मादीनां दृष्टार्थं सार्थकता अनियमेन प्राप्तौ नियमार्थं शास्त्रमवघातादिवत् । अन्यथा

मलसंयोगजं तज्ज यस्य येनोपहन्यते ।
तस्य तच्छोधन प्रोक्त सामान्यद्रव्यशुद्धिकृत् ॥

इतिसामान्यशास्त्रेणैव दृष्टार्थानुवचनादशेषमपि द्रव्यशुद्धिप्रकरणमनर्थक स्यात्, अतः सामान्यशास्त्रं चोक्तादितिरिक्तविषयम् ।

यत्तु ।

ताम्रायःकांस्यरैत्यानां त्रपुणः सीसकस्य च ।
शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः ॥

इति मानवे यथार्हपदं तदपि यथोक्तद्रव्यपरमिति न विरोधः । उक्तशुद्धेर्विषयमाह । कलाभ्यो विगतो विकलः ।

महोपघाते तु बौधायन आह तैजसानां मूत्रपुरीषासृङ्मद्यैरत्यन्तोपहतानामावर्त्तन अल्पसंसर्गे तु परिलेखन स्पर्शमात्रोपघाते तु त्रिःसप्तकृत्वो भस्मना परिमार्जनमतैजसानामेवं भूतानामुत्सर्ग इति । भस्मे

त्यस्त्ररजसोरुपलक्षणं तेनोपघातमहत्त्वे ताम्रादिषु तयोरप्यावृत्तिः कार्या । यत्तु नारी स्त्री मनसा व्यभिचाररता रजोदर्शनेनैव शुध्यति "रजसा स्त्रीमनोदुष्टेति मानवात् । या च विकल प्रतिलोमज न गच्छति सापि वक्ष्यमाणप्रायश्चित्तेन शुध्यति तद्गमने तु त्याग एव ।

> चतस्रस्तु परित्याज्याः गुरुगा शिष्यगा च या ।
> पतिघ्नी च विशेषेण जुङ्गितोपगता च या ॥

इतिवसिष्ठस्मरणात् । जुङ्गितः प्रतिलोमजः । ननु यजतिषु ये यजामहं करोति नानुयाजेष्विति, अत्रानुयाजपर्युदासवद्विकलगामिनी-पर्युदासेन नार्या रजसा शुध्यभिधानादिदमेकमेव वाक्यमस्तु, निमित्तान्तर-परत्वे वाक्यभेदादिति चेन्नैवम् । प्रसक्त्यभावेन पर्युदासायोगात् । तथाहि यजतित्वेनानुयाजेष्वपि प्राप्ते ये यजामहेऽनुयाजव्यतिरिक्तेषु यजतिष्विति पर्युदासः सम्भवति न तथा प्रकृते रजसा नारी शुद्धा । नच मानसव्यभि-चारविषयिण्याः कायिकव्यभिचाररूपे विकलविषयेऽपि मानसव्यभिचा-रसत्त्वाद् रजसा शुद्धिः प्राप्नोतीति तदभावबोधनाय पर्युदास इति वाच्यम् । तत्र प्रायश्चित्तविशेषास्मरणाद् व्यभिचारे गमनपदाप्रयो-गाच्च । न च मनसा भर्तुरतिचारे त्रिरात्र यावक क्षीरोदन च भुञ्जानाधः शयीत ऊर्ध्वं त्रिरात्रादप्सु निमग्नायाः सावित्र्यष्टशतेन शिरोभिर्जुहुयात् पूता भवतीति विज्ञायत इति वासिष्ठ मनसा नीचगमनविषयमेवान्यत्र रजसैव शुद्धिरिति वाच्यम् । निवृत्तरजस्कादीनां मानसव्यभिचारे शुध्य-भावप्रसङ्गेन वासिष्ठस्य तद्विषयत्वावश्यम्भावादिति । तच्च द्रव्यशुद्धिप्र-स्तावे स्त्रीशुध्यभिधानस्यासङ्गतत्वात् ।

कलौ मानसपापानुत्पत्त्या तत्प्रायश्चित्ताभिधानस्य सुतरामसङ्ग-तत्वाच्च । तस्माद्यथोक्तमेव साधीयः । अथवा परपुरुषसमर्गे तु रजोद-र्शनेनैव शुध्यति प्रायश्चित्ताधिकारिणी भवति तदनन्तरमेव प्रायश्च-त्ताम्नानात् । तथा च चतुर्विंशतिमते ।

> रजसा शुध्यते नारी परपुंसाभिगामिनी ।
> तथापि मुनिना प्रोक्तं प्रायश्चित्त समाचरेदिति ॥

नद्युपहतौ शुद्धिमाह ।

**नदी वेगेन शुध्येत लेपो यदि न दृश्यते ।**

शवाद्यमेध्योपहता नदी वेगेन जलप्रवाहेण शुध्यति यद्यमेध्यलेपो न परिदृश्यते परिदृश्यमाने तु तस्मिन्तावन्मात्रं तीर्थं परित्यजेत् तदाह देवलः ।

अक्षोभ्याणि तटाकानि नदीवापीसरांसि च ।
कश्मलाशुचियुक्तानि तीर्थं तत्परिवर्जयेदिति ॥

नदीलक्षणं च स्मृत्यन्तरेऽभिहितम् ।

धनुःसहस्राण्यष्टौ तु गतिर्येषां न विद्यते ।
नैते नदीशब्दवहा गर्तास्ते परिकीर्तिताः ॥
आद्वादशतोऽल्पनदा उपनदो भवत्याचतुर्विंशात् ।
तदुत्तरं महानद्यः फलमेकद्वित्रिकक्रमिह इति ॥

अक्षोभ्यानीति विशेषणादल्पतटाकादीनां सर्वथा परित्याग एव । तदाह देवलः ।

अक्षुद्राणामपां नास्ति प्रभूतानां च दूषणम् ।
स्तोकानामुद्धृतानां च कश्मलं दूषणं भवेदिति ॥

वाप्याद्युपहतौ शुद्धिमाह ।

**वापीकूपतडागेषु दूषितेषु कथञ्चन ॥**
**उद्धृत्य वै कुम्भशतं पञ्चगव्येन शुध्यति ॥ ३ ॥**

वापीकूपतडागेषु कथंचनोपानद्रक्तादिदूषितेषु कथञ्चन उद्धृत्य वै कुम्भशतं पञ्चगव्येन कथं स कुम्भानां शतं परिमाणमस्य तत्कुम्भशतं जलमुद्धृत्यावशिष्टं पञ्चगव्येन शुध्यति । तदाहतुः संवर्त्तापस्तम्बौ ।

वापीकूपतडागानां दूषितानां च शुद्धये ।
अपां घटशतोद्धारः पञ्चगव्येन शोधनम् ॥
उपानद्रक्तविण्मूत्रस्त्रीरजोमद्यदूषिते ।
जलाशये च कूपे च कुम्भानां शतमुद्धरेदिति ॥

शवतरणाद्युपहतौ हारीतोक्ता शुद्धिः कार्या ।

वापीकूपतडागेषु मानुषः शीर्यते यदि ॥
अस्थिचर्मविनिर्मुक्तैर्दूषितैश्च खरादिभिः ।
उद्धृत्य तज्जलं सर्वं शोधनं परिमार्जनम् ॥

विष्णुः ।

वन्हिप्रज्वालनं कृत्वा कूपे पक्वेष्टकाचिते ।
पञ्चगव्यं न्यसेत्तत्र तत्तोय च ततोद्धरेदिति ॥

बहु जले तु न दोषः । तदाह विष्णुः ।

जलाशयेषु स्वल्पेषु स्थावरेषु महीतले ।
कूपवत्कथिता शुद्धिर्महत्सु च न दूषणमिति ॥

अनुपहतमिति । अनुपहतमपि गोतृप्तिकरमेव जलं शुचि नाल्पम् । तदाह मनुः ।

आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत् ।
अव्याप्ता चेदमेध्येन गन्धवर्णरसान्विताः ॥ इति ।

नवोदके तु दशाहाच्छुद्धिमाह यमः ।

अजा गावो महिष्यश्च नार्यश्चैव प्रसूतिकाः ।
दशरात्रेण शुध्यन्ति भूमिष्ठं च नवोदकमिति ॥

तदुभयमपि न साम्प्रतं "गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया नवोदके दशाहे चेति" कलिवर्ज्यस्मरणात् ।

इदानीं स्त्रीषु शुद्धिमाह ।

**अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ॥**
**दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥ ४ ॥**

अष्टवर्षादिकालीनदानविधेः फलसाधनतया गौर्यादिनामव्यपदेशः ।

अत एव मरीचिः ।

गौरीं ददन्नाकपृष्ठं वैकुण्ठं रोहिणीं ददत् ।
कन्या ददद्ब्रह्मलोकं रौरवं तु रजस्वलामिति ॥

अत एकादशादशाद्दूर्ध्वं द्वादशे वर्षे इति व्याख्येयम् । दशवर्षाद्दूर्ध्वं विवाहस्मरणात् । तथा चाश्वलायनः ।

ऊर्ध्वं दशाब्दाद्या कन्या प्रायजोदर्शनात्तु सा ।
गान्धारी स्यात्समुद्वाह्या चिरञ्जीवितुमिच्छति ॥
अत एव द्वादशवार्षिक्या वृषलीत्वमाह संवर्त्तः ।
अष्टवर्षा भवेद्गौरी नवमे नग्निका भवेत् ।
दशमे कन्यका प्रोक्ता द्वादशे वृषली मता ॥ इति ।

यत्तु त्रिंशद्वर्षोद्वहेत्कन्या हृद्या द्वादशवार्षिकीमिति मानवं तद्रजोदर्शनाभावे तस्या अपि विवाह्यत्वप्रतिपादनार्थं प्रायजोदर्शनादिति स्मरणात् । अत एव गौतमः । कन्याप्रदान प्रागृतोरिति । रजस्वला रजसः सम्भावितत्वादिति । अत एव गौतमः । प्रयच्छेन्नग्निका कन्यामृतुकालभयादिहेति । अनेनाष्टवर्षादीना गौर्यादिनामनिर्देष्टाना शुद्धिर्द्वादशवार्षिक्या वृषलीरजस्वलादिनामनिर्देशादशुद्धिरभिहिता भवति । तामेवाशुद्धि दर्शयितुमदातुर्निन्दामाह ।

**प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति ॥**
**मासि मासि रजस्तस्याः पिबन्ति पितरोऽनिशम् ॥५॥**

यो द्वादशवार्षिकीमपि कन्यामागताय सगुणाय निर्गुणाय वा वराय न ददाति तस्या मासिमासि सम्भूत रजो ऽदातु· पितरो निरन्तरं पिबन्ति । अत एव बौधायनः ।

दद्याद्गुणवते कन्या नग्निका ब्रह्मचारिणे ।
अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥ इति ।

यत्तु ।

काममामरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि ॥
नचैवैना प्रयच्छेत्तु गुणहीनाय कर्हिचित् ।
इति मानम् ।
तत्सगुणावश्यकताबोधनाय न निर्गुणनिषेधायेति च ध्येयम् ।

किञ्च ।

**माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च ॥**
**त्रयस्ते नरकं यान्ति दृत्वा कन्यां रजस्वलाम् ॥ ६ ।**

मात्रादिपरिगणेन यो यदा कन्यादानाधिकारी तदा तस्य प्रत्यवाय इत्युच्यते तत्त्रयाणामेवेति । अत एव याज्ञवल्क्यः ।

पिता पितामहो भ्राता सकुल्यो जननी तथा ।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥
अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ ।
गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरमिति ॥
अदातारं निन्दित्वा वोढारमपि निन्दति ।

**यस्तां समुद्वहेत्कन्यां ब्राह्मणो मदमोहितः ॥**
**असंभाष्योऽपांक्तेयश्च स विप्रो वृषलीपतिः ॥ ७ ॥**

यो ब्राह्मणो मदेन कामातिशयेनाक्रान्तचित्तस्तां रजस्वलां कन्यां समुद्वहति स वृषल्या रजस्वलाकन्यायाः पतिरिति हेतोरसम्भाष्योऽपाङ्क्तेयश्च भवति

पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ।
सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः ॥

इति मनुस्मरणात् ।

कथंचिदतिक्रान्तनिषेधस्य वोढुस्सकृदपि तद्गमने प्रायश्चित्तमाह

**यः करोत्येकरात्रेण वृषलीसेवनं द्विजः ॥**
**स भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्विशुध्यति ॥ ८ ॥**

उक्तलक्षणया वृषल्या एकरात्रमपि गमने वर्षत्रयं यावद्भैक्ष्यं भुक्त्वा गायत्रीं नित्यं जपन् शुध्यति । यद्यपि जपे मन्त्रविशेषो न श्रुतस्तथापि

यत्र यत्र च सङ्कीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमैर्गायत्र्या वाचनं तथा ॥

इति याज्ञवल्क्यपरिभाषयात्रापि सैव ग्राह्येति ।

रात्रौ चण्डालादिस्पर्शे शुद्धिमुपपादयिष्यन्नाह ।

**अस्तङ्गते यदा सूर्ये चाण्डालपतितं स्त्रियम् ॥**
**सूतिकां स्पृशतश्चैव कथं शुद्धिर्विधीयते ॥ ९ ॥**

**जातवेदःसुवर्णं च सोममार्गं विलोक्य च ॥**
**ब्राह्मणानुमतश्चैव स्नानं कृत्वा विशुध्यति ॥ १० ॥**

सूर्यास्तानन्तरं चण्डालपतितसूतिकाश्चकाराद्रजस्वलां च यः स्पृशति स जातवेदाश्च सुवर्णं च जातवेदःसुवर्णं सोममार्गं च विलोक्य ब्राह्मणानुमतस्सचैल स्नात्वा शुध्यति। अत्रायं क्रमः शुक्लपक्षे सति सम्भवे सोम तदभावेऽग्निं तस्याप्यभावे सुवर्णं तस्याप्यभावे सोममार्गं विलोकयेदिति। कृष्णपक्षे यदा सोमो न दृश्यते तदा सोममार्गं विलोकयेदिति।

कृष्णपक्षे यदा सोमो न दृश्येत कदाचन।
या दिशं व्रजते सोमस्ता दिश चावलोकयेत् ॥

इतिवचनेन सोमाभाव एव प्रत्याम्नायाम्नानात्।

रजस्वलयोर्ब्राह्मण्योरन्योन्यस्पर्शे शुद्धिमाह।

**स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मण्या ब्राह्मणी तथा ॥**
**तावत्तिष्ठेन्निराहारा त्रिरात्रेणैव शुध्यति ॥ ११ ॥**

रजस्वलयोर्ब्राह्मण्योरन्योन्यस्यस्पर्शे सति यावत्स्नानमुपवासश्चति त्रिरात्रोपवासश्च प्रथमदिनस्पर्शे, तृतीयदिनस्पर्शे तु काश्यपोक्तम्।

रजस्वला तु संस्पृष्टा ब्राह्मण्या यदि कामतः।
एकरात्रं निराहारा पञ्चगव्येन शुध्यति ॥

इतिद्रष्टव्यम्। सगोत्रयोश्च सद्यः स्नानमेव तथा च वृद्धवसिष्ठः।

स्पृष्टे रजस्वलेऽन्योन्यं सगोत्रे चैकभर्तृके।
कामादकामतो वापि सद्यः स्नानेन शुध्यति ॥

इति।

ब्राह्मणीक्षत्रिययोः शुद्धिमाह।

**स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रिया तथा।**
**अर्द्धकृच्छ्रं चरेत्पूर्वा पादमेकं त्वनन्तरा ॥ १२ ॥**

रजस्वलयोर्ब्राह्मणीक्षत्रिययोरन्योन्यस्पर्शे ब्राह्मण्याः कृच्छ्रार्द्धं क्षत्रियायाः पादकृच्छ्रं यावत्स्नानमुपवासो वर्तत एव स्नानानन्तरं चेद प्रायश्चित्तं कार्यं शुद्धेरङ्गत्वात्।

ब्राह्मणीवैश्ययोः शुद्धिमाह ।

**स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी वैश्यया तथा ।**
**पादहीनं चरेत्पूर्वा पादमेकमनन्तरा ॥ १३ ॥**

रजस्वलयोर्ब्राह्मणीवैश्ययोरन्योन्यस्पर्शे ब्राह्मण्याः पादहीनं कृच्छ्रं प्रायश्चित्तं वैश्यायाः पादकृच्छ्रं प्रायश्चित्तम् ।

ब्राह्मणीशूद्रयोः शुद्धिमाह ।

**स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रया तथा ।**
**कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेन शुध्यति ॥ १४ ॥**

रजस्वलयोर्ब्राह्मणीशूद्रयोरन्योन्यस्पर्शे प्रायश्चित्तमिदम् । क्षत्रियादिषु तूक्तेयम् । तदाह वसिष्ठः ।

स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया शूद्रयापि च ।
उपवासैः स्त्रिभिः पूर्वा त्वहोरात्रेण चोत्तरा ॥
स्पृष्ट्वा रजस्वलान्योन्यं वैश्या शूद्रा तथैव च ।
त्रिरात्राच्छुध्यते पूर्वा उत्तरा तु दिनत्रयात् ॥

एतच्च सर्वं कामतः स्पर्शे विधिरेष सनातन इति वृद्धवसिष्ठस्मरणात् । अकामतस्तु विष्णूक्तम् । रजस्वला हीनवर्णां रजस्वला स्पृष्ट्वा सद्यः स्नात्वा शुध्यतीति । कामतः चण्डालादिस्पर्शे वृद्धवसिष्ठ आह

चण्डालान्त्यश्वपाकेन संस्पृष्टा चेद्रजस्वला ।
तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत् ॥
प्रथमेऽह्नि त्रिरात्रं स्यात् द्वितीये द्व्यहमेव तु ।
अहोरात्रं तृतीयेऽह्नि परतो नक्तमाचरेत् ॥
व्यतिक्रम्योपोष्य । अकामतो बौधायन आह ।
रजस्वला तु संस्पृष्टा चण्डालान्त्यश्ववायसैः ॥
तावत्तिष्ठेन्निराहारा यावत्कालेन शुध्यतीति ।
भोजनकाले स्पर्शे तु स एवाह ।
रजस्वला तु भुञ्जाना चान्त्यजादीनुपस्पृशेत् ।
गोमूत्रयावकाहारा गोमूत्रेण विशुध्यति ॥
अशक्तौ काञ्चनं दद्याद्विप्रेभ्योऽपि हि भोजनमिति ।

उच्छिष्टस्पर्श त्वाहाऽत्रिः ।

उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित् स्त्रीरजस्वला ।

कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानैरुपोषितैः ॥

क्षत्रियावैश्ययोः पादादूकृच्छ्रौ वेदितव्यौ । तत्रैव चण्डालादि दर्शनेऽपि उक्तम् ।

रजस्वला तु भुञ्जाना चण्डालं यदि पश्यति ।

उपवासं ततः कृत्वा प्राजापत्यं तु कामतः ॥

उदक्या यदि वा भुक्तौ दृष्टान्या तु रजस्वलाम् ।

आघ्रातकाम नाश्नीयाद्ब्रह्मकूर्चं ततः पिबेदिति ॥

शवादिस्पर्शपूर्वकभोजने चात्रिशातातपौ ।

आर्तवाभिप्लुता नारी स्पृशेच्चेच्छवसूतकम् ।

ऊर्द्ध्वं त्रिरात्रात्स्नाता ता त्रिरात्रमुपवासयेत् ॥

आर्तवाभिप्लुता नारी मृतसूतकयोः स्पृशेत् ।

भुक्त्वा पीत्वा चरेत्कृच्छ्रं स्पृष्टा तु त्र्यहमेव त्विति ॥

बन्धुमरणग्रहणादिनिमित्ते स्नाने तु प्रकारविशेषमाह व्यासः

स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ।

पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेत् ॥

सिक्तगात्रा भवेदद्भिः साङ्गोपाङ्गा कथं चन ।

न वस्त्रपीडनं कुर्यान्नान्यद्वस्त्रं च धारयेदिति ॥

इदानीं रजोनिमित्ता शुद्धिमाह ।

**स्नाता रजस्वला या तु चतुर्थेऽहनि शुध्यति ।**

**कुर्याद्रजोनिवृत्तौ तु देवपित्रादिकर्म च ॥ १९ ॥**

रजस्वला स्त्री रजोदर्शनदिनादारभ्य त्रिरात्रमशुचिः चतुर्थेऽहनि प्रभाते षष्ठिवारं मृत्तिकाभिः शौचं कृत्वा दन्तधावनपूर्वकं प्रातःस्ना यथाविधि । सगवे वा मृदादिभिश्च शौचं कृत्वा रजस्वलाशुध्यति रजसो निवृत्तौ च दैवपित्र्यपाकादिकर्मसु युज्यते। अनेन यावद्रजोनिवृत्ति दैवादिकर्मयोग्यत्वं नास्तीत्युक्तं भवति । रजोऽनिवृत्तौ तु पंचमदिन एव शुध्यति तदाहापस्तम्बः ।

शुद्धा भर्तुश्चतुर्थेऽन्हि स्नाता नारी रजस्वला ।
दैवकर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यतीति ॥

आरब्धदीर्घव्रता तु रजस्वलापि तदनुतिष्ठदेव । तदाह जातूकर्ण्यः ।

आरब्धदीर्घतपसा नारीणां यद्रजो भवेत् ।
न तत्रासां व्रतस्य स्यादुपरोधः कथचन ।
स्वभाव एव नारीणां ज्ञेयो मूत्रपुरीषवत् ।
अतोऽर्थाच्च प्रदुष्येयू रजसा तपसि स्थिता ॥

रजसो विशेषेणाशुद्धेरपवादमाह ।

**रोगेण यद्रजःस्त्रीणामन्वहं तु प्रवर्तते ॥**
**नाशुचिः सा ततस्तेन तत्स्याद्वैकालिकं मलम् ।१६।**

रोगेण धातुवैषम्येन यद्रजोऽन्वहं निरतर प्रवर्त । तुशब्दाद्रागेण-द्रव्येण च कादाचित्कमपि तेन रजसा सा स्त्री ततो हेतोर्नाशुचिर्भवति यतस्तद्वैकालिकं विकाले विरुद्धकाले भव मलमेव निरयस्तदेवाशुद्धिहेतुरिति । तदाह बृहस्पतिः ।

रागज रोगजं चैव द्रव्यजं कालज तथा ।
यद्रागरोगद्रव्योत्थ तद्रक्त प्राह भार्गवः ।
कालजं तु रजःसन्न तस्मात् तेनैव साऽशुचिः ।
आर्वाक् प्रसूतेरत्यन्त मेध्यो वृष्यांगनासु यत् ।
तद्रागजमिति प्रोक्त प्रज्ञाद्भिदसम्भवम् ।
पित्तादिदोषवैशम्यात्सकृत्तत्सप्रवर्तते ।
रोगज तत् समुद्दिष्टमथद्रव्यजमुच्यते ।
भक्ष्यद्रव्यस्य वैषम्याद्धातुवैषम्यसभवम् ।
द्रव्यज रज इत्युक्त तत्कादाचित्कसभवम् ।
आरभ्य चार्तवदिनादेकविशतिवासरात् ।
मासाद्वृऽथ रजो यस्या स्तत्कालजमुदाहृतम् ।
रजस्वला यदा स्नाता पुनरेव रजस्वला ।
अष्टादशदिनादर्वागशुचित्वं न विद्यते ।
एकोनविशतेरर्वागेकाह स्यात्ततो द्व्यहम् ॥

विंशत्प्रभृत्युत्तरेषु त्रिरात्रमशुचित्वापवादो गतयौवनायाः ।
ऋतुस्नाता तु याप्रौढा पुनरेव रजस्वला ।
स्नानात्सप्तदशाहे तु शौचेनैव शुचिर्भवेत् ।
अष्टादशाहे त्वेकाहं द्व्यहमेकोनविंशतौ ।
विंशत्प्रभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेद् ॥

इति कश्यपस्मरणात् ।

अप्रौढा गतयौवना । वक्ष्यति चैतन्मूलकारोऽपि द्वादशे अष्टादशदिनादर्वागिति । युवत्यास्तु विशेषमाह कश्यप एव ।

त्रयोदशदिनादूर्ध्वं रजो दृष्टवती यदा ।
अष्टादशाहात्प्रागवापि युवत्या स्यात् त्रिरात्रकम् ।
एकादशाहे त्वेकाह द्विरात्र द्वादशेऽहनि ।
ऊर्ध्वं त्रिरात्र विज्ञेयमिति कुण्डलिनोदितमिति ।

एतेन गर्भिण्या अपि प्राक् प्रसवाद्रजोदर्शने कालरजोवद्दिनत्रयमेवाशौचमिति निरस्तम् । बृहस्पतिवचनविरोधात् । मूलोक्तहेतुविरोधाच्च द्रव्यजे विशेषमाहाङ्गिराः ।

आद्वादशाह नारीणा मूत्रवच्छौचमिष्यते ।
अष्टादशाहात्स्नान स्यात्त्रिरात्र परतोऽशुचिः ।
एतत्तु द्रव्यजे विद्याद्रोगजे पूर्वमीरितमिति ।
रोगजेऽपि विशेषमाह ऋष्यशृङ्गः ।
रोगजे वर्तमानेऽपि काले निर्यातकालजम् ।
तस्मात्काले प्रमत्ता स्यादन्यथा सकरो भवेदिति ।
सूतिकाया विशेषमाह प्रजापतिः ।
प्रसूतिका तु या नारी स्नानतो विंशतेः परम् ।
आर्तवा रजसा प्रोक्ता प्राक्तु नैमित्तिक रजः ।
ननु नैमित्तिके न स्यात् रजसा स्त्रीरजस्वला ।
रजस्युपरते तस्यां स्नानेनैव शुचिर्भवेत् ।
अन्यत्र गर्भविश्लेषात्पतनाद्वा रजस्वला ।
गर्भस्रावेऽपि सा स्नानाद्विंशतः परतोऽशुचिः ।

गर्भस्य पतने चैव स्नानं स्यात्क्षालयेदधः ।
रजसो ज्ञानाज्ञानसंदेहेषु निर्णयमाह स एव
अविज्ञाते मले सा चेन्मलवद्वसना यदि ।
कृते गेहेषु जुष्टं स्याच्छुद्धिस्तस्या स्त्रिरात्रतः ॥
निःसन्दिग्धे परिज्ञाते आर्तवे शुद्धिकारणम् ।
सन्देहमात्रे स्नानं स्यादित्युवाच प्रजापतिरिति ।
रजःकालनिर्णयमाह कात्यायनः ।
रात्रौ तृतीयभागात्प्राग् यदि नारी रजस्वला ।
पूर्वेण स्नानतः शुध्येदूर्ध्वं चेदुत्तरेण त्विति ॥
भागद्वये पूर्वदिनं तृतीयभागे परदिनमित्यर्थः ।
उक्तस्याशौचापवादस्य विषयविशेषं परिशेषयितुमाह ।

**साध्वाचारा न तावत्स्याद्रजो यावत्प्रवर्तते ।**
**रजोनिवृत्तौ गम्यास्याद्गृहकर्मणि चैव हि ॥ १७ ॥**

रागरोगद्रव्यैर्निमित्तैर्यावद्रजोऽनुवर्तते तावत् स्त्री साध्वाचारा साधु दैवापि आदिराचारो यस्याः सा साध्वाचारा दैवपित्र्यादिकर्मयोग्या न भवति । ततोऽधस्तादपि राजसि निवृत्त एव पुरुषगमनार्हा भवति गृहकर्मणि नित्यपाकादौ च योग्या भवति एतेन दैवपित्र्यपुरुषोपभोगगृहपाकादिव्यतिरिक्तेषु कार्येषु शुद्धिरिति पूर्ववाक्यस्य विषयो दर्शित इति ।

यदुक्तं चतुर्थेऽहनि शुध्यतीति तत्राद्ये दिनत्रये शुध्यभावमाह ।

**प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी ॥**
**तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ॥ १८ ॥**

रजस्वला त्रिरात्रमशुचिरित्येतावतैवार्थसिद्धौ चण्डालादिनामभिर्व्यवहारस्तत्तद्दिनेषु रजस्वलासंपर्के चण्डालादिसंपर्कोक्तशुद्धिप्राप्त्यर्थः । तथा कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीत्यग्निहोत्रनामनिर्देशो नित्याग्निहोत्रधर्मातिदेशार्थ इति सा च शुद्धिः पूर्वाध्याये रजकी चर्मकारी चेत्यादिनोपवर्णिता । यत्तु चण्डालादिगमनप्रत्यवायप्राप्त्यर्थस्तन्नामनिर्देश इति । तन्न प्रायश्चित्तवैलक्षण्यात् तथाहि त्रिरात्रान्ते घृतं प्राश्य गत्वो-

दद्या विशुध्यतीत्यादिगमनप्रायश्चित्तं तु चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छतीत्यादिविलक्षणमेव तस्माद्यथोक्तमेव साधीय इति । रजस्वला चतुर्थेऽह्नि स्नाता शुध्यतीत्युक्तम् । तत्र ज्वराद्यभिभूतायाः स्नानाशक्तौ कथमित्यत आह ।

**आतुरे स्नान उत्पन्ने दशकृत्वोह्यनातुरः ।**
**स्नात्वा स्नात्वा स्पृशेदेनं ततः शुध्येत्स आतुरः ॥१६॥**

रजस्वलासान्निध्यादभिहिता अप्यस्या शुद्धिः सर्वसाधारण्यबोधनायातुरशब्देनोपादानं तस्मिन् रजस्वलासूतिकादीनां नियतनैमित्तिके स्नाने प्राप्ते ऽन्योऽनातुरो दशवारं द्वादशवारं स्नात्वा स्नात्वा स्पृशेत्प्रतिस्नानं वातुरस्य वासो विपरिवर्तयेत्ततो यथा शक्ति दानं दत्वा स आतुरः शुध्यतीति । तदाहोशनाः ।

**ज्वराभिभूता या नारी रजसा च परिप्लुता ।**
**कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा ॥**

चतुर्थेऽहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियम् ।
सा सचेलावगाह्यापः स्नात्वा चैव पुनः स्पृशेत् ।
दशद्वादशकृत्वो वा आचमेच्च पुनः पुनः ।
अन्ते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा ।
दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यति ।
अत्रिरपि ।
आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः ।
स्पृष्ट्वास्पृष्ट्वा वगाहेत स विशुध्येत आतुरः ।
वासोभिर्दशभिश्चैव परिधाय यथा क्रमम् ।
दद्यात्तु शक्तितो दानं पुण्याहेन विशुध्यतीति ।
रजस्वलायाः सहगमनविधिस्तु स्मृत्यन्तरेऽभिहितः ।
यदा म्रियामुदक्यापातः प्राणान् परित्यजेत् ।
द्रोणमेकं तंडुलानामवहन्याद्विशुध्यये ।
मुसलाभिघातैस्तदसृक् स्रवते योनिमण्डलात् ।
विरजस्कामन्यमाना स्वे चित्ते तदसृक्क्षयम् ।

दृष्ट्वा शौचं प्रकुर्वीत पचमृत्तिकया पृथक् ।
त्रिशद्धिशद्धशपञ्चगवा दत्वा त्वह : क्रमात् ।
विप्राणां वचन लब्धासमारोहेद्धुताशनम् ।
नारीणां सरजस्कानामिय शुद्धिरुद्राहृतेति ।
रजस्वलादाहेऽपि विशेषस्तत्रैव ।
पञ्चभि स्नापयित्वा तु गव्यैः प्रेतां रजस्वलाम् ।
वस्त्रान्तरवृता कृत्वा दाहयेद्विधिपूर्वकम् ॥ इति ।
तत्र प्रायश्चितमुक्तम् धर्मप्रदीपे ।
कारयेयुः स्त्रियः स्नानमुदक्यासु तथैव च
तस्याः पापविशुध्यर्थं कृच्छ्रान् पञ्चदशाचरेदिति ।
सूतिकादाहेऽविशेषमाह प्रजापतिः ।
उदक्या सूतिका वापि मृता स्याद्यदि सा तदा ।
अशौचेत्वनतिक्रान्ते दाहयेदन्तरा यदि ।
उद्धृतेन तु तां येन स्नापयित्वा तु मन्त्रतः
आपोहिष्ठेतितिसृभिः हिरण्यवर्णाचतसृभिः ।
पवमानानुवाकेन यदतीति च सप्तभिः ।
ततोयज्ञपवित्रेण मार्जयेदथ च द्विजः ।

स्नापयित्वान्यवासेनाच्छाद्य शवधर्मतः ।
दाहादिक ततः कुर्यात्प्रजापतिवचो यथेति ॥
अत्र प्रतित्र्यहं प्रायश्चित्तमाह व्यासः ।
सूतिका तु यदा साध्वी विस्नातामरणं गता ॥
त्रिवर्षपूर्तिपर्यन्तं शुध्येत्कृच्छ्रेण सर्वदा ।
सूतिका तु यदा नारी रजसैव परिप्लुता ॥
म्रियते वै तदा सा तु द्विवर्षं कृच्छ्रमाचरेत् ।
सूतिका तु यदा साध्वी विस्नाता मरणं गता ॥
अब्दकृच्छ्रेण शुध्येत व्यासस्य वचनं यथेति ।
अशक्तौ पक्षान्तरमाह स एव
त्रिपक्षावदिनादर्वागेकाब्देन विशुध्यतीति ।
दशाहानन्तरं मासाभ्यन्तरे तु विशेषमाह ।
सूतिका तु यदा नारी प्राणांश्चैव परित्यजेत् ।

मासमेकोऽवधिर्यावत्त्रिभिः कृच्छ्रैर्विशुध्यतीति ॥

अत्र सा तु द्विवर्षकृच्छ्रमाचरेदिति सूतिकायाः कर्त्तव्यताश्रवणेऽपि विप्रतिषेधात्तस्याः पापविशुध्यर्थं कृच्छ्रान्यचदशाचरेदिति लिङ्गाच्च क्रियाकर्तुरेव प्रायश्चित्तकर्तृत्वं ज्ञेयम् ।

उच्छिष्टस्य द्विजस्योष्टादिस्पर्शे शुद्धिमाह ।

**उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण यः पुनः ॥**
**उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥ २० ॥**

उच्छिष्टश्चासावुच्छिष्टसस्पृष्टश्च स्वयमुच्छिष्ट एवान्योच्छिष्टेन सस्पृष्ट इति यावत् समस्तमप्युच्छिष्टपद बुध्या विच्छिद्य शूद्रादिपदेन सबन्धनीय तेनोच्छिष्टो द्विजोऽन्येनोच्छिष्टेन द्विजेन शुना शूद्रेण वा सस्पृष्टश्चेदेकाहमुपोष्य परेऽहनि पञ्चगव्येन शुध्यतीति ।

यत्तु रजनीपदमहिम्ना रात्रिभोजनमात्रस्यैव परित्याग इति । तन्न उपवासपदस्य भोजनद्वयपरित्यागे रूढत्वेन रात्रिपदस्योहोरात्रपरत्वावश्यम्भावात् । उपवासाशक्तस्य दशवार गायत्रीजपमाहात्रिः ।

उच्छिष्टोच्छिष्टसस्पृष्टो ब्राह्मणो ब्राह्मणेन वा ।
दशरूप जपेत्पश्चाद्गायत्र्याः शोधनं भवेदिति ॥
अनेकश्वस्पर्शे विशेषमाह सवर्तः ।
कृतमूत्रपुरीषो वा भुक्तोच्छिष्टो ऽथ वा द्विजः
श्वभिः स्पर्शे जपेद्देव्याः सहस्र स्नानपूर्वकमिति ॥

उच्छिष्टानुच्छिष्टयोर्द्विजयोरुच्छिष्टानुच्छिष्टशूद्रस्पर्शे शुद्धिमाह ।

**अनुच्छिष्टेन शूद्रेण स्पर्शे स्नानं विधीयते ॥**
**तेनोच्छिष्टेन संस्पृष्टः प्राजापत्यं समाचरेत् ॥२१॥**

अनुच्छिष्टस्य द्विजस्यानुच्छिष्टशूद्रस्पर्शे स्नानमुच्छिष्टशूद्रस्पर्शे स्नानमुच्छिष्टस्योच्छिष्टशूद्रस्पर्शे प्राजापत्यं विहितम् । यद्यपि द्विजविशेषणमुच्छिष्टत्वादि न श्रूयते तथाप्युच्छिष्टशूद्रस्पर्शे पंचगव्योपवासविधानात्स्नानमनुच्छिष्टविषयं कृच्छ्रं चोच्छिष्टविषयं पर्यवस्यति ।

यदुक्तं भस्मना शुध्यते कांस्यमिति तत्र विशेषमाह ।

**भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते ॥**
**सुरापात्रेण संस्पृष्टं शुध्यतेऽग्न्युपलेपनैः ॥ २२ ॥**

यत्कांस्यं सुरामूत्रपुरीषैर्नोपहन्यते तस्योक्ता भस्मनैव शुद्धिर्भवति । सुरायामत्रिसादृश्यं तत्सुराया यस्य तत्सुरा मात्रं मूत्रपुरीषादि । अज्ञानात्तु सुरां प्राश्यरेतो विण्मूत्रमेव चेति साम्याभिधानात् ।

तेन सुरामूत्रपुरीषेणोपहतं तदग्नितापनोपलेपनावघर्षणतक्षणैः शुध्यतीति । तथाच स्मृत्यन्तरम् ।

भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते ।
सुरामूत्रपुरीषैस्तु शुध्यतेऽग्न्युपलेखनैः ॥
आमिषेण सुधाल्लिप्तं पुनर्दाहेन शुध्यतीति ।

किञ्च ।

**गवा घ्रातानि कांस्यानि श्वकाकोपहतानि च ॥**
**शुध्यन्ति दशभिः क्षारैः शूद्रोच्छिष्टानि यानि च ॥२३॥**

गोश्वकाकशूद्रैर्घ्रातानि श्वकाकोपहतानि च भुक्तोच्छिष्टानि कांस्यानि दशवारमावर्तितैः क्षारैर्भस्मभिः शुध्यन्ति । तदाह शातातपः ।

गवाघ्रातेषु कांस्येषु शूद्रोच्छिष्टेषु वा पुनः ।
दशभिर्भस्मभिः शुद्धिः श्वकाकोपहतेषु चेति ॥

किञ्च ।

**गण्डूषं पादशौचं च कृत्वा वै कांस्यभाजने ॥**
**षण्मासान् भुवि निक्षिप्य उधृत्य पुनराहरेत् ॥ २४ ॥**

मुखपादक्षालनजलाभ्यामुपहतं कांस्यं मासषट्कं भूमौ निक्षिप्य पुनरुद्धर्षणेन तदाकारं कुर्यात् । तदाहाङ्गिराः ।

गण्डूषं पादशौचं च कृत्वा वै कांस्यभाजने ।
षण्मासं भुवि निःक्षिप्य पुनराकारमादिशेदिति ॥

आयसादिशुद्धिमाह ।

**आयसेष्वायसानां च सीसस्याग्नौ विशोधनम् ॥**

आयसानां पात्राणामयोमयेषु घर्षणसाधनेषु घर्षणं विशोधनम् ।

आयसग्रहणमश्मनोऽप्युपलक्षणं तथायसाना तापेन अश्मघर्षणेन चेति मार्कण्डेयस्मरणात् ।

सीसपात्रस्य निर्लेपस्याद्भिर्विशोधन सूतिकाद्युपहतस्याग्नौ प्रक्षेपः । तथाच ब्रह्मपुराणम् ।

कांस्यायस्ताम्ररैत्यानि त्रपुसीसमयानि च ।
निर्लेपान्येव शुध्यन्ति केवलेन जलेन च ॥
सूतिकाशवविण्मूत्ररजस्वलाहतानि च ।
प्रक्षेप्तव्यानि चैतान्यग्नौ द्रव्य मलापहे ॥ इति ।

गजदन्तादीनां शुद्धिमाह ।

**दन्तमस्थि तथा शृंगं रौप्यं सौवर्णभाजनम् ॥२५॥**
**मणिपात्राणि शंखश्चेत्येते प्रक्षालयेज्जलैः ॥**
**पाषाणे तु पुनर्घर्षः शुद्धिरेषामुदाहृता ॥ २६ ॥**

दन्तो गजदन्तस्तन्मयमस्थि गजादीनामेव तन्निर्मितं शृङ्गं खड्गमहिषादिशृङ्गनिर्मितं रौप्य राजतमय च यद्भाजनं मणिपात्राणि स्फटिकमरकतादिनिर्मितानि शङ्खश्चकाराच्छुक्तिश्चेत्येतानि निर्लेपानि जलैः प्रक्षालनीयानि सलेपानि पाषाणघर्षणेन शोधनीयानि । तथा च मनुः ।

निर्लेप काञ्चनं भाण्डमद्भिरेव विशुध्यति ।
अब्जमश्ममय चैव राजत चानुपस्कृतम् ॥

शातातपः ।

सुवर्णं रजतं ताम्रं त्रपुकृष्णायसं तथा ।
रीतिका सीसलोहानि शुध्यन्त्येतेऽश्मघर्षणात् ॥ इति ॥

अश्मघर्षणेन लेपापनयनात्सलेपविषयमिदमर्थात्सिध्यति यत्तु तक्षण दारुशृङ्गास्थ्नामिति तदश्मघर्षणापनयनेयलेपविषयमिति ।

मृन्मयादिशुद्धिमाह ।

**मृन्मयोदहनाच्छुद्धिर्धान्यानां मार्जनादपि ॥ २७ ॥**

मृन्मयं पात्रमुच्छिष्टलेपोपहत पुनर्दाहेन शुध्यति । तदाह बौधायनः ।

मृन्मयाना पात्राणामुच्छिष्टसमन्वारब्धानामतूलनमुच्छिष्टोपहताना पुनर्दहनं मूत्रपुरीषरेतःप्रभृतिभिरुत्सर्ग इति । चण्डालादिस्पर्शे परित्याग एव ।

चण्डालाद्यैस्तु सस्पृष्ट धान्य वस्त्रमथापि वा ।
क्षालनेन विशुध्येत परित्यागान्महीमयम् ॥ इतिस्मरणात्

धान्यानां व्रीहियवादीनामुच्छिष्टोपहताना मार्जनमल्पाना क्षालन बहुनां प्रोक्षणमिति । तदाह मनुः ।

अद्भिस्तु प्रोक्षण शौच बहूना धान्यवाससाम् ।
प्रक्षालनेन त्वल्पानामद्भिः शौच विधीयते ॥ इति

वैणवादिशुद्धिमाह ।

**वेणुवल्कलचीराणां क्षौमकार्पासवाससाम् ।**
**और्णनेत्रपटानां च प्रोक्षणाच्छुद्धिरिष्यते ॥ २८ ॥**

वेणुर्वंशः, तत्कार्याणि कटव्यजनादीनि वल्कलचीराणि प्रसिद्धानि क्षौममतसीत्वङ्निर्मितवस्त्र कार्पासवासःप्रसिद्धम् । और्णमूर्णानिर्मितकबलादिः नेत्रपटोऽरण्यवासिनां प्रसिद्धः । एषा वैणवादीनामेकैकस्याल्पोपहतौ प्रोक्षणाच्छुद्धिर्महोपघाते क्षालनमेव क्षौमादीना तु चण्डालादिस्पर्शमात्रोपघाते प्रत्येकमपि प्रोक्षणमेव लेपोपहतौ तु स्वस्वशोधनैः क्षालनमेव । तथाच देवलः ।

और्णकौशेयकुतपशाणक्षौमदुकूलजाः ।
अल्पशौचा भवन्त्येते शोषणप्रोक्षणादिभिः ॥
तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैरिति ।

कार्पासवाससां तु चण्डालादिस्पर्शे बहूनां प्रोक्षणमल्पानां क्षालनम् ।

अद्भिस्तु प्रोक्षणं शौच बहूनां धान्यवाससाम् ।
प्रक्षालनेन त्वल्पानामद्भिः शौच विधीयते ॥ इति मनुस्मरणात् ।

राशीकृतेष्वपि वस्त्रेषु यावत्संस्पृष्ट तावतो क्षालनमसंस्पृष्टस्य प्रोक्षणमेव ।

वस्त्रधान्यादिराशीनामेकदेशविदूषणे ।
तावन्मात्रं समुद्धृत्य शेष प्रोक्षणमर्हति ॥ इतिस्मरणात् ।

मुञ्जादिशुद्धिमाह ।

**मुञ्जोपस्करशूर्पाणां शणस्य फलचर्मणाम् ॥**
**तृणकाष्ठस्य रज्जूनामुदकाभ्युक्षणं मतम् ॥ २९ ॥**

मुञ्जः तृणविशेषस्तन्निर्मितमुपस्करो विष्टरादिः शूर्पं वेणुमय यद्यपि तच्छुद्धिः पूर्वमुक्तैव वेणुविकारत्वात्तथापि फलीकरणादिना सलेपस्यापि तस्य शुध्यन्तरशङ्कानिरासार्थं पुनर्ग्रहण रायादिहेतुर्वल्कलविशेषः तेन तद्विकाराणा ग्रहणं फलमाम्रादि चर्म कृष्णाजिनादि तृण काष्ठ रज्जुर्वल्वजादिनिर्मिता एषामस्पृश्यस्पृष्टानामुदकेनाभ्युक्षण विण्मूत्राद्युपहताना क्षालनमेवेति । तदाह कश्यपः । तृणकाष्ठरज्जुमुञ्जचर्मवेणुविदलफलपत्रमूलादीनां चैलवच्छौचं मृद्वाद्यचर्मणा चात्यन्तोपहताना त्याग इति ।

तूलिकादिशुद्धिमाह ।

**तूलिकाद्युपधानानि रक्तवस्त्रादिकानि च ।**
**शोषयित्वार्कतापेन प्रोक्षणाच्छुद्धतामियुः ॥ ३० ॥**

तूलं कार्पास तेन पूर्णा पटी तूलिका आदिनासनोपाश्रयादिग्रहणमुपधानमुच्छिर्षकं तूलिकादीनि चोपधान चेति तूलिकाद्युपधानानि रक्तमादिशब्देन हारिद्रादिग्रहणं तेषां चण्डालादिस्पर्शे प्रोक्षणार्कतापाभ्या विण्मूत्राद्युपहतौ क्षालनेनैव शुद्धिः । यथा देवलः ।

तूलिकाद्युपधानं च पुष्परक्ताम्बराणि च ।
शोषयित्वातपे किंचित्करैस्तन्मार्जयेन्मुहुः ॥
पश्चात्तु वारिणा प्रोक्ष्य विनियुञ्जीत कर्मणि ।
तान्यप्यतिलिप्तानि यथावत्परिशोधयेदिति ॥

पुष्य कुसुम्भादि ।
कुसुम्भकुङ्कुमारक्तं तथा लाक्षारसेन च ।
प्रोक्षणेनैव शुध्येत चण्डालस्पर्शने सदा ।
इति षड्विंशन्मतात् ।

इदानीं केषु चिदशुध्यपवादमाह ।

**मार्जारमक्षिकाकीटपतङ्गकृमिदर्दुराः ।**
**मेध्यामेध्यं स्पृशन्तोऽपि नोच्छिष्टं मनुरब्रवीत् ॥३१॥**

मार्जारमक्षिके प्रसिद्धे । कीटाः पिपीलिकाद्याः पतङ्गः शलभः क्रिमयो धान्यादावुत्पन्नजीवाः घुणादयः दर्दुरा भेकाः, एते मेध्यं चामेध्यं च मेध्यामेध्यं शुद्धाशुद्धं द्रव्यं स्पृशन्तोऽपि नोच्छिष्टं कुर्वन्तीति मनुरब्रवीत् । तथा च मनुः । मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिरिति । याज्ञवल्क्योऽपि ।

रश्मिरग्नी रजः छाया गौरश्वश्च सदानिलः ।
विप्रुषो मक्षिकास्पर्शे वत्सः प्रस्नवणे शुचिरिति ॥

किं च ।

**महीं स्पृष्ट्वा गतं तोयं याश्चाप्यस्याऽऽस्यविप्रुषः ॥**
**भुक्तोच्छिष्टं तथा स्नेहं नोच्छिष्टं मनुरब्रवीत् ॥३२॥**

परानाचामयतो यदुदकं भूमिं स्पृष्ट्वा बिन्दुरूपेणोर्ध्वमायात्य स्पृशति याश्च संभाषणेऽन्योन्यविप्रुषो मुखोद्गता बिन्दवोऽङ्गे पतन्ति यच्च भोजनपात्रादन्यदुच्छिष्टमुर्वरितं पुनः पुनर्भुज्यमानमपि तथा स्नेहं तैलाभ्यङ्गे पुनःपुनरुपयुज्यमानमपि नोच्छिष्टं भवतीति यथालिङ्गं प्रत्येकं संबध्यत इति मनुरब्रवीत् । तथा च मनुः ।

स्पृशन्ति बिन्दवः पादौ यानाचामयतः परान् ।
भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥

नोच्छिष्टं कुर्वते मेध्या विप्रुषोऽङ्गे पतन्ति याः ॥ इति ।

किंच ।

**ताम्बूलेक्षुफलं चैव भुक्तस्नेहानुलेपने ।**
**मधुपर्के च सोमे च नोच्छिष्टं धर्मतो विदुः ॥३३॥**

ताम्बूलं च इक्षुश्च फलं च ताम्बूलेक्षुफलं भुक्तश्चासौ स्नेहश्च तस्यानुलेपनं क्षालनानपनोद्यलेपे मधुपर्के विवाहादौ दधिभक्षणे सोमयागे सोमपानमेतेषु नोच्छिष्टदोष इति मन्वादयो विदुः । तथा च शातातपः । ताम्बूले च फले चैव भुक्तस्नेहावशिष्टके । श्रुतिश्च न सोमे नोच्छिष्टा भवन्ति इति ।

किञ्च ।

**रथ्याकर्दमतोयानि नावः पन्थास्तृणानि च ।**
**मारुतार्केण शुध्यन्ति पक्वेष्टकचितानि च ॥ ३४ ॥**

रथ्या मार्गमात्रं तत्रस्थानि कर्दमतोयानि बहुवचनाच्चैलखर्परयोरपि ग्रहणं नावो वहित्राणि पन्था मार्गस्तृणानि उलपादीनि पक्वेष्टकचितानि वेदिकागृहादीनि चण्डालादिस्पृष्टान्यपि मारुतार्कतापाभ्यां शुध्यन्ति ।

तथा च याज्ञवल्क्यः ।

रथ्याकर्दमतोयानि स्पृष्टान्यन्त्यश्ववायसैः ।
मारुतेनैव शुध्यन्ति पक्वेष्टकचितानि च ॥
पन्थानश्च विशुध्यन्ति सोमसूर्यांशुमारुतैरिति ।
चकारादासनशयनादेरपि ग्रहणम् ।

तदाह बौधायनः ।

आसनं शयनं यानं नावः पन्थास्तृणानि च ।
मारुतार्केण शुध्यन्ति पक्वेष्टकचितानि चेति ।

किञ्च ।

**गण्डूषनिर्गता धारा मारुतोत्थाश्च रेणवः ।**
**स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदा चन ॥ ३६ ॥**

गण्डूषादेर्निर्गता मुखं प्रविष्टा अप्यविच्छिन्ना उदकधारा नोच्छि

ष्टा भवन्ति न च पात्रस्यजलं दूषयन्ति नानाविधाशुचिप्रदेशाद्वायुनोत्थापिता अपि रेणवो नाशुचयोऽन्यत्र खरादिरेणुभ्यः । तथा च शातातपः ।

रेणवः शुचयः सर्वे वायुना समुदीरिताः ।
अन्यत्र रासभाजाविश्वसूकरनिवासिनः ॥

इति ।

स्त्रीबालवृद्धाः प्रातःस्नानाद्यभावेऽपि गृहकर्माचरन्तः शुचयः । तथा च वसिष्ठः ।

श्वहताश्च मृगा मेध्याः पातितं च द्विजैः फलम् ।
बालैः खलुपरिक्रान्तं स्त्रीभिराचरितं च यदिति ॥
स्त्रीबालयोरपि शुचित्वमात्मीययोरेव न सामान्यतः ।
आसनं शयनं वस्त्रं जायापत्यं कमण्डलुम् ।
आत्मनः शुचिरेतानि न परेषां कदा चन ॥ इति स्मरणात् ।

इदानीमुक्तशुद्धेर्विषयमाह ।

**देशभङ्गे प्रवासे वा व्याधिषु व्यसनेष्वपि ।**
**रक्षेदेव स्वदेहादि पश्चाद्धर्मं समाचरेत् ॥ ३६ ॥**

देशभङ्गे परसैन्यागमेन प्रवासो देशान्तरगमनेन परगृहादिवासः, व्याधयो ज्वरादयः व्यसनानि स्वामिकोपादिजनितानि भयानि एतेषु प्राप्तेषु शुध्यशुद्धी न विचारयितव्ये किं तर्हि शुचिभिरशुचिभिर्वा द्रव्यैरात्मपुत्रकलत्रादिरक्षां विधाय गतायामापदि पश्चाच्छास्त्रानुसारेणाशुद्धद्रव्योपभोगनिमित्तप्रायश्चित्तपूर्वकं धर्मानाचरेदिति ।

एवं शुद्धिविषयमुक्त्वा प्रसङ्गान्मुख्यगौणयोरपि कल्पयोर्विषयमाह ।

**येन केन च धर्मेण मृदुना दारुणेन वा ।**
**उद्धरेद्दीन आत्मानं समर्थो धर्ममाचरेत् ॥ ३७ ॥**

मृदुना सुकरेण यथोपपन्नदेशकालद्रव्यात्मसाध्येन दारुणेन वा उद्धरेद्दीन आत्मानं समर्थो धर्ममाचरेत्, न दुष्करेण यथोक्तदेशकालद्र-

व्यात्मसाध्येन वा येन केन चिदव्यवस्थितेन धर्मेण दीन आपद्ग्रस्त मात्मानमुद्धरेदनापदं कुर्यात्समर्थोनिस्तीर्णापद् धर्मं मुख्य शास्त्रेणोक्तमेवाचरेन्न तु कल्प शास्त्रोक्तमिति अनेनासमर्थो मुख्यगौणयोर्धर्मयोर्यथोपपत्त्यधिकारी समर्थस्तु मुख्यधर्म एवेत्युक्तं भवति ।

प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते ॥
न सांपरायिकं तस्य दुर्मतेर्विद्यते फलमिति स्मरणात् ।
यथोक्तविपर्यये मुख्यगौणकल्पयोरुदाहरणमाह ।

**आपत्कालं तु निस्तीर्य शौचाचारं तु चिन्तयेत् ।**
**शुद्धिं समुद्धरेत्पश्चात् स्वस्थो धर्मं समाचरेत् ॥३८॥**

निस्तीर्णापत्काल एव पुमान् शौचाचारमाचारकाण्डोक्त धर्मं विचिन्तयेदनुतिष्ठेत्, शुद्धिं प्रायश्चित्तकाण्डोक्तां च समुद्धरेदाचरेत्, अनेन मुख्यगौणकल्पयोराचारप्रायश्चित्तयोरेव सम्भवो नान्यत्रेत्युक्तं भवति स्वस्थो धर्मं समाचरेदित्युक्तोपसंहारो द्विविधमपि धर्मं स्वस्थ एवाचरे चापद्य इति

दध्नः कुम्भान् कुसुम्भारुणवसनवृता मस्तके न्यस्तमूलान्
बिभ्राणा गोपकन्याश्चलपदमभितो व्यस्तदृष्टि व्रजन्तीः ।
शुल्कव्याजान्निरुध्य प्रसभमभिमृशन् कञ्चुकान्तर्विचिन्वन्
नीवीवासो विकर्षन् स्मितललितमुखः पातु सङ्कर्षणो वः ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृतेऽखिलशुद्धिहेतु-
रध्याय एष विवृतः खलु सप्तमोऽपि ॥ २ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेय-विनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां सप्तमोऽध्यायः । शुभमस्तु ।

श्रीगणेशायनमः ।

आधाय प्रेम साधारणमिव गतवान्पूर्वमस्मासु कस्माद्
राधामाधाय कुञ्जे विहरति हरिरित्यन्तरीर्ष्याः सकोपाः ।
गोपीः सातङ्कमन्तश्चलपदमभिगम्यानुनेतुं सशङ्कः
प्रद्युम्नश्चाटुवाक्यैर्जयति हृदि मुदा सन्दधत् निर्व्यलीकाः ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृते क्रियते विचारो-
ऽध्याये ऽष्टमे निखिलगोवधशुद्धिसिध्यै ॥ २ ॥

एवमाचारप्रायश्चित्तकाण्डयोरनुक्तान् शेषान् धर्मान्तरान् सङ्कर काण्डेन प्रतिपाद्येदानीं प्रायश्चित्तकाण्डमारभते ।

तत्र पूर्वकाण्डे प्रकीर्णकसङ्करीकरणमलिनीकरणेषु प्रायश्चित्त मभिहितमिदानीमुपपातकेषु तदुक्तव्य, तत्स्वरूपं च याज्ञवल्क्य आह ।

गोवधो व्रात्यता स्तेयमृणाना चाऽनपक्रिया ।
अनाहि ताग्नितापण्यविक्रयः परिवेदनम् ॥
भृतादध्ययनादानं भृतकाध्यापनं तथा ।
पारदार्यं पारिवित्त्य वार्द्धुष्यं लवणक्रिया ।
स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्थोपजीवनम् ॥
नास्तिक्यं व्रतलोपश्च सुताना चैव विक्रयः ।
धान्यकुप्यपशुस्तेयमयाज्यानां च याजनम् ॥
पितृमातृसुतत्यागस्तडागारामविक्रयः ।
कन्यासदूषणं चैव परिविदकयाजनम् ॥
कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनम् ।
आत्मनोर्थे क्रियारम्भो मद्यपस्त्रीनिषेवणम् ॥
स्वाध्यायाग्निसुतत्यागो बान्धवत्याग एव च ।
इन्धनार्थं द्रुमच्छेदः स्त्रीहिंसौषधिजीवनम् ॥
हिंस्रयन्त्रविधानं च व्यसनान्यात्मविक्रयः ।
शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणम् ॥

तथैवाऽनाश्रमे वासः परान्नपरिपुष्टता ।
असच्छास्त्राधिगमनमाकरेष्वधिकारिता ॥
भार्याया विक्रयश्चैषामेकैकमुपपातकमिति ॥

तेष्वाद्यस्य गोवधस्य प्रायश्चित्तमध्यायद्वयेन विवक्षुरादिपति

**गवां वन्धनयोक्त्रेषु भवेन्मृत्युरकामतः ॥**
**अकामकृतपापस्य प्रायश्चित्तं कथं भवेत् ॥ १ ॥**

बन्धनयोक्त्रे वक्ष्यमाणलक्षणे बहुवचनाद्रोधघातयोरुपादानम् ।

तथा च वक्ष्यति नवमे ।

रोधवन्धनयोक्त्राणि घातश्चेति चतुर्विधमिति वधनिमित्तमिति शेषः

तेषु चतुर्ष्वप्यकामतो मरणानुद्देशेपि प्रयुक्तानां गवां यदि कथञ्चिन्मरणं भवेत्तदा न कामतस्तदुद्देशेन कृतं पापं येनाऽसावकामकृतपापस्तस्य पुरुषस्य प्रायश्चित्तं कथं स्यात् । अयमभिसन्धिः । द्विविधमपि पापं प्रायश्चित्तनिमित्तं कामकृतमकामकृतं च ।

तत्राऽहमेनमेवं व्यापादयिष्यामीत्युद्देशः कामस्तदभावोऽकामज्ञानकामयोश्चाऽव्यभिचारात्तुल्यफलकत्वमेव । तथा च मरणानुद्देशेऽपि योक्त्रबन्धनादीनां मरणानुकूलव्यापारत्वाद्धिंसैव परं त्वकामकामकृता च तत्र च प्रायश्चित्तं नाम रूढ्या योगेन च पापनिवर्तनक्षमो धर्मविशेष उच्यते ।

योगश्चाऽङ्गिरसा दर्शितः ।

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपो निश्चयसंयुक्तं प्रायश्चित्तं तदुच्यत इति ॥

रूढिमात्राङ्गीकारे त्ववयवशक्तिपरित्यागः समुदायशक्तिकल्पना चाऽपद्येत तच्च नैमित्तिकमेव क्षामवतीवत् । यत्तु प्रायश्चित्तैरपैत्येन इत्यादि पापक्षयस्य फलत्वेन श्रवणं तज्जातेष्टिन्यायेन नैमित्तिकेऽप्यविरुद्धम् ।

यदपि "प्रायश्चित्तमकुर्वाणाः पापेषु निरतानराः ।
अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान् ।

इत्याद्याकरणे प्रत्यवायश्रवणान्नित्यत्वप्रतिभानं तदपि न । अनेन प्रायश्चित्ताकरणस्य पापान्तरजनकत्वाप्रति-पादनात् किन्तु विनाशकाभावे तदनुवृत्तिमात्रबोधनात् । तस्मा नैमित्तिक तच्चा ऽकामकृते पापमात्रे सर्ववादिसंप्रतिपन्नं, कामकृते महापातकादौ तु केषां चिदेव संमतं न सर्वेषाम् ।

तथाच मनुः ।

अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः ।

कामकारकृते प्याहुरेके श्रुतिनिदर्शनात् ॥ इति ।

एतत्सर्वमभिप्रेत्याऽऽह । अकामकृतपापस्य प्रायश्चित्तं कथं भवेदिति ।

प्रायश्चित्तं कथं भवेदिति प्रश्नस्य साङ्गप्रायश्चित्तविषयत्वात्पर्षदुपसत्तिरूपमाद्यमङ्गमाह ।

**वेदवेदांगविदुषां धर्मशास्त्रं विजानताम् ॥**
**स्वकर्मरतविप्राणां स्वकं पापं निवेदयेत् ॥ २॥**

वेदा ऋग्वेदादयोगानि शिक्षादीनि तानि विदन्ति धर्मशास्त्रं च मानवादि ये जानंति स्वकर्म च नित्यनैमित्तिकाद्यनुतिष्ठन्ति तेषामग्रे स्वीयमुत्पन्नं पापमशेषेण निवेदयेत् ।

यद्यपि धर्मशास्त्रज्ञानमात्रेण प्रायश्चित्तं विधातुं शक्यं तथापि वेदाध्ययनतदर्थानुष्ठानरहितैर्निर्दिष्टस्य प्रायश्चित्तस्य पापापनोदनक्षमत्वाभावस्य वक्ष्यमाणत्वाद् विशेषणद्वयोपादानमर्थवत्, बहुवचनं तु तत्तत्स्थानोपदिष्टसंख्यासंग्रहाय ।

तथाच स्मृत्यन्तरम् ।

पातके तु शतं पर्षत्सहस्रं महदादिषु ।

उपपापेषु पञ्चाशत् स्वल्पे स्वल्पा तथा भवेदिति ॥

अनेन पर्षल्लक्षणं तदुपसत्तिश्चोक्ता तामेतां पर्षदुपसत्तिं स्पष्टमाहांगिराः ।

अत ऊर्ध्वं प्रवक्ष्यामि उपस्थानस्य लक्षणम् ।
उपस्थितो हि न्यायेन व्रतादेशनमर्हति ॥
सद्यो निःसंशये पापे न भुञ्जीतानुपस्थितः ।
भुञ्जानो वर्धयेत्पापमसत्यं पर्षदि ब्रुवन् ॥
संशये तु न भोक्तव्यं यावत्कार्यस्य निश्चयः ।
प्रमादश्च न कर्तव्यो यथैवासंशये तथा ॥
कृत्वा पापं न गूहेत गूहमानस्य वर्धते ।
बहु वा स्वल्पकं वापि धर्मविद्भ्यो निवेदयेत् ॥
प्रायश्चित्ते समुत्पन्ने ह्रीमान् सत्यपरायणः ।
मृदुरार्जवसंपन्नः शुद्धिं याचेत मानवः ॥
सचैलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः ।
क्षत्रियो वाथ वैश्यो वा पर्षदं ह्युपतिष्ठति ॥
सर्वे धर्मविवेक्तारो गोप्तारः सकला द्विजाः ।
मम देहस्य संशुद्धिं कुर्वन्तु द्विजसत्तमाः ॥
मया कृतं महाघोरं ज्ञातमज्ञातकिल्बिषम् ।
प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ ॥
पूज्यैः कृतः पवित्रोऽहं भवेयं द्विजसत्तमैः ।
उपस्थाय ततः शीघ्रमार्तिमान् धरणीं व्रजेत् ॥
गात्रैश्च शिरसा चैव न च किंचिदुदाहरेत् ।
ततस्ते प्रणिपातेन दृष्ट्वा तं समुपस्थितम् ॥
वृद्धाः पृच्छन्ति तत्कार्यमुपविश्याग्रतः स्थितम् ।
किं ते कार्यं वदास्माभिः किं वा मृगयसे द्विज ॥
तत्त्वतो ब्रूहि तत्सर्वं सत्यं हि गतिरात्मनः ।
सत्येन द्योतते राजा सत्येन द्योतते रविः ।
सत्येन द्योतते वन्हिः सर्वं सत्ये प्रतिष्ठितम् ॥
भूर्भुवःस्वःस्त्रयो लोकास्तेपि सत्ये प्रतिष्ठिताः ।
अस्माकं चैव सर्वेषां सत्यमेव परं बलम् ।
यदि चेद्वक्षसे सत्यं नियतं प्राप्स्यसे शुभम् ॥
यद्यागतोस्यसत्येन न त्वं शुध्यसि कर्हिचित् ।
सत्येन तु विशुध्यन्ति शुद्धिकामाश्च मानवाः ॥

तस्मात्तद्वद यत्सत्यमार्दिमध्यावसानिकम् ।
एवं तैः समनुज्ञातः सर्वं ब्रूयादशेषत इति ॥
पापप्रवचने च पर्षद्दक्षिणा दत्वा कार्यमित्यत आह पराशरः ।
पापं प्रख्यापयेत्पापी दत्वा धेनुं तथा वृषमिति ॥

धेनुवृषयोश्च दानं मूल्यरूपेण न स्वरूपेण पर्षद्विभागासहत्वाद्विक्रयप्रतिषेधाच्च एतदतिकृच्छ्रा । दिप्रायश्चित्तेषु

अन्येषु तु विष्णूक्तम् ।
पादव्रते वस्त्रदानं कृच्छ्रार्द्धे तिलकांचनम् ।
पादहीने तु गामेकां कृच्छ्रे गोमिथुनं स्मृतमित्यादि ज्ञेयं ॥
वक्ष्यति च नवमे, पादे वस्त्रयुगं चैवेत्यादि ।

नामधारकविप्राणां पर्षत्वनिषेद्धुं तल्लक्षणमाह ।

**सावित्र्याश्चापि गायत्र्याः संध्योपास्त्यग्निकार्ययोः ॥**
**अज्ञानात्कृषिकर्तारो ब्राह्मणा नामधारकाः ॥ ३ ॥**

तत्सवितुर्वृणीमह इति सावित्री तत्सवितुर्वरेण्यमिति गायत्री । यद्यपि सवितृप्रतिपादकत्वाद्गायत्र्या एव सावित्रीत्वं प्रसिद्धम् । तथाप्यत्र भेदेनोपन्यासात्पुनरुपनयने उद्देश्यत्वाच्चोदाहृतैव सावित्रीति संध्योपास्तिः संध्यावन्दनम् । अग्निकार्यं समिदाधानम्, एषामज्ञानेन याजनाध्यापनादिवृत्त्यसंभवाच्च जीवनाय कृषिमाश्रयन्ति ते ब्राह्मणा नामधारका ब्राह्मणशब्दाभिधेयाः जातिमात्राश्रयत्वात् ।

तदाहव्यासः ।
ब्रह्मबीजसमुत्पन्नो ब्रह्मसंस्कारवर्जितः ॥
जातिमात्रोपजीवी यः स भवेन्नामधारकः ॥ इति ।

उक्ते पर्षल्लक्षणे विशेषणानां व्यावर्त्यमाह

**अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् ।**
**सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥ ४ ॥**

व्रतैः सौम्यप्राजापत्यादिभिः हीनाः अव्रताः अनधीतमन्त्रा अमन्त्राः अनेन ब्राह्मणाऽनध्ययनेपि मंत्रभागमात्राध्ययनेपि पर्षत्त्वं भवतीत्युक्तम् । एत-

वाजातिमात्राश्रयाणां पर्षत्त्व नास्ति । ननु गुणोत्कर्षापकर्षाभ्यामल्याधिकसङ्ख्याना पर्षत्त्व दृश्यते, यथाध्यात्मविद एकस्यैव, एको वाध्यत्मवित्तम इति स्मरणात् । तदभावे चतुर्णां, चत्वारो वेदधर्मज्ञा इति । तद्वत्मकृतेऽपि संख्याधिक्येनैषामेवास्तुपर्षत्त्वमित्यत आह सहस्रशः समेतानामिति । अनेन वेदाध्ययनकर्मानुष्ठानयोर्व्यावर्त्यमुक्तम् ।

इदानीं धर्मशास्त्र विजानतामिति विशेषणस्य व्यावर्त्यमाह ।

**यद्वदन्ति तमोमूढा मूर्खा धर्ममतद्विदः ।**
**तत्पापं शतधा भूत्वा तद्वक्तॄनधिगच्छति ॥ ५ ॥**

धर्मशास्त्राज्ञान द्विविधं सत्यपि मूलपाठे न्यायनिर्णयकौशलाभावेन व्यवस्थाऽपरिज्ञानमेकम् । व्यवस्थासामर्थ्येऽपि मूलाऽपरिशीलनमूलकमपरम् । तदुभयरूपेण, तमसा, वचनानां विषयव्यवस्थाज्ञानाभावेन मूढाः सूक्ष्मन्यायेषु विभ्रान्ताः मूलापरिज्ञानेन मूर्खा पण्डितम्मन्याः, अत एवातद्विदः प्रायश्चित्तविशेषमजानन्तो, यत्पापमुद्दिश्य धर्मं प्रायश्चित्तमन्यथा वदन्ति तत्पापं शतगुणं भूत्वा तान्मूर्खान्वक्तॄनधिगच्छति प्राप्नोति, तस्मात्पापनिर्णयाय मूलवाक्यपाठायच यतितव्यम् ।

तदाहाङ्गिराः ।

यत्तु दत्तमजानद्भिः प्रायश्चित्तं सभागतैः ।
तत्पाप शतधा भूत्वा दातॄनेवोपतिष्ठतीति ।

एवं पर्षल्लक्षणमभिधाय प्रसङ्गादनुवादकलक्षणमपि व्यतिरेकमुखेनाह ।

**अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः ।**
**प्रायश्चिती भवेत्पूतः किल्विषं पर्षदि व्रजेत् ॥ ६ ॥**

यस्त्वनुवादको धर्मशास्त्राण्यपठित्वैव कुतश्चिदभियुक्तात्प्रायश्चित्तविशेषं ज्ञात्वोपदिशत्यसावपि पूतो निष्पापोऽप्यनेनैव पापेन प्रायश्चित्ती किल्विषी भवेत् । विधायकवचनोदाहरणसामर्थ्याभावात् । तदुदाहरणेनैव प्रायश्चित्तोपदेशाम्नानात् ।

तदुक्तम् ।

मुनिवत्कोद्गनात् धर्मान् रचन्तो वेदपारगाः । इति षष्ठाध्याये ।

अङ्गिरसापि ।

वचः पूर्वमुदाहार्यं यथोक्तं धर्मवक्तृभिः ।
पश्चात्कार्यानुसारेण शक्त्या कुर्युरनुग्रहम् ॥
नहि तेषामतिक्रम्य वचनानि महात्मनाम् ।
अज्ञानैरपि विद्वद्भिः शक्यमन्यत्प्रभाषितुमिति ॥

तत्र हेतुमाह किल्विष पर्षदि व्रजेदिति यतस्तत्पापं शतधेत्यनेनेदमुक्तमित्यर्थः । यत्तुप्रायश्चित्ती निमित्ती तादृशेनापि प्रायश्चित्तेन पूता भवतीति व्याख्यानम् ।

तन्न ।

यद्विना धर्मशास्त्रेण प्रायश्चित्त विधीयते ।

नैव शुद्धिमवाप्नोति प्रायश्चित्ते कृतेऽपि सः।

इतिवृद्धशातातपस्मरणविरोधात् ।

इदानीं पर्षन्निर्णीतस्याप्यर्थस्य विधायकैस्त्रिचतुरैस्सह संवादःकार्य इत्यत आह ।

चत्वारो वा त्रयो वापि यं ब्रूयुर्वेदपारगाः ।
स धर्म इति विज्ञेयो नेतरैस्तु सहस्रशः ॥ ७ ॥

पर्षन्निर्णीतमप्यर्थं त्रयश्चत्वारो वा वेदशास्त्रपारगा विप्रा ब्रूयुर्यदा तदाऽसौ धर्मो भवति न केवलं सहस्रादिसंख्यकैः सत्यैरेवोक्त इति ।

विचरस्तादृशः कार्यो यथा सर्वे सभासदः ।
एकवाक्यतया ब्रूयुस्तथा श्रेयो ऽधिगच्छतीति स्मरणात् ॥

अनेन पर्षदतिरिक्तास्त्रयश्चत्वारो वा विधायकाः कार्या इत्युक्तं भवति । अतएवभारते ।

अर्द्धं पापं भवेन्मुख्ये पादो भवति कर्तृषु ।

पादो भवति सभ्येषु ये न निन्दन्ति निन्दितम् ।

"इति त्रयाणामपि पृथगुपादानं विहितम् । मुख्यः प्राड्विवाकः कर्तारो विधायकाः सभ्याः पर्षन्नियुक्तास्त इति ।

विधायकैरपि पर्षन्निर्णीतेर्थे संवादः कथं कार्य इत्यत आह ।

**प्रामाणमार्गं मार्गन्तो ये धर्मं प्रवदन्ति वै ।**
**तेषामुद्विजते पापं सद्भूतगुणवादिनाम् ॥ ८ ॥**

प्रमाणं धर्मशास्त्रं मार्गः शिष्टानुगृहीतः पन्थाः तयोः समाहारः। यद्वा प्रमाणानां स्मृतिवचनानां मार्गो व्यवस्था तां मार्गन्तो न्यायेनानुसन्दधाना ये धर्मं प्रवदन्ति सम्वदन्ति तेषां सद्भूतगुणवादेन यथावस्थितार्थप्रतिपादनेन पापमुद्विजते नाशयोग्यतामापद्यत इति । अनेन विधायकैरपि प्रमाणानुसन्धानेन सम्वादः कार्य इत्युक्तं भवति ।

ननु प्रमाणमार्गणस्यैव पापोद्वेजकत्वे स्वयमेव तथानुष्ठाने पापोद्वेगः किं न स्यादित्यत आह ।

**यथाऽश्मनि स्थितं तोयं मारुतार्केण शुध्यति ।**
**एवं परिषदादेशान्नाशयेत्तत्र दुष्कृतम् ॥ ९ ॥**

महति शिलातले निम्नभागे स्थितमुदकं यथा वायुसूर्यादिसंपर्क्केणैव शुष्यति न स्वयमेव तथैव परिषच्छास्त्रीयप्रायश्चित्तोपदेशादेव निमित्तिनः पापं नाशयति नान्यथा अनेन पर्षदादेश एव पापनाशो न स्वयमेव ज्ञात्वानुष्ठानमिति दर्शितम् । अत एव वक्ष्यति नवमान्ते तस्मात्प्रकाशयेत्पापमिति ।

ननु पर्षदुपदिष्टं पापं यदि कर्तर्य्येवावतिष्ठते तदा प्रायश्चित्तमनर्थकम् । अथ पर्षदं प्राप्नुयात्तर्हि ततः कथमुद्वेग इत्यत आह ।

**नैव गच्छति कर्तारं नैव गच्छति पर्षदम् ।**
**मारुतार्क्कादिसंयोगात्पापं नश्यति तोयवत् ॥ १० ॥**

नहि शिलास्थमुदकमुत्तरकाले यथापूर्वं शिलायामुपतिष्टते

नापि मारुतादावासज्जते किंतु शुष्यत्येव केवलम्, तथेदमपि पापं न कर्तर्य्यवतिष्ठते नापि पर्षदं प्राप्नोति किंतु स्वयं नाशमेव प्राप्नोति ।

तथाच चतुर्विंशतिमते ।

यथा भूमिगतं तोयमर्कतापेन शुष्यति ।
एवं हि परिषद्दृष्टं नश्यत्येतस्य दुष्कृतम् ॥
नैव गच्छति कर्तारं नैव गच्छति पर्षदम् ।
मारुतार्कादिसंयोगात्पापं नश्यति तोयवदिति ॥

ननु प्रायश्चित्तेन कर्तुः पापनाशान्नैव गच्छति कर्तारमित्युच्यतां नाम नैव गच्छति पर्षदमिति त्वनुपपन्नम् । तेषां पापासंक्रमे अतिकृच्छ्रं ततः कुर्याज्जपेद्वै वेदमातरमिति वक्ष्यमाणं प्रायश्चित्तविधानमनुपपन्नं स्यादिति चेन्नैवम् । नहि कर्तुः पापं पर्षदि संक्रामति तस्याक्रियत्वात् किंतु पर्षदः प्रायश्चित्तोपदेशनिमित्तं पापान्तरमुत्पद्यते तद्विनाशाय कृच्छ्रादिविधानमिति न विरोधः । यथाच पर्षदः प्रायश्चित्तोपदेशानुपदेशयोर्न संकटपातस्तथोपरिष्टाद्वक्ष्यामः ।

इदानीं कार्यतारतम्येन पर्षदो मुख्यानुकल्पभेदानाह ।

**चत्वारो वा त्रयो वापि वेदवन्तोऽग्निहोत्रिणः ।**
**ब्राह्मणानां समर्था चेत्परिषत्सा विधीयते ॥११॥**

ये चत्वारो ब्राह्मणा वेदवन्तः साङ्गवेदाध्येतारो अग्निहोत्रिणोऽविच्छिन्नाग्निहोत्रहोमाः आहिताग्नयः, समर्थाः सम्यगर्थो धर्मस्य प्रतिपादकं शास्त्रं येषां ते धर्मशास्त्रज्ञाः, सा ब्राह्मणानां मुख्या परिषत् तदभावे तादृशास्त्रयो वा परिषत् वाशब्दान्तरेण स्वकर्मरतत्वं विप्रत्वं च पूर्वलक्षणाद्दाकृष्यते । ब्राह्मणानामिति विशेषणात् क्षत्रियादीनां द्वैगुण्यादि कल्पनीयम् ।

यथाहाङ्गिराः ।

पर्षद्या ब्राह्मणानां स्यात् सा राज्ञां द्विगुणा मता ।
वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतमिति ।

उक्तलक्षणपर्षदसम्भवेऽनुकल्पमाह ।

**अनाहिताग्नयो येऽन्ये वेदवेदाङ्गपारगाः ।**
**पञ्च त्रयो वा धर्मज्ञाः परिषत्सा प्रकीर्तिता ॥१२॥**

ये पञ्च ब्राह्मणा अनाहिताग्नयः स्मार्ताग्निपरिशीलनेनापरिगृहीतत्रेताग्नयो न तु निरग्निका वेदवेदाङ्गपारगाः धर्मज्ञाः धर्मशास्त्रज्ञास्तेपि परिषद्भवन्ति तदभावे तादृशास्त्रयो वापि पर्षद्भवन्ति सेयमाहिताग्नित्वादिगुणाभावेऽप्याम्नातत्वाद्गुणानुकल्पः ।

इदानीं सङ्ख्यानुकल्पमाह ।

**मुनीनामात्मविद्यानां द्विजानां यज्ञयाजिनाम् ।**
**वेदव्रतेषु स्नातानामेकोऽपि परिषद्भवेत् ॥१३॥**

मुनीनामात्ममननशालिनामात्मनो ब्रह्मणो, विद्या ऽनुभवो येषां ते आत्मविद्यास्तेषां चेति विशेषणद्वयस्य सिद्धसाधकाख्याभेदेन विकल्पमाश्रित्योपादानम् । द्विजाना विप्राणामात्मसाक्षात्कारेण कृतार्थानामपि लोकानुग्रहाय यज्ञानुष्ठानशीलानां वेदेषु ऋगादिषु व्रतेषु महानाम्न्यादिषु सौम्यप्राजापत्यादिषु वा अन्यतरेषु उभयेषु वा समाप्तेषु स्नातानां कृतसमावर्तनानां मध्ये एकोपि यः कश्चित्परिषद्भवेत् । शिरोव्रतेन स्नातानामिति वा यावत् । तच्च तेषामेवैतां ब्रह्मविद्यां वदेत् । शिरोव्रतविधिवद्यैस्तु चीर्णमित्याद्याथर्वणिकानां प्रसिद्धम् ।

इदानीं गुणतः संख्यातश्चानुकल्पमाह ।

**पञ्च पूर्वं मया प्रोक्तास्तेषां वासंभवे त्रयः ।**
**स्ववृत्तिपरितुष्टा ये परिषत्सा प्रकीर्तिता ॥ १४ ॥**

पूर्वं चत्वारो वेत्यादिश्लोकत्रयेणाहिताग्न्यनाहिताग्नीनां द्वौ द्वौ, पक्षावात्मविदस्त्वेकः पक्ष इति पञ्चपर्षत्पक्षा मया पराशरेणोक्ता स्तेषु, पञ्चानामपि पक्षाणामसंभवे ये के चन स्ववृत्तिपरितुष्टा आपत्कालेप्यापद्वृत्त्यनाश्रयणेन यथाकथंचिद्विहितप्रतिग्रहादिभिरेव कृतनिर्वाहास्ते त्रयोऽपि पर्षत्सञ्ज्ञां लभन्ते । तेषु प्रायश्चित्तविधानप्रयोजकस्य धर्मशास्त्रा-

दिज्ञानस्यापेक्षितत्वे तु धर्मशास्त्ररथारूढ इत्यन्तेन वक्ष्यमाणवाक्येनास्यैकवाक्यत्वं द्रष्टव्यम् । एतेन क्षत्रियादिवृत्त्युपजीविना यथोक्तगुणवतामपि पर्षत्त्वं नास्तीत्युक्तं भवति । एतेषां पर्षत्पक्षाणां दोषतारतम्येनापि व्यवस्था कार्या ।

तथाहाङ्गिराः ।

एषा लाघवकार्येषु मध्यमेषु तु मध्यमा ।
महापातकचिन्तासु शतशो भूरिशश्च वेति ॥

इदानीं नामधारकविप्राणां पर्षत्त्वनिषेधमाह ।

**अत ऊर्ध्वं तु ये विप्राः केवलं नामधारकाः ।**
**पर्षत्त्वं न तु तेष्वस्ति सहस्रगुणितेष्वपि ॥ १५ ॥**

अतः स्ववृत्तिपरितुष्टानां पर्षत्त्वमिति पक्षादूर्ध्वमनन्तरं ये केवलं नामधारका ब्राह्मणत्वजातिमात्रसमवायेन ब्राह्मणशब्दाभिधेयाः विप्रास्तेषु सहस्रसंख्येष्वपि पर्षत्त्वं नास्ति तेषामुक्तलक्षणे सावित्र्याद्यज्ञानोपन्यासेन धर्मशास्त्रज्ञानाभावस्य कृषिकरणोपन्यासेन स्ववृत्तिभ्रंशस्य च समर्थितत्वात् ।

ननु गुणाभावेपि ब्राह्मण्यपुरस्कारेणैव नामधारकाणां पर्षत्त्वं भवत्वित्यत आह ।

**यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः ।**
**ब्राह्मणस्त्वनधीयानस्त्रयस्ते नामधारकाः ॥ १६ ॥**

यथा काष्ठनिर्मितो हस्ती चर्मनिर्मितश्च मृगो हस्तित्वमृगत्वजात्यभावेन तत्कार्याक्षमा सादृश्यमात्रेण तच्छब्दभाजो भवतस्तथा नामधारका विप्रा वेदाध्ययनाभावेन वक्ष्यमाणलक्षणब्राह्मण्याभावेऽपि सादृश्यमात्रेणैव ब्राह्मणशब्दभाजो भवन्ति न मुख्यप्रवृत्तिनिमित्तसद्भावेन । तेन न पर्षत्त्वयोग्या भवन्ति इति ।

ननु नामधारकेषु ब्राह्मण्याभावे,
ब्रह्मबीजसमुत्पन्नो ब्रह्मसंस्कारवर्जितः ।

जातिमात्रोपजीवी यः स भवेन्नामधारकः ॥

इतिव्यासवचनविरोधः स्यादिति चेत् । मैवम् । अस्यावान्तरजातिमात्रसद्भावप्रतिपादकत्वात् । मुख्यब्राह्मण्यस्य गुणविशिष्टजातेरेव ब्राह्मणशब्दप्रवृत्तिनिमित्तत्वस्य वक्ष्यमाणत्वात् ।

नन्वेवं नामधारकेषु ब्राह्मणशब्दप्रयोगो न स्यात्प्रवृत्तिनिमित्ताभावादित्यत आह ।

**ग्रामस्थानं यथा शून्यं यथा कूपस्तु निर्जलः ।**
**यथा हुतमनग्नौ च अमन्त्रो ब्राह्मणस्तथा ॥ १७ ॥**

यथा ग्रामकूपहोमशब्दा जननिवासस्थानविशेषान् जलाधारखातविशेषान् संस्कृताग्निहविःप्रक्षेपान् विशिष्टान् मुख्यवृत्त्याभिदधानाः, शून्यस्थाननिर्जलखातानग्निहविःप्रक्षेपान्न मुख्यवृत्त्या ऽभिदधति विशेषणाभावात् । किंतु लक्षणया गौर्नित्य इतिवत् तथा संस्कारविशेषविशिष्टं मातापितृजन्यं मुख्यवृत्त्या ऽभिदधानो ब्राह्मणशब्दो वेदाध्ययनादिसंस्कारहीनं लक्षणयैवाभिदध्यान्न शक्त्या विशेषणाभावात् तस्मान्नामधारकेषु न मुख्यो ब्राह्मणशब्दप्रयोग इति ।

ननु यथाहिताग्न्यसम्भवे अनाहिताग्नेरप्यनुकल्पत्वेन पर्षत्त्वमुक्तं तथा मुख्यब्राह्मणाभावे नामधारकाणामप्यनुकल्पत्वेनैव पर्षत्त्व कुतो नेष्यत इत्यत आह ।

**यथा षण्ढोऽफलः स्त्रीषु यथा गौरूषराफला ।**
**यथाचाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः ॥१८॥**

अनुकल्पस्यापि कार्यक्षमस्यैवोपादानं सोमाभावे पूतीकानामिव व्रीह्यभावे नीवाराणामिव वा, नामधारकाणां तु वेदाद्यध्ययनहीनत्वेन प्रायश्चित्तविधानाऽक्षमत्वादनुकल्पत्वेनापि नोपादानं यथा भर्त्रनुकल्पत्वेन देवराद्युपादानेपि न षण्ढस्य दयत्तेत्रानुकल्पत्वेनोषराया भूमेर्दानपात्रानुकल्पत्वेनाज्ञस्य नोपादानं भवति । प्रकृतफलासाधकत्वात् । तथा ऽविद्योपि न पापनिवृत्तिहेतुरिति ।

ननु ऊढायां ब्राह्मण्या वोढुर्ब्राह्मणाज्जातो ब्राह्मण इत्येव स्मृत्यन्तरे ब्राह्मणलक्षणमुक्तम् । तत्कथं तत्सत्त्वेऽपि नामधारकाणा न मुख्यं ब्राह्मण्यमित्यत आह ।

**चित्रकर्म यथानेकैरङ्गैरुन्मील्यते शनैः ।**
**ब्राह्मण्यमपि तद्वद्धि संस्कारैर्मन्त्रपूर्वकैः ॥ १६ ॥**

यथा भित्तिपटादौ लिख्यमानं चित्रमनेकैर्वर्णैर्निष्पद्यते नैकेन नीलेन पीतेन वा तथासति चित्रत्वानुपपत्तिः । तथा ब्राह्मण्यमपि शास्त्रीयैः संस्कारैः हिशब्देन स्मृत्यन्तरप्रसिद्धविशिष्टजन्मना च सिध्यति नान्यतरेणैव ।

अयमभिसंधिः । न ब्राह्मण्यादिजातिः गोत्वादिवल्लौकिकप्रमाणगम्या व्यक्तिप्रत्यक्षेण संशयानुपपत्तेः किंतु शास्त्रैकगम्या यथाशास्त्रमङ्गीकर्तव्या । शास्त्रं तु संस्कारविशेषविशिष्टत्वे सति विशिष्टमातापितृजन्यत्वं ब्राह्मण्यमाह ।

यथाहाङ्गिराः ।
जन्मशारीरविद्याभिराचारेण श्रुतेन च ।
धर्मेण च यथोक्तेन ब्राह्मणत्वं विधीयते ॥ इति ।

जन्म ऊढाया वोढुः सकाशात् शारीरं शरीरसंस्कारो जातकर्मादिः विद्या वेदः आचारस्संध्यास्नानादिः श्रुतं मीमांसादिः धर्मः श्रौतस्मार्तानुष्ठानमेभिर्मिलितैर्ब्राह्मण्यं भवति । एवं लक्षणं ब्राह्मण्य न केवलं जन्मविशेषेण नापि संस्कारविशेषैरेव सिध्यति । किन्तूभाभ्याम् ।

यत्तु विशिष्टजन्मनैव ब्राह्मण्यमिति स्मृत्यन्तरम् । तत्स्त्रीषण्ढादिसाधारणब्राह्मण्यावान्तरजात्यभिप्रायेणेति मन्तव्यम् । इदं तु मुख्यं ब्राह्मण्यं बहुश्रुतत्वापरपर्यायं पूर्वलक्षणोपयोगि निरूप्यते इति न विरोधः ।

बहुश्रुतलक्षणं चाह गौतमः ।

स एष बहुश्रुतो भवति लोकवेदवेदांगविद्वाकोवाक्येतिहास-

पुराणकुशलः तदपेतस्ववृत्तिरष्टाचत्वारिंशत्संस्कारैः संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वा सामयाचारिकेष्वभिविनीत इति ।

न केवलं नामधारकाणामेव पर्षत्त्वनिषेधोऽपि तु तत्समवेतानामन्येषामपि इत्याह ।

**प्रायश्चित्तं प्रयच्छन्ति ये द्विजा नामधारकाः ।**
**ते द्विजाः पापकर्माणः समेता नरकं ययुः ॥ २० ॥**

ये नामधारका ब्राह्मणाः प्रायश्चित्तं प्रयच्छन्ति ते पापकर्माणो भवन्ति तत्समवेताश्चान्ये सन्तोऽपि नरकं ययुर्यान्तीत्यर्थः ।

तथा चतुर्विंशतिमते ।

प्रायश्चित्तं प्रयच्छन्ति ब्राह्मणा नामधारकाः ।
ते सर्वे पापकर्माणः, समेता नरकं व्रजेदिति ॥

ननूक्तलक्षणानामपींद्रियार्थपरत्वात्कथं पर्षत्त्वमित्यत आह ।

**ये पठन्ति द्विजा वेदं पञ्चयज्ञरताश्च ये ।**
**त्रैलोक्यं तारयन्त्येते पञ्चेन्द्रियरता अपि ॥ २१ ॥**

ये द्विजा अधीत वेदमविस्मरणार्थमन्वहं पठन्ति ये च पञ्चमहायज्ञानुष्ठानतत्परास्ते शास्त्राविरोधेनेन्द्रियार्थप्रसक्ता अपि शुद्धात्मत्वात्त्रैलोक्यमपि तारयितुं समर्थाः । किं पुनर्न दुष्कृतिनमिति ।

अत एवाह याज्ञवल्क्यः ।

वेदाभ्यासरतं दान्तं महायज्ञक्रियापरम् ।
न स्पृशंतीह पापानि महापातकजान्यपि ॥ इति ।

नन्वेवं स्वतः शुद्धानामपि पराचभोजनानुप्रविष्टपापानां कथं पर्षत्त्वम् । यो यस्यान्नं समश्नाति स तस्याश्नाति किल्विषम् इतिस्मरणादित्यत आह ।

**संप्रणीतः श्मशानेषु दीप्तोग्निः सर्वभक्षकः ।**
**तथा च वेदविद्विप्रः सर्वभक्षोपि दैवतम् ॥ २२ ॥**

यथा श्मशानेष्वनुप्रणीतः सर्वभक्षकोप्यग्निर्न दुष्यति नाग्निर्दहनकर्मणेतिस्मरणात् । तथा वेदविद्विप्रः सर्वत्र भुञ्जानोऽपि दैवतमेव भूदेव एव वेदाभ्यासेनैव तादृशदोषनाशनात् ।

तथा च श्रूयते ।

क्रयविक्रयाद्योनिदोषाद्भुक्त्वामोज्यात्प्रतिग्रहात् ।
असम्भोजनाच्चापि नृशन तत्पावमानीभिरहं पुनामीति ॥

यदुक्तम् त्रैलोक्यन्तारयन्तीति तद्दृष्टान्तेनोपपादयति ।

**अमेध्यानि तु सर्वाणि प्रक्षिप्यन्ते यथोदके ।**
**तथैव किल्विषं सर्वं प्रक्षिपेच्च द्विजानले ॥२३॥**

यथोदके गङ्गादिजले प्रविष्टैः स्नातुकामैः स्वशरीरजानि सर्वाण्यमेध्यानि स्वेदादीनि प्रक्षालनेन प्रक्षिप्यन्ते विनाश्यन्ते नच जलं तावता दुष्यति । नापो मूत्रपुरीषाभ्यामिति स्मरणात् किन्तु मलापनयनेन तान्पुनाति तथा निमित्ती स्वीयमशेषं पापं पर्षदुपविष्टे द्विजाग्नौ किल्बिषंदुष्कृतं प्रक्षिपेन्निवेदयेत् नैतावता पर्षद्दुष्यति पापं नश्यति तीर्थवदिति न्यायेनान्तरैव पापविनाशात् । किन्तु यथोक्तप्रायश्चित्तोपदेशान्निमित्तिनमुद्धरन्ति "एवं परिषदादेशान्नाशयेत्तत्र दुष्कृतमितिस्मरणात् । तस्मादुपपन्नन्तारयन्तीति ।

नन्वमन्त्रोऽनृच इत्यादौ को मन्त्रो विवक्षितो यं विना न ब्राह्मण्यमित्यत आह ।

**गायत्रीरहितो विप्रः शूद्रादप्यशुचिर्भवेत् ।**
**गायत्रीब्रह्मतत्वज्ञाः संपूज्यन्ते जनैर्द्विजाः ॥२४॥**

ब्रह्मणो वेदस्य तत्वं सारो वेदत्रयप्रसूतत्वात् ।

तथाच मनुः ।

त्रिभ्य एव तु वेदेभ्यः पादं पादमदूदुहत् ॥

तदित्यृचोस्याः सावित्र्याः परमेष्ठी प्रजापतिरिति ॥

गायत्र्येव ब्रह्मतत्व गायत्रीब्रह्मतत्व तज्जानातीति गायत्रीब्रह्मतत्वज्ञा द्विजाः जनैरिहामुत्र च सपूज्यन्ते गायत्र्याःब्रह्मतत्वप्रतिपादन गायत्र्युपासनामात्रस्य सर्वोपासनाफलकत्वप्रतिपादनार्थम् ।

अत एव वृहत्पराशरः ।

गायत्र्युपसिता येन तेनोपास्तं जगत्त्रयम् ।
गायत्रीमेव यो ज्ञात्वा सम्यगभ्यसते पुनः ॥
इहामुत्र च पूज्योऽसौ ब्रह्मलोकमवाप्नुयादिति ।

अन्यथा गायत्रीज्ञानरहितो विप्रो जातिमात्रेण ब्राह्मणोऽपि शूद्रादप्यशुचिः कर्मानधिकारी भवति अनेनान्वयव्यतिरेकाभ्यां गायत्रीमात्रस्यैव ब्राह्मण्यप्रयोजकत्व तदभावाच्च नामधारकत्वमित्युपक्रमोपसंहारयोरेकार्थत्वमुक्तम्भवति ।

ननु यथोक्तलक्षणविप्राभावे तादृशः क्षत्रियादिर्यदृह्यतां किंनि गुण विप्रोपादानेनेत्यत आह ।

**दुःशीलोऽपि द्विजः पूज्यो न तु शूद्रो जितेन्द्रियः ।**
**कः परित्यज्य गां दुष्टां दुहेच्छीलवतीं खरीम् ॥२५॥**

शीलाद् वृत्तात्सन्ध्यास्नानादेर्दुर्गतो दुःशीलो न तु निषिद्धकारी द्विजो द्वितीयजन्मवान् गायत्रीसंस्कृत इति यावत्स एव पूज्यः पूजार्हं न तु जितेन्द्रियोऽपि यथोक्ताचरणशीलोऽपि शूद्रः । तत्र दृष्टान्तः कः परित्यज्येत्यादिः शूद्रान्तानां ब्राह्मणव्यतिरिक्ताना त्रयाणामपि वर्णाना पर्षत्त्वनिषेधार्थम् ।

तथा च स्मृत्यन्तरम् ।
क्षत्रियो वाथ वैश्यो वा शूद्रो वा न कथञ्चन ।
प्रायश्चित्तविधानं हि कुर्वीतेति विदुर्बुधा इति ।

यदुक्तं स्ववृत्तिपरितुष्टास्त्रयोपि पर्षदिति । तत्रापेक्षितं विशेषणमाह ।

**धर्मशास्त्ररथाः रूढा वेदखड्गधरा द्विजाः ।**
**क्रीडार्थमपि यत्कुर्युः सधर्मः परमः स्मृतः ॥२६॥**

धर्मशास्त्रं मन्वादि तदेवरथः प्रायश्चित्ताभिधाननिर्वाहकत्वात् तत्रारूढास्तदेकाधिष्ठानाः वेद एव खड्गः परान्नभोजनादिजन्यपापनोद-कत्वात् ।

यथाह मनुः ।

हत्वा लोकानपीमांस्त्रीनश्नन्नपि यतस्ततः ।
ऋग्वेदं धारयन्विप्रो नैनः प्राप्नोति किञ्चनेति ।

तं धारयन्तीति वेदखड्गधारा द्विजा विप्राः यत् क्रीडार्थं हास्यार्थमपि कुर्युः सोऽपि परमो धर्मः किंपुनः पर्षदि नियुक्ताः पर्षद्धर्मं जानाना धर्मशास्त्रमवलोक्य यमर्थं ब्रूयुस्स धर्म इत्यत्र वक्तव्यमिति ।

एवं पर्षदो मुख्यानुकल्पभेदा अभिहितास्तेषु कल्पान्तरमप्याह ।

**चातुर्वैद्यो विकल्पीच अङ्गविद्धर्मपाठकः ।**
**त्रयश्चाश्रमिणो मुख्याः पर्षदेषा दशावरा ॥२७॥**

चतस्रो विद्या अधीत इति चातुर्वैद्यो वेदचतुष्टयाभिज्ञो विकल्पो धर्मपर्षत्प्रायश्चित्तानां प्रमाणं सोऽस्यास्तीति विकल्पी अङ्गवित् शिक्षादिषडङ्गाभिज्ञः धर्मपाठकोऽनेकधर्मशास्त्राभिज्ञः, एतद्गुणविशिष्टा मुख्या आद्या ब्रह्मचारिप्रभृतयस्त्रय आश्रमिणः आश्रमत्रयस्था न चतुर्थाश्रमाः ।

त्रयश्चाश्रमिणः पूर्वं पर्षदेषा दशावरेति मनुस्मरणात् ।
एषा दशावरा दशावरे यस्यां पर्षदि सा दशावरा पर्षत् ज्ञेया ।

तदाहाङ्गिराः ।

चातुर्वैद्यो विकल्पी च अङ्गविद्धर्मपाठकः ।
त्रयश्चाश्रमिणो वृद्धाः पर्षदेषा दशावरा ।
चतुर्णामपि वेदानां पारगा ये द्विजोत्तमाः ।
स्वैः स्वैरङ्गैर्विनाप्येते चातुर्वैद्या इति स्मृताः ।
धर्मस्य पर्षदश्चैव प्रायश्चित्तक्रमस्य च ।
त्रयाणां यः प्रमाणज्ञः स विकल्पी भवेद् द्विजः ।

शब्दे छन्दसि कल्पे च शिक्षायां च सुनिश्चितः ।
ज्योतिषामयने चैव सनिरुक्तोऽङ्गविद्भवेत् ।
वेदविद्याव्रतस्नातः कुलशीलसमन्वितः ।
अनेकधर्मशास्त्रज्ञः प्रोच्यते धर्मपाठकः ।
ब्रह्मचर्याश्रमादूर्ध्वं वृद्धा आश्रमिणस्त्रयः ।
वदेयुस्तस्य ते धर्मान् ये मया परिकीर्तिता इति ।

अत्र ब्रह्मचारिव्यतिरिक्ताना त्रयाणामाश्रमाणा वृद्धत्वपरिभाषणात् सन्यासिनामपि पर्षत्त्वमस्तीति गम्यते तदपि वेदव्रतेषु स्नातानामित्यनेन मूलाभ्यनुज्ञातत्वाद्विकल्पनीयम् ।

मनुस्तु प्रकारान्तरेणाह ।

त्रैविद्यो हैतुकस्तर्क्की नैरुक्तो धर्मपाठकः ।
त्रयश्चाश्रमिणः पूर्वे पर्षदेषा दशावरेति ।

हैतुकोऽनुमानज्ञः तर्क्की प्रमाणस्याप्रयोजकत्वोद्भावनेऽनिष्टप्रसञ्जकः नैरुक्तो निरुक्तिज्ञः, एषामपि पर्षत्पक्षाणां व्यवस्था पूर्वोक्तैव द्रष्टव्या।

यत्तु पूर्वोक्तेषु पर्षल्लक्षणेष्वनेन चातुर्वेद्यत्वादिगुणो विधीयत इति तन्न । उत्पत्तिशिष्टगुणावरुद्धेष्वेतेषु गुणान्तरनिवेशासम्भवादामिक्षावरुद्धे वैश्वदेवयागे वाजिनवत् निवेशे वा वेदवेदांगविदुषामित्याविशेषणैः पौनरुक्त्यादित्यलम् ।

एवमुक्तलक्षणप्रायश्चित्तोपयोगिपर्षन्निर्णीता तस्या दोषविशेषेण कर्तव्यविशेषमाह ।

**राज्ञश्चानुमते स्थित्वा प्रायश्चित्तं विनिर्दिशेत् ॥**
**स्वयमेव न कर्तव्यं कर्तव्या स्वल्पनिष्कृतिः ॥२८॥**

अत्र गोवधस्य प्रकृतत्वात्तत्समतदधिकपापेषु राजानुमतिं कृत्वा पर्षत्प्रायश्चित्तमुपदिशेत् । स्वयमेव राजानुमतिव्यतिरेकेण प्रायश्चित्ताभिधानं न कर्तव्यं पर्षदा गोवधादर्वाचीनेषु पापेषु निष्कृतिः प्रायश्चित्तोपदेशः स्वयमेव कर्तव्यः । तथा च देवलः ।

याचिता स्वेन ते वापि ब्राह्मणा पापभीरुणा ।
निष्कृतिं व्यवहारार्थं कुर्युस्तस्मै नृपाज्ञया ।
स्वयं वा ब्राह्मणैः कृच्छ्रमल्पदोषो विधीयते ।
राज्ञा च ब्राह्मणैश्चैव महत्सु सुपरीक्ष्य चेति ।
एवं पर्षत्कर्तव्यमुक्त्वा राज्ञोऽपि कर्तव्यमाह ।

**ब्राह्मणांस्ताननतिक्रम्य राजा कर्त्तुं यदीच्छति ॥**
**तत्पापं शतधा भूत्वा राजानमनुगच्छति ॥२९॥**

तान्पर्षदुपविष्टान् ब्राह्मणानतिक्रम्यावमत्य स्वयमेव राजा यदि प्रायश्चित्तोपदेशं कर्त्तुं वाञ्छति तदा तत्प्रायश्चित्तनिर्मित्तीभूतं पापं शतगुणीभूय राजानमनुगच्छतीति ॥ २९ ॥

उक्तलक्षणायाः पर्षदोऽग्रे स्वकं पापं निवेदयेदित्युक्तं ततः पर्षदा किं कार्यमित्यत आह ।

**प्रायश्चित्तं सदा दद्याद्देवतायतनाग्रतः ॥**
**आत्मकृच्छ्रंततः कृत्वा जपेद्वै वेदमातरम् ॥३०॥**

पूर्वोक्ता पर्षन्निमित्तिनं पापोक्तरीत्या पृष्ट्वा पर्षद्वृत्तिदानपूर्वके निमित्तिना स्वनिमित्ते निवेदिते वक्ष्यमाणप्रकारेण प्रायश्चित्तं दद्यात्। अत्र पर्षत्प्रायश्चित्तं दद्यात्युभयतो नियमोऽङ्गिरसास्पष्टी कृतः ।

आर्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः ।
जानन्तो न प्रयच्छन्ति तेषां ते समभागिनः ।
तस्मादार्तं समासाद्य ब्राह्मणं च विशेषतः ।
जानद्भिः पर्षदः पन्था न हातव्यः पराङ्मुखैः ॥
अनर्चितैरनाहूतैरपृष्टैश्च यथाविधि ।
प्रायश्चित्तं न दातव्यं जानद्भिरपि जल्पत इति ।

अनर्चितैरितिविशेषणाद्गन्धपुष्पादिभिः सप्तानामर्चनं कार्यमित्युच्यते । प्रायश्चित्तदानप्रकारोऽपि तेनैव स्पष्टीकृतः

तस्मिन्निवेदिते कार्ये निष्कास्यो हि स कार्यवान् ।
तस्मिन्नुत्सारिते पापे ये यथा धर्मपाठकाः

ते तथा तत्र जल्पेषु विमृशन्तः परस्परम् ।
आपद्धर्मेषु यत्प्रोक्तं यच्च सानुग्रहं भवेत् ।
अनुग्रहप्रकारश्च षष्ठाध्याये वर्णितः ।
पर्षदः सम्पदश्चैव कार्याणां च बलाबलम् ।
यथादेशं यथा कालं यच्च कार्यान्तरं भवेत् ।
पर्षत्समवेत्य तत्सर्वं प्रायश्चित्तं विनिर्दिशेत् ।
सर्वेषां निश्चितं यत्स्याद्यच्च प्राणान्न पीडयेत् ।
कार्यान्तरं वृद्धमातापित्रादि शुश्रूषा ।
आहूय तद्वदेदेको पर्षदा यो नियोजितः ।
ब्राह्मणो ब्राह्मणानां तु क्षत्रियाणां पुरोहितः
वैश्यानां याजकश्चैव प्रायश्चित्तं समादिशेत् ।
शृणु भोस्त्वमिदं विप्रैर्यदादिश्यते व्रतम् ।
तत्ते यत्नेन कर्तव्यमन्यथा तद्वृथा भवेत् ।
यदा त्वया भवेच्चीर्णं तदा शुद्धिप्रकाशनम् ।
कृत्वा कुर्यात् प्रयत्नेन शक्त्या विप्राभिपूजनमिति ।

शुद्धिप्रकाशनं सर्वान्ते वक्ष्यमाणलक्षणम् । एवं विधप्रायश्चित्तोपदेशे विशेषमाह । देवतायतनाग्रत इति । देवतायाः शिवविष्ण्वादेरायतनम्, तस्याग्रतः स्थित्वा प्रायश्चित्तमुपदिशेत् । देवतायतनं पुण्यतीर्थादेरुपलक्षणम् । एवं प्रायश्चित्तमुपदिश्य पर्षदः कर्तव्यमाह । आत्मकृच्छ्रमिति आत्मार्थं कृच्छ्रमात्मकृच्छ्रमात्मनः प्रायश्चित्तोपदेशजनितप्रत्यवायपरिहारार्थं प्रायश्चित्तमिति यावत् कृत्वा पर्षद्वेदमातरं गायत्रीं निमित्तानुसारेण जपेत् । वै शब्देन पवित्रान्तरं वाचयेत् । तथा च हारीतः ।

प्रायश्चित्तं तु निर्दिश्य कथं पापात्प्रमुच्यते ।
तत्पवित्रं विजानीयाज्जपेद्वा वेदमातरमिति ॥

अनुवादकस्य प्रायश्चित्तमाहाङ्गिराः ।

स्वगुरुः क्षत्रियाणां च वैश्यानां चाथ याजकः ।
प्रायश्चित्तं समादिश्य तप्तकृच्छ्रं समाचरेदिति ॥

नन्विदं पर्षदः प्रायश्चित्तविधानमनुपपन्नम् ।

आर्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः ।

जानन्तो न प्रयच्छन्ति ते तेषां समभागिन इति ।

प्रायश्चित्तावचने तस्या दोषस्मरणादितिचेत् । अत्र कश्चिच्चेदं प्रायश्चित्तं प्रायश्चित्तविधाननिमित्तम् । किन्तु पतितसम्भाषणादिनिमित्तमित्याह तन्न । वृद्धाः पृच्छन्ति किं कार्यमित्यादिना तदभ्यनुज्ञानात् । नाप्ययथाशास्त्र प्राश्चित्तविधाननिमित्त नित्यवच्छ्रवणविरोधात् । अत्रोच्यते । पर्षत्प्रवेशानन्तरं प्रायश्चित्तावचने दोषस्मरणेऽपि पर्षत्प्रवेशाभावे दोषास्मरणाद्रागप्राप्तपर्षत्प्रवेशनिमित्तमेवेदं प्रायश्चित्त यथा श्राद्धे निमन्त्रितस्य श्राद्धभोजने दोषसद्भावेऽपि श्राद्धाप्रवेशे न दोषः । प्रवेशे च रागकृते प्रायश्चित्तविधान तथा प्रकृतेऽपि, प्रायश्चित्ताख्यानेन निषेधानुमानं तूभयत्रापि समानमेव । श्राद्धे निमन्त्रितस्याभोजने तु प्रत्यवायमाह मनुः

केतितस्तु यथा न्याय हव्यकव्ये द्विजोत्तमः ।

कथं चिदप्यतिक्रामन्पापः शूकरतां व्रजेदिति ।

श्राद्धभोजनप्रायश्चित्तं त्वन्ते वक्ष्यते । तस्मात्पर्षत्प्रवेशो न कर्तव्यः प्रवेशे यथोक्तप्रायश्चित्तमुक्त्वा स्वयमपि पर्षत्प्रवेशनिमित्तं प्रायश्चित्त कर्तव्यमिति । अत एवाह मनुः

सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम् ।

अब्रुवन् विब्रुवन्वापि नरो भवति किल्बिषीति ।

एवं चतुष्पादे प्रायश्चित्ते आद्यपादद्वयमभिहितमपरं पादद्वयं तत्रतत्राभिधास्यन्त्याचार्याः । तदाहाङ्गिराः ।

उपस्थानव्रतादेशश्चर्या शुद्धिप्रकाशनम्

प्रायश्चित्तं चतुष्पादं विहितं धर्मकर्तृभिरिति ।

उपस्थानं पर्षदो व्रतादेशः प्रायश्चित्तोपदेशश्चर्या व्रतानुष्ठान शुद्धिप्रकाशनं गवा तृणादिदानेन । तत्र व्रतग्रहणप्रकारमाह विष्णुः ।

सर्वपापेषु सर्वेषां व्रतानां विधिपूर्वकम् ।
ग्रहणं सम्प्रवक्ष्यामि प्रायश्चित्त चिकीर्षताम् ।
दिनान्ते नखरोमादि प्रवाप्य स्नानमाचरेत् ।

नखरोमादिवपने विशेषं नवमाध्याये वक्ष्यति ।

भस्मगोमयमृद्वारि पञ्चगव्यादिकल्पितैः ।
मलापकर्षणं कार्यं बाह्यशौचप्रसिद्धये ।
दन्तधावनपूर्वेण पञ्चगव्येन संयुतम् ।

पञ्चगव्यप्रकारं श्चैकादशाध्याये वक्ष्यति ।

व्रतं निशामुखे ग्राह्य बहिस्तारकदर्शने ।
आचम्यातः परं मौनी ध्यायन् दुष्कृतमात्मनः ।
मनः सन्तापन तीव्रमुद्वहेच्छोकमन्ततः ॥ इति ।

वेदवेदाङ्गविदुषामित्यारभ्य जपेद्वै वेदमातरमित्यन्तेन ग्रन्थसन्दर्भेण यत्पर्षत्तदुपसत्त्यादिनिरूपणान्तदतीतानागताध्यायोक्तेषु प्रायश्चित्तेषु सर्वेष्वपि समानमवगन्तव्यम् ।

इदानीमध्यायादौ पृष्ट गोवधप्रायश्चित्तं प्रतिपादयिषुरादौ तदितिकर्तव्यतामाह ।

**सशिखं वपनं कृत्वा त्रिसन्ध्यमवगाहनम् ॥**
**गवां मध्ये वसेद्रात्रौ दिवा गाश्चाप्यनुव्रजेत् ॥३१॥**

शिखया सह वर्तमानं सशिखं यथा शिखापि न परिशिष्यते. तथेति यावत् । वपनं कृत्वा त्रिसन्ध्यमवगाहनं कुर्यात्सन्ध्यात्रये अपोऽवगाहेत रात्रौ गवां मध्ये वसेत् तिष्ठेत् शयीत दिवा गच्छन्तीः स्वागा अनुव्रजेदिति । अनुगमनं च गोश्चर्मैव प्रावृत्त्य कार्यम् । गोघ्नः सशिखं वपनं कृत्वा गोचर्मणा प्रावृतो गाश्चानुगच्छन् गोष्ठेशयो गाश्च दद्यादिति प्रचेतसः स्मरणात् । एतदुपसहारे न स्त्रीणामजिनं वास इत्यपवादासङ्गतेश्च। इदमेव प्रायश्चितमाह च्यवनः । प्राजापत्यं गोवधप्रायश्चित्तं नखरोमाणि छित्त्वा त्रिषवणी गवामनुगमनसहशयने सुमहत्तराणि रथ्यासु वारयेद्गन्ते ब्राह्मणभोजनमिति । इदं च सशिखवपनं

वक्ष्यमाणचतुष्पादप्राजापत्याभिप्रायेण नैकपादादौ तत्र तत्र विशेषस्मरणात् तथाचापस्तम्बः ।

पादे तु नखरोमाणि द्विपादे श्मश्रुणोऽपि च ।
त्रिपादे तु शिखा धार्या चतुर्थे सशिख स्मृतमिति ॥
वक्ष्यति च स्वयमप्यग्रिमाध्याये पादेऽङ्गरोमवपनमित्यादि ।

किञ्च ।

**उष्णे वर्षति शीते वा मारुते वाति वा भृशम् ।**
**न कुर्वीतात्मनस्त्राणं गोरकृत्वा तु शक्तितः ॥ ३२ ॥**

उष्णे निदाघे वर्षति वृष्टौ शीते हिमे मारुते वा वाति सति गवां त्राणमुष्णादिनिवारणोपायं छायादि यथाशक्त्यकृत्वा आत्मनो न कुर्वीत भृशमत्युष्णादीना सर्वेषां विशेषणं न मारुतस्यैव स्वल्पस्यापरिहार्यत्वात् ।

किञ्च ।

**आत्मनो यदि वाऽन्येषां गृहे क्षेत्रेऽथ वा खले ।**
**भक्षयन्तीं न कथयेत्पिबन्तं चैव वत्सकम् ॥ ३३ ॥**

स्वीयेषु परकीयेषु वा गृहक्षेत्रे खलेषु तृणधान्यादिभक्षयन्तीं गां स्तन्यं पिबन्तं वत्सं चान्यस्मै निवारणाय नाचक्षीत पराख्यानिषेधेन स्वयं तद्वारणं दूरापेतमेव ।

किञ्च ।

**पिबन्तीषु पिबन् तोयं संविशन्तीषु संविशेत् ।**
**पतितां पङ्कलग्नां वा सर्वप्राणैः समुद्धरेत् ॥ ३४ ॥**

स्वयमतितृषितोऽपि गवां जलपानात्प्रग् जलं न पिबेत् किं तु तासु पिबन्तीष्वेव तथा विरक्तिगतिभ्यामतिश्रान्तोपि गोःसंवेशनात्प्राक् स्वयं न संविशेत्किं तु तासु संविशन्तीष्वेव तथा यत्र क्वापि पतितां पङ्के वा लग्नां गां सर्वप्राणैः प्राणाधिकैरपि प्रयत्नैः समुद्धरेत् ।

ननु गवोद्धरणे मृतस्य प्रक्रान्तप्रायश्चित्तसमाप्त्यभावेन शुद्धिर्न स्यादित्यत आह ।

**ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान् परित्यजेत् ।**
**मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च ॥३५॥**

गोब्राह्मणयोश्चोरव्याघ्रादिभिर्व्यापाद्यमानयोस्त्राणार्थे प्रवृत्तस्य-तदकृत्वैव यदि स्वप्राणान् परित्यजेत्तदापि ब्रह्महा ब्रह्महत्याया मुक्तो भवति, अथवान्वेव तौ गोपायितापि शुध्यत्येव, ननु गवोद्धरणे मृतस्य गोहत्यानपगमाशङ्कायां ब्रह्महत्याया मुच्यत इत्युत्तरमसङ्गतम् । सत्यम् । कैमुतिकन्यायेन तस्योत्तरत्वात् । तथाहि । सर्वगोब्राह्मणत्राता ब्रह्महापि विशुध्यति तत्र किं वक्तव्यं गोघ्नः शुद्धतीति । यद्वा यथा ब्रह्महा गोब्राह्मणत्राता शुध्यति तथायमपीति दृष्टान्तत्वेनास्यात्रोपन्यास इति नानुत्तरत्वम् । एवमङ्गान्यभिधायाङ्गिनमाह ।

**गोवधस्यानुरूपेण प्राजापत्यं विनिर्दिशेत् ।**
**प्राजापत्यं ततः कृच्छ्रं विभजेत चतुर्विधम् ॥३६॥**

पूर्वोक्तेऽकामकृते गोवधे वक्ष्यमाणलक्षणं प्राजापत्यं प्रायश्चित्तत्वेन पूर्वोक्ता पर्षद्विर्निर्दिशेत् । ततो निर्देशानन्तरं गोवधस्यानुरूपेण वक्ष्यमाणलक्षणचतुर्विधगोवधतारतम्यानुसारेण निर्दिष्टप्राजापत्यकृच्छ्रमनन्तरोक्ताभिश्चतसृभिर्विधाभिर्विभजेत । वक्ष्यमाणप्रकारेण व्यवस्थापयेत् । पुनः प्राजापत्यपदं प्रसिद्धप्राजापत्यादस्य वैलक्षण्यद्योतनाय ।

तदाह ।

**एकाहमेकभक्ताशी एकाहं नक्तभोजनः ।**
**अयाचितमेकमहरेकाहं मारुताशनः ॥ ३७ ॥**
**दिनद्वयं चैकनक्तो द्विदिनं नक्तभोजनः ।**
**दिनद्वयमयाचीस्याद्द्विदिनं मारुताशनः ॥३८॥**
**त्रिदिनं चैकभक्ताशी त्रिदिनं नक्तभोजनम ।**
**दिनत्रयमयाची स्यात्त्रिदिनं मारुताशनः ॥३९॥**

**चतुरहस्त्वेकभक्ताशी चतुरहं नक्तभोजनम् ।**
**चतुर्दिनमयाची स्याच्चतुरहं मारुताशनम् ॥४०॥**

एकभक्तनक्तायाचितोपवासैः क्रमानुष्ठितैरेकाविधा सम्पद्यते तैरेव स्वस्थानविवृद्ध्या द्विगुणीभूतैर्द्वितीया त्रिगुणीभूतैस्तृतीया चतुर्गुणीभूतैश्चतुर्थीति ता एताश्चतस्रोऽपि प्राजापत्यविधा वक्ष्यमाणेषु रोधादिनिमित्तेषु वक्ष्यमाणप्रकारेण व्यवस्थाप्याः । यद्यप्ययमखिलोऽप्यर्थोऽग्रिमाध्यायेनैव सिध्यति तथाप्यनुपपन्नस्य विनियोगासम्भवादत्रोत्पन्नस्य व्रतस्य तत्र विषयविशेषसमर्पणमित्यपुनरुक्तिः । यत्त्वत्र गोवधसामान्यप्रायश्चित्तमुच्यते तत्र तु रोधादिनिमित्तविशेषेणेति तत्र निमित्तविशेषाणां प्रायश्चित्तविशेषाक्रान्तत्वेन सामान्यप्रायश्चित्तस्य निर्विषयत्वापातात् । तस्मादुक्तमेव साधीय इति ।

इदानीं व्रतोत्तराङ्गमाह ।

**प्रायश्चित्ते ततश्चीर्णे कुर्याद् ब्राह्मणभोजनम् ।**
**विप्राणां दक्षिणां दद्यात्पवित्राणि जपेद् द्विजः ॥४१॥**

एवं यथोक्ते प्रायश्चित्ते कृते तत्संपूर्णतायै ब्राह्मणभोजनं कुर्यात् भुक्तवद्भ्यो ब्राह्मणेभ्यश्च यथाशक्ति दक्षिणा दद्याद् द्विजश्चेन्निमित्ती पवित्राणि पवमानसूक्तादीन्यपि जपेन्नान्यः । विप्राणामितिबहुवचनात्कपिञ्जलाधिकरणन्यायेन त्रित्वे पर्यवसानं दक्षिणाजपयोस्तु शक्त्या व्यवस्थेति ।

एवं वेदवेदाङ्गविदुषामित्यादिनोपस्थानव्रतादेशनचर्यात्मकान् त्रीन् प्रायश्चित्तपादानभिधायेदानीं शुद्धिप्रकाशनरूपं चतुर्थं पादमाह ।

**ब्राह्मणान् भोजयित्वा तु गोघ्नः शुध्येन्न संशयः ।**

प्रायश्चित्ताङ्गब्राह्मणभोजनानन्तरं स्वशुद्धिप्रकाशनाय यथासंभवं ब्राह्मणान् ज्ञातींश्च भोजयित्वा गोघ्नः शुध्यतीत्यत्र संशयो न कार्यः । संशयनिषेधवचनं तु मन्वाद्युक्तगुरुप्रायश्चित्तश्रद्धाजाड्येनाल्पेऽस्मिन्नभक्तिनिरासायेति ।

यावत्यो गोपिकाः स्युस्तदनुगुणतया तावतीरात्ममूर्त्तीः
कृत्वा प्रत्येकमासां करकलितकरो मण्डलीकृत्य नृत्यन् ।
तिर्यक्पादं विवृत्त्याऽधिकमभिमुरलि व्यग्रवक्त्रः सदास्मा
नेकच्छिद्रापिधानव्यसनिकरपुटः पातु मध्येऽनिरुद्धः ॥ १ ॥
धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृते विहितो विचारो
ऽध्यायेऽष्टमे निखिलगोवधशुद्धिसिध्यै ॥ २ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायामष्टमोऽध्यायः ।

॥ श्रीगणेशायनमः ॥

यद्यत्कापुरुषादनुव्रजनतस्तच्चित्तसंरक्षणात्
तत्तद्वागनुवादतश्च विबुधाः लिकश्यन्ति लब्धुं प्रियम् ॥
तत्सर्वं पुरुषोत्तमाद्वयमनायासेन लिप्सामहे
भक्तिस्तच्चरणद्वये ऽप्रतिहता यद्यस्ति किं दुर्लभम् ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
शास्त्रे पराशरकृते क्रियते व्यवस्था
ऽध्यायेऽष्टमेऽत्र नवमे विहितव्रतानाम् ॥

एवमष्टमाध्याये ऽभिहितानां व्रतविधानां निमित्तविशेषे व्यवस्थापनाय नवमाध्यायमारभते । तत्रादौ निमित्तविशेषे प्रायश्चित्तनिमित्ततामपवदति ।

गवां संरक्षणार्थाय न दुष्येद्रोधबन्धयोः ।
तद्वधं तु न तं विद्यात्कामाकामकृतं तथा ॥ १ ॥

गवां सम्यग्रक्षायै श्वशृगालादिभयनिवृत्त्यै रात्रौ यो रोधः शालादौ प्रतिबन्धो यश्च बन्धो रज्ज्वादिना नियन्त्रणं तयोः क्रियमाणयोः सतोः यदि गवां मरणं स्यात्तदा तत्कर्ता न दुष्यच्चदोषभाक् भवति तत्र हेतुमाह यतस्तं रोधादिव्यापारं तासां गवां वधं निषिद्धं न विद्यात् । तस्य फलमाह । कामाकामाभ्यामुत्पन्ने निमित्ते कृत्त प्रायश्चित्त तथा न विद्यात् । एवं भयशङ्काभावेऽपि स्वेच्छया लोभादिना बद्धानां गवां बन्धनयोक्त्रादिना मरणे पूर्वोक्तप्रायश्चित्तस्य विषये नेत्येतदाहाङ्गिराः ।

सायं सङ्गोपनार्थं तु न दुष्येद्रोधबन्धयोरिति ।

अकामतो रोधादावुक्तप्रायश्चित्तस्य कामतो द्वैगुण्यमाह ।

दण्डादूर्ध्वं यदन्येन प्रहाराद्यदि पातयेत् ।
प्रायश्चित्तं तदा प्रोक्तं द्विगुणं गोवधं चरेत् ॥ २ ॥

दण्डाद् अङ्गुष्ठमात्रस्थूलइत्यादिवक्ष्यमाणलक्षणात् ऊर्ध्वमधिकप्रमाणेनान्येन लगुडादिना प्रहारात् प्रहृत्य यदि गाम्पातयेत् घातयेत्तदा अकामतो घाते यत्प्रायश्चित्तं प्रोक्तं पूर्वाध्याये प्रतिपादितं तत्कामतो घाते द्विगुणं चरेत् घात इति रोधादीनामप्युपलक्षणम् । तथा चैव फलति । अकामतो रोधे एकः पादः कामतो द्वौ अकामतो बन्धने द्वौ पादौ कामतश्चत्वारः अकामतो योक्त्रे त्रयः पादाः कामतः षट्, अकामतो घाते प्राजापत्यम् कामतो द्वाविति । यद्यप्यत्र कामत इति न श्रूयते तथाप्यकामकारप्रायश्चित्तस्य द्वैगुण्यविधानं कामकारविषयमिति गम्यते ।

विहितं यदकामानां कामात्तद्द्विगुणं भवेदितिस्मरणात् ।
यथाकामानुबन्धेन व्रतद्वैगुण्यं तथा गोगुणानुबन्धेनापि ज्ञेयम् ।

तदाह बृहस्पतिः ।

गर्भिणीं कपिलां दोग्ध्रीं होमधेनुं च सुव्रताम् ।
खड्गादिना घातयित्वा द्विगुणं व्रतमाचरेदिति ॥

इदानीमुक्तप्राजापत्यविधानं निमित्तविशेषे व्यवस्थापनाय तद्भेदमुपन्यस्यति ।

**रोधबन्धनयोक्त्राणि घातश्चेति चतुर्विधम् ।**

वक्ष्यमाणलक्षणानि रोधादीनि घातश्चेति चतुर्विधम् वधनिमित्तमिति शेषः । तत्र प्रायश्चित्तव्यवस्थामाह ।

**एकपादं चरेद्रोधे द्वौ पादौ बन्धने चरेत् ॥ ३ ॥**
**योक्त्रेषु हीनपादं स्याच्चरेत्सर्वं निपातने ।**

पूर्वाध्याये षोडशरात्रः कृच्छ्रो विहितः तस्य तत्रोक्तपादकल्पनयैवात्र रोधादिनिमित्तेषु वधेषु प्रायश्चित्तान्यवगन्तव्यानि ।

तानि चेत्थम् । एकभक्तनक्तायाचितोपवासैः क्रमानुष्ठितैरेकः पादो रोधे कार्यः । तैरेव स्वस्थानविवृद्धैर्द्विगुणैर्द्वौ पादौ बन्धने कार्यौ ।

त्रिगुणैस्त्रयः पादा योक्त्रे कार्याः । चतुर्गुणैः सर्वं प्राजापत्यं निपातने कार्यमिति ।

तदाहापस्तम्बः ।

एकभक्तेन नक्तेन तथैवायाचितेन च ।
उपवासेन चैकेन पादकृच्छ्र उदाहृतः ॥
एकपादं चरेद्रोधे द्वौ पादौ बन्धने चरेत् ।
योजने पादहीनं स्याच्चरेत्सर्वं निपातने इति ।

इदं चाऽकामतो रोधादौ ज्ञेयम् । पूर्वाध्यायादावकामत इत्युपक्रम्यास्याभिधानात् । कामतस्त्वेतदेव द्विगुणमित्युक्तमेवं दण्डादूर्ध्वमित्यनेन घाते त्वकामकृतेऽपि वयोविशेषेणैतद्व्यवस्थामाह बृहत्प्रचेताः ।

एकवर्षे हते वत्से कृच्छ्रपादो विधीयते ।
अबुद्धिपूर्वं पुंसः स्याद्द्विपादस्तु द्विहायने ।
त्रिहायने त्रिपादः स्यात्प्राजापत्यमतः परमिति ।
कामतो घाते त्वनयैव दिशा द्वैगुण्य कल्प्यम् ।

यद्यपि रोधादौ गोवयोविशेषो न श्रूयते तथापि चतुर्हायनघाते प्राजापत्यदर्शनात् तादृशस्यैव रोधादौ पादकृच्छ्रादीति ज्ञेयम् । तथा चैकवर्षादीनां घाते पादकृच्छ्रादिविधानात् रोधादौ पादकृच्छ्राणां तुरीयांश एकोपवासादिः कल्प्यः । तथा एकवर्षस्य रोधे द्वावुपवासौ बन्धे चत्वारः योजने षट् घाते द्वौ पादौ । त्रिवर्षस्य रोधे त्रय उपवासा बन्धे षट् योजने नव घाते त्रयः पादाः चतुर्वर्षस्य रोधे एकः पादौ बन्धे द्वौ योजने त्रयः घाते प्राजापत्यमिति कामतस्तु तत्तदेव द्विगुणमिति समुदायार्थः । इदमित्थमेव व्याख्येयम् । अन्यथा चतुर्हायनरोधादौ ये पादकृच्छ्रादयस्त एवैकहायनादिरोधादिष्वपीति विरोधापातात् ।

इदानीमुद्दिष्टस्य रोधस्य स्वरूपमाह ।

**गोवाटे वा गृहे वापि दुर्गेष्वप्यसमस्थले ॥ ४ ॥**
**नदीष्वथ समुद्रेषु त्वन्येषु च नदीमुखे ।**
**दग्धदेशे मृता गावस्तम्भनाद्रोध उच्यते ॥ ५ ॥**

गोवाटे गोष्ठे गृहे शालायां दुर्गेषु पर्वतादिसङ्कीर्णमार्गेषु असमस्थले निम्नोन्नतप्रदेशस्थले नदीसमुद्रयोर्मध्ये नदीसमुद्रशब्दौ तत्तीरमुपलक्षयतः। तेन यत्र बहूनां गवामाकस्मिकनदीवृध्या समुद्रवृद्ध्या च गवामुपघातो भवति तादृशस्थलमुच्यते। अन्येषु वाप्यादिषु नदीसमुद्रसङ्गमे दग्धदेशे चाग्न्यादिसन्तप्ते देशे च स्तम्भनाद्गावो मृता भवन्ति इति तत्स्तम्भनं रोध इत्युच्यते।

बन्धनस्वरूपमाह।

**योक्त्रदामकदोरैश्च कण्ठाभरणभूषणैः।**
**गृहे वापि वने वापि बद्धः स्याद्गौर्मृतो यदि ॥ ६ ॥**
**तदेव बन्धनं विद्यात्कामाकामकृतं च यत्।**

योक्त्रं पाशः दामकं शकटयुगसम्बद्धं ग्रैवेयकं दोरो रज्जुमात्रं कण्ठाभरणं घण्टा किङ्किण्यादि भूषणं ललाटपट्टिकाचामरवराटकादि एतैर्बद्धो गौर्गृहे वने वा यदि मृतः स्यात् म्रियेत तदा तत् मरणनिमित्तं योक्त्रादिकमत्र बन्धनमित्युच्यते। तच्च द्विविधं मरणाभिसन्धिना योक्त्रादियोजनं कामकृतं बन्धनं तदनभिसन्धिना चाकामकृतमिति।

योक्त्रस्वरूपमाह।

**हले वा शकटे पङ्क्तौ पृष्ठे वा पीडितो नरैः ॥ ७ ॥**
**गोपतिर्मृत्युमाप्नोति योक्त्रो भवति तद्वधः।**

हलशकटयोर्योजनेन, पङ्क्तौ गले मेटीबन्धनेन, गोण्यद्यारोपणेनातिपीडितः क्षुतृष्णाश्रमाद्यनपनयनेनातिवाहितो गोपतिर्बलीवर्द्दो यदि म्रियेत तदाऽसौ वधो योक्त्रो भवति। इदं च दमनादीनामप्युपलक्षणम्।

दमने दामने रोधे सङ्घाते चैव योजने।
नस्तः सकलपाशैर्वा मृते पादोनमाचरेत्।

इत्यापस्तम्बस्मरणात्।

अशिक्षितबलीवर्दस्य भारोद्वहनशिक्षणं दमनम्। मेढ्यां बद्धस्य खलस्थितधान्यमर्दनाय प्रचारणं दामनं रोधो मक्ष्यमाणधान्यभक्षणनिवा-

रणाय मुखबधनं सङ्घातः समर्दः योजनं द्विवाणां गवां परस्परमलबन्धः नस्तो नासिकाया दोरप्रवेशनं सकलपाशा इतराणि बन्धनानि एतैरतिपीडया मृते पादोनकृच्छ्रमिति ।

घातस्वरूपमाह ।

**मत्तः प्रमत्त उन्मत्तश्चेतनो वाप्यचेतनः ॥ ८ ॥**
**कामाकामकृतक्रोधो दण्डैर्हन्याद्‍थोपलैः ।**
**प्रहृता वा मृता वापि तद्धि हेतुर्निपातने ॥ ९ ॥**

मत्तो धनादिना प्रमत्तो मद्यादिपानेन परवशः उन्मत्तः पञ्चविधोन्मादाविष्टः स यदि चेतनः सावधान अचेतनो असावधानो वा कामाकामकृतक्रोधो घातनेच्छाकामस्तदभावश्चाकामस्ताभ्यां कृतः क्रोधो यस्य तादृशः दण्डोपलादिभिः हन्यात्ताडयेत्तेन ताडनेन प्रहृता व्यथिता मृता यदि गौः तत्ताडनमेव निपातने हेतुर्घात इत्यर्थः । अयमर्थः मत्तादिः सावधानः कामतः क्रोधेन यदि गां ताडयेत्तदा ताडनमेव गोर्घातो यद्यसावधानो ऽकामतः क्रोधेन प्रमापयति तदा तदेवेत्युभयमपि घात इति । यद्यपि ताडनप्रमापणयोस्तुल्यत्वं न सम्भवति तथापि मरणोद्देशेन ताडितायाः दैवाज्जीवनेऽपि मरणप्रायश्चित्तातिदेशात्तुल्यत्वम् ।

तथा च याज्ञवल्क्यः । चरेद्व्रतमहत्वापि घातार्थं चेत्समाहित इति । नचात्रातिदेशात्पादोनं व्रतं चरेत्सर्वं निपातन इत्युपदेशात् ।

यदुक्तं दण्डादूर्ध्वमिति तत्राकाङ्क्षितं दण्डलक्षणमाह ।

**अङ्गुष्ठमात्रस्थूलस्तु बाहुमात्रः प्रमाणतः ।**
**आर्द्रस्तु सपलाशश्च दण्ड इत्यभिधीयते ॥ १० ॥**

अङ्गुष्ठप्रमाणोऽङ्गुष्ठमात्रो यावान् स्थूलः, तेनाधिकस्थौल्यव्यावृत्तिः प्रमाणतो दैर्घ्येण बाहुमात्रो बाहुप्रमाणः तेनाधिकदैर्घ्यव्यावृत्तिः, आर्द्रत्वं सपलाशत्वं च छेदनानुत्पत्त्यर्थं सपलाशत्वेनार्द्रत्वसिद्धौ पुनरुपादानं सत्वत्त्वबोधनाय तादृशोऽत्र दण्डोऽभिधीयते इति ।

कृशस्य गोर्यथोक्तदण्डेन ताडितस्य मरणेपि क्वचित्प्रायश्चित्ताभावमाह ।

**मूर्च्छितः पतितो वापि दण्डेनाभिहतः स तु ।**
**उत्थितस्तु यदा गच्छेत् पञ्च सप्त दशाथ वा ॥ ११ ॥**
**ग्रासं वा यदि गृह्णीयात्तोयं वापि पिबेद्यदि ।**
**पूर्वं व्याध्युपसृष्टश्चेत् प्रायश्चित्तं न विद्यते ॥ १२ ॥**

यो गौः पूर्वमेव व्याध्युपसृष्टो यथोक्तदण्डेन ताडितो मूर्च्छितः पतितो वा भवति स एव पुनरुत्थितः सन् पञ्च सप्त दश वा पदानि गच्छति अथोत्थातुमशक्तस्तत्रैव ग्रासं तृणादिकं वा भक्षयेत् भक्षयितुमपि अशक्तः तोयं वा यदि पिबेत् पश्चान्म्रियेतापि तदा ताडयितुः प्रायश्चित्तं सपूर्णं न भवति किन्त्वर्धमेव पूर्वव्याधिकृतत्वान्मरणस्य सर्वथाप्यताडने वारणाद्यसम्भवाच्च । उत्थानाद्यन्यतममकृत्वा प्रहारानन्तरमेव मरणे तु प्रायश्चित्तं भवतीत्यर्थादेव सिद्धम् ।

तत्र विशेषमाह यमः ।

अतिवृद्धामतिकृशामतिबालां च रोगिणीम् ।
हत्वा पूर्वविधानेन चरेदर्द्धं व्रतं द्विज इति ॥

गोगर्भवधे प्रायश्चित्तमाह ।

**पिण्डस्थे पादमेकं तु द्वौ पादौ गर्भसंमिते ।**
**पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनम् ॥ १३ ॥**

चतस्रो गर्भावस्थाः पिण्डः संमितः अचेतनः सचेतनश्चेति तत्र गर्भाशयगतं शुक्रं कललबुद्बुदादिक्रमेणार्धमासेन पिण्डत्वमापद्यते सा प्रथमा स एव मासमात्रेण दीर्घमापन्नो गर्भः संमित इत्युच्यते । गर्भमध्येसम्यक् मितो दृढीभूत इति यावत् सा द्वितीया स च मासानन्तरमासप्तममासमचेतनः सा तृतीया । तदनन्तरं सप्तमे मासि प्राणवायुसञ्चाररूपां चेतनामापन्नः सचेतनो भवति सा चतुर्थी । तत्र क्रमेणावस्थात्रयस्थगर्भवधे यथोक्तप्राजापत्यस्यैकद्वित्रिपादा भवन्ति । चतुर्थावस्थवधे त्वग्रे वक्ष्यति ।

तथा च षट्त्रिंशन्मते

पाद उत्पन्नमात्रेतु द्वौ पादौ वृद्धतां गते ।
पादोन व्रतमुद्दिष्टं हत्वा गर्भमचेतनमिति ॥

पादकृच्छ्रादिषु वपने विशेषमाह ।

**पादेऽङ्गरोमवपनं द्विपादे श्मश्रुणोऽपि च ।**
**त्रिपादे तु शिखावर्जं सशिखन्तु निपातने ॥ १४ ॥**

अङ्गरोम्णां कक्षाधः स्थितानां वपनं तत्पादकृच्छ्रे । अपिचेत्येवार्थे श्मश्रुण एव वपनं कृच्छ्रार्द्धे । त्रिपादकृच्छ्रे शिखावर्जं वपनम् । निपातयति चतुरोऽपि पादानिति निपातनः कृच्छ्रस्तस्मिन् सशिखं वपनमिति । रोमपदं नखोपलक्षणार्थम् ।

तथाचापस्तम्बः ।

पादे तु नखरोमाणि द्विपादे श्मश्रु वापयेत् ।
त्रिपादे तु शिखा धार्या चतुर्थे सशिखं स्मृतमिति ॥
शिखाधारणमपि स्त्रीशूद्रव्यतिरिक्तानाम् ।
शिखा यज्ञोपवीतं च कुशा मौनं तथैव च ॥
वेदाध्ययनभैक्ष्ये च स्त्रीशूद्रपतनानि षड् ॥

इति धर्मप्रदीपस्मरणात् ।

प्रमादात्तत्रापि शिखानाशे विशेषः काठकगृह्ये ।

अथ चेत्प्रमादाद्वि शिखः स्यात्तदा कौशीं शिखां ब्रह्मग्रन्थिसमन्वितां दक्षिणकर्णोपर्योशिखाबन्धाद्वधत्तिष्ठेदिति ।

वपनवत्पर्षद्दक्षिणायामपि विशेषमाह ।

**पादे वस्त्रयुगं चैव द्विपादे कांस्यभाजनम् ।**
**त्रिपादे गोवृषं दद्याच्चतुर्थे गोद्वयं स्मृतम् ॥ १५ ॥**

पादकृच्छ्रे वस्त्रयुगं तु उत्तरीयान्तरीयरूपं अर्द्धकृच्छ्रे पूर्णाहाराधारणं कांस्यपात्रं पादन्यूने गोवृषं बलीवर्द्दं पूर्णकृच्छ्रे गोद्वयं धेनुवृषभौ वचनात् ।

विष्णुस्तु द्विपादे तैलङ्काञ्चनमित्याह ।

इदानीं चतुर्थावस्थागोगर्भे चेत्प्रायश्चित्तमाह ।

**निष्पन्नसर्वगात्रस्तु दृश्यते वा सचेतनः ॥**
**अङ्गप्रत्यङ्गसंपूर्णे द्विगुणं गोव्रतं चरेत् ॥ १६ ॥**

यो गर्भो निष्पन्नसर्वाङ्गः स सप्तमे मासि सचेतनश्च भवत्यसावङ्गप्रत्यङ्गसंपूर्णः तस्मिन् हते द्विगुणं गोहत्याव्रतं पूर्वोक्तं प्राजापत्यद्वयं चरेत् ।

तथाच षट्त्रिंशन्मते ।

अङ्गप्रत्यङ्गसपूर्णे गर्भे चेतः समन्विते ।
द्विगुणं गोव्रतं तत्र एषा गोघ्नस्य निष्कृतिरिति ॥

ननु वध्यगर्भस्य वयोवस्योत्कर्षेण प्रायश्चित्ताधिक्ये प्रसवानन्तवत्सहननेन इतोऽपि प्रायश्चित्तमधिकं स्यात्तथाचैकवर्षे हते वत्से कृच्छ्रपादो विधियत इति विरुध्येत । नच गर्भस्यहनने द्विगुणं व्रतं निर्गतहनने च पादकृच्छ्रमिति युज्यते वयोवस्थाया उत्कृष्टत्वात् । तस्मादिदं तत्तदस्यगर्भवतीहननविषयमस्तु । एवं च गर्भिणीहनने बार्हस्पत्यं व्रतद्वैगुण्यमपि घटते इति चेत् । मैवम् । हत्वा गर्भमचेतनमिति वचनविरोधात् । नच न्यायविरोधः ब्राह्मणवधे सवनस्थतारूपनिमित्तस्येव गोवधे गर्भस्यसचेतनतारूपनिमित्तस्यापि प्रायश्चित्तद्वैगुण्यापादकत्वे बाधकत्वाभावात् । तस्माद्गर्भवधे एवेदं न गर्भिणीवधे इति स्थितम् ।

अवयवविशेषोपघातेप्रायश्चित्तविशेषमाह ।

**पाषाणेनैव दण्डेन गावो येनाभिघातिताः ।**
**शृङ्गभङ्गे चरेत्पादं द्वौ पादौ नेत्रघातने ॥ १७ ॥**
**लाङ्गूले पादकृच्छ्रं तु द्वौ पादावस्थिभञ्जने ।**
**त्रिपादं चैव कर्णे तु चरेत्सर्वं निपातने ॥ १८ ॥**

येन पुंसा पाषाणेन तत्साहचर्यादशास्त्रीयेण दण्डेन वा गावस्ताडिता असौ शृङ्गनेत्रोपघातयोः पादार्द्धकृच्छ्रौ चरेत् । तथा लाङ्गूले

लाङ्गूलच्छेदे पादाद्यस्थिभङ्गे च पादार्धकृच्छ्रं चरेत् कर्णे कर्णच्छेदे पादोनं प्राजापत्यं निपातने शृङ्गादिभङ्गरुजैव कालान्तरे गोमरणे च सर्वप्राजापत्यं चरेत् ।

यत्वङ्गिरसा ।

अस्थिभङ्गं गवां कृत्वा लाङ्गूलच्छेदनं तथा ।
पातनं चैव शृङ्गस्य मासार्द्धं यावकं पिबेदित्युक्तम् ।

यदपि शृङ्गादिभङ्ग न तत् कालान्तरमरणविषयमेवेति ज्ञेयम् ।

किं तत्कालान्तरमित्यपेक्षित आह ।

**शृङ्गभङ्गे ऽस्थिभङ्गे च कटिभङ्गे तथैव च ।**
**यदि जीवति षण्मासान्प्रायश्चित्तं न विद्यते ॥ १९ ॥**

शृङ्गास्थिकटिभङ्गेषु तथैव कर्णाक्षिपुच्छत्वक्च्छेदेषु च यदि षण्मासान् जीवति पश्चान् म्रियते तदा शृङ्गादिभङ्गकृतमरणनिमित्तं प्रायश्चित्तं प्राजापत्यरूपं न भवति ।

किन्तु शृङ्गादिभङ्गनिमित्तं पादकृच्छ्राद्येव अनेन शृङ्गादिभङ्गानन्तरं षण्मासाभ्यन्तरमरणे तन्निमित्तं प्राजापत्यं भवत्येवेत्युक्तं भवति ।

शृङ्गादिभङ्गेषु कर्तव्यान्तरमप्याह ।

**व्रणभङ्गे च कर्तव्यः स्नेहाभ्यङ्गस्तु पाणिना ।**
**यवसश्चोपहर्तव्यो यावद्दृढबलो भवेत् ॥ २० ॥**

व्रणस्त्वक्छेदो भङ्गः शृङ्गादेस्तयोः समाहारो व्रणभङ्गं तस्मिंश्चिकित्सार्थं स्वपाणिना स्नेहाद्यौषधाभ्यङ्गः कर्तव्यः यवसोऽभिनवं तृणमन्यदपि हितं भक्ष्यमुपहरेत् यावद्यथा पूर्वबलस्ताडिता गौर्भवति तस्मिंश्चिव्रणे व्रतोत्तराङ्गं समाप्यमिति ।

यवसश्चोपहर्तव्यो यावद्रोहेच्च तद्व्रणम् ।
सम्पूर्णे दक्षिणादद्यात्ततः पापात्प्रमुच्यते ॥

तदाह शङ्खः ।

एवं चिकित्सितस्य जीवनानन्तरं कर्तव्यमाह ।

**यावत्संपूर्णसर्वाङ्गस्तावत्तं पोषयेन्नरः ।**

**गोरूपं ब्राह्मणस्याग्रे नमस्कृत्वा विसर्जयेत् ॥ २१ ॥**

न केवलं बलाधानपर्यन्तमेव चिकित्सादिकरणं किन्तु यावद्व्रणाद्युपेतमङ्गं सर्वं संपूर्णावयवं भवति तावत्तं पोषयित्वानन्तरं प्रकृतावस्थं गोरूपं यस्य कस्यापि ब्राह्मणस्याग्रे मृतशङ्कापरिहाराय प्रदर्श्य नमस्कारपूर्वकं विसर्जयेत् यस्मै कस्मै चिद्दद्यात् ।

सम्यक् चिकित्सिताया अपि मरणे प्रायश्चित्तमाह ।

**यद्यसंपूर्णसर्वाङ्गो हीनदेहो भवेत्तदा ।**
**गोघातकस्य तस्यार्द्धं प्रायश्चित्तं विनिर्दिशेत् ॥२२॥**

सम्यक्चिकित्स्यमानोऽपि गौर्यद्यसम्पूर्णसर्वाङ्गो न संपूर्णं व्रणादिस्थाने सर्वमङ्गं यस्यासवीदृश एव हीनदेहः तदा तस्य प्राजापत्यस्यार्द्धं प्रायश्चित्तं गोघातकस्य गोताडयितुर्विनिर्दिशेत् । अनेन चरेत्सर्वं निपातन इत्युक्तः प्राजापत्यः शृङ्गभङ्गादिष्वनन्तरमचिकित्सितगोमरणे द्रष्टव्यः ।

इदानीमोद्धत्येन गोवधे निमित्तविशेषेण प्रायश्चित्तविशेषमाह ।

**काष्ठलोष्ठकपाषाणैः शस्त्रेणैवोद्धतो बलात् ।**
**व्यापादयति यो गां तु तस्य शुद्धिं विनिर्दिशेत् ॥२३॥**
**चरेत्सातपनं काष्ठे प्राजापत्यं तु लोष्ठके ।**
**तप्तकृच्छ्रं तु पाषाणे शस्त्रेणैवातिकृच्छ्रकम् ॥ २४ ॥**

काष्ठं दण्डातिरिक्तम् । लोष्ठं मृत्पिण्डः पाषाणः प्रसिद्धः तेने ष्टकादेरपि ग्रहणम् । शस्त्रं खड्गादि एतैर्यस्त्वौद्धत्येन बलात्कामात् गां व्यापादयति तस्य शुद्धिं प्रायश्चित्तं विनिर्दिशेत् । तदेवाह चरेत्सातपनमित्यादिना तत्र सान्तपनातिकृच्छ्रयोः स्वरूपं दशमैकादशयोर्वक्ष्यति । तप्तकृच्छ्रप्राजापत्ययोस्तु चतुर्थाष्टमयोरुक्तम् । ननु दण्डादूर्ध्वमित्यनेन काष्ठहननप्रायश्चित्तमुक्तमेव किमर्थं पुनरत्र काष्ठग्रहणमिति चेन्नैवम् । अस्यौद्धत्यविषयत्वेन तस्यानौद्धत्यविषयत्वात् । तर्ह्यस्य पूर्वोक्ता न्यूनताऽसङ्गतेति चेत्, न दक्षिणागवीनामतिरेकेणाधिकत्वात् । नच काष्ठा-

दीनां वधनिमित्तत्वाविशेषे व्रतवैषम्यमयुक्तमिति शङ्कनीयम्। वाचनिकेऽर्थे यौक्तिकोपालम्भस्यायुक्तत्वात् ।

उक्तव्रतेषु दक्षिणाविशेषानाह ।

**पञ्चसान्तपने गावः प्राजापत्ये तथा त्रयः ।**

**तप्तकृच्छ्रे भवन्त्यष्टावतिकृच्छ्रे त्रयोदश ॥ २५ ॥**

सान्तपनप्राजापत्यं तप्तकृच्छ्रातिकृच्छ्रेषु पञ्च तिस्रोऽष्टौ त्रयोदश गावो भवन्ति देया इति शेषः ।

परकीयगोहनने विशेषमाह ।

**प्रमापणे प्राणभृतां दद्यात्तत्प्रतिरूपकम् ।**

**तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीन्मनुः ॥ २६ ॥**

माहिषाद्यादिवधेऽप्येतत्समानमिति बोधयितुं प्राणभृत्पदोपादानं तेषां प्राणिनां प्रमापणे मरणे तत्प्रतिरूपकं तस्याः हतायाः व्यक्तेः प्रतिरूपकं वयोगुणादिभिः समान व्यक्त्यन्तरं तत्स्वामिने दद्यात् । तादृशव्यक्त्यन्तरालाभे तस्य प्राणिनो देशकालाद्यनुरूपं मध्यस्थकल्पितं मूल्यं वा दद्यादिति मनुरब्रवीत् । अत्र पुनर्दानवचनं यथा कथं चित्स्वामिसन्तोषस्यावश्यककर्त्तव्यताबोधनार्थम् ।

तथाच मनुः ।

यो यस्य हिंस्याद् द्रव्याणि ज्ञानतोऽज्ञानतोऽपि वा ।
स तस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्सममिति ॥

अध्यायादावुक्तस्य रोधबन्धयोर्दोषहेतुत्वापवादस्यातिदेशमाह ।

**अन्यत्राङ्कनलक्ष्याभ्यां वाहने मोचने तथा ।**

**वाहने गोपनार्थं च न दुष्येद्रोधबन्धयोः ॥ २७ ॥**

यथा सायं सङ्गोपनार्थे गवां रोधबन्धयोर्न दुष्यति तथा वाहने गोणयाद्यारोपणे मोचने तदवरोपणे च क्रियमाणे गोमरणेऽपि न दुष्यति तयोः शास्त्राभ्यनुज्ञातत्वात् । किमेतत्सर्वबलीवर्द्दसमानं नेत्याह । अन्यत्रेति । वृषोत्सर्गादौ दाहादिना चक्रशूलादिस्थिरचिन्हकरणमङ्कनं

तदर्थमेव गोमयादिना तात्कालिकचिन्हकरणं लक्ष्यं ताभ्यामन्यत्र तद्रहितेषु बालीवर्देष्वित्यर्थः । तथाच लक्षितांकिताभ्यामन्येषां वाहनमोचनयोर्मरणेपि न प्रत्यवायः तयोश्च वाहनादौ प्रत्यवाय इत्युक्तं भवति ।

पुनरपि नैमित्तिकविशेषाभिधानाय निमित्तविशेषानाह ।

**अतिदाहेतिवाहे च नासिकाभेदने तथा ।**
**नदीपर्वतसञ्चारे प्रायश्चित्तं विनिर्दिशेत् ॥ २८ ॥**

रोगादिचिकित्सोपयुक्तदाहातिरिक्तोऽतिदाहः अक्लेशवाह्यभाराधिकभारारोपणमतिवाहः रज्जुप्रवेशनार्थं छिद्रकरणं नासिकाभेदनं सम्भावितमरणयोर्नदीपर्वतयोश्चारणम् । एतेषु निमित्तेषु वक्ष्यमाणप्रायश्चित्तं विनिर्दिशेत् ।

तदेवाह ।

**अतिदाहे चरेत्पादं द्वौ पादौ वाहने चरेत् ।**
**नासिक्ये पादहीनं तु चरेत्सर्वं निपातने ॥ २९ ॥**

अतिदाहातिवाहनासाभेदेष्वेकद्वित्रिपादाः प्राजापत्यस्य भवन्ति निपातने निपातनानुकूले व्यापारे नदीपर्वतयोश्चारणरूपे सर्वमुक्तलक्षणं प्राजापत्य चरेत् । यद्यपि निमित्तनैमित्तिकवाक्ययोरतिदाहादेरेव शृङ्गभङ्गादिवन्निमित्तता प्रतीयते न तु मरणपर्यवसायिनस्तथापि नस्तःसकलपाशैर्वा मृते पादोनमाचरेदित्यापस्तम्बेन विशेषाभिधानान्मरणपर्यवसायिन एव निमित्ततावगन्तव्या तथाचरणाभावेप्यतिदाहादिमात्रेपि प्रायश्चित्तान्तरं कल्पनीयम् । ननु रोधस्वरूपे दुर्गनदीपर्वतादिसंचारो गणित एव स कथं पुनरत्रोपदिश्यत इति चेत् । सत्यम् । तत्र नदीपर्वतादिषु गवां स्तम्भनं निषिद्धमत्र तु तेष्वेव गवां पतनानुकूलो व्यापारः संचार एव निषिद्ध इति न पौनरुक्त्यम् । अत एवैकपादं चरेद्रोध इति चरेत्सर्वं निपातन इति च युक्तमेव, प्रायश्चित्तवैलक्षण्यमिति । अतिदोह इति पाठे च वत्समनपेत्य कृत्स्नक्षीरदोहनमतिदोहनमतिदोहस्सोऽपि वत्सोपघातनिमित्तत्वात्प्रायश्चित्तनिमित्तमिति ।

इदानीं गृहदाहेन गोदाहे प्रायश्चित्तमाह ।

**दहनात्तु विपद्येत आनड्वान् योक्त्रयन्त्रितः ।**
**उक्तं पराशरेणैव ह्येकं पादं यथाविधि ॥ ३० ॥**

यदि योक्त्रयन्त्रितोनड्वान् अनडुत्वाविवक्षया गौर्वा गृहदहनाद्विपद्येत तदा वृद्धपराशरेणोक्तमेकं कृच्छ्रपादं चरेदितिशेषः ।

तदाहापस्तम्बः ।

कान्तारेष्वथ वा दुर्गे गृहदाहे खलेषु च ।
यदि तत्र विपत्तिःस्यात्पाद एको विधीयते इति ॥

इदं त्वग्निनिर्वापणार्थमकृते प्रयत्ने द्रष्टव्यम् । कृते तु प्रयत्ने प्रायश्चित्ताभावस्य वक्ष्यमाणत्वात् ।

उक्तानि वधनिमित्तान्यविक्षेपायोपसंहरति ।

**रोधनं बन्धनं चैव भारः प्रहरणं तथा ।**
**दुर्गप्रेरणयोक्त्रं च निमित्तानि वधेषु षट् ॥ ३१ ॥**

रोधबन्धयोक्त्राणि व्याख्यातानि प्राक् भारोऽतिवाहनं प्रहरणमुक्तलक्षणो घातः दुर्गयोर्नदीपर्वतयोः प्रेरणं संचारः एतानि षडुक्तानिवधनिमित्तानि षडिति प्रचयशिष्टसंख्यानुवादो न परिसंख्या तेनातिदाहनासिकाभेदनयोरपि चकारादुपसंग्रहः ।

योक्त्रयन्त्रितगोदहनप्रायश्चित्तप्रसङ्गेन स्वभावतोऽपि गोर्मरणकाले बन्धसद्भावे प्रायश्चित्तमाह ।

**बन्धे पाशसुगुप्ताङ्गो म्रियते यदि गोपशुः ।**
**भवने तस्य पापी स्यात्प्रायश्चित्तार्द्धमर्हति ॥ ३२ ॥**

यदि गोजातीयः पशुर्बन्धहेतुना पाशेन सुगुप्ताङ्गः सम्बद्धगलचरणादिः भवने गृहे स्वभावतोऽपि म्रियेत तदा तस्य भवनस्य गोपशोर्वा स्वामी पापी स्यात्स पूर्वोक्तस्य पादप्रायश्चित्तस्यार्द्धं दिनद्वयमर्हति एतेन गोर्मरणकाले पाशमोचनमावश्यकमित्युक्तं भवति इदमित्थमेवव्या-

ख्येयं न बन्धनिमित्तमरणे कृच्छ्रार्द्धःप्रायश्चित्तविषयत्वेन द्वौ पादौ बन्धने चरेदित्यनेन पौनरुक्त्यात् ।

बन्धनप्रङ्गेन वर्ज्यान् रज्जुविशेषानाह ।

**न नारिकेलेन न शाणवालैर्न**
**वापि मौञ्जेन न वर्ध्रशृङ्खलैः ।**
**एतैस्तु गावो न निबन्धनीया**
**बध्वापि तिष्ठेत्परशुं गृहीत्वा ॥ ३३ ॥**

नारिकेलं नारिकेलवृक्षत्वक्निर्मितं शाणं शणनिर्मितं वालं वाल-वृक्षत्वग्निर्मितं मौञ्ज मुञ्जनिर्मितं वर्ध्रा चर्मरज्जुः वल्केति पाठे पला-शादिवल्कलनिर्मितं दाम, शृङ्खलं लोहादिनिर्मित एतैर्गावो न बन्धनीया यदि दामान्तरासम्भवेन कदाचिदेतैरेव बध्येरन्स्तदा तज्जनितापचिवा-रणाय तच्छेदार्थं परशुं गृहीत्वा सावधानस्तिष्ठेत् । अनेन दृढरज्जुमात्र-मुपलक्ष्यते । अत एवाङ्गिराः ।

न नारिकेलेन न फलकेन न मौञ्जिना नापि च वल्कलेन ।
एतैरनड्वाच निबन्धनीयो बध्वापि तिष्ठेत्परशुं गृहीत्वेति ॥
कार्पासटसरीपट्टादिफलभवन्तंतुनिर्मितं फालकम् ।
तर्हि कैर्बन्धनीया इत्यत आह ।

**कुशैः काशैश्च बध्नीयाद्गोपशुं दक्षिणामुखम् ।**

कुशकाशादिभिराशुच्छेद्यैर्दक्षिणाभिमुख गोजातीय पशुं बध्नी-यात् पाशबन्धस्थानस्यापि निर्दोषतामाहव्यासः ।

कुशैः काशैश्च बध्नीयात्स्थाने दोषविवर्जिते इति ।

ननु कुशादिपाशेष्वपि लग्नेनाग्निना गोदाहश्चेत्कथमित्यत आह ।

**पाशलग्नाग्निदग्धेषु प्रायश्चित्तं न विद्यते ॥ ३४ ॥**

गृहदाहादौ कुशादिपाशान्सहसैव त्रोटयित्वा पलायमानानां गवां गलगतपाशलग्नेनाग्निना किञ्चिच्चर्मदाहे मरणेपि वा प्रायश्चित्त नास्ति । एवमपोदितस्यापि प्रायश्चित्तस्य क्व चित्प्रतिप्रसवमाह ।

**यदि तत्र भवेत्काष्ठं प्रायश्चित्तं कथं भवेत् ।**
**जपित्वा पावनीं देवीं मुच्यते तत्र किल्बिषात् ॥ ३५ ॥**

कुशादिपाशानां भक्षणवारणाय तत्र यद्यन्तरा किञ्चित्काष्ठं बद्धं स्यात्तद्गतेनाग्निनोपद्रवबाहुल्येन यदि गौर्दह्येत म्रियेत वा तदा प्रायश्चित्तं किं स्यादित्यपेक्षायां पावनीं देवीं गायत्रीमष्टोत्तरशतवारं सहस्रवारं वा यथायथं जप्त्वा तत्र तस्मिन्निमित्ते निष्पापो भवतीति । पावमानीयामिति पाठे पवमानसूक्तमेकवारं त्रिवारं वा जप्त्वेति व्याख्येयम् ।

ये पुनर्नदीपर्वतसञ्चारे चरेत्सर्वं निपातने इत्याभ्यां निमित्तनैमित्तिके उपन्यस्ते तयोरेव विषयवैभवमाह ।

**प्रेरयन् कूपवापीषु वृक्षच्छेदेषु पातयन् ।**
**गवाशनेषु विक्रीणन् स्वतः प्राप्नोति गोवधम् ॥ ३६॥**

सम्भावितमरणेषु वापीकूपतडागेषु जलपानाद्यर्थं प्रेरयन् तथा यत्र प्रौढा वृक्षा छिद्यन्ते तत्र शाखापातेन सम्भावितमरणे वनेषु चारणार्थं गाः पातयन् तथा गवाशनेषु गोमांसभक्षकेषु म्लेच्छेषु विक्रीणन् स्वत एव निमित्ताद्गोवधं प्राप्नोत्यतस्तेषु निमित्तेषु गोवधप्रायश्चित्त प्राजापत्य चरेदिति ।

उद्वृषभयज्ञादौ गवोपघाते प्रायश्चित्तमाह ।

**आराधितस्तु यः कश्चिद्भिन्नकक्षो यदा भवेत् ।**
**श्रवणं हृदयं भिन्नं मग्नो वा कूपसङ्कटे ॥ ३७ ॥**
**कूपादुत्क्रमणे चैव भग्नो वा ग्रीवपादयोः ।**
**स एव म्रियते तत्र त्रीन्पादांस्तु समाचरेत् ॥ ३८ ॥**

उद्वृषभयज्ञे हि बलीवर्दमाराध्य धावयन्ति तत्रातित्वरयाघातो यदि कक्षाकुक्षिप्रदेशः कर्णौ हृदयं वा भिद्येत कूपसङ्कटे सङ्कीर्णे कूपे वा पातस्ततउद्धरणे यदि ग्रीवापादयो भंङ्गः स एव तादृशएव भिन्नकक्षतादिरेव चेन्म्रियते तदा त्रीन्पादान्प्राजापत्यस्य समाचरेत् । अवताडनहेतु-

कास्थिभङ्गादिनिमित्तमरणाभावेन न तन्निमित्तं प्रायश्चित्त सम्भवतीति पृथक्प्रायश्चित्तोपन्यासः । तेन तादृशस्य जीवने न किञ्चित्प्रायश्चित्तमिति गम्यते । आधावित इति पाठेऽयमेवार्थः । अवारित इति पाठे तु धावने कूपसङ्कटपातसम्भावनायामवारित इति व्याख्येयम् ।

उक्तस्य कूपपातनिमित्तप्रायश्चित्तस्य क्वचिदपवादमाह ।

**कूपखाते तटावन्धे नदीबन्धे प्रपासु च ।**
**पानीयेषु विपन्नानां प्रायश्चित्तं न विद्यते ॥ ३९ ॥**

कूपस्य खाते कूपखाते सर्वतो विशीर्णावयवः कूपः तटेषु तीरेषु समन्तान्निम्नात्तिमुखं जलं वन्ध्यत इति तटावन्धः नदीवन्धो नदीसेतुः प्रपाः गवा जलपानार्थं निर्मिता गर्त्तास्तेषु पानीयार्थं स्वत एव प्रवृत्ताना गवां मरणे न स्वामिनः प्रायश्चित्त भवति परन्तु परोक्ष निवारणे वा कृते समक्षमनिवारणे तु प्रत्यवायोस्त्येवेति ।

एवमपोदितस्य प्रायश्चित्तस्य क्वचित्प्रतिप्रसवमाह ।

**वेश्मद्वारे निवासेषु यो नरः खातुमिच्छति ।**
**स्वकार्यगृहखातेषु प्रायश्चित्तं विनिर्दिशेत् ॥ ४० ॥**

वेश्मनो गृहस्य द्वारं प्रवेशनिर्गममार्गः निवासाः गोनिवासस्थानानि शालादीनि तेषु यः खनति तस्य स्वकार्यार्थं नित्त्याद्यर्थं गृहाङ्गणादिखातेषु गोमरणे पूर्वोक्त पादत्रय प्राश्चित्त विनिर्दिशेदिति ।

पूर्वोक्तस्य प्रायश्चित्तापवादस्य विषयवैभवमाह ।

**निशि बद्धनिरुद्धेषु सर्पव्याघ्रहतेषु च ।**
**अग्निविद्युद्विपन्नेषु प्रायश्चित्तं न विद्यते ॥ ४१ ॥**

रात्रौ संरक्षणार्थं पाशादिभिर्बद्धाः शालाया निरुद्धा वा गावो यदि सर्पव्याघ्रादिभिः व्यापद्येरन् ग्रामदाहाग्निविद्युत्पाताभ्यां वा म्रियेरन् तदा स्वामिनः प्रायश्चित्तं न भवति ।

ननु दहनात्तुविपद्येत्तेत्यनेन प्रायश्चित्ताभिधानेनेदं प्रायश्चित्तनिराकरणं विरुद्धमिति चेत् सत्यम् । यत्ने कृते विपद्येतेत्यस्य सर्वशेषतया

भिहितत्वेन प्रायश्चित्तापवादस्याग्निनिर्वापणार्थं कृतप्रयत्नविषयत्वात् । तत्रैवाकृतप्रयत्नविषयं प्रायश्चित्तमिति न विरोधः ।

किञ्च ।

**ग्रामघाते शरौघेण वेश्मभङ्गान्निपातने ।**
**अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यते ॥ ४२ ॥**

शत्रुभिः परग्रामे हन्यमाने विमुक्तैः शरैः ग्रामान्तःस्थितानां गवां निपातने तथा स्तम्भादिशैथिल्येन गृहभङ्गाद्वा गोमरणे बुधशुक्रसामीप्यादिना प्रवृत्तायामतिवृष्टौ शीतवातादिभिर्मृतानां गवां च स्वामिनस्तद्दोषनिवृत्तये यथाशक्तिप्रवृत्तौ न प्रायश्चित्तं भवति ।

किञ्च ।

**संग्रामे प्रहतानां च ये दग्धा वेश्मकेषु च ।**
**दावाग्निग्रामघातेषु प्रायश्चित्तं न विद्यते ॥ ४३ ॥**

शत्रुसैन्ययोरन्योन्ययुद्धे शत्रुभिर्द्विषाद्या गावो हतास्तासां तथा अल्पानि वेश्मानि वेश्मकानि ग्रामाद्बहिर्गोनिवासार्थं कृतास्तृणकुट्य इति यावत्, तेषु शत्रुभिर्दह्यमानेषु ये दग्धा तथा ग्रामदुर्गतायै परितः कृते वने शत्रुभिर्दह्यमाने तेनैवाग्निना यदा ग्रामोऽपि दह्यते स्वभावतो वा सन्निहितवनाग्निना यदा ग्रामो दह्यते । तत्र सर्वत्र स्वामिनो यथाशक्तितन्निवारणप्रवृत्तौ प्रायश्चित्तं न भवति ।

किञ्च ।

**यन्त्रिता गौश्चिकित्सार्थं गूढगर्भविमोचने ।**
**यत्ने कृते विपद्येत प्रायश्चित्तं न विद्यते ॥ ४४ ॥**

रोगादिचिकित्सार्थं दाहच्छेदशिराभेदादिप्रयोगे यन्त्रिता रज्ज्वादिना बद्धा गौर्यदि विपद्येत म्रियेत तथा गूढस्यान्तर्मृतस्य गर्भस्य स्वतो निःसरणशक्त्यभावात्तद्विमोचने हस्तप्रवेशेन निष्कासने क्रियमाणे यदि गौर्म्रियेत तदा तद्धितार्थं यत्नस्य कृतत्वात्स्वामिनोऽन्यस्यवा कर्तुर्न प्रायश्चित्तं भवति ।

तदाह संवर्त्तः ।

यन्त्रणे गोः चिकित्सार्थे गूढगर्भविमोचने ।
यदि तत्र विपत्तिः स्यान्न स पापेन लिप्यते ॥
औषधं स्नेहमाहारं दद्याद्गोब्राह्मणेषु च ।
दीयमाने विपत्तिश्चेन्न स पापेन लिप्यते ॥
दाहच्छेदशिराभेदप्रयोगैरुपकुर्वताम् ।
द्विजानां गोहितार्थंच प्रायश्चित्तं न विद्यते इति ॥

यन्त्रकरणस्य सर्वप्रायश्चित्तापवादशेषत्वेन उपेक्षया यन्त्राकरणे प्रायश्चित्तं भवत्येव ।

तथा च वक्ष्यति सर्वेषां पातकम्भवेदिति ।
प्रायश्चित्त त्वत्र दहनात्तु विपद्येतेत्यादिनोक्तं पादकृच्छ्रमेव ।
यत्तु व्यासेन जलौघपल्वले मग्ना मेघविद्युद्धतापिवा ।
श्वभ्रे वा पतिता ऽकस्मात् श्वापदेनापि भक्षिता ॥
शीतवातहता वाह्याद्दुष्टबन्धनमृता पिवा ।
शून्यागार उपेक्षाया प्राजापत्य विनिर्दिशेत् ।

इति प्राजापत्यमुक्तम् । तत्त्रिमासादिहनने प्रायश्चित्तत्र्यादिमन्वादिमते सङ्गतं न पराशरमते तत्र हननप्रायश्चित्तस्यैव प्राजापत्यरूपत्वात् । नच हननोपेक्षयोस्तुल्यं प्रायश्चित्त संभवति । एतेन पल्वलौघमृगव्याघ्रश्वापदादिनिपातनेश्वभ्रप्रपा तसर्पाद्यैर्मृते कृच्छार्द्धमाचरेत् । अयालत्वात्तु कृच्छ्र स्याच्छून्यागार उपप्लव इति विष्णुवचनमपि व्यवस्थापितमेवेत्यलम् ।

इदानीमेकप्रयत्नविष्यचानेकगोवधे प्रायश्चित्तमाह ।

**व्यापन्नानां बहूनान्तु रोधने बन्धनेऽपि वा ।**
**भिषङ्मिथ्याप्रचारे च प्रायश्चित्तं विनिर्दिशेत् ॥४५॥**

यदि सकृत्कृते पूर्वोक्तलक्षणे रोधने बन्धने वाशब्दाद्योक्ते घाते वा बहूनां गवां व्यापत्तिर्भवति तदा तत्कर्तुः भिषजो वैद्यस्य मिथ्या अयथाशास्त्रं प्रचारे चिकित्सायां च न प्रतिनिमित्त नैमित्तिकावृत्तिर्नापि तन्त्रेण किन्तु वचनबलाद् द्विगुणमेव प्रायश्चित्त विनिर्दिशेत् ।

तथाचापस्तम्बः ।

विपन्नानां बहूनां तु रोधने बन्धनेपिवा ।

भिषङ्मिथ्याप्रयोक्ताच द्विगुणं गोव्रतं चरेदिति ।

यदुक्तं यत्ने कृते विपत्तिश्चेत्प्रायश्चित्तं न विद्यते इति तस्य प्रत्युदाहरणमाह ।

**गोवृषाणां विपत्तौ च यावन्तः प्रेक्षका जनाः ।**
**अनिवारयतां तेषां सर्वेषां पातकं भवेत् ॥ ४६ ॥**

गावश्च वृषाश्च गोवृषास्तेषां विपत्तौ पूर्वोक्तायां कूपादिपातरूपायां यावन्तो जना औदासीन्येन प्रेक्षका भवन्ति तेषां गवां विपत्तिमनिवारयतां सर्वेषां पातकं भवति । तत्र च पूर्वोक्तपादकृच्छ्रमेव प्रायश्चित्तं कार्यं तस्याकृतप्रयत्नविषयत्वात् । इदमपि शक्तौ सत्यामौदासीन्ये द्रष्टव्यम्।

अत एव पैठीनसिः ।

उपेक्षकः शक्तिमांश्चेद्द्राणवक्तानुमोदकः ।
अकार्यकारिणस्तेषां प्रायश्चित्तं प्रकल्पयेत् ॥

इत्याह ।

नन्वेकप्रयत्ननिष्पन्नानेकगोवधे प्रायश्चित्तमुक्तम् । अनेकप्रयत्ननिष्पन्नैकगोवधे तु कथमित्यत आह ।

**एको हतो यैर्बहुभिः समेतै-**
**र्न ज्ञायते यस्य हतोऽभिघातात् ।**
**दिव्येन तेषामुपलभ्य हन्ता**
**निवर्तनीयो नृपसन्नियुक्तैः ॥ ४७ ॥**

यत्रैको गौर्बहुभिः समेतैर्मिलितैर्हतस्ताडितस्तस्यान्यस्याभिघातानन्तरमेव मृतः स चेन्न ज्ञायते तदा तं दिव्येन तुलाभ्यादिना उपलभ्य हन्तृत्वेन निश्चित्यानन्तरमसौ नृपसन्नियुक्तैः पुरुषैः निवर्तनीयो ऽयमसौ

गोहन्तेति व्याख्याय ज्ञातिव्यवहाराद्बहिः कर्तव्यः । यद्यपि सर्वेषामपि प्रहाराणां वेदनाहेतुत्वं समानमेव तथापि यद्व्यतिरेकेण जीवनं यस्मिन्सत्यविलम्बेन च मरणं स एव तद्धेतुरिति तत्कर्तुरेव हन्तृत्वं सिध्यति हन्तृत्वनिश्चयश्च हनननिमित्तप्रायश्चित्तप्राप्त्यर्थः ।

तर्हि एतेषां किं न प्रत्यवाय इत्यत आह ।

**एका चेद्बहुभिः काचिद्दैवाद्व्यापादिता क्वचित् ।**
**पादं पादं तु हत्यायाश्चरेयुस्ते पृथक् पृथथ ॥ ४८ ॥**

यद्येका काचित्सगुणा निर्गुणा वा गौर्बहुभिर्मिलित्वा दैवादज्ञानात् क्वचिद्व्यापादिता तदा ते सर्वे यादृग्वधगोहत्याया यद्व्रतमुपदिष्टं तस्यैकैकं पादं चतुर्थांशं पादकृच्छ्रादि पृथक् पृथगेकैकशश्चरेयुः । एका चेदित्युपलक्षणं तेन बहुभिर्द्वयोर्बहूनां च व्यापादने प्रतिपुरुषं पादद्वयं पादत्रयं च कल्पनीयम् । कामतस्तु प्रत्येकं सर्वेषामपि निषेधातिक्रमस्य तुल्यत्वेन कृत्स्नदोषसम्बन्धात्कृत्स्नव्रतसम्बन्धो युक्तः मारणामेव प्रतिपुरुषं कृत्स्नव्यापारसमवायात् ।

एकं घ्नतां बहूनां च यथोक्ताद्द्विगुणो दम इति प्रत्येकं दण्डद्वैगुण्यदर्शनाच्च । यद्यप्येतदकामकारेऽपि तुल्यं तथापि वचनादेव तत्र पादप्रायश्चित्तविधानमिति न विरोधः । नन्वनेकानि गोमरणनिमित्तान्युक्तानि तेषां सन्देहे कथं निर्णय इत्यत आह ।

**हते तु रुधिरं दृश्यं व्याधिग्रस्तः कृशो भवेत् ।**
**लाला भवति दष्टेषु एवमन्वेषणं भवेत् ॥ ४९ ॥**

रुधिरेण प्रहारः कार्श्येन व्याधिः लालया च सर्पदंश इत्येवमाद्यभियुक्तप्रसिध्यान्वेषणं कार्यम् ।

ननु बाह्यलिङ्गाभावे आन्तरावयवभङ्गः कथं निश्चेयः इत्यत आह ।

**ग्रासार्थं चोदितो वापि अध्वानं नैव गच्छति ।**

योऽभीष्टग्रासार्थमपि न गच्छति नोपसर्पति यो वा चोदितः

प्रेरितोऽप्यध्वानं वा न गच्छति सोऽन्तः पीडावानिति ज्ञेयम्। एवमव्यभिचारिभिरभियुक्तप्रसिद्धैरन्यैरपि लिङ्गैरन्विष्य तत्र तत्रोचित प्रायश्चित्त करणीयम्।

ननूक्तेषु निमित्तविशेषेषूक्ता व्रतविशेषा भवन्तु अनुक्तेषु तु निमित्तेषु किं व्रतमित्यत आह।

**मनुना चैवमेकेन सर्वशास्त्राणि जानता।**
**प्रायश्चित्तं तु तेनोक्तं गोघ्नश्चान्द्रायणं चरेत्॥५०॥**

येषु गोवधनिमित्तविशेषेषु प्रायश्चित्तविशेषा मयाभिहितास्तेषु त एवानुष्ठेया येषु पुनर्मया प्रायश्चित्तविशेषो नोक्तस्तेषु सर्वशास्त्रतत्त्वज्ञेनैकेन सकलमुनिमुख्येन तेन प्रसिद्धेन मनुनैवोक्त चान्द्रायणप्रायश्चित्तम् एव मदुक्तेतिकर्तव्यतया गोघ्नश्चरेत्।

अयमभिसन्धिः। यथा अनुक्तविशेषेषूपपातकेषु चान्द्रायणमुपदिष्ट मनुना तद्वैवानुक्तविशेषे गोवधेप्युपपातकत्वाविशेषात्कर्तव्य न तु स्मृत्यन्तरोक्त विशेषप्रायश्चित्तमपीत्येतदेव दृढीकर्तुम् ऋष्यन्तरेभ्यो मनोर्वैशिष्ट्यप्रतिपादनायानेकविशेषणोपादानमिति। तथा च गोवधप्रायश्चित्तमभिधायाह मनुः।

एतदेव व्रतं कुर्युरुपपातकिनो द्विजाः।
अवकीर्णिवर्जं शुद्ध्यर्थं चान्द्रायणमथापि वेति।

यदुक्त सशिख वपनं कृत्वा पादेद्वु रोमवपनमित्यादि तस्य कथंचिदसम्भवे कथमित्यत आह।

**केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत्।**
**द्विगुणे व्रत आदिष्टे दक्षिणा द्विगुणा भवेत्॥५१॥**

यस्तु लावण्यादिहानिभया केशवापन न चिकीर्षति स केशरक्षणार्थं यस्मिन्निमित्ते यद्व्रतमुपदिष्ट तद्विगुणमाचरेत्। परन्तु महापातक गोवधावकीर्णव्यतिरिक्तनिमित्तेषु तत्र द्विगुणव्रताचरणेपि केशरक्षणं न भवत्येव।

विद्वद्विप्रनृपस्त्रीणां चेष्यते केशवपनम् ।
ऋते महापतकिनो गोहन्तुश्चावकीर्णिनः ॥
इतिविशेषस्मरणात् ।
द्विगुणव्रताचरणेन केशरक्षणस्य सर्वत्र प्राप्तौ नियममाह ।

**राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ।**
**अकृत्वा वपनं तेषां प्रायश्चित्तं विनिर्दिशेत् ॥ ५२ ॥**

राजाऽभिषिक्तः क्षत्रियः राजपुत्रो राज्यार्हकुमारः बहुश्रुतो ब्राह्मणो गौतमोक्तः ।

यथा स एव बहुश्रुतो भवति लोकवेदवेदाङ्गविद्वाकोवाक्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिरष्टाचत्वारिंशता संस्कारैः संस्कृतस्त्रिषु कर्मस्वभिरतः षट्सु वा सामयाचारिकेष्वभिविनीत इति । एतेषां वपनमकृत्वा अकारयित्वा प्रायश्चित्तमुपदिशेत् । अत्र चैतेषामेवेत्येव नयमो न त्वकृत्वैवेति ।

तेषामपि हारीतेन ।
राजा वा राजपुत्रो वा ब्रह्मणो वा बहुश्रुतः ।
केशानां वपनं कृत्वा प्रायश्चित्त समाचरेदितिवपनस्मरणात् ।

अतएवापस्तम्बोप्येतेषामेव वपनाभावे व्रतद्वैगुण्यं तदुभयाभावेच पापतादवस्थ्यमाह ।

राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः ।
यस्तु नो वपनं कुर्यात्प्रायश्चित्त कथ भवेत् ॥
केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत् ।
द्विगुणे तु व्रते चीर्णे दक्षिणा द्विगुणा भवेत् ॥
यस्य न द्विगुणं दानं केशांश्च परिरक्षतः ।
तत्पापं तस्य तिष्ठेत वक्ता च नरकं व्रजेत् ॥
यत्किञ्चित्क्रियते पापं सर्वं केशेषु तिष्ठति ।
तस्मात्सर्वप्रयत्नेन सशिखं कारयेद्द्विज इति ॥

ननु विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनमिति स्त्रिया अपि वपननिषेधात्कथं नात्र परिगणनमित्यत आह ।

सर्वान्केशान्समुद्धृत्य छेदयेदङ्गुलद्वयम् ।
एवं नारीकुमारीणां शिरसो मुण्डनं स्मृतम् ॥ ५३॥

सर्वं केशराशेरेकीकृतम् धृत्वाऽग्रतोऽङ्गुलद्वयं छेदयेदेवं विधं नारीणामविधवानां कुमारीणामविवाहितानाञ्च शिरसो मुण्डनं स्मृतमाचार्यैः । नारीग्रहणेन सिद्धेऽपि कुमारीग्रहणे पुनरुपादानं तासामप्येवं विधमुण्डनप्राप्त्यर्थम् ।

यतः स्मृत्यन्तरे

सधवाना तु नारीणामलङ्काराय सर्वदा ।
केशसन्धारणं प्रोक्तं प्रायश्चित्ते द्विजोत्तमैः ॥

इति सधवानामेव केशधारणं नियमितं नान्यासा । एवं च परिशेषा द्विधवाना सर्ववपनमेवाभ्यनुज्ञात भवति ।

न च ।

विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनम् ।
ऋते महापातकिनो गोहन्तुश्चावकीर्णिनः ॥

इति पर्युदासान्महापतकादिषु स्त्रीणामपि समूलमेव केशवपनं सिध्यतीति शङ्कनीयम् ।

केशानां नास्ति नारीणां वपनं व्रतयज्ञयोः ।
गोवधादिषु सर्वेषु छेदयेदङ्गुलद्वयम् ॥

इति विशेषस्मरणेन तत्राप्यग्रच्छेदस्यैव विधानात् ।

नचैवं स्त्रीणा नेष्यते केशवापनमिति निषेधानुपपत्तिः । तस्य वापनशब्दशक्त्यैव समूलकेशवापनपरत्वात् । यद्यप्येतत्प्रायश्चित्तप्रकरणेऽभिहितं तथापि वाक्यबलाद्यत्र यत्र नारीकुमारीणा सामान्यवाक्येन तीर्थादौ मुण्डनप्राप्तिस्तत्र सर्वत्राप्येवं विधमेव मुण्डनमिति गमयति अन्यथा गोवधप्रायश्चित्तप्रकरणनियमितत्वेन प्रायश्चितान्तरेऽपि न स्यात् ।

अत एव दिवोदासीये ।

सर्वान्केशान्समुद्धृत्य छेदयेदङ्गुलद्वयम् ।

तीर्थादिषु सभर्तृणां स्यादेवं केशवापनम् ॥
इति साक्षादेव वचनमभिहितम् ।

किञ्च ।

क्षौरकर्म न शस्तं स्याद्योषितां तु वरानने ।
सभर्तृकाणां तत्रैव विधिं तासां शृणुष्व मे ।
सर्वान्केशान्समुद्धृत्य च्छेदयेदङ्गुलद्वयम् ॥

इति प्रभासखण्डीयसभर्तृकस्त्रीवपनपरिभाषायाः सर्वत्राप्यप्रतिहतत्वेन न क्वचित्समूलं वपनम् । नचेदमपि प्रभासतीर्थपरमेव प्रकरणादिति वाच्यम् । परिभाषायाः प्रकरणेनानियमात् । पित्र्ये तु द्विगुणा दर्भा इतिवत् । परिभाषात्वञ्चास्य सभर्तृकस्त्रीवपनमात्रविधिप्रतिपादकत्वात्

यदपि

केशमूलान्युपाश्रित्य सर्वपापानि देहिनाम् ।
तिष्ठन्ति तीर्थस्नानेन तस्मात्तांस्तत्र वापयेत्

इति वचनबलेन केशमूलवपनविधानमिति तदपि न पापानां केशमूलाश्रयणस्य वपनविध्यर्थवादतया स्वार्थे विधिपरत्वाभावात् । तेन ह्यत्राङ्क्ष्यत इत्यत्राचकरणत्वस्यैव । तस्मात्स्त्रीणां न क्वचित्समूलं केशवपनमिति स्थितम् ।

पूर्वोक्तानामङ्गानां साधारण्यप्राप्तौ अकर्तव्यं केषांचिदपवादमाह ।

**न स्त्रियाः केशवपनं न दूरे शयनासनम् ।**
**नच गोष्ठे वसेद्रात्रौ नदिवा गामनुव्रजेत् ॥ ५४ ॥**
**न नदीसङ्गमे चैव अरण्येषु विशेषतः ।**
**न स्त्रीणामजिनं वासो व्रतमेवं समाचरेत् ॥ ५६ ॥**

यदुक्तं सशिखं वपनं कृत्वेत्यादि तत्स्त्रिया न किन्तु द्व्यङ्गुलच्छेद एव । यच्चोक्तं सविशन्तीषु सविशेदिति तच्छयनासनं दूरे ग्रामाद्गृहाद्वा स्त्रिया न कार्यम् । यत्पुनर्गवां मध्ये वसेद्रात्रौ दिवा गास्त्वाप्यनुव्रजेदित्युक्तं

तदप्युभयं न स्त्रिया कार्यम् । अनुव्रजनविधिनैव नदी तर्यं तट न
प्राप्त तदप्यपोह्यते । अनुव्रजनाद्यवादे सिद्धे पुनर्वचन ग्रामा-
न्तरमनुव्रजनेपि नद्यादौ विशेषतो निषेधार्थम् । यदपि गोवधे प्राकृत
इत्युपसंहारप्राप्तमजिनवासस्त्व तदपि स्त्रीणां न भवति तर्हि किं कार्य-
मित्यत आह व्रतमेव यथोक्तं प्राजापत्यादिकमेव कुर्यात् । एवकारो यथो
क्ताङ्गनिवृत्तेर्दार्ढ्यार्थम् ।

एवकारेण त्रिषवणस्नानादेरप्यपवादप्राप्तावाह ।

**त्रिसन्ध्यं स्नानमित्युक्तं सुराणामर्चनं तथा ।**
**बन्धुमध्ये व्रतं तासां कृच्छ्रचान्द्रायणादिकम् ॥५६॥**

यदुक्तं त्रिसन्ध्यमवगाहनमिति तत्स्त्रीणामभ्यनुज्ञायते तथा सुरा
णामर्चनमधिकं विधीयते । तथा तासामुक्तं कृच्छ्रचान्द्रायणादिव्रतं बन्धु-
मध्य एव करणीयं नान्यत्रेति ।

व्रताचरणकालेऽस्थितिस्थानमाह ।

**गृहेषु सततं तिष्ठेच्छुचिर्नियममाचरेत् ॥ ५७ ॥**

व्रताचरणकालेपि गृहेषु गृहान्तिकेषु तिष्ठेत् वा मो गृहान्तिके इव
इति योगीन्द्रस्मरणात् । शुचिः,पापान्तरमकुर्वती नियमं सप्राप्त प्राय
श्चित्तमाचरेदिति ।

उक्तप्रायश्चित्तस्याकरणे बाधकमाह ।

**इह यो गोवधं कृत्वा प्रच्छादयितुमिच्छति ।**
**स याति नरकं घोरं कालसूत्रमसंशयम् ॥ ५८ ॥**
**विमुक्तो नरकात्तस्मान्मर्त्यलोके प्रजायते ।**
**क्लीबो दुःखी च कुष्ठी च सप्तजन्मनि वै नरः ॥५९॥**

यो गोवधं कृत्वा इह कलौ प्रच्छादयितुं रहस्यप्रायश्चित्तेनापाकर्तु-
मिच्छति सकालसूत्रसंज्ञं घोरं नरकमसंशयं निश्चितं प्राप्नोति । तादृश-
नरकभोगानन्तरं मनुष्यलोके उत्पन्नो नरो भूत्वा क्लीबो नपुंसको दुःखी
रोगादिना कुष्ठी च सप्तजन्मनि प्रकर्षेण जायते इति ।

ननु रहस्य प्रायश्चित्त कथमत्र न भवेत् तस्यापि रहस्ये रहस्य प्रकाशे प्रकाशमिति हारीतादिविधानादिति चेत् ।

सत्यम् । बृहन्नारदीयविष्णुपुराणादिषु

छादयन्ति प्रयत्नेन स्वदोष पापकर्मिणः ।
रहस्यमेव कुर्वन्ति प्रायश्चित्तक्रिया कलौ ।
मनः शुद्धिविहीनाना निष्कृतिर्न ततो भवेत् ॥

इत्यादि ।

तत्र तत्र कलिनिन्दाप्रक्रमे रहस्यप्रायश्चित्तनिन्दाश्रवणात् तस्माद्रहस्यप्रायश्चित्तेन कलौ न शुद्धिरिति गम्यते । उपपादित चैतदधस्तात्

नन्वेवमपि क्लीबत्वादीनां पापान्तरफलत्वेन श्रवणाद्गोवधफलत्वाभिधानं विरुद्धम् । तथाहि । राजमहिषीगामी नपुंसक इति गौतमः । सर्वदा दुःखचित्तः स्यात्परवित्तविनाशक इति शातातपः । ब्रह्महा कुष्ठीति शङ्ख इति तेषा सप्तजन्मानुवृत्त्यभिधानमपि विरुद्ध गोवधस्योपपातकत्वेन तत्फलस्य पञ्चजन्मानुवृत्तेः ।

महापातकजं चिन्हं सप्तजन्मनि जायते ।
उपपापोद्भव पञ्च त्रीणि पापसमुद्भवम् ॥

इति शातातपस्मरणादिति चेत् सत्यम् । क्लैब्यदुःखकुष्ठानामवान्तरजातिभेदात्तृणारणिन्यायेन गोवधस्यऽपि तत्र कारणत्वे बाधकाभावात् । सप्तजन्मनिवृत्तिस्तु गर्भिण्यादिगोवधफलविषयिणीस्त्री गर्भिणी गोगर्भिणीबालवृद्धवधेषु भ्रूणहा भवतीति प्रचेतसा तत्र महापातकत्वातिदेशात् । तेन तस्य कुष्ठफलकत्वमप्युपपन्नम् ।

कुष्ठ च राजयक्ष्मा च प्रमेहो ग्रहणी तथा ।
इत्येवमादयो रोगा महापापोद्भवाः स्मृताः ॥

इति शातातपस्मरणादिति सर्वमनवद्यम् ।

उक्तार्थस्य सर्वविषयतां स्पष्टयितुं सामान्येनोपसंहरति ।

तस्मात्प्रकाशयेत्पापं स्वधर्मं सततं चरेत् ॥
स्त्रीबालभृत्यगोविप्रेष्वतिकोपं विवर्जयेत् ॥ ६० ॥

यस्मात्पापप्रच्छादने ऐहिकामुष्मिकनरकभोगः प्राप्नोति तस्मात्पूर्वोक्तपर्षदि स्वीयं कामकृतमकामकृतं वा पापं प्रकाशयेदनन्तरम्पर्षोपदिष्टं धर्मं यथोक्तं प्रायश्चित्तं सततमविच्छेदेन चरेत् । तदनन्तरमपि पापान्तरानुत्पत्तये स्त्रीबालभृत्यगोविप्रेष्वतिशयितमनर्थहेतुभूतं कोपं विशेषतो वर्जयेदिति ।

सुधोपधिबुधोपगग्रहमणेरिवाधोगते
विधोरुपनिदर्शनाद्बहुविधोपाश्रयात् ।
भजे भुवनधोरणेः सवसुधोपभोगोद्यतेः
वधोद्यतमदं मृधोद्धतमधोः सदाधोक्षजम् ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दुश्रीरामपण्डितसुतेन विनायकेन ॥
शास्त्रे पराशरकृते विहिता व्यवस्थाध्यायेष्टमे नवमे विहितव्रतानाम् ॥ २

इतिश्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनाम-
धेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्म-
नोहरायां नवमोऽध्यायः ॥

श्रीगणेशायनमः ॥

प्रह्लादाह्लादहेतुः सकलसुरगणानन्दकेतुः श्रुतीनां
सेतुर्दैवारिनेतुः खरनखरगणा यस्य जेतुर्निपेतुः ।
वक्षःपीठे विनेतुर्निजभजनकृतामहसा धूमकेतुः
संसाराम्भोधिसेतुः स जयति भगवान् श्रीनृसिंहो नृकेतुः ॥ १ ॥
धर्माधिकारिकुलकैरवकाननेन्दुश्रीरामपण्डितसुतेन विनायकेन ॥
शास्त्रे पराशरकृते क्रियते ह्यगम्यागन्तुर्विशुद्धिवचने दशमे विचारः ॥ २ ॥

एवमध्यायद्वयेन कामाकामकृतगोवधोपपातके प्रायश्चित्तमभिहितमिदानीमगम्यागमनोपपातके प्रायश्चित्तं वक्तुं दशमाध्यायमारभते । तत्राध्यायार्थप्रतिज्ञापूर्वकं सामान्यप्रायश्चित्तमाह ।

**चातुर्वर्ण्येषु सर्वेषु हितां वक्ष्यामि निष्कृतिम् ॥**
**अगम्यागमने चैव शुद्धौ चान्द्रायणं चरेत् ॥ १ ॥**

चत्वारो वर्णाश्चातुर्वर्ण्यं तेषु चतुर्षु वर्णेषु सर्वेषु अनुलोमप्रतिलोमजेषु च हितामेव स्वल्पत्वेऽप्यनर्थफलनिवारिकामेव निष्कृतिं निष्क्रियते निस्सार्यते पापमनयेति निष्कृतिः प्रायश्चित्तिमगम्यागमने वक्ष्यामि तामेवाह । स्मृतौ भार्यामुपेयादित्यादिशास्त्राद्गम्या स्वभार्या तदितरा सर्वाप्यगम्या तस्या गमने सति शुध्यर्थं चान्द्रायणं वक्ष्यमाणलक्षणं चरेत् । अयमर्थः । येषु निमित्तेषु प्रायश्चित्तविशेषा वक्तव्यास्तेषु त एवानुष्ठेयायेषु पुनः प्रायश्चित्तविशेषो नाम्नातस्तेष्विदं चान्द्रायणं कर्तव्यमिति ।

चान्द्रायणस्यानेकविधत्वात् स्वाभिप्रेतस्य लक्षणमाह ।

**एकैकं ह्रासयेद्ग्रासं कृष्णे शुक्ले च वर्द्धयेत् ॥**
**अमावास्यां न भुञ्जीत ह्येष चान्द्रायणे विधिः ॥ २ ॥**

चन्द्रस्यायनं गतिं क्षयवृद्धिभ्यामुपलक्षणं यस्मिन्कर्मणि तच्चान्द्रायणं तस्मिश्चान्द्रायणे एष विधिर्यथा पौर्णमास्यां केशश्मश्रुलोमनखानि

वापयित्वोपोष्य श्वोभूते चतुर्दशग्रासान्यावकपायसाद्यन्यतमस्य द्रव्यस्य गायत्र्याऽभिमन्त्र्य भक्षयेदेव प्रतिदिनमेकैकपिण्डह्रासेनाऽमावास्यायामुपोष्य श्वप्रभृत्येकैकग्रासवृद्ध्या पौर्णमास्यां पञ्चदशग्रासानश्नीयादिति। तदनेन पिपीलिकामध्यचान्द्रायणेन सहाऽपराणि चत्वारि चान्द्रायणानि सविशेषाण्याह यमः। अथातश्चान्द्रायणकल्पं व्याख्यास्यामस्तद्यथा

पौर्णमास्यामुपेत सुब्राह्मणस्तु समाहितः।
केशश्मश्रूणि लोमानि कक्षोपस्थं च वापयेत् ॥
प्रयतो विधिवत्कृत्वा गृह्णीयात्सुसमाहितः।
मधुमांसं च लवणं शुक्तानि परिवर्जयेत् ॥
स्त्रीशूद्रौ नाऽभिभाषेत सत्यवादी समन्ततः।
पालाशं धारयेद्दण्डं शुचिमाञ्जीं च मेखलाम् ॥
यज्ञोपवीती करकं धारयेन्नियतः शुचिः।
शाणी वल्कलचीरो वा मार्गं वा वास उच्यते ॥
सर्वाण्यहानि मौनस्थस्त्वानमौनभृतव्रतः।
स्थानासनाभ्यां विहरेद्ब्रह्मचारी क्षपाशनः ॥

गोमयेन गोचर्ममात्रं स्थण्डिलमुपलिप्याभ्युक्ष्याग्निं प्रतिष्ठाप्य ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य प्रागुदगग्रान् दर्भानास्तीर्याज्यभागं कृत्वा महाव्याहृतिभिराज्याहुतीर्जुहुयात् व्रतपतय ऋतं सत्यं प्रजापतिं मित्रमग्नीषोमौ बृहस्पतिं यजेत एतानेवमर्चयित्वा महाव्याहृतयस्तथा।

ॐकारपूर्वा व्याख्यातास्तथा सर्वाः पृथक् पृथक्।
ऋतं सत्यं च गायत्रीमित्येतानि सदा जपेत् ॥
दशसाहस्रिकं चापि गायत्रीमान्हिकं जपेत्।
इन्द्रशुद्धा ऋचश्चापि प्रविश्य मनसा जपेत् ॥
तत्रैव गायेत्सामानि अथवा व्याहृतीर्जपेत्।
वृक्षमूलनिकेतः स्याद्रात्रौ वीरासनो भवेत् ॥
आर्द्रवासाश्चरेत्कृच्छ्रं स्नात्वा वस्त्रं न पीडयेत्।
चरुं वा श्रपयेन्नित्यं गोभ्यो निःसृतयावकैः ॥

पायसं शाकमन्नं वा भैक्ष्य वा वाग्यतश्चरेत् ।
आयसं तैजसं पात्रं चक्रोत्पन्नं विवर्जयेत् ॥
आतुराणां हि तत्पात्रमयस्तैजसचक्रजम् ।
तथैवान्यतमालाभे मृदं कुर्वीत वैदिकम् ॥
यज्ञियानां तु वृक्षाणां तेषां पर्णैः स्वयच्युतैः ।
हृसन्नु निरीक्षेत नाभिभाषेत्परस्त्रियम् ॥
गोदोहमात्रं तिष्ठेत न सुप्तानां परं व्रजेत् ।
सद्विधेषु चरेद्भैक्षं नियतेषु द्विजातिषु ।
अग्नयो यत्र हूयन्ते ब्रह्म वा यत्र पठ्यते ॥
प्रयतः कृतशौचस्तु भैक्षमभ्युक्षयेत्ततः ।
आदित्याभिमुखो भूत्वा गुरवे तन्निवेदयेत् ॥
अनुज्ञातस्ततः कुर्याद्वैर्वाणोपतृप्तजनम् ।
शाकं वा यदि वा पत्रं मूलं वा यदि वा फलम् ॥
सम्पादयेद्यथाहार्न्ते तेनाग्नौ जुहुयात्सदा
आहारार्थं द्विजे दत्त्वा तदन्नं नियमं श्रितः ॥
ग्रासं शेषेण कुर्वीत योऽस्यास्य प्रविशेत्सुखम्
कुक्कुटाण्डप्रमाणं वा ग्रासं कुर्यात्समाहितः ॥
अङ्गुल्यग्रे स्थितं चापि गायत्र्या चाभिमन्त्रयेत् ।
प्राशयित्वा उपस्पृश्य पुनरेवाभिमन्त्रयेत् ।
न तु विख्यापयेत्पिण्डं रसांश्चास्वादयेत्पुनः ॥
न निन्देच्च न प्रशंसेत स्वाद्वस्वादु च भक्षयेत् ।
प्राङ्मुखो नित्यमश्नीयाद्वाग्यतोऽतमकुत्सयन् ॥
यासो वृद्धिर्यथा सोमे मासि मासि प्रदृश्यते ।
अमावास्या पौर्णमास्या व्रतं चान्द्रायणं चरेत् ॥
ग्रासान्वर्द्धयते सोमः पञ्च पञ्च च पञ्च च ।
एकैकं वर्द्धयेत्पिण्डं शुक्ले कृष्णे च ह्रासयेत् ॥
अमावास्यां न भुञ्जीत एष चान्द्रायणो विधिः ।
एकैकं ह्रासयेत्पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ॥
एतत्पिपीलिकामध्यं चान्द्रायणमुदाहृतम् ।

वर्द्धयेत्पिण्डमेकैकं शुक्ले कृष्णे च ह्रासयेत् ॥
एतच्चान्द्रायणं नाम यवमध्यं प्रकीर्तितम् ।
त्रींस्त्रीन्पिण्डान्समश्नीयान्नियतात्मा दृढव्रतः ॥
हविष्यान्नस्य वै मासमृषिचान्द्रायणं स्मृतम् ।
चतुरः प्रातरश्नीयाच्चतुरः सायमेव च ।
पिण्डानेतद्धि बालानां शिशुचान्द्रायणं स्मृतम् ॥
पिण्डानष्टौ समश्नीयान्मासं मध्ये दिने रवौ ।
यतिचान्द्रायणं ह्येतत्सर्वकल्मषनाशनम् ॥

इति ।

यदा त्वेकस्मिन्पक्षे तिथिवृद्धिह्रासवशात्षोडश चतुर्दश वा दिनानि भवन्ति तदा ग्रासानामपि तद्वृद्धिह्रासौ वेदितव्यौ तिथिवृध्या चरेत्पिण्डानिति योगिना नियमस्मरणात् ।

चान्द्रायणार्हग्रासपरिमाणमाह ।

**कुक्कुटाण्डप्रमाणं तु ग्रासं वै परिकल्पयेत् ।**
**अन्यथा जातदोषेण न धर्मो न च शुध्यति ॥ ३ ॥**

कुक्कुटाण्ड प्रमाणमस्य तादृशं ग्रासं चान्द्रायणं कुर्वन् कल्पयेदश्नीयादन्यथा परिमाणाधिक्येन जातो यो दोषो व्रतवैगुण्यं तेन धर्मश्चन्द्रलोकानुकूलापूर्वसिद्धिर्न भवति नापि पापक्षयरूपा शुद्धिरिति । अयमर्थः ।

द्विविधं हि चान्द्रायणं नैमित्तिकं काम्यं च तत्र गोघ्नश्चान्द्रायणं चरेदित्यादिना गोवधादावुक्तं नैमित्तिकम् ।

धर्मार्थमाचरेद्यस्तु चन्द्रस्यैति सलोकताम् ।

इत्यादिना चन्द्रलोकप्राप्त्यर्थमुक्तं च काम्यं तदेतद्द्विविधमपि ग्रासवैगुण्येन प्रकृतफलसाधकं न भवतीति ।

उक्तप्रायश्चित्तोत्तराङ्गमाह ।

**प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ।**
**गोद्वयं वस्त्रयुग्मं च दद्याद्विप्रेषु दक्षिणाम् ॥ ४ ॥**

कर्तव्यतार्कं चान्द्रायणं कृत्वा ब्राह्मणभोजनं कुर्यात् यद्यप्यत्र ब्राह्मणसंख्याविशेषो न प्रतीयते तथापि दक्षिणाप्रतिग्रहीतृब्राह्मणेषु बहुवचनात्कपिञ्जलाधिकरणन्यायेन त्रित्वे पर्यवस्यति। भोक्तृणामेव च दक्षिणाप्रतिग्रहीतृत्वमुपपादितं स्पष्टं, भुक्तवद्भ्यश्च त्रिभ्यो ब्राह्मणेभ्यो गोद्वयं वस्त्रयुग्मं चेति त्रितयं यथासंख्यं दक्षिणां दद्यात्। अयमर्थः। सर्वान् ब्राह्मणान् भोजयित्वा तेषां मध्ये द्वाभ्यामेकैकां गामेकस्मै च वस्त्रयुग्मं दक्षिणात्वेन दद्यादिति।

एवं सामान्यप्रायश्चित्तमभिधाय विशेषप्रायश्चित्तप्राप्त्यादौ विषयस्य चण्डाल्यादिगमनस्य प्रायश्चित्तमाह।

**चाण्डालीं वा श्वपाकीं वा अनुगच्छति यो द्विजः।**
**त्रिरात्रमुपवासित्वा विप्राणामनुशासनात्॥ ५॥**
**सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरेत्।**
**गोद्वयं दक्षिणां दद्यात् शुद्धिं पाराशरोऽब्रवीत्॥ ६॥**

च [illegible] चण्डाल [illegible] या स्त्री चण्डालश्चात्रिविधः।
आरूढपतितापत्य [illegible] यश्च शूद्रजः
सगोत्रोढासुतश्चैव चण्डालास्त्रय ईरिताः।

इति यमस्मरणात्। तेन त्रिविधापि चण्डाली उग्रात्क्षत्तायां जातः श्वपाकस्तज्जातीया श्वपाकी उग्रात्तुजातः क्षत्तायां श्वपाक इति कीर्तित इति मनुस्मरणात्। ता यदि द्विजो ब्राह्मणो गच्छति तदासौ पर्षदुपदेशेन त्रिरात्रमुपवासित्वोपोष्य आचारार्थवाचिक्विप्रत्ययान्तात्क्तप्रत्ययनिष्पत्तेः। अनन्तरं सशिखं वपनं कृत्वा पूर्वोक्तलक्षणं प्राजापत्यद्वयं चरित्वा गोद्वयं दक्षिणां दत्वा शुद्धो भवतीति वृद्धपराशरोऽब्रवीत्। गोद्वयदक्षिणादानाशक्तं प्रत्याह शङ्खः

अकामतस्तु यो विप्रश्चण्डालीं यदि गच्छति।
तप्तकृच्छ्रेण शुध्येत प्राजापत्यद्वयेन च।

अनेन मूलवचनमप्यकामविषयं सिद्धं कामतस्त्वाह स एव।

कामतस्तु यदा विप्रश्चण्डालीं यदि सेवते ।
चान्द्रायणेन शुध्येत प्राजापत्यद्वयेन च ॥

इति । चण्डाल्यादिगमनभोजनाद्यत्यन्तपपर्के तु पातित्यमेव । तथा च मनुः ।

चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥

इति । वाशब्दद्वयोपादानात्पुल्कस्यादिगमनेऽपि स्मृत्योक्तप्रायश्चित्तमनुज्ञायते । तथा च सवर्त्तः ।

पुल्कसीगमनं कृत्वा कामतोऽकामतोऽपि वा ।
कृच्छ्रं चान्द्रायणं कुर्यात्ततो मुच्येत किल्बिषात् ॥
नटीं शैलूषकीं चैव रजकीं वेणुजीविनीम् ।
गत्वा चान्द्रायणं कुर्यात्तथा चर्मोपजीविनीम् ॥

आपस्तम्बोऽपि ।

म्लेच्छी नटी चर्मकारी रजकी बुरुडी तथा ।
एतासु गमनं कृत्वा चरेच्चान्द्रायणद्वयमिति ॥

शातातपः ।

कैवर्तीं रजकीं चैव वेणुचर्मोपजीविनीम् ।
प्राजापत्यविधानेन कृच्छ्रेणैकेन शुध्यति ॥
कापालिकस्त्रीगमने तु यमः ।
कापालिकान्नभोक्तृणां तन्नारीगामिनां तथा ।
ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैवन्दं द्वयम् ॥
इति । रजस्वलागमने तु सवर्तः
रजस्वलां तु यो गच्छेद् गर्भिणीं पतितां तथा ।
तस्यपापविशुध्यर्थमतिकृच्छ्रो विशोधकम् ॥
तत्रैव दिनभेदेन विशेषश्चतुर्विंशतिमते ।
रजस्वलां द्विजो गत्वा पराकं तु समाचरेत् ।
सांतपनं द्वितीयेऽन्हि प्राजापत्यं परेऽहनीति ।

गर्भिण्यां विशेषमाहात्रिः ।
षण्मासान्कामयेन्मर्त्यो गर्भिणीं स्त्रियमेव हि ।
आदन्तजननादूर्ध्वमेव धर्मो न हीयते ॥

इति । गर्भिणीं षण्मासानेव गच्छेन्नातः परम् । ऊर्ध्वं प्रसूतेरादन्तजननाद् बालस्य दन्तजननमारभ्य न प्रागित्यर्थः ।

क्षत्रियवैश्ययोस्तदाह ।

**क्षत्रियो वाथवैश्यो वा चण्डालीं यदि गच्छतः ।**
**प्राजापत्यद्वयं कुर्याद्दद्याद्गोमिथुनद्वयम् ॥ ७ ॥**

क्षत्रियो वैश्यो वा चण्डालीं श्वपाकीं वा गत्वा पर्षन्निदेशेन त्रिरात्रमुपोष्य सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरित्वा गोमिथुनद्वयं गोद्वयं वृषभद्वयं च दक्षिणां दद्यात् ।

शूद्रस्य तदाह ॥

**श्वपाकीं वाथ चण्डालीं शूद्रो वा यदि गच्छति ।**
**प्राजापत्यं चरेत्कृच्छ्रं चतुर्गोमिथुनं वहेत् ॥ ८ ॥**

शूद्रः श्वपाकीं चण्डालीं वा गत्वा प्राजापत्यसञ्ज्ञकमेकं पूर्वोक्तरीत्या चरित्वा चतुर्णां गोमिथुनानां समाहारश्चतुर्गोमिथुनं चतस्रो गाश्चतुरो वृषभांश्च दद्यात् ।

इदानीमज्ञानतो मात्रादिगमने प्रायश्चित्तमाह ।

**मातरं यदि गच्छेत्तु भगिनीं स्वसुतां तथा ।**
**एतास्तु मोहितो गत्वा त्रीणि कृच्छ्राणि संचरेत् ॥ ९ ॥**
**चान्द्रायणत्रयं कुर्याच्छिश्नच्छेदेन शुध्यति ।**

माता जननी अन्यासां पितृदारान्समारुह्येत्यत्र वक्ष्यमाणत्वात् । भगिन्येकोदरप्रसूता, स्वसुता सवर्णायां भार्यायां स्वस्मादुत्पन्ना, एतासामज्ञानतस्सकृद्गमने चरमधातुविसर्गपर्यन्ते व्यापारे शिश्नच्छेदादीनि त्रीण्यपि प्रायश्चित्तानि प्रातिलोम्यक्रमेण भवन्ति । तद्यथा । मातृगमने शिश्नच्छेदः । भगिनीगमने चान्द्रायणत्रयं स्वसुतागमने कृच्छ्रत्रयमिति ।

ननु

जनन्यां च भगिन्यां च स्वसुतायां तथैव च ।
स्नुषाया गमने चैव विज्ञेयमतिपातकमिति ॥

कात्यायनस्मरणादतिपातकत्वाविशेषे प्रायश्चित्तविशेषः किन्निबन्धन इति चेत् । सत्यम् । ब्रह्महत्यादीना पञ्चानां गोवधादीनां पञ्चचत्वारिंशता च महापातकत्वोपपातकत्वाविशेषे भवता वा प्रायश्चित्तविशेषः किन्निबंधनः ? वाचनिक इतिचेत् प्रकृतेऽपि दीयतां दृष्टिः । नचैवमतिपातकिनस्त्वते प्रविशेयुर्हुताशनमिति कात्यायनीयमेव प्रायश्चित्ततौल्य नोपपद्यत इति वाच्यम् । तस्य जनन्यां कामतः सकृद्गमने भगिन्यादिषु चासकृद्गमने ज्ञेयत्वात् । शिश्नच्छेद इति शिश्नमात्रच्छेदो न वृषणच्छेदः । अत एव नारदः । माता मातृष्वसाश्वश्रूरित्याद्युपक्रम्य ।

आसामन्यतमां गच्छन् गुरुतल्पग उच्यते ।
शिश्नस्योत्कर्त्तनात्तत्र नान्यो दण्डो विधीयते ॥

इत्यभिहितवान् । दण्ड इति दमनार्थं शुध्यर्थं च । शिश्नमात्रच्छेदे च पाक्षिक जीवनमपि संभवतीति नात्यन्तिक मरणान्तमिदं प्रायश्चित्तमकामतः सकृद्गमने । तत्रैवाभ्यासे तु नित्यवन्मरणमेव ।

पितृभार्यां तु विज्ञाय सवर्णां योऽधिगच्छति ।
जननीं वाप्यविज्ञाय नामृतः शुद्धिं प्राप्नुयादिति ॥

षाड्त्रिंशन्मतोक्तं द्रष्टव्यम् । अपेराधिक्यार्थत्वात्तस्य चाभ्यासपर्यायत्वात् । कामतः सकृद्गमने तु ।

यः कामतो महापापं नरः कुर्यात्कथंचन ।
न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते ॥

इत्यङ्गिरोविहित भृग्वग्न्यन्यतरपतन द्रष्टव्यम् । कथंचनशब्दस्य सकृदकामपर्यायस्य कामशब्दोपादानेन सकृत्व परिशेषितत्वात् । कामतोऽभ्यासे त्वग्निपतनं निष्कालको घृताभ्यक्तो गोमयाग्निना पादप्रभृत्यात्मानमवदाहयेदिति वसिष्ठोक्तेतिकर्तव्यताकमनुसंधेयम् । नन्वकामकृते प्रायश्चित्तमभिधाय कामकृते तदनभिदधत आचार्यस्य न्यूनतेतिचेत् । उच्यते ।

सर्वधर्मप्रवचनार्थमाचार्यस्य न प्रवृत्तिः। किंतु कलौ केषांचिदपूर्वाणामेव विधानार्थं, केषांचित्स्मृत्यन्तरप्रसिद्धानामपि गुणविशेषविधानार्थं च। तेन च येषां नापूर्वत्वं नवा गुणविशेषविधिस्तेषां स्मृत्यन्तरप्रसिद्धाना यथावस्थितानामेव याह्यत्वान्न पुनर्वचनमिति न न्यूनतेति। नचैवं कलावपि मरणान्तिकप्रायश्चित्तप्राप्तौ प्रायश्चित्तविधानं च विप्राणां मरणान्तिकमितिवचो विरुध्येतेति वाच्यम्। तस्य विधानशब्देनोपदेशपरत्वात्। स्वतो ज्ञात्वा तु तत्करणेऽपि न दोष इत्युपपादित प्राक्। भगिन्यां गमने चान्द्रायणत्रयम्। यथाह बृहद्यमः॥

चण्डालीं पुल्कसीं म्लेच्छीं शूद्रां च भगिनीं सखीम्।
मातापित्रोः स्वसारं च निक्षिप्तां शरणागताम्।
मातुलानीं प्रव्रजितां सगोत्रां नृपयोषितम्॥
शिष्यभार्यां गुरोर्भार्यां गत्वा चान्द्रायणं चरेत्॥

इति। एकस्य चात्र त्रित्वावयुत्यानुवादान् विधेयं चान्द्रायणत्रयं कुर्यादिति त्रित्वस्य विहितत्वात्। यत्तु संवर्त्तवचनम्॥

भगिनीं मातुराप्तां च स्वसारं वान्यमातृजाम्।
एता गत्वा स्त्रियो मोहात् तप्तकृच्छ्रं समाचरेत्॥

इति। तद्रेतःसेकादर्वाङ्निवृत्तौ द्रष्टव्यम्। भगिन्यादिषु तु कामतो-गमने शिश्नच्छेदमेवोपलक्षयिष्यति। अभ्यासे त्वग्निप्रवेश इति। तथा चतुर्विंशतिमते।

मातरं गुरुपत्नीं च स्वसारं स्वसुतां तथा।
गत्वा तु प्रविशेदग्निं नान्या शुद्धिर्विधीयते॥

इति। जननीगमने विहितं प्रायश्चित्तमन्यत्राप्यतिदिशति॥

**मातृष्वसृगमे चैवमात्ममेढ्रनिकृन्तनम्॥ १०॥**

मातृष्वसुश्चकारात् स्वानुक्तविशेषाणां श्वश्रूपितृष्वस्रादीनां ग्रहणम्। एतासु गमने आत्मनो मेढ्रस्य शिश्नस्य निकृन्तनं छेदनमेव शुद्धिहेतुः। यथाह नारदः।

माता पितृष्वसा श्वश्रूर्मातुलानी पितृष्वसा ।
पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
दुहिताचार्यभार्या च सगोत्रा शरणागता ।
राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥
आसामन्यतमां गच्छन् गुरुतल्पग उच्यते ।
शिश्नस्योत्कर्त्तनात्तत्र नान्यो दण्डो विधीयते ॥

इति । न च जनन्या तद्भगिन्यादीना च गमने समानव्रतमयुक्तमितिशंकनीयम् । जनन्यामकामतोऽन्यासु च कामतो गमने समानव्रतत्वसंभवात् ।

कामकृतविषयत्वं वा स्यात्कामकृते पृथक्प्रायश्चित्तश्रवणादव गम्यते ॥

तदेवाह

**अज्ञानेन तु यो गच्छेत्कुर्याच्चान्द्रायणद्वयम् ।**
**दशगोमिथुनं दद्याच्छुद्धिं पाराशरोऽब्रवीत् ॥ ११॥**

आसां मातृष्वसादीनां मध्ये भगिनीसुतयोरकामतस्सकृद्गमने प्रायश्चित्तं पूर्वमुक्तम् । अन्यासामपि मातृसखीभ्रातृसुतागुरुपत्नीस्नुषाभ्रातृभार्यामातुलानीसगोत्राणा गमने नामग्रहं वक्ष्यति । अत्र शिष्टानां मातृष्वस्रादीनामज्ञानतो गमने चान्द्रायणद्वय कृत्वा दशानां गोमिथुनाना समाहारो दशगोमिथुनं दक्षिणा दद्यादितिवृद्धपाराशरोऽब्रवीत् । तदुक्त चतुर्विंशतिमते ।

पितृष्वसा मातुलानीश्वश्रूर्मातृष्वसा तथा ।
एता गत्वा स्त्रियो मोहाच्चरेच्चान्द्रायणव्रतम् ॥

इति । अत्रैकत्वंजात्याभिप्रायेण । संख्याकाङ्क्षायां तु मूलवाक्यैकवाक्यतया द्वित्वमेवान्वेति । दक्षिणाकांक्षायां च दशगोमिथुनमिति । यद्वा चान्द्रायणैकत्व रेतःसेकादर्वाङ्निवृत्त्यभिप्रायेण । मूलोक्तं तु साङ्गक्रियानिनिवृत्तिमभिप्रेत्येति न विरोधः ।

इदानीं सापत्नमात्रादिगमने प्रायश्चित्तमाह ॥

**पितृदारान् समारुह्य मातुराप्तां तु भ्रातृजाम् ।**
**गुरुपत्नीं स्नुषां चैव भ्रातृभार्यां तथैव च ॥ १२ ॥**
**मातुलानीं सगोत्रां च प्राजापत्यत्रयं चरेत् ।**
**गोद्वयं दक्षिणां दत्वा मुच्यते नात्र संशयः॥१३॥**

पितृदारा जननी व्यतिरिक्ता । मातुराप्ता मातृसखी भ्रातृजा ज्येष्ठ-कनिष्ठान्यतरभ्रातृसुता । गुरुः पितृव्यतिरिक्ताचार्यादिस्तस्य पितृदारानित्यनेनैव प्राप्तत्वात् । तस्य पत्नी पाणिगृहीती, स्नुषा पुत्रभार्या, भ्रातृभार्या भ्रातुर्ज्येष्ठस्य कनिष्ठस्य वा भार्या, मातुलानी मातुलपत्नी, सगोत्रा समान-गोत्रा, एतास्तथैवाज्ञानेनैव सम्यक्क्रियानिष्पत्तिपर्यन्तसमारुह्य गत्वा प्राजा-पत्यत्रयाचरणानन्तर गोद्वयं दक्षिणा दत्वा तस्मात्पापान्मुच्यते इत्यत्र संशयो नास्ति । संशयाभाववचनं स्वल्पस्यास्य प्रायश्चित्तं कथं महापातक-निवर्तकत्वमितिशङ्कानिरासाय । तेन समारोहणमात्रविषयमिदं स्वल्प प्रायश्चित्तमितिनिरस्तम् । आरोहणे सम्यत्त्वस्य क्रियानिष्पत्तिपर्यवसायि-त्वात् । पितृदारानिति सामान्योपादानेऽपि सवर्णापितृदाराणामकामत-स्सकृद्गमन इदं द्रष्टव्यम् । तत्रैवाज्ञानादभ्यासे वृद्धमनु ।

गमने गुरुभार्यायाः पितृभार्यागमे तथा ।
अब्दत्रयमकामात्तु कृच्छ्रं नित्यं समाचरेत् ॥

इति । अकामान्नित्यं पितृभार्यागमे अब्दत्रय समाचरेदित्यर्थः । तत्रैव कामतः सकृद्गमने शङ्खः ।

अधःशायी जटाधारी पर्णमूलफलाशनः ।
एककालं समश्नन्वै वर्षे तु द्वादशे गते ॥
रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः ।
व्रतेनैतेन शुध्यन्ति महापातकिनस्त्विमे ॥

इति । तत्रैव कामतोऽभ्यासे तु मरणमेव । तथा षट्त्रिंशन्मते ।

पितृभार्यां तु विज्ञाय सवर्णां योऽधिगच्छति ।
जननीं चाप्यविज्ञाय नामृतः शुद्धिमाप्नुयात् ॥

इति । अत्रापेराधीक्यमर्थः । तच्चाभ्यासपर्याय इत्युक्तम् । पितृदारानिति बहुवचनान्तदारशब्दोपादानसामर्थ्यादसवर्णपितृदारगमनेऽपि प्रायश्चित्तं भवतीति ज्ञापितम् । तच्च स्मृत्यन्तरादवगन्तव्यम् । यथा अज्ञानात्सकृत् क्षत्रियागमने च पृथक् आह ।

चान्द्रायणं तप्तकृच्छ्रमतिकृच्छ्रं तथैव च
सकृद् गत्वा गुरोर्भार्यामज्ञानात् क्षत्रिया द्विज इति ॥

अत्रायमभिसन्धिः । गमनं हि त्रेधा भवति । पुरुषेच्छया, स्त्रीच्छया, उभयेच्छया चेति । तत्रेयं व्यवस्था । उभयेच्छातः प्रवृत्तौ तप्तकृच्छ्रः स्त्रीच्छयातिकृच्छ्रः पुरुषेच्छया चान्द्रायणमिति तत्रैवाज्ञानादभ्यासे जातूकर्ण्यः ।

गुरोः क्षत्रसुतां भार्यां पुनर्गत्वा त्वकामतः ।
अण्डमात्रं समुत्कृत्य शुध्येज्जीवन्मृतोऽपि च ॥

इति तत्रैव कामतः सकृद्गमने व्याघ्रः ।

कृच्छ्रं चैवातिकृच्छ्रं च तथा कृच्छ्रातिकृच्छ्रकम् ।
चरेन्मासत्रयं विप्रः क्षत्रियागमने गुरोः ॥

इति । अत्राप्युभयेच्छातः प्रवृत्तावतिकृच्छ्रः स्त्रीच्छया कृच्छ्रः स्वेच्छया कृच्छ्रातिकृच्छ्रः । तत्रैवकामतोऽभ्यासे देवलः ।

मत्या गत्वा पुनर्भार्यां गुरोः क्षत्रसुतां द्विजः ॥
अण्डाभ्यां वर्जितं लिङ्गमुत्कृत्य च मृतः शुचिः ।

इति । अज्ञानात्सकृद्वैश्यागमने प्रजापतिः ।

पञ्चरात्रं तु नाश्नीयात्सप्ताष्टौ वा तथैव च ।
वैश्या भार्यां गुरोर्गत्वा सकृदज्ञानतो द्विजः ॥

इति । तत्राप्युभयेच्छातः प्रवृत्तौ सप्तरात्रं स्त्रीच्छया पञ्चरात्रं स्वेच्छयाऽष्टरात्रमिति । तत्रैवाज्ञानादभ्यासे हारीतः ।

अभ्यस्य विप्रो वैश्यायां गुरोरज्ञानमोहितः ।
स षडब्दं ब्रह्मचर्यमाचरेद्यावदायुषम् ॥

इति । तत्रैव कामतः सकृद्गमने कण्वः ।

तप्तकृच्छ्रं पराकं च तथा सांतपनं गुरोः ।
भार्यां वैश्यां सकृद् गत्वा बुध्या मासं चरेद्द्विजः ॥

इति । अत्राप्युभयेच्छातः प्रवृत्तौ तप्तकृच्छ्रम् । स्त्रीच्छया सांतपं स्वेच्छया पराक इति । तत्रैव कामतोऽभ्यासे लौगाक्षिः ।

गुरोर्वैश्यां पुनर्गत्वा गत्वा चापि पुनः पुनः ।
लिङ्गाग्रं छेदयित्वा तु ततः शुध्येत्स किल्बिषात् ॥

इति । अस्मादेव ज्ञापकादभ्यासोक्तमेवगुरुतल्पप्रायश्चित्तमत्यन्ताभ्यासे ऽपि द्रष्टव्यम् । अज्ञानतः सकृच्छूद्रागमने दीर्घतपाः ।

प्राजापत्यं सांतपनं सप्तरात्रोपवासकम् ।
गुरोः शूद्रां सकृद्गत्वा चरेदज्ञानतो द्विजः ॥

इति । अत्राप्युभयेच्छातः प्रवृत्तौ सांतपनं स्त्रीच्छया प्राजापत्यं स्वेच्छया सप्तरात्रोपवास इति । अत्रैवाज्ञानादभ्यासे मनुः ।

चान्द्रायणं वा त्रीन्मासानभ्यस्य नियतेन्द्रियः ।
हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये ॥

इति । अत्रैव कामतः सकृद्गमने जाबालिः ।

अतिकृच्छ्रं तप्तकृच्छ्रं पराकं च तथैव च ।
गुरोः शूद्रां सकृद् गत्वा बुध्या विप्रः समाचरेद् ॥

इति । तत्राप्युभयेच्छातः प्रवृत्तौ तप्तकृच्छ्रः स्त्रीच्छयाऽतिकृच्छ्रः स्वेच्छया पराक इति । तत्रैव कामतोऽभ्यासे मनुः ।

पुनः शूद्रां द्विजो गत्वा बुध्या विप्रः समाहितः ।
ब्रह्मचर्यं च दुष्टात्मा चरेद्द्वादशकं समाः ॥

इति । इदं च ब्राह्मणीपुत्रादेरानुलोम्येन गमने द्रष्टव्यं प्रातिलोम्येन गमने त्वग्निप्रवेश एव सर्वेषाम् । प्रातिलोम्ये वधः पुंसो नार्याः

कर्णादिकर्त्तनमिति स्मरणात् । वधेतिकर्तव्यताकाङ्क्षायां तु वसिष्ठोक्त-मनुसन्धेयम् । शूद्रस्तु ब्राह्मणीमभिगच्छेद्वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येत् ब्राह्मण्याः शिरसि वपनं कारयित्वा नग्नां सर्पिषाभ्यज्य कृष्णखरमारोप्य महापथमनुसव्राजयेत् पूता भवतीति विज्ञायते । वैश्यश्चेद्ब्राह्मणीमुपगच्छे-ल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येत । ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरखरमारोप्य महापथमनुसव्राजयेत्पूता भवतीति विज्ञायते । राजन्यश्चेद्ब्राह्मणीमुपगच्छेच्छरपत्रैर्वेष्टयित्वा राज-न्यमग्नौ प्रास्येद्ब्राह्मण्याः शिरसि वपनं कारयित्वाभ्यज्य नग्नां रक्तखर-मारोप्य महापथमनुसव्राजयेत् पूता भवतीति विज्ञायते । एवं वैश्यो राजन्यां शूद्रश्चराजन्यवैश्ययोरिति । नचेदमुपपातकविषयमत्र न प्रवर्तत इति शङ्कनीयम् । यदोपपातकेऽपिप्रातिलोम्यगमने एवं तदा महापातके प्रातिलोम्यगमने सुतरामिति न्यायेनैवात्र प्रवृत्तेः । यद्यपि विजातीय-गुरुतल्पगमनप्रायश्चित्तप्रतिपादनं न प्रकृतोपयोगि, कलौ विजातीय-कन्याविवाहाभावात् । तथापि शास्त्रार्थस्वरूपजिज्ञासानिवर्तकत्वेन सङ्गत-मिति । सामान्यतस्तु पुरुषवत्स्त्रीणामप्यत्रमहापातकोत्वाविशेषाद्यथा-यथोक्तदोषप्रायश्चित्ते भवतः । तथा च कात्यायनः ।

> एष दोषश्च शुद्धिश्च पतितानामुदाहृता ।
> स्त्रीणामपि प्रसक्तानामेष एव विधिःस्मृतः ॥

इति । अयमर्थः । यस्मिन्निमित्ते पुरुषस्य प्राणान्तिकं प्रायश्चित्त-मुक्तम् । तत्रस्त्रिया अपि तदेव । यत्र तु व्रतरूपं तत्र तदेव । तथा च मनुः ।

> एतदेव व्रतं कार्यं योषित्सु पतितास्वपि ।

इति । तत्रैतदेवेत्यविकृतातिदेशात्वधःकल्पनावकाशोऽन्यत्र तु सा भवत्येव । अत एव मनुः ।

> यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम् ।

इति पारदार्ये एतत्स्त्रीणा मकलव्रतमतिदिष्टवान् । सोऽय गुरुतल्पदोषः साधारणस्त्रियां नास्ति । तथा च व्याघ्रः ।

जात्युक्त पारदार्यं च कन्यादूषणमेव च ।
साधारणस्त्रिया नास्ति गुरुतल्पत्वमेव च ॥

इति । मातृसख्यादीनां तु कामतो गमने नारदोक्तः शिश्नच्छेद एव । अभ्यासे तु चतुर्विंशतिमताभिहितोऽग्निप्रवेश एव चेति । चकाराद्भ्रातृस्त्रियादिगमनेऽपि स्मृत्यन्तरोक्त प्रायश्चित्त समुचितम् । तथा चतुर्विंशतिमते ।

भ्रातुश्चैव कनिष्ठस्य भार्यां गत्वा तु कामतः ।
सान्तपन तु कुर्वीत कृच्छ्रद्वयमथापि वा ॥
मातुश्च स्वस्रीया गत्वा पितृव्यतनया तथा ।
तप्तकृच्छ्र प्रकुर्वीत षड्रात्र तु सुतासु च ॥
गुरोर्दुहितर गत्वा पराक तु समाचरेत् ।
भागिनेयीं द्विजो गत्वा चरेच्चान्द्रायणव्रतम् ॥
मातुलस्य सुतां गत्वा पितुश्च स्वस्रीया तथा ।
प्राजापत्य प्रकुर्वीत हारीतवचन यथा ॥
मातुश्च स्वस्रीयां चैव भार्या गत्वा तु कामतः ।
पितृव्यतनयस्यैव सपाद कृच्छ्रमाचरेत ॥
दौहित्रीं पुत्रतनया चरेच्चान्द्रायणव्रतम् ।
तत्सुता च स्नुषा गत्व पराक तु समाचरेत् ॥
चरेच्चान्द्रायण विप्रो गत्वापाध्याययोषितम् ।
आचार्यस्य पराक तु बौधायनवचो यथा ॥
सर्वान्त्यजस्त्रियो गत्वा सपाद कृच्छ्रमाचरेत् ।
विधवागमने कृच्छ्रमहोरात्रसमन्वितम् ॥
व्रतस्थागमने कृच्छ्रं सपादं तु समाचरेत् ।
सखिभार्यां समारुह्य ज्ञातिस्वजनयोषितम् ॥
स कृत्वा प्राकृत कृच्छ्र पादं कुर्यात्ततः पुनः ।
कुमारीगमने विप्रश्चरेच्चान्द्रायणव्रतम् ॥
पतिता तु द्विजां गत्वा तदेव व्रतमाचरेद् ।

इति । अत्र च विधवात्वादिगुणनिमित्तं प्रायश्चित्तं पारदार्यप्रायश्चित्तेन समुच्चीयते । निमित्तद्वयसमावेशात् । पतितां कृतप्रायश्चित्तामपि पतितस्त्रियमिति ज्ञेयम् । तथा मूलवचनपरिगणितातिरिक्तपारदार्याक्षमपिप्रायश्चित्तं चकारात्समुच्चीयते । तदाह व्याघ्रः ।

ब्राह्मणो ब्राह्मणीं गच्छेदकामां यदि कामतः ।
कृच्छ्रं चान्द्रयणं कुर्यादर्द्धमेव प्रमादतः ॥
अर्द्धमेव सकामाया तप्तकृच्छ्रं सकृद्गतौ ।
अर्द्धमर्द्धं नृपादीनां दारेषु ब्राह्मणश्चरेत् ॥
एतद्व्रतं चरेत्सार्द्धं श्रोत्रियस्य परिग्रहे ।
अश्रोत्रियश्चद्विगुणमनुक्रममर्द्धमेव च ॥

इति । अयमर्थः । ब्राह्मणस्य ब्राह्मण्यामकामायां कामतो गमने चान्द्रायणं कृच्छ्रमिति चान्द्रायणविशेषणं । तस्यामेवाकामतो गमने चान्द्रायणार्द्धं सकामायां कामतो गमनेऽपि चान्द्रायणार्द्धमेव । इदमप्यभ्यासे । सकृद्गमने तु तप्तकृच्छ्रमेव सर्वत्र ब्राह्मणस्य क्षत्रियवैश्यशूद्रस्त्रीगमनेऽप्यर्द्धमेव चान्द्रायणम । इदं च श्रोत्रियस्याश्रोत्रियस्त्रीगमने तु चान्द्रायणम् । श्रोत्रियस्य श्रोत्रियस्त्रीगमने तु सार्द्धं चान्द्रायणम् । अश्रोत्रियस्य श्रोत्रियस्त्रीगमने चान्द्रायणद्वयम् । इदमपि गुप्तायामगुप्तायान्त्वर्द्धमेव चान्द्रायणं सर्वत्रेति । शूद्रादिगमने तु विशेषमाह कण्वः ।

शूद्रदारान् गतो विप्रो ह्यतिकृच्छ्रं समाचरेत् ।
चान्द्रायणं विशो राज्ञः सम च ब्राह्मणं व्रतम् ॥

इति । शूद्रस्त्रीगमनेऽतिकृच्छ्रं चरेत् । विशो राज्ञश्च दारान् गतो विप्रश्चान्द्रायणं चरेत् । समं तुल्यं चान्द्रायणमेव ब्राह्मणीगमनसम्बन्धिव्रतमित्यर्थः । तदेतदत्यन्ताभ्यासे द्रष्टव्यम् । ब्राह्मणोऽक्षत्रियादिगमने तु विशेषमाह । व्याघ्रः ।

विप्रेणैव निविष्टाश्चेच्चातुर्वर्ण्यप्रसूतयः ।
क्रमेण पादशो हीनं व्रतं तासु गतश्चरेत् ॥

इति । ब्राह्मणस्य ब्राह्मणीगमने कामाकामादिभेदेन यदुक्तं व्रतं तदेव ब्राह्मणोढक्षत्रियादिगमनेऽपि पादहीनं भवतीत्यर्थः । प्रातिलोम्येन गमने त्वाह संवर्त्तः ।

> कथं चिद्ब्राह्मणीं गच्छेत्क्षत्रियो वैश्य एव वा ।
> गोमूत्रयावकाहारो मासार्द्धेन विशुध्यति ॥
> शूद्रस्तु ब्राह्मणीं गत्वा कथं चित्काममोहितः ।
> गोमूत्रयावकाहारो मासेनैकेन शुध्यति ॥

इति । मासश्चार्द्धं चेति मासार्द्धं, तच्च प्रातिलोम्येन क्षत्रियवैश्ययोर्ज्ञेयम् । तद्यथा क्षत्रियस्य ब्राह्मणीगमने मासार्द्धं वैश्यस्य मासमिति । इदं चाकामविषयं कथं चित्काममोहित इति विशेषाभिधानात् । कामतो गुरुतल्पप्रायश्चित्तमेव । माता यस्मादि तस्येति प्रचेतोलिङ्गात् । तच्च प्रातिलोम्यगुरुतल्पप्रायश्चितप्रस्तावे वसिष्ठवाक्योदाहरणेन प्रतिपादितम् । इद च सर्वमपि व्रतं गर्भानुत्पत्तौ । तदुत्पत्तौ प्रतिपदोक्तं चतुर्विंशतिमताभिहितमेव कार्यं ।

> ब्राह्मणीगमने कृच्छ्रं गर्भे सान्तपनं चरेत् ।
> राज्ञीगर्भे पराकः स्याद्विड्गर्भे तु त्र्यहाब्दिकम् ॥
> शूद्रगर्भे द्विजः कुर्यात्तद्वच्चान्द्रायणव्रतम् ।
> चाण्डाल्या गर्भमारोप्य गुरुतल्पव्रतं चरेद् ॥

इति । एतदतिरिक्तस्यने तु तत्तदेवद्विगुणं कार्यम् । तदाहोशनाः

> गमने तु व्रतं यत्स्याद्गर्भे तद्द्विगुणं भवेद् ।

इति । एवं मानुष्यागमने प्रायश्चित्तमुक्तम् ।

इदानीं पश्वादिगमने प्रायश्चित्तमाह ॥

**पशुवेश्यादिगमने महिष्युष्ट्रीं कपीं तथा ॥**
**खरीं च शूकरीं गत्वा प्राजापत्यं समाचरेत् ॥ १४ ॥**

पशुरुक्तातिरिक्तोऽश्वादिः सर्वः वेश्या वेशो भृतिस्सा । जीवनमस्याःसा वेश्या पञ्चचूडाभिधाप्सरस्सन्ततिः समानजातेरुत्कृष्टजातेर्वा पुरुषादु-

त्यक्त्वा पुरुषसम्भोगवृत्तिर्ब्राह्मण्यादीव स्वतन्त्रा जातिः स्कन्दपुराणोक्ता । आदिशब्दात्स्वैरिण्यादीनां ग्रहणम । आसां गमने महिष्युष्ट्रकपीखरी शूकरीषु गत्वा यथोक्तं प्राजापत्यं कुर्यात् । यद्यप्यत्र सर्वपशुसाधारण्येन प्राजापत्य उक्तस्तथापि शुनीगमनेऽतिकृच्छ्रो ज्ञेयः ।

तथा च चतुर्विंशतिमते ।
सर्वासां पशुजातीनां गमने कृच्छ्रमाचरेत् ।
शुनीं चैव द्विजो गत्वा अतिकृच्छ्रं समाचरेत् ॥

इति । स्वैरिणीगमने शङ्खलिखिताबाहतुः । स्वैरिण्यां वृषल्यां चावकीर्णः सचैलस्नात उदकुम्भं दद्याद्ब्राह्मणाय । वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयेत् । क्षत्रियायाम् त्रिरात्रोपोषितो यवाढकं दद्यात् । ब्राह्मण्या त्र्यहमुपोष्य घृतपात्रं दद्यादिति । बन्धकीगमने तु षट्त्रिंशन्मते प्रायश्चित्तमुक्तम् ।

ब्राह्मणीं बन्धकीं गत्वा किञ्चिद्दद्याद्द्विजातये ।
राजन्यां तु धनुर्दद्याद्वैश्यां गत्वा तु चैलकम् ॥
शूद्रां गत्वा तु वै विप्र उदकुम्भं द्विजातये ।
दिवसोपोषितो बास्याद्दद्यार्द्विप्राय भोजनम् ॥

इति । स्वैरिणी बन्धक्योर्लक्षणमुक्तं स्मृत्यन्तरे । चतुर्थे स्वैरिणी प्रोक्ता पञ्चमे बन्धकी भवेदिति । व्यभिचार इति शेषः । यद्यपि वैश्यादीनांमनुष्यावान्तरजातित्वान्मानुषीगमनप्रायश्चित्तप्रस्ताव एव प्रायश्चित्ताभिधानमुचितं । तथापि पुरुषविशेषापरिग्रहसाम्यात्पश्वादिभिः सहाभिधानम् । अत एव इदमनवरुद्धासु तु परदारवदेवदोषमाह नारदः ।

स्वैरिण्यब्राह्मणी वेश्या दासी निष्कासिनी तथा ।
गम्याःस्युरानुलोम्येन स्त्रियो न प्रतिलोमतः ॥
आस्वेव तु भुजिष्यासु दोषः स्यात्परदारवत् ।
गम्यास्वपि हि नोपेयाद्यत्ताः परपरिग्रहाः ॥

इति । निष्काशिनी स्वाम्यनवरुद्धा दासी । गम्यत्वाभिधानं तु दण्डाभावाभिप्रायेण । न तु प्रायश्चित्ताभावमभिप्रेत्य तस्याःपत्यविधा-

नात् । भुजिष्या नियतपुरुषपरिगृहीताः । इदं च गर्भानुत्पत्तौ । तत्र तु कण्व आह ।

प्रसूतो यस्तु वैश्यायां भैक्ष्यभुङ्नियतेन्द्रियः ।
शतं सहस्रमभ्यस्य सावित्रीमिति शुद्धताम् ॥

इति । अत्राकामतोऽभ्यासे विशेषश्चतुर्विंशतिमते ।

सकृत्कृते तु यत्प्रोक्तं त्रिगुणं तत्त्रिभिर्दिनैः ।
मासात्पञ्चगुणं प्रोक्तं षण्मासाद्दशधा भवेत् ॥
संवत्सरात्पञ्चदश अब्दाद्विंशद्गुणं भवेत् ।
ततोऽप्येवं विकल्पः स्याच्छातातपवचो यथा ॥

इति । कामतोऽभ्यासे तु लौगाक्षिः ।

अभ्यासेऽहर्गुणा वृद्धिर्मासादर्वाग्विधीयते ।
ततो मासगुणा वृद्धिर्यावत्संवत्सरं भवेत् ॥
ततःसंवत्सरगुणा यावत्पापं समाचरेत् ॥

इति । अनेनैव न्यायेनानुक्तविशेषेषूपपातकेष्वभ्यासे प्रायश्चित्तमूहनीयम् ।

गोगमने विशेषमाह ॥

**गोगामी च त्रिरात्रेण गामेकां ब्राह्मणो ददत् ॥**

गोगामी ब्राह्मणस्त्रिरात्रमुपोष्य गामेकां दत्वा शुध्यति । महिष्यादिगमने यदुक्तंप्राजापत्यं तदभ्यासविषयम् ॥

इदानीं सकृद्गमने विशेषमाह ॥

**महिष्युष्ट्रीखरीगामी त्वहोरात्रेण शुध्यति ॥ १४ ॥**

महिष्युष्ट्रीखरीर्गत्वा अहोरात्रोपोषितः शुध्येदिति ।

वक्ष्यमाणप्रायश्चित्तनिमित्तानुत्पादार्थं स्वीरक्षणमाह ॥

**अमरे समरे वापि दुर्भिक्षे वा जनक्षये ॥**
**बन्दिग्राहे भयार्त्तौ वा सदा स्वस्त्रीं निरीक्षयेत् ॥ १५ ॥**

अमरो घाडा समरो युद्ध दुर्भिःक्षमशनाभावो जनक्षयो मारिका वन्दिग्राहो बलाद्ग्रामीकरणं भयार्त्तिश्चोरराजादितोयद्दुःखं तस्मिन् पुरुषः स्वानिष्टमपरिहृत्यापि स्वस्त्रीपरिरक्षणमवहितः कुर्यात् । तथा च वसिष्ठः । अप्रमत्ता रक्षत तन्तुमेनमिति । निरीक्षयेदितिच्छा स्वयमशक्तोऽन्यद्वाराऽपि रक्षयेदित्युक्तम् ।

चण्डाल्यादिगमने पुंसः प्रायश्चित्तमभिहितम् । इदानीं स्त्रीणा चण्डालादिगमने पञ्चभिः श्लोकैः प्रायश्चित्तमाह ॥

**चण्डालैः सह सम्पर्कं या नारी कुरुते ततः ।**
**विप्रान् दश वरान्कृत्वा स्वयं दोषं प्रकाशयेत् ॥१७॥**

या चातुर्वर्ण्यस्त्री चण्डालैः सह संपर्कं व्यवाय कुरुते । ततो हेतोर्दश विप्रान् वरान् चातुर्वैद्येत्याद्युक्तगुणसम्पन्नान् पर्षद कृत्वा स्वयमेव स्वकीय दोषं पर्षद्दक्षिणादानादिपूर्वकं प्रकाशयेत् । चण्डालैरितिबहुवचन स्वसमानधर्मश्वपचाद्यभिप्रायेण । तथाहाङ्गिराः ।

चण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा ।
मागधायोगवौ चैव सप्तैतेंऽत्यावसायिनः ॥

इति । अत एव चाप्यशुद्धः । सपृक्तास्यादथान्त्यैर्यैत्यांत्यग्रहणमेव कृतवान् ।

तेन रजकश्चर्मकारश्च नटो बुरुड एव च ।
कैवर्त्तमेदभिल्लाश्च सप्तैते त्वन्त्यजाः स्मृताः ॥

इत्यापस्तम्बोक्तानामप्यन्त्यानामग्रहण सिद्धम् । दशावरानिति पाठे दश अवरा येऽल्पास्तानित्यर्थः । पर्षदि दोषप्रकाशनस्य सामान्यतः प्राप्तावपि स्वय दोष प्रकाशयेदिति पुनर्विधानमप्रकाशस्याप्यस्य दोषस्य रहस्यप्रायश्चित्तापवादेन पर्षदुपदिष्टप्राश्चितप्राप्त्यर्थं ।

तदेवाह ॥

**आकण्ठसंमिते कूपे गोमयोदककर्दमे ॥**
**तत्र स्थित्वा निराहारा त्वहोरात्रेण निष्क्रमेत् ॥१८॥**

कण्ठप्रमाणं कूपं गत्वा सोदकेन गोमयेन समापूर्य तत्रैकमहोरात्रं निराहारा स्थित्वा परेद्युर्विष्क्रमेत् ।

किञ्च

**सशिखं वपनं कृत्वा भुञ्जीयाद्यावकौदनम् ।**
**त्रिरात्रमुपवासित्वा त्वेकरात्रं जले वसेत् ॥१९॥**

गोमयोदककूपान्निर्गत्य सशिखं वपनं कृत्वा यावकौदनं यवमयं चरुं द्वितीयेऽहनि भुक्त्वा अनन्तरं त्रिरात्रमुपोष्य षष्ठेऽहोरात्रं आकण्ठं जले वसेत् । यद्यपि ॥

शिखा यज्ञोपवीतं च कुशा मौनं तथैव च ।
वेदाध्ययनभैक्ष्यं च स्त्रीशूद्रपतनानि षड् ॥

इति स्मृत्यन्तरे स्त्रीणां शिखानिषेधात्सशिखमिति नोपपद्यते तथापि ।

सर्वान्केशान्समुद्धृत्य छेदयेदङ्गुलद्वयम् ॥

इति विशेषविहितस्त्रीवपनापवादेन समूलकेशवपनमत्रानेनोच्यत इति ।

किञ्च ॥

**शङ्खपुष्पीलतामूलं पत्रं वा कुसुमं फलम् ।**
**सुवर्णं पञ्चगव्यं च क्वाथयित्वा पिबेज्जलम् ॥ २० ॥**

सप्तमेऽहनि जलान्निर्गत्य शङ्खपुष्पीलताया मूलपत्रपुष्पफलाना-मयतमं सुवर्णं पञ्चगव्यं चैकत्र जले क्वाथयित्वा तज्जलं पिबेत् ।

किञ्च ॥

**एकभुक्तं चरेत्पश्चाद्यावत्पुष्पवती भवेत् ।**
**व्रतं चरति तद्यावत्तावत्संवसेत बहिः ॥ २१ ॥**

ततोऽष्टमदिनमारभ्य यावदृतुदर्शनमेकभुक्तं चरेत् । यावदुक्तं व्रतं समाप्नोति । तावत्सा बहिरेव तिष्ठेच गृहे सम्व्यवहरेदिति ।

उक्तव्रतोत्तराङ्गमाह ।

**प्रायश्चित्ते ततश्चीर्णे कुर्याद् ब्राह्मणभोजनम् ।**
**गोद्वयं दक्षिणां दद्याच्छुद्धिं पाराशरोऽब्रवीत् ॥२२॥**

यथोक्तप्रायश्चित्ताचरणानन्तरं द्वौ ब्राह्मणौ भोजयित्वा ताभ्यामेकैकां गामेवं गोद्वयं दक्षिणां दद्यादिमां शुद्धिं वृद्धपराशरोऽब्रवीदिति। तदेतत्सप्तरात्रसाध्यं व्रतम् । स्मृत्यन्तरे त्विदमेव नवरात्रसाध्यं व्रतमुक्तम् ।

चण्डालेन तु सम्पर्कं यदि गच्छेत्कथंचन ।
सशिखं वपनं कृत्वा भुञ्जीयाद्यावकौदनम् ॥
त्रिरात्रमुपवासः स्यादेकरात्रं जले वसेत् ।
आत्मना संमिते कूपे गोमयोदककर्दमे ॥
तत्र स्थित्वा निराहारा त्रिरात्रं तु ततः क्षिपेत् ।
शङ्खपुष्पीलतामूलं पत्रं वा कुसुमं फलम् ॥
क्षीरे सुवर्णसमिश्रं क्वाथयित्वा ततः पिबेत् ।
एकभुक्तं चरेत्पश्चाद्यावत्पुष्पवती भवेत् ॥
बहिस्तावच्च निवसेद्यावच्चरति सा व्रतम् ।
प्रायश्चित्ते ततश्चीर्णे कुर्याद् ब्राह्मणभोजनम् ॥
गोद्वयं दक्षिणां दद्याच्छुद्धिं स्वायंभुवोऽब्रवीद् ।

इति । कथंचनेतिवचनादिदमकामविषयमुक्तम् ।

इदानीं कामतो गमने प्रायश्चित्तमाह ।

**चातुर्वर्ण्यस्य नारीणां कृच्छ्रं चान्द्रायणव्रतम् ॥**
**यथा भूमिस्तथा नारी तस्मात्तां न तु दूषयेत् ॥२३॥**

चातुर्वर्ण्यस्त्रीणां कामतश्चण्डालसम्पर्के चान्द्रायणं कृच्छ्रं प्रायश्चित्तं व्रतं शोधकं भवति । तदाह मनुः ।

चण्डालं पुल्कसं म्लेच्छं श्वपाकं पतितं तथा ।
एतान् गत्वा स्त्रियः श्रेष्ठाः कुर्युश्चान्द्रायणं परम् ॥

इति । यद्यप्यत्र कामत इति नोपात्तं तथापि पूर्वस्याकामविषयत्वेनेदं कामविषये पर्यवस्यति प्रायश्चित्ताधिक्यात् ।

ननु

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।
पतिघ्नी च विशेषेण जुङ्गितोपगता च या ॥

इति । जुङ्गितपदोपात्तप्रतिलोमगते स्त्रीणां वसिष्ठेन हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेदिति वर्णेभ्यो हीनो हीनवर्णश्चण्डालस्तद्गमने बृहस्पतिना च त्याग एवोक्तस्तत्कथं तत्रापि व्रताभिधानमित्यत आह । यथा चण्डालाद्युपभुक्ताया भूमेर्यथोक्तशुध्यनन्तरमुपादानमेव न तु परित्यागः । तथा चण्डालाद्युपभुक्ताया अपि स्त्रिया यथोक्तप्रायश्चित्ताचरणानन्तरं स्वीकार एव तस्मात्ता न दूषयेन्न परित्यजेदिति कामतो भोजनव्यवायाद्यत्यन्तसम्पर्के तु मरणान्तिकमेव । तदाहोशनाः ।

अन्त्यजेन तु सम्पर्के भोजने मैथुने कृते ।
प्रविशेत्सम्प्रदीप्तेग्नौ मृत्युना सा विशुध्यति ॥

इति । अत एव मरणान्त प्रायश्चित्तमचिकीर्षन्त्या वासिष्ठत्यागो वार्हस्पत्यो वधो वा योजनीयस्तेन कामतः सकृद्गमने चान्द्रायणं विदधता मूलवाक्येनापि न विरोध इति । सगर्भायाश्चण्डालादिव्यवाये विशेषमाह ऋष्यशृङ्गः ।

अन्तर्वत्नी तु युवतिः संपृक्ता त्वन्त्ययोनिना ।
प्रायश्चित्तं न सा कुर्याद्यावद्गर्भो न निःसृतः ॥
न प्रचारं गृहे कुर्यान्न चाङ्गेषु प्रसाधनम् ।
न शयीत समं भर्त्रा न च भुञ्जीत बांधवैः ॥
प्रायश्चित्तं गते गर्भे विधि कृत्वाब्दिकं चरेत् ।
हिरण्यमथवा धेनुं दद्याद्विप्राय दक्षिणाम् ॥ इति ।

इदानीं बन्दीकृतायाश्चण्डालादिसंपर्के प्रयश्चित्तमाह ।

**वन्दिग्राहेण भुक्तायां हत्वा वध्वा बलाद्भयात् ॥**
**कृत्वा सान्तपनं कृच्छ्रं शुध्येत्पाराशरोऽब्रवीत् ॥ २४ ॥**

वन्दिग्राहो वन्दीकरणं तेन बलाद्रज्ज्वादिभिर्बध्वा कशादिभि-र्हत्वा वा भयाद् ल्यब्लोपे पञ्चमीविधानात् भयमुत्पाद्य या स्त्री पूर्वानुषङ्गा चातुर्वर्ण्यसम्बन्धिनी उत्तरानुषङ्गात्पापकर्मभिश्चण्डालाद्यैर्भुक्ता सा सान्तपन कृच्छ्र प्रायश्चित्त वक्ष्यमाणलक्षणं कृत्वा शुध्येदिति वृद्धपराशरोऽब्रवात्। इदं तु द्विरभ्यासे। सकृद्गमनेऽग्रे प्राजापत्यविधानात्। न च द्व्यहसाध्यस्य सान्तपनस्य प्राजापत्यात् न्यूनत्वेनाभ्यासविषयत्वमयुक्तमिति शङ्कनीयम् । सप्ताहसाध्यस्यात्र विवक्षितत्वात् । तथा च त्रिरात्रोपवासव्रतः प्राजापत्यात्सप्ताहोपवासात्मकस्यास्य पञ्चगव्याशनक्लेशेनाधिकत्वात् । यद्यपि शुध्येदिति सामान्यतोऽभिहितम् । तथापि परलोकशुद्धिरेवात्र विवक्षिता न संग्रहः । बलात्कारादिदुष्टस्त्रीसंग्रहो विधिचोदित इति कलिवर्ज्यस्मरणात् । अत एव बृहस्पतिः ।

> अनिच्छन्ती तु भुक्ता या गुप्तां ता कारयेद्गृहे ।
> मलिनाङ्गीमधःशय्या पिण्डमात्रोपजीविनीम् ।
> कारयेन्निष्कृति कृच्छ्रं पराकं वा ऽसमङ्गताम् ।

इति । अयमर्थः । असममतिहीन चण्डालादिकमनिच्छन्तीं सकृद्गतां स्त्रीं कृच्छ्रं द्विर्गतां पराकं वा कारयेत् । परन्तु स्वगृह एव गुप्तां वासो गृहान्तिके देय इति स्मरणादिति । पराकसान्तपनयोस्तु समानक्लेशत्वादेकविषयत्वमेव ।

तत्रैव सकृत्सम्पर्के प्रायश्चित्तमाह ।

**सकृद्भुक्ता तु या नारी नेच्छन्ती पापकर्मभिः ॥**
**प्राजापत्येन शुध्येत ऋतुप्रस्रवणेन च ॥ २५ ॥**

पापकर्मभिश्चण्डालादिभिरनिच्छन्ती वन्दीकृतबन्धनताडनादिना बलात्सकृद्भुक्ता या नारी चातुर्वर्ण्यस्त्री सा यथोक्तेन प्राजापत्येन ऋतुदर्शनेन च शुध्येदिति । तदाह संवर्त्तः ।

> बलात् मध्य भुक्ता चेद्दूयमानेन चेतसा ।
> प्राजापत्येन शुद्धः स्यात्तत् तस्याः पावनं परम् ॥

इति । अत्रैव विषये सवर्णसम्पर्के ऋष्यशृङ्गः ।

बलेन कामिता नारी सवर्णेन कथं चन ।
प्रायश्चित्तं त्रिरात्रं वै तस्याः शुध्यर्थमादिशेद् ॥

इति । अन्यत्र तु स्त्रीणामकामतः प्रातिलोम्येन व्यवाये संवर्त्तः ।

ब्राह्मण्यां कामतो गच्छेत् क्षत्रियो वैश्य एव वा ।
गोमूत्रयावकैर्मासात्तदर्द्धाच्च विशुध्यति ॥
ब्राह्मण्याः शूद्रसंपर्के कथं चित्समुपागते ।
चान्द्रायणेन शुद्धिः स्यात्तत्तस्याः पावनं परम् ॥

इति । क्षत्रियसङ्गमेऽर्द्धमासं वैश्यसङ्गमे मासमिति द्रष्टव्यम् । यदेव ब्राह्मण्याः क्षत्रियसङ्गमे तदेव क्षत्रियाया वैश्यसङ्गमे यदेव ब्राह्मण्या वैश्यसङ्गमे तदेव क्षत्रियायाः शूद्रसङ्गम इत्याद्यूह्यम् । एकान्तरत्वस्य साम्याद्द्व्यन्तराश्रवणाच्च । कामतस्तु बृहत्प्रचेताः ।

विप्रा शूद्रेण संपृक्ता न चेत्तस्मात्प्रसूयते ।
प्रायश्चित्तं स्मृतं तस्याः कृच्छ्रं चान्द्रायणत्रयम् ॥
चान्द्रायणे द्वे कृच्छ्रश्च विप्राया वैश्यसङ्गमे ।
कृच्छ्रचान्द्रायणे स्यातां तस्याः क्षत्रियसङ्गमे ॥
क्षत्रिया शूद्रसंपर्के कृच्छ्रं चान्द्रायणद्वयम् ।
चान्द्रायणं सकृच्छ्रं तु चरेद्वैश्येन सङ्गता ॥
शूद्रं गत्वा चरेद्वैश्या कृच्छ्रं चान्द्रायणोत्तरम् ।
इति । आनुलोम्येन व्यवाये तु विशेषमाह स एव ।
आनुलोम्येन कुर्वीत कृच्छ्रं पादावरोपितम् ॥

इति । क्षत्रियावैश्याशूद्राणां ब्राह्मणगमने त्रिपादार्द्धपादकृच्छ्राः क्रमेण भवन्ति । वैश्याशूद्रयोः क्षत्रियगमने त्रिपादार्द्धकृच्छ्रावित्याद्यूह्यम् । सवर्णव्यवाये तु पुरुषोक्तमेव प्रायश्चित्तम् । तदाह बृहस्पतिः ।

यत्पुंसः परदारेषु समानेषु व्रतं स्मृतम् ।
व्यभिचाराच्च भर्तुः स्त्री तदशेषं समाचरेद् ॥

इति। तदेतेषु सवर्णानुलोमप्रतिलोमव्यवायेषु त्रिष्वपि विलक्षणं प्रायश्चित्तमुक्तं षड्त्रिंशन्मते। ब्राह्मणी क्षत्रियवैश्यसेवायामतिकृच्छ्रकृच्छ्रातिकृच्छ्रौ चरेत्। क्षत्रिययोषितो ब्राह्मणराजन्यवैश्यसेवायां कृच्छ्रपादः कृच्छ्रार्द्धं प्राजापत्यं च शूद्रायां शूद्रसेवने प्राजापत्य ब्राह्मणराजन्यवैश्यसेवायामहोरात्रं त्रिरात्र कृच्छ्रार्द्धमिति। सगर्भाया व्यभिचारे स्मृत्यन्तरे विशेषः।

अन्तर्वत्नी तु या नारी समेताक्रम्य कामिभिः।
प्रायश्चित्तं न सा कुर्याद्यावद्गर्भो न निःसृतः॥
जाते गर्भे व्रतं पश्चात्कुर्यान्मासं तु यावकम्।
न गर्भदोषस्तत्रास्ति संस्कार्यः स यथाविधि॥ इति।

ननु बन्दीकृतायाश्चण्डालसंपर्कवत्सुरापानमपि सम्भवति। तत्र किं कार्यमित्यत आह।

**पतत्यर्द्धं शरीरस्य यस्य भार्या सुरां पिबेत्॥**
**पतितार्द्धशरीरस्य निष्कृतिर्न विधीयते॥ २९॥**

चातुर्वर्ण्यस्येत्यनुवृत्तावपि तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदिति त्रैवर्णिकस्यैव निषेधश्रवणाद्यच्छब्देन परामर्शः। तथा च यस्य त्रैवर्णिकस्य भार्या सजातीया, विजातीयायाः कलावभावात्, सुरा स्वस्वनिषिद्धां वक्ष्यमाणलक्षणां पिबति। तस्य शरीरस्यार्द्धं भार्यारूपं पतति। भार्याया अर्द्धशरीरत्वं श्रुतिसिद्धम्। अर्द्धो वा एष आत्मनो यत्पत्नीति। नन्विदं नारम्भणीयं सामान्यत एव

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥

इत्यादिना सुरापानस्य पातकत्वस्मरणात्। न च तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेदित्यादिनिषेधेषु पुंस्त्वश्रवणात्स्त्रीणां पातित्याप्राप्ताविदमारभ्यते इति वाच्यम्। पुंस्त्वस्योद्देश्यगतत्वेन ग्रहै-

कत्ववदविवक्षितत्वात् । सुरापाननिषेधोऽयं जात्याश्रय इति स्थितिरिति स्मरणेनाहत्य जात्याश्रयताबोधनाच्चेति चेत् । नैवम् । आत्यन्तिकपातित्यविधानायेदमारभ्यत इति ब्रूमः । पतितं च तदर्द्धशरीरं चेति पतितार्द्धशरीर तस्य भार्यारूपस्य निष्कृतिर्व्रतरूपप्रायश्चित्तानुष्ठानेन व्यवहार्यतासिद्धिर्न विद्यत इति । अत एव सुरापी व्याधिता चाधिवेत्तव्येत्याद्यधिवेदनस्मरणमपि तस्याः दृष्टार्थत्वेन युज्यते । तथा मद्यपस्त्रीनिषेवणमपि पुंस उपपातकं संगच्छते । तच्च कृतप्रायश्चित्ताया एव निषेवणं नत्वकृतप्रायश्चित्तायाः । तथात्वे यौनसंबधस्य सद्यः पातकत्वेन महापातकं स्यात् । न चेदमर्द्धप्रायश्चित्तापवादेन संपूर्णप्रायश्चित्तविधानपरमिति वाच्यम् । तस्यापदार्थत्वादवाक्यार्थत्वाच्च । नापि स्त्रीकृतेन सुरापानेन पुरुषस्यैव पातित्यमनेनोच्यते वचनाजस्यात्, यस्य भार्येति पुंसम्बन्धपुरस्करणाच्च । अन्यथा या सुरा पिबेत्सा पततीत्येवोच्येतेति मन्तव्यम् । शास्त्रफलं प्रयोक्तरीति न्यायविरोधात् । किञ्च स्वकृतेऽपराधे प्रायश्चित्तेन शुद्धिर्भार्याकृतापराधे न च निष्कृत्यभाव इति महदेववैषम्यमनन्तरोक्तसांतपनप्रायश्चित्तासंगतिश्चेत्यास्तां तावत् । तस्माद्द्विजातिभार्याया निषिद्धसुरापाने न व्यवहार्यता प्रायश्चित्तेन तु परलोकशुद्धिर्भवतीति वचनान्तरसामर्थ्यादवगम्यत इति । ननु पतितार्द्धशरीरस्येत्यत्र बहुव्रीहेरपि सम्भवात्पत्युः प्रायश्चित्ताभाव एव कुतो नेष्यत इत्यत आह ।

**गायत्रीं जपमानस्तु कृच्छ्रं सांतपनं चरेत् ।**

सुरापभार्यः पुमान् गायत्रीं जपमानो वक्ष्यमाणलक्षणं सांतपनं कुर्यात् । जपमान इतिवर्तमानार्थप्रत्ययप्रयोगाद्यावद्व्रतानुष्ठानं जपानुवृत्तिः सिध्यति ।

सांतपनलक्षणमाह ॥

**गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥**
**एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम् ॥ २७ ॥**

समासान्तर्गतस्याप्येकरात्रशब्दस्य वुध्याविच्छिन्नस्य गोमूत्रादिभिः प्रत्येकं समुदितैश्च समन्वयेन सप्तरात्र गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।

एकैकं प्रत्यहं पीत्वा त्वहोरात्रमभोजनम् ।
कृच्छ्रं सांतपनं नाम सर्वपापप्रणाशनम् ॥

इति । द्विरात्रमाह याज्ञवल्क्यः ।

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
प्राश्यापरे तूपवसेत्कृच्छ्रं सांतपनं चरन् ॥

इति । तदनयोः कल्पयोर्यथायोगं विनियोगो द्रष्टव्यः ।

नन्वेवमस्तु व्यभिचारे प्रायश्चित्त गर्भोत्पत्तौ तु कथमित्यतआह ।

**जारेण जनयेद्गर्भं मृते व्यक्ते गते पतौ ॥**
**तां त्यजेदपरे राष्ट्रे पतितां पापकारिणीम् ॥ २८ ॥**

या त्रैवर्णिकस्त्री पत्यौ मृते प्रेते व्यक्ते प्रत्यक्षे गते परोक्षे वा जारेण शूद्रेण निहितं गर्भं जनयेत्पूर्णकाले प्रजनयेत्तां पापकारिणीं पापाचरणशीलामत एव पापाभ्यासात्पतितां स्वराष्ट्रादुत्सार्य परराष्ट्रे त्यजेत् । तथा च वसिष्ठः ।

ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः ।
अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतराः ॥

इति । शूद्रेणेतिवचनादन्यगर्भोत्पत्तौ जनयेदिति वचनाच्च शूद्रगर्भस्याप्यन्तराविनाशे वा न त्याग इत्युक्तम् । तथा चतुर्विंशतिमते ।

विप्रगर्भे पराकः स्यात् क्षत्रियस्य तथैन्दवम् ।
ऐन्दवञ्च पराकश्च वैश्यस्याकामकारतः ॥
शूद्रगर्भे भवेत्त्यागश्चण्डालो जायते यतः ।
गर्भस्रावे धातुदोषैश्चरेच्चान्द्रायणत्रयम् ॥

इति । ननु

स्त्रीणां नास्ति परित्यागो ब्रह्महत्यादिभिर्विना ।
तत्रापि गृहमध्ये तु प्रायश्चित्तानि कारयेत् ।

परित्यक्ता चरेत्पार्श्वं बहुधा वापि किंचन।
तत्पापं शतधा भूत्वा बान्धवाननुगच्छति॥

इति तत्रैव स्त्रीणामात्यन्तिकपरित्यागे दोष उक्तस्तत्कथमुच्यते तां त्यजेदपरे राष्ट्र इति। सत्यम्। प्रायश्चित्तार्हत्वे सति परित्यागस्यान्याय्यत्वात्। प्रायश्चित्तादि कारयेदिति स्मरणात्। तदभावे तु संसर्गनिवृत्तये तदल्पानुज्ञानात्। सचोपपादित एव प्रायश्चित्तेन नेतरा इति। अत एव।

चतस्र एव संत्याज्याः पतने सत्यपि स्त्रियः।
श्वपाकोपहता या तु भर्तृघ्नी पितृपुत्रगा॥
इति तत्रैव क्वचित्त्यागोऽभ्यनुज्ञायते। एतेन
चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या।
पतिघ्नी च विशेषेण जुंगितोपगता च या॥
इति वासिष्ठमपि वाक्यं स्पष्टीकृतम्।

नन्वेवमस्तु गर्भितव्यभिचारायाम्, शङ्कितव्यभिचारायां तु कथमित्यत आह।

**ब्राह्मणी तु यदा गच्छेत्परपुंसा समन्विता॥**
**सा तु नष्टा विनिर्दिष्टा न तस्या गमनं पुनः॥ २९॥**

रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्द्धके।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित्स्त्रियाः॥

इत्याद्युक्तरक्षकातिरिक्तः पुमान्परस्त्वेन विवक्षितस्तेन पुंसा समन्विता प्रीत्यतिशयद्योतकहास्यादिव्यवहारपुरस्सरं सम्यगन्विता ब्राह्मणी यदा दशाहाधिकं कालं गृहान्तरं च ग्रामान्तरं देशान्तरं वा गच्छेत्सा नष्टेति पूर्वैर्विनिर्दिष्टा तस्याः पुनर्गमनं ज्ञातिषु प्रवेशो नास्तीति।

किंच।

**कामान्मोहाच्च या गच्छेत्त्यक्त्वा बन्धून्सुतान्पतिम्॥**
**सापि नष्टा परे लोके मानुषेषु विशेषतः॥ ३०॥**

स्त्रीणां यस्या यस्यामवस्थायां यो यो रक्षक उक्तो यथा तारुण्ये पतिर्वार्द्धके पुत्रा उभयाभावे ज्ञातयस्तस्यां तस्यामवस्थायां कामात्स्वातन्त्र्यान्मोहात्स्त्री धर्मापरिज्ञानाच्च तं तं त्यक्त्वा या दशाहाधिकं कालमन्यत्र गच्छेत्सापि शास्त्रोल्लङ्घनजनितप्रत्यवायात्परलोके नष्टा नरकभाग्भवति। कथं वित्तविवृत्तावपि मानुषेषु स्वबन्धुषु प्रवेशाभावाद्विशेषतो नष्टा भवतीति। पितृपरित्यागापरिगणनन्तु कौमारे कामचारप्राबल्याद्दोषाभावमभिप्रेत्येति।

उक्तार्थस्य क्वचिदपवादमाह।

**मदमोहगता नारी क्रोधाद्दण्डादिताडिता॥**
**अद्वितीयगता चैव पुनरागमनं भवेत्॥ ३१॥**

मदः पत्यादितिरस्कारजनकविरागाभिमानातिशयस्तेन मोहः पत्यादिशुश्रूषायाः परधर्मत्वज्ञानविरहस्तेन वार्तीत्यागता आक्रान्ता स्त्रीपत्यादिभिः शिक्षार्थं दण्डादिना ताडिता सती क्रोधादपि परपुरुषसमन्वयव्यतिरेकेणाद्वितीया एकाकिन्येव क्वापि गता तथापि स्वबन्धुषु पुनरागमनं भवेत्प्राप्नुयादिति ताडनमधिवेदनस्याप्युपलक्षणम्।

तथा च मनुः।

अधिविन्ना तु या नारी निर्गच्छेद्रुषिता गृहात्।
सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसंनिधौ।

इति। रुषितायाः कथं चिदनुनयासम्भवे कुलसन्निधौ बन्धुमध्ये त्याज्या स्याप्येतियावत्। इदं च समानन्यायत्वात्प्रकृतेऽपि द्रष्टव्यम्।

पुनरागमने कालावधिमाह।

**दशमे तु दिने प्राप्ते प्रायश्चित्तं न विद्यते॥**
**दशाहं न त्यजेन्नारीं त्यजन्नष्टमृतां तथा॥ ३२॥**

या ताडिता सती बहिर्निर्गता तया दशमेऽपि दिने स्वकीये गृहे प्राप्ते सति तस्या अनिर्णीते व्यभिचारे शङ्कामात्रेण प्रायश्चित्तं न

भवति। निर्गमे तु तथापि भवत्येव। अत एव तादृशीं नारीं दशाहपर्यन्तं न त्यजेच्च व्यवहारं परिहरेत्तथा सत्यपि ता त्यजन्नष्टो भवतीति । अनेन दशाहादूर्ध्वमनिर्गतेऽपि व्यभिचारे शङ्कामात्रेणापि प्रायश्चित्तं त्यागो वा भवत्येवेति गम्यते । यद्यप्युभयत्रापि शङ्का समानैव तथापि दशाहान्तर्वचनात्प्रायश्चित्ताभावः । परपुरुषसमन्वयेन स्वातन्त्र्येण वा गमने तु दशाहमध्ये अनिर्गतेऽपि व्यभिचारे प्रायश्चित्त भवति । ऊर्ध्वमसंग्राह्यता प्रतिपादनात् ।

नन्वसगौह्यामपिभर्तादिश्चेत्संगृह्णाति तदा कथमित्यत्त आह ।

भर्त्ता चैव चरेत्कृच्छ्रं कृच्छार्द्धं चैव बांधवाः ॥
तेषां भुक्त्वा च पीत्वा च अहोरात्रेण शुध्यति ॥ ३३ ॥

या परपुरुषसमन्वयेन स्वातन्त्र्या निर्गता ता दशाहान्तः प्रायश्चित्तमकारयित्वा तदूर्ध्वं कारयित्वापि वा संगृह्णन् भर्त्ता कृच्छ्रं चरेत् तत्रैव बांधवाः पितृश्वशुरादयोऽर्द्धकृच्छ्रं चरेयुः । यः पुनरकृतप्रायश्चित्तानां भर्त्रादीनां गृहे भुङ्क्ते पिबति वा सोऽप्यहोरात्रोपवासेन शुध्यतीति ।

नन्वस्तु परपुरुषसमन्वितायास्त्यागः क्रोधनिर्गतायास्तु स कथमित्यत आह ।

ब्राह्मणी तु यदा गच्छेत् परपुंसा विवर्जिता ॥
गत्वा पुंसां शतं याति त्यजेयुस्तान्तु गोत्रिणः ॥ ३४ ॥

यद्यपि ब्राह्मणी क्रोधादिना परपुंसा विवर्जितैव गच्छति तथा प्येकाकिनी गत्वा पुंसां शतमपि याति बाधकाभावादिति मत्वा गोत्रिणो बांधवास्ता तादृशीं त्यजेयुरेवेति ।

तादृश्याः प्रवेशे गृहस्याप्यशुद्धिमाह ।

पुंसो यदि गृहं गच्छेत्तदाऽशुद्धं गृहं भवेत् ॥
पितृमातृगृहं यच्च जारस्यैव तु तद्गृहम् ॥ ३५ ॥

सेयं दुर्ब्राह्मणी यदि पुंसः स्वपत्युर्गृहं पितृमातृगृहं जारस्यैव वा गृहं यच्चान्यदपि गच्छेत्तदा तत्रस्य कस्यापि गृहमशुद्धमप्रयतं भवेत् ॥

नन्वेवमप्रायत्ये तच्छुद्धिः कथं स्यादित्यत आह ।

**उल्लिख्य तद्गृहं पश्चात्पञ्चगव्येन सेचयेत् ॥**
**त्यजेच्च मृन्मयं पात्रं वस्त्रकाष्ठांश्च शोधयेत् ॥३६॥**

यस्मिन् गृहे सा ब्राह्मणी प्रविष्टा तद्गृहं सभूमिभित्युल्लिख्य पश्चात्पञ्चगव्येन सेचयेत् । तत्र स्थितं च समृन्मयं पात्रमखिलं त्यजेद्, वस्त्र काष्ठं च द्रव्यशुध्युक्तप्रकारेण शोधयेत् ।

**संभारान् शोधयेत्सर्वान्गोकेशैश्च फलोद्भवान् ॥**
**ताम्राणि पञ्चगव्येन कांस्यानि दश भस्मभिः ॥३७॥**

संभारान् मुसलोलूखलादीन् द्रव्यशुध्युक्तप्रकारेणैव शोधयेत् । फलोद्भवान् नारिकेलादिफलनिर्मितान् पात्रविशेषांश्च गोबालैर्मार्जयेत् । ताम्रपात्राणि पञ्चगव्येन कांस्यपात्राणि दशवारमावर्तितैर्भस्मभिश्च शोधयेत् ।

किंच ।

**प्रायश्चित्तं चरेद्विप्रो ब्राह्मणैरुपपादितम् ॥**
**गोद्वयं दक्षिणां दद्यात्प्राजापत्यद्वयं चरेत् ॥ ३८ ॥**

गृहस्वामी विप्रः पर्षद्भिर्योजितैर्ब्राह्मणैरुपपादितमुपदिष्टं प्रायश्चित्तं चरेत् । न स्वत एव ज्ञात्वा अनेन रहस्यत्वेऽप्यस्य पर्षदुपदेशोऽङ्गमित्युक्तम् । तच्च प्राजापत्यद्वयं कृत्वा गोद्वयं दक्षिणां दद्यादिति ॥

किंच ।

**इतरेषामहोरात्रं पञ्चगव्यं च शोधनम् ॥ ३९ ॥**

अन्येषां तद्गृहवासिनामहोरात्रोपवासेन पञ्चगव्यप्राशनेन च शुद्धिरिति ।

एवं ब्राह्मणशुद्धिमुक्त्वा क्षत्रियादिशुद्धिमाह ॥

**उपवासैर्व्रतैः पुण्यैः स्नानसंध्यार्चनादिभिः ॥**
**जपहोमदयादानैः शुध्यन्ते ब्राह्मणादयः ॥ ४० ॥**

ब्राह्मणा आदौ येषां ते ब्राह्मणादयः क्षत्रियवैश्यशूद्राः उपवासादिभिर्यथायथमनुष्ठितैः शुध्यन्ति । तद्यथा उपवासैरशनत्यागैर्व्रतैरेकभुक्तादिभिः पुण्यैस्तीर्थादिगमनैः शूद्रः शुध्यति । स्नानं महानद्यादौ सन्ध्या सध्यामठादौ अर्चनं विष्णुशिवादीनां आदिशब्दाद्ब्राह्मणभोजनं चेत्येतैर्वैश्यः शुध्यति । जपो गायत्र्याः, होमस्तिलैः, दया दीनेषु, दानं गवादेस्तैः क्षत्रियः शुध्यतीति ।

यदुक्तं संभारान् शोधयेदिति । तस्य क्वचिदपवादमाह ।

**आकाशं वायुरग्निश्च मेध्यं भूमिगतं जलम् ॥**
**न दूष्यन्ति च दर्भाश्च यज्ञेषु चमसा यथा ॥४१॥**

आकाशं रिक्तभाण्डं वायुस्तत्साधनं व्यजनभस्त्रादिअन्यथाशुध्युक्तिप्रकारापवादानर्थक्यात् । अग्निर्महानसादिसस्थो भूमिगतं जलं कूपवाप्यादिस्थवारि कुशाश्चेत्येते दुर्ब्राह्मणीसंपर्कवत्यपि गृहे विद्यमाना न दुष्यन्ति । यथा यज्ञेषु ऋत्विङ्मुखोच्छिष्टा अपि चमसा न दुष्यन्तीति ।

यतस्त्वं विश्वस्मिन्नखिलमपि भूतं तृणमिव
स्तुतो मेरुं कृत्वा निवससि मद्दैवाच्युत इव ॥
तदेकां विज्ञप्तिं कलय भगवन्नच्युतमनाः
स्वनामान्तः स्वान्तं सफलय ममाप्यच्युत इति ॥१॥
धर्माधिकारिकुलकैरवकाननेन्दुः
श्रीरामपण्डितसुतेन विनायकेन ॥
व्याख्यात एष दशमोऽपि पराशरस्या-
ध्यायः स्मृतावनुपगम्य गमं विशुध्यै ॥ १ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां दशमोऽध्यायः ॥

श्रीगणेशायनमः ॥

पिबन्तमसकृद्दृगञ्चलपुटैर्मुखेन्दोः सुधाम्
श्रियः श्रितनिजोरसः स्मितमिषात् श्रवन्तीं मुखात् ॥
स्फुटं तदुदितारुणच्छविभिरीषदुन्मीलितै-
र्जनार्दनमुपास्महे स्मरमहे महेच्छाकुलम् ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दुश्रीरामपण्डितसुतेन विनायकेन ॥
एकादश विवरणं क्रियतेऽधुनात्राध्याये पराशरकृतावघभक्ष्यशुध्यै ॥ २ ॥

एवं पूर्वाध्यायेनागम्यागमनप्रायश्चित्तमभिधायेदानीमभोज्यभोजनप्रायश्चित्तं वक्तुमेकादशाध्यायमारभते ॥

तत्रादावमेध्यादिभोजने प्रायश्चित्तमाह ।

**अमेध्यरेतो गोमांसं चाण्डालान्नमथापि वा ॥**
**यदि भुक्तं तु विप्रेण कृच्छ्रं चान्द्रायणं चरेत् ॥ १ ॥**

अमेध्यं विण्मूत्रादि, तदाह देवलः ।
मानुषास्थि शवं विष्ठा रेतोमूत्रार्तवं वसा ।
स्वेदोऽश्रुदूषिका श्लेष्मा मद्यं वाऽमेध्यमुच्यते ॥ इति ।

अमेध्यग्रहणेन सिद्धेऽपि रेतोग्रहणं पृथगुपादानं मलान्तरसंग्रहार्थम् । तथा च मनुः ।

वसा शुक्रमसृङ्मज्जामूत्रं विट् कर्णविण्नखाः ।
श्लेष्माश्रुदूषिका स्वेदो द्वादशैते नृणां मलाः ॥

इति । गोमांसम्पक्वमपक्वं वा चण्डालान्नं पक्वमपक्वमित्येतद्यदि विप्रो भुङ्क्ते तदा कृच्छ्रं चान्द्रायणं चरेत् । अयमर्थः । अमेध्यादीनामकामतः सकृद्भोजने कृच्छ्रं प्राजापत्यं वक्ष्यमाणं पञ्चगव्यस्नानपाने चरेत् । कृच्छ्रमितिसामान्योपादाने च कृच्छ्रातिकृच्छ्रतप्तकृच्छ्राणां ग्रहणम् ।

कामतस्तद्भोजने तु चान्द्रायणमिति । तत्राकामतो विण्मूत्रादिभक्षणे गौतमः । अमत्या मद्यपाने पयो घृतमुदकं वायुः प्रतित्र्यहं

तप्तानि पिबेत्तप्तकृच्छ्रस्ततोऽस्य संस्कारो मूत्रपुरीषकुणपरेतसां प्राशने-नेति । कामतस्तद्भक्षणे तु बृहस्पतिः ।

अलेह्यानामपेयानामभक्ष्याणां च भक्षणे ।
रेतोमूत्रपुरीषाणां शुद्धिश्चान्द्रायणं स्मृतम् ॥ इति ।
अभ्यासे तु चतुर्विंशतिमतेऽभिहितम् ।
विण्मूत्रभक्षणे विप्रश्चरेच्चान्द्रायणद्वयम् । इति ।

अत्यन्ताभ्यासेऽपि तत्रैव श्वकाकोच्छिष्टक्रिमिकीटादिभक्षणे ।

अमेध्यानां च सर्वेषां चरेच्चान्द्रायणत्रयम् । इति ।
श्वादिमूत्रादिभक्षणे तु संवर्त्तः ।
श्वचण्डालखरोष्ट्राणां कपेर्गोमायुकाकयोः ।
प्राश्य मूत्रं पुरीषं वा चरेच्चान्द्रायणव्रतम् ॥ इति ।
कामतस्तद्भक्षणे तु चतुर्विंशतिमते ।
श्वादीनां चैव विण्मूत्रं चरेच्चान्द्रायणत्रयम् ॥ इति ।
बलाकादिमूत्रादिभक्षणे त्वङ्गिराः ।
बलाकाभासगृध्राखुखरवानरसूकराः ।
दृष्ट्वा चैषाममेध्यानि स्पृष्ट्वाचम्य विशुध्यति ॥
इच्छयैषाममेध्यानि भक्षयित्वा द्विजातयः ।
कुर्युः सान्तपनं कृच्छ्रं प्राजापत्यमनिच्छया ॥ इति ।
विण्मूत्रादिसंसृष्टभक्षणे तु विष्णुः ।
मृद्वारिकुसुमादींश्च फलकन्देक्षुमूलकान् ।
विण्मूत्रदूषितान्प्राश्य चरेत्कृच्छ्रं च पादतः ॥
संनिकृष्टेऽर्द्धमेव स्यात्कृच्छ्रस्याशु विशोधनम् । इति ।
दूषणं संसर्गः संनिकर्षस्तदतिशयः ।

एतेन मूलोक्तं प्रायश्चित्तं मूत्रादिसंसृष्टान्नभक्षणे साक्षात्तद्भक्षण-स्यासंभावादिति परास्तम् । मूत्रादिसंसृष्टजलपाने कूर्मः ।

अपो मूत्रपुरीषाद्यैर्दूषिताः प्राशयेद्यदा ।
तदा सान्तपनं कृच्छ्रं व्रतं पापविशोधनम् ॥

इति । अकामतो गोमांसभक्षणे च बृहद्यमः ।
वराहैकशफानां च काककुक्कुटयोस्तथा ।
क्रव्यादानां च सर्वेषामभक्ष्या ये च कीर्तिताः ॥
मांसमूत्रपुरीषाणां प्राश्य गोमांसमेव च ।
श्वगोमायुकपीनां च तप्तकृच्छ्रं विशोधनम् ॥ इति ।

प्रचेता अपि श्वशृगालकाककुक्कुटपार्षतवानरवकचाषक्रव्यादखरोष्ट्रगजवाजिविड्वराहगोमानुषमांसभक्षणे तप्तकृच्छ्रमादिशेदिति । कामतो गोमांसभक्षणे तु संवर्तः ।

गोमांसं मानुषं चैव सूतिहस्तात्समाहृतम् ।
अभक्ष्यं तद् द्विजातीनां भुक्त्वा चान्द्रायणं चरेद् ॥ इति ।

इदमपि सकृद्भक्षणे अभ्यासे तु चान्द्रायणत्रयम् । तदाह प्रजापतिः ॥

चान्द्रायणत्रयं कुर्यादभक्ष्यपशुभक्षणे ।
एकमेव सकृद् भुक्त्वा चरेदाह प्रजापतिः ॥ इति ।
चण्डालान्नभक्षणे त्वङ्गिराः ।
चण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा ।
मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः ।
अन्त्यावसायिनामन्नमश्नीयाद्यश्च कामतः ॥
स तु चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा । इति ।

अकामतस्तप्तकृच्छ्रं कामतश्चान्द्रायणमिति। इदमेव प्रायश्चित्तं रजकाद्यन्नभक्षणेऽपि ज्ञेयम् । तदाह बौधायनः ।

बहूनामेकधर्माणामेकस्यापि यदुच्यते ।
सर्वेषामेव तत्कुर्यादेकरूपा हि ते स्मृताः ॥ इति

अतएवापस्तम्बः ।

रजकव्याधशैलूषवेणुचर्मोपजीविनः ।
एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणं चरेत् ॥

इदं कामतो ज्ञेयम् । अत्रैव कामाभ्यासयोराह यमः ।

भुक्त्वाचैषां स्त्रियो गत्वा पीत्वापः परिगृह्य च ।
कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दवद्वयम् ॥

कामाकामाभ्यामत्यन्ताभ्यासे तुपातित्यतज्जातीयत्वे भवतः तदाह सुमन्तुः ।

चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च ।
पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति ॥ इति

पातित्ये महापातकप्रायश्चित्तम् । तज्ज्यतीयत्वे तु प्रायश्चित्ताभाव एव भवति । चण्डालान्नमथापिवेत्यनास्थया तस्य धर्माणामन्येषामपि ग्रहणम् । तथाच हारीतः ।

यदन्नं प्रतलोमस्य शूद्रजस्योत्तमस्त्रियाम् ।
महापातकिनश्चैव यदच स्त्रीकृतघ्नयोः ॥
आरूढपतितस्यैव सगोत्राभर्तुरेव च ।
पाषण्डमाश्रिताना च यतेश्चैव तथैवच ।
अतिकृच्छ्रं चरेद्भुक्त्वा प्रमादाद्ब्राह्मणः सकृत् ।
मत्या चान्द्रायणं कुर्यादामं चेदर्द्धमेव वा ।
तद्धस्तभोजने चापि त्रिगुणं सहभोजने ।
चतुर्गुणं तदुच्छिष्टे पानीये चार्द्धमेव च ।
कृच्छ्राब्दपादमुद्दिष्टमज्ञानाभ्यासभोजने ।

मत्याभ्यासे तथा कुर्यात्त्रिंशत्कृच्छ्रं द्विजोत्तमः । इति उत्तमस्त्रियां ब्राह्मण्या प्रातिलोम्येन शूद्रजश्चण्डालः । आरूढपतितः सन्यासानन्तरं पुनर्गृहस्थः । पाषण्डी बौद्धादिमतानुगः । अनाश्रितः सामर्थ्ये ऽप्यनाश्रमी । अत्रार्द्धत्वादिप्रतियोगि चान्द्रायणमेव सन्निहितत्वात् । कृच्छ्राब्दपादं त्रैमासिकं कृत्रिंशत्कृच्छ्रमब्दमिति । चण्डालादिस्पृष्टान्नभोजने तु शंखः । अमेध्यपतितचण्डालपुल्कसरजस्वलावधूतकुष्ठिकुणिस्पृष्टानि भुक्त्वा कृच्छ्रमाचरेदिति । चण्डालादिस्पृष्टस्य स्नानं विना भोजने पैठीनसिः ।

चण्डालपतितामेध्यैः कुनखैः कुष्ठिना तथा ।
संस्पृष्टस्तु यदा भुङ्क्ते तप्तकृच्छ्रं समाचरेदिति ॥

इति। अकामतस्तप्तकृच्छ्रं कामतश्चान्द्रायणम् ॥

इति। इदमेव प्रायश्चित्त रजकाद्यन्नभक्षणेऽपि ज्ञेयम्।
तदाह बौधायनः।
बहूनामेकधर्माणामेकस्यापि यदुच्यते।
सर्वेषामेव तत्कुर्यादेकरूपा हि ते स्मृताः।
अत एवापस्तम्बः।
रजकव्याधशैलूषवेणुचर्मोपजीविनः।
एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणं चरेत्।
इद च कामतोः। अकामतस्तु तप्तकृच्छ्रमेवात्रापि ज्ञेयम्।
चण्डालादिस्पृष्टस्य स्नानं विना भोजने पैठीनसिः।
चण्डालपतितामेध्यैःकुनखैः कुष्ठिनांतथा।
संस्पृष्टस्तु यदा भुङ्क्ते तप्तकृच्छ्रं समाचरेद् ॥

इति। अत्रामेध्या म्लेच्छादयः सर्वे निन्दिता गृह्यन्ते। अस्य स्पर्शे-त्वहोरात्रोपोषितस्य पञ्चगव्याशनम्।

स्नानार्हस्तु यदा स्नानमकृत्वाऽश्नाति वै द्विजः।
अहोरात्रोषितः स्नातः पञ्चगव्येन शुध्यति ॥

इति स्मरणात्। चण्डालाद्युच्छिष्टभोजने त्वापस्तम्बः।

अन्त्याना भुक्तशेषन्तु भक्षयित्वा द्विजातयः।
चान्द्र कृच्छ्रं तदर्द्धं च ब्रह्मक्षत्रविशा विधिः।

अंगिराः।

चण्डालपतितादीनामुच्छिष्टान्नस्य भक्षणे।
चान्द्रायणं चरेद्विप्रः क्षत्रः सातपनं चरेत्।
षड्रात्रं च त्रिरात्र च वर्णयोरनुपूर्वशः ॥

इति। सांतपनं सप्ताहसाध्यं ज्ञेयम्। इदन्तु स्वतः प्रवृत्तस्य। बलात्कारेण भोजनस्य तु विशेषमाहापस्तम्बः।

बलाद्दासीकृता ये तु म्लेच्छचण्डालदस्युभिः।
अशुभं कारिताः कर्म गवादिप्राणिहिंसनम्।

उच्छिष्टमार्जनं यत्र तथा तस्यैव भोजनम् ।
खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणम् ।
तत्स्त्रीणां च तथा समस्ताभिश्च सह भोजनम् ।
मासोषिते द्विजातौ तु प्राजापत्यं विशोधनम् ।
चान्द्रायणं त्वाहिताग्नेः पराकस्त्वथवा भवेत् ।
चान्द्रायणं पराकं च चरेत्संवत्सरोषितः ।
संवत्सरोषितः शूद्रो मासार्द्धं यावकं पिबेत् ।
मासमात्रोषितः शूद्रः कृच्छ्रपादेन शुध्यति ।
ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं द्विजोत्तमैः ।
संवत्सरैस्त्रिभिश्चैव तद्भावं स नियच्छति ।
ह्रासो न विद्यते तस्य प्रायश्चित्तैर्दुरात्मन इति ।

अत्र बलाद्दासीकरणमेव प्रायश्चित्तनिमित्तं यच्छन्दयोगाद्दासीकरणनिर्वाहकं चाशुभकर्मकारणं तत्प्रपञ्चः श्वगवादिप्राणिहिंसादिस्तेन तदभ्यासेऽपि प्रायश्चित्तनिमित्तस्यैकत्वान्न प्रायश्चित्ताधिक्यम् यथा ब्रह्मवधनिर्वाहकाणां प्रहारादिव्यापाराणां बहुत्वेऽपि निमित्तैकत्वादेकमेव नैमित्तिकमिति । अत्र सर्वत्र प्रायश्चित्तानन्तरं पुनरुपनयनं कार्यम् । तच्चाग्रिमाध्याये स्वयमेव वक्ष्यति ।

एवं विप्रस्यामेध्यादिभोजनप्रायश्चित्तमुक्त्वा क्षत्रियादीनां तदाह ॥

**तथैव क्षत्रियो वैश्योऽप्यर्द्धं चान्द्रायणं चरेत् ॥**
**शूद्रोऽप्येवं यदा भुङ्क्ते प्राजापत्यं समाचरेत् ॥ २ ॥**

ब्राह्मणस्य चान्द्रायणविधानाद्वैश्यस्य च तदर्द्धविधानान्मध्यवर्त्तिनः क्षत्रियस्य पादोनं चान्द्रायणमिति गम्यते । तदेव च तथैवेत्यतिदेशेनावगमितम् । उपदिष्टादतिदिष्टस्याल्पत्वात् । शूद्रोऽप्येवममेध्यादि यदा भुङ्क्ते तदा प्राजापत्यं कुर्यात् । इदं च कामतः । अकामतस्तु आपस्तम्बः ।

चण्डालान्नं यदा भुक्तं ब्राह्मणाद्यैः प्रमादतः ।
प्रायश्चित्तं कथं तत्र वर्णे वर्णे विधीयते ॥
चान्द्रायणं चरेद्विप्रः क्षत्रः सांतपनं चरेत् ।
षड्रात्रं च त्रिरात्रं च वर्णयोरनुपूर्वशः ॥

इति । एतेन

भुक्त्वाऽतोऽन्यतमस्यान्नममत्या तु त्र्यहं क्षिपेत् ।
मत्या भुक्त्वा चरेत्कृच्छ्रं रेतो विण्मूत्रमेव च ॥

इतिसामान्यमनुवचनं शूद्रविषये स्पष्ट व्यवस्थापितम् ॥

एवं चतुर्णामपि वर्णानां व्रतं निरूप्य तदेव कर्त्तव्यमाह ।

**पञ्चगव्यं पिबेच्छूद्रो ब्रह्मकूर्चं पिबेद्द्विजः ॥**
**एकद्वित्रिचतुर्गा वा दद्याद्विप्राद्यनुक्रमात् ॥ ३ ॥**

पञ्चानां गव्यानां समाहारः पञ्चगव्यं वक्ष्यमाणलक्षणममन्त्रकमेव शूद्रः पिबेत् । तदेव वक्ष्यमाणविधिविशिष्टं ब्रह्मकूर्चं द्विजो विप्रादिः पिबेत् । अनन्तरं विप्राद्यनुक्रमेणैकद्वित्रिचतुर्गा दद्यात् । विप्र एकां क्षत्रियो द्वे वैश्यस्तिस्रः शूद्रश्चतस्र इति अनडुत्साहित्यापेक्षया वा शब्दः । तथा च बृहत्पराशरः ।

अगम्यागमने चैव मद्यगोमांसभक्षणे ।
शुद्धै चान्द्रायणं कुर्यान्नदीं गत्वा समुद्रगाम् ।
चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ।
अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणाम् ॥

इति । कामकृतनिमित्तविहितचान्द्रायणसमभिव्याहारात्तत्रैवानडुत्सहितं गोदानम् । अकामकृते तु गोमात्रदानमिति व्यवस्था

विप्रस्य शूद्राद्यन्नभोजने प्रायश्चित्तमाह ॥

**शूद्रान्नं सूतकान्नं च अभोज्यस्यान्नमेव च ॥**
**शङ्कितं प्रतिषिद्धान्नं पूर्वोच्छिष्टं तथैव च ॥ ४ ॥**
**यदि भुक्तं तु विप्रेण अज्ञानादापदापि वा ॥**
**ज्ञात्वा समाचरेत्कृच्छ्रं ब्रह्मकूर्चं तु पावनम् ॥ ५ ॥**

शूद्रस्वामिकमन्नं शूद्रान्नं सूतककालीनमन्नं सूतकान्नं न जननमरणाशौचान्नं तत्र व्रतविशेषस्य वक्ष्यमाणत्वेन पौनरुक्त्यापातात् । अभोज्यस्य कदर्यादेरन्नं शङ्कितम्, भोज्याभोज्यतया संदिग्धम्, प्रतिषिद्धमनर्चितादि

पूर्वोच्छिष्ट भुक्तादुर्वशिष्टमन्नं विप्रेण यद्यज्ञानादापदा वान्तरालाभेन-वा सकृद्भुक्तं तदा ब्रह्मकूर्चं वक्ष्यमाणलक्षणं पावनं शोधकं चरेदभ्यासे तत्समसङ्ख्यतया तदेवाभ्यसेन्मत्या सकृद्भोजने तु त्रिरात्रमुपवसेज्ज्ञात्वा-भ्यासे तु कृच्छ्रं चरेत्तदेतत्स्पष्टमाह प्रजापतिः ।

ब्राह्मणस्यैव शूद्रान्नमभोज्यं परिकीर्तितम् ।
सकृद्भुक्त्वा तथाऽज्ञानाद्ब्रह्मकूर्चं सकृत्पिबेत् ॥
अभ्यासे च तदभ्यस्येदाममन्नमगर्हितम् ।
मत्या त्रिरात्र कुर्वीत कृच्छ्रमभ्यासतश्चरेद् ॥

इति । सूतकान्नलक्षणमाह वृद्धवसिष्ठः ।

सर्वेषामेव वर्णाना सूतक राहुदर्शने ।
सचैलं च भवेत्स्नान सूतकान्न च वर्जयेत् ।
तदपि पक्वमेव । शतमन्नं विवर्जयेद् ॥

इतिषड्त्रिशन्मतात् । तत्र प्रायश्चित्तमाह हारीतः ।

आशौचान्न सूतकान्न सरोषं वापि संस्कृतम् ।
शङ्कितं प्रतिषिद्धान्नं विद्विषोऽन्नमथापि च ॥
यदि भुञ्जीत विप्रस्तु प्रायश्चित्तं ध्रुवं भवेत् ।
प्राशयेत्पञ्चभिर्मन्त्रैः पञ्चगव्यं पृथक् पृथक् ।
एतेन शुध्यते विप्रो ह्यन्यैश्चाभोज्यभोजनैः ॥

इति । समन्त्रकपञ्चगव्यविधानं ब्रह्मकूर्चमेव शब्दान्तरेणाह । इद-मकामतः सकृद्भोजने अन्यत्र प्रजापत्युक्तएव विशेषो बोध्यः । पूर्वोच्छिष्ट-भोजने तु ब्रह्मकूर्चसमानत्वमेव मुक्तं स्मृत्यन्तरे ।

स्वमुच्छिष्टं तु यो भुङ्क्ते यो भुङ्क्ते भुक्तभाजने ।
एवं वैवस्वतः प्राह भुक्त्वा सांतपनं चरेद् ॥
इति । अभोज्यान्नान्याह याज्ञवल्क्यः ।
कदर्यबद्धचौराणां क्लीबरङ्गावतारिणाम् ।
वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम् ।
चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम् ।

क्रूरोग्रपतितव्रात्यदांभिकोच्छिष्टभोजिनाम् ।
अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम् ।
शस्त्रविक्रयिकर्मारतन्तुवायश्ववृत्तिनाम् ।
नृशंसराजरजकक्रृतघ्नवधजीविनाम् ।
चैलधावसुराजीवसहोपपतिवेश्मनाम् ।
पिशुनानृतिनोश्चैव तथा चाक्रिकवन्दिनाम् ।
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ।

इति । एवमन्येऽपि स्मृत्यन्तरादनुसंधेयाः । एते च सर्वे ब्राह्मणा एव तत्तद्वृत्त्युपजीवनाभोज्यान्ना नत्वन्ये । अत एव बृहस्पतिः । भोज्यान्नान् परिगणय्यान्ते ।

कर्मस्वेतेषु यो मोहाद्ब्राह्मणो वर्तते सदा ।
प्रायश्चित्तेऽपि चरिते परिहार्यो भवेत्स हि ।
एते ब्राह्मणचण्डालाः सर्वे ब्रह्महताः किल ।
तथा दैवे च पित्र्ये च वर्जितास्तत्वदर्शिभिः ॥

इत्युपसंहृतवान् । एषामनुतापे प्रायश्चित्तमप्याह स एव ।

एतेषामेव सर्वेषां प्रत्यापत्तिं तु मार्गताम् ।
भैक्षाचमुपयुंजानो द्विजश्चान्द्रायणं चरेद् ॥

इति । एषामन्नभोक्तुरपि प्रायश्चित्तमाह स एव ।

एतेषां ब्राह्मणो भुक्त्वा दत्वा कृत्वा प्रतिग्रहम् ।
प्राजापत्येन शुध्येत्तु तस्मात्पापान्न संशयः ॥

इति । प्रतिषिद्धान्नमप्याह याज्ञवल्क्यः

अनर्चितं वृथामांस केशकीटसमन्वितम् ।
शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम् ।
उदक्यास्पृष्टसंघुष्टं पर्यायान्नं च वर्जयेत् ।
गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टं च कामतः ॥

इति । एवमन्यदपि उदाहार्यम् । अत्रान्नमिति सामान्योपादानेऽपि पक्वमेव ज्ञेयम् ।

१ पर्याचान्तमित्यपिपाठः ।

अभोज्यानां तु सर्वेषां भुक्त्वान्नमुपसंस्कृतम् ॥

इत्यङ्गिरःस्मरणात् । न त्वाममन्नमगर्हितमिति वचनात्

यत्तु

आमं वा यदि वा पक्कं शूद्रान्नमुपसाधयेत् ।

किल्बिषं भजते भोक्ता यश्च विप्रः पुरोहितः

इत्यगिरसैवोभयविधमपि निन्दितम् । तदाहिताग्निविषयम् ।

आहिताग्निस्तु यो विप्रः शूद्रान्नं प्रतिगृह्य तु ।

भुङ्क्ते तामसतां याति तिर्यग्योनिं च गच्छति ॥

इति तस्यैवोपक्रमात् । चकारेण समुच्चिते बिडालाद्युच्छिष्टे तथै-वेत्यनेनोक्तं प्रायश्चित्तमतिदिश्यते । तदाह संवर्त्तः ।

बिडालमूषकोच्छिष्टे पञ्चगव्यं पिबेद्द्विजः ।

श्वकाकोच्छिष्टगोच्छिष्टभक्षणे तु त्र्यहं पिबेद् । इति ॥

एवमुच्छिष्टस्याभोज्यत्वे क्वचिद्विशेषमाह ।

**बालैर्नकुलमार्जारैरन्नमुच्छेषितं यदा ॥**

**तिलदर्भोदकैः प्रोक्ष्य शुध्यते नात्र संशयः ॥ ६ ॥**

बाला अत्र पूर्णपञ्चवर्षाः

ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च ।

इतिस्मरणात् । तन्न्यूनस्य नोच्छिष्टापादकत्वम् ॥

अतो न्यूनतरस्यास्य नापराधो न पातकम् ॥ इति

बालैरनुपरिक्रान्तं नित्यं मेध्यमितिस्थितिः ॥

इतिस्मरणात् । नकुलमार्जारौ प्रसिद्धौ बहुवचनान्मूषकग्रहणम् । तैरुच्छेषितमुच्छिष्टीकृतमन्नं तिलदर्भयुतैरुदकैः प्रोक्षितं शुध्यतीत्यत्र संशयो नास्ति । अप्रोक्षितभोजने तु पूर्वोक्तमेव प्रायश्चित्तम् ।

अन्योच्छिष्टाशने उशनाः । ब्राह्मणोच्छिष्टाशने तु प्राणायाम-शतं कुर्यात् । क्षत्रियोच्छिष्टाशने प्राणायामसहस्रम् । वैश्योच्छिष्टाशने सहस्रं प्राणायामाः । मतिपूर्वे प्राजापत्यमतिकृच्छ्रं कृच्छ्रातिकृच्छ्रं च शूद्रोच्छि-

ष्ठाशने सप्तरात्रं यवागूपानं मतिपूर्वं चेत्पराक एवं द्विजात्युच्छिष्टभोजने शूद्राणां चेति । सहभोजने त्वाह यमः ।

भुक्त्वा सह ब्राह्मणेन प्राजापत्येन शुध्यति
भूभुजा सह भुक्त्वा च सप्तरात्रेण शुध्यति
शूद्रेण सह भुक्त्वा च चान्द्रायणमथाचरेद् ।
इति । मात्रादिभिः सह भोजने तु वृहद्यमः ।
माता वा भगिनी वापि भार्या बालाश्च योषितः ।
न ताभिः सह भोक्तव्य भुक्त्वा चान्द्रायणं चरेद् ।

इति ॥

उच्छिष्टभोजने ।

**यद्येकोऽपि त्यजेत्पात्रं शेषमन्नं न भोजयेत् ॥ ७ ॥**

एकस्यां पङ्क्तावुपविष्टानां विप्राणां सहैककालमेव भोजने प्रवर्त्तमाने केनापि निमित्तेन यद्येकोऽपि भोजनपात्रं त्यक्त्वोत्तिष्ठेत्तदा शेषमन्नं स्वस्वपात्रस्थितमन्यैरपि विप्रैर्न भोज्यं पङ्क्तेरुच्छिष्टत्वादिति ॥

तत्र प्रायश्चित्तमाह ॥

**मोहाद् भुञ्जीत यस्तत्र पङ्क्तावुच्छिष्टभोजनम् ॥**
**प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सांतपनं तदा ॥ ८ ॥**

यो विप्रो मोहात्पूर्वोक्तनिषेधाज्ज्ञानात् तस्यामेव पङ्क्तावुच्छिष्टभोजनस्तद्भोजनपात्र उपविष्ट एव भुञ्जीत स द्व्यहसाध्यं विप्रः कृच्छ्रं सांतपनं चरेत् ।

तथा च स्मृत्यन्तरे ।

यस्तु भुङ्क्ते द्विजः पङ्क्तावुच्छिष्टायां कदा च न ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥ इति ॥

पेयूषादिभोजने प्रायश्चित्तमाह ॥

**पेयूषं श्वेतलशुनं वृन्ताकफलगृञ्जनम् ॥**
**पलाण्डुवृक्षनिर्यासान् देवस्वकवकानि च ॥ ९ ॥**

उष्ट्रीक्षीरमविक्षीरमज्ञानात् भुञ्जते द्विजाः ॥
त्रिरात्रमुपवासेन पञ्चगव्येन शुध्यति ॥ १० ॥

पेयूषोऽभिनवं पयः इदं सन्धिन्यनिर्दशावत्सास्यन्दिनीयमसूपयसामुपलक्षणम् ।

सन्धिन्यनिर्दशावत्सागोपयः परिवर्जयेत् ।

इतियोगिस्मरणात् । स्यन्दिनीयमसूसन्धिनीना वेति गौतमस्मरणाच्च । तच्च सन्धिनीविशेषानुपादानाद्भोज्यपयसा अजामहिषीणा ज्ञेयम् । अत एव वसिष्ठः । गोमहिष्यजानामनिर्दशानामिति यमे निषेधादेव तद्विकाराणा दध्यादीनामपि निषेध एव । श्वेतलशुनं रसोनः श्वेतः सूक्ष्मः कलिङ्गामयकन्दनालः । श्वेतमिति विशेषणं रक्तव्यावृत्त्यर्थं तेन-तत्रेदं प्रायश्चित्तम् वृन्ताक श्वेतं कृष्णं च ॥

वृन्ताकं श्वेतवृन्ताकं मूलक क्षमूलकम् ।
अलाबु वर्तुलालाबुं शिग्रुक रक्तशिग्रुकमिति ॥

* देवलस्मरणात् । एतेनैकपक्षमाश्रित्य श्वेतशब्दस्य लशुनवृन्ताकाभ्यामन्वयो निरस्तः ।

नालिकाशणच्छत्राककुसुम्भालाबुविड्भवान् ।
कुम्भीकन्दकवृन्ताककोविदाराश्च वर्जयेत् ॥

इतिसामान्यश्रवणाच्च । यद्यपि पलाण्डुं श्वेतवृन्ताकं कुसुम्भं वनकंटकमित्यादिविशेषस्मरणं तत्तस्यापि निषेधाय नतु तस्यैवेति । पृथगिनिषेधबलादेव चोपसहार न्यायोऽपि निरस्तः । गृञ्जन लशुनानुकारी लोहितसूक्ष्मकन्दः । पत्रविशेषो वा कण्ठशुध्यर्थं गायकोपभुज्यमानरसः । मूलविशेषो वा गाजरापरपर्यायः । पलाण्डुः स्थूलकन्दनालो लशुनानुकारी वृक्षनिर्यासा लोहिताः वृक्षच्छेदसम्भवास्तु लोहिता अपि अत एव मनुः ।

लोहितान्वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा ॥

इति । लोहितग्रहणाद्विङ्गुकर्पूरादीनामनिषेधःदेवस्वं देवेभ्यो दत्तं गन्धपुष्पनैवेद्यादिव्यतिरेकेण ।

शङ्खोदकं हरेर्भुक्तं निर्माल्यं पादयोर्जलम् ।
चन्दन धूपशेषश्च ब्रह्महत्यापहारकम् ॥

इति तेषां ग्राह्यतास्मरणात् । कवकानि छत्राकाणि शिलीन्ध्रापरपर्यायाणि उष्ट्राः क्षीरमव्याः मेष्याः क्षीरं अवीग्रहणं द्विस्तनीमात्रोपलक्षणं तेन स्त्रैणादेरपि ग्रहणम् ।

औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकम् ॥

इतियोगिस्मरणात् । एतानि पेयूषादीनि यद्यज्ञानाद्विजा भुञ्जते तदा त्रिरात्रमुपोष्य चतुर्थेऽहनि पञ्चगव्य पीत्वा शुध्यन्तीति । छान्दसो वचनव्यत्ययः । तदाह यमः ।

लशुन च पलाण्डुं च गृञ्जनं कवकानि च ।
चतुर्णां भक्षण कृत्वा तप्तकृच्छ्रेण शुध्यति ॥

इति । चतुरहसाध्यतप्तकृच्छ्रप्रतिपादकत्वादस्य मूलसमानार्थत्वमेव । विष्णुरपि । व्रश्चनामेध्यप्रभवाश्च लोहितान्वृक्षनिर्यासान्, सेलुं च वृथाकृसरसंयावपायसापूपशष्कुलींश्च देवाना हावींषि च, गोऽजामहिषीवर्जं सर्वपयांसि च, अनिर्दशाहेतान्यपि च, स्यन्दनीसन्धिनीयमसूविवत्सायाः क्षीरं च, अमेध्यसूपश्च, दधिवर्जं केवलं सर्वभुक्तानि, ब्रह्मचारी श्राद्धाशने त्रिरात्रमुपवसेत् । इति । कवकानिचेति चकारादलाबुकिंशुकोदुम्बराणां ग्रहणम् । तदाह कूर्मः ।

अलाबुं किंशुक चैव भुक्त्वाप्येतद्व्रत चरेत् ।
औदुम्बरन्त्वकामेन तप्तकृच्छ्रेण शुध्यति ॥

इति । एवमन्येषामपि स्वभावदुष्टाना भक्षणे तप्तकृच्छ्रमाह प्रचेताः ।

संसर्गदुष्टं यच्चान्न क्रियादुष्टमकामतः ।
भुक्त्वा स्वभावदुष्टं च तप्तकृच्छ्रं समाचरेत् ॥

इति । इदं चाकामतः सकृद्भक्षणे । कामतो भक्षणे तु कामत, इत्यनुवृत्तौ याज्ञवल्क्यः ।

पलाण्डुं विड्वराहं च छत्राकं ग्रामकुक्कुटम् ।
लशुन गृञ्जन चैव जग्ध्वा चान्द्रायणं चरेत् ॥

इति । कामतोऽत्यन्ताभ्यासे पातित्यमेव । तथा च मनुः ।

छत्राकं विड्वराह च लशुन ग्रामकुक्कुटम् ।
पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः ॥

इति । अकामतोऽभ्यासे सान्तपन यतिचान्द्रायण वा ।

अमत्यैतानि षट् जग्ध्वा कृच्छ्र सान्तपन चरेत् ।
यतिचान्द्रायणं चापि शेषेषूपवसेदहः ॥

इति । कामतो वृन्ताकादिभक्षणे प्राजापत्यम् । तदाह यम ।

खट्वावार्ताककुम्भीकव्रश्चनप्रभवाणि च ।
भूतृणं शिग्रुकं चैव सुखण्डं कवकानि च ।
एतेषां भक्षणं कृत्वा प्राजापत्यं चरेद् द्विजः ॥

इति । कामतो निषिद्धक्षीरभोजने शङ्खः ।

अनिर्दशाया गोक्षीरं माहिषं चाजमेव च ।
पीयूषं च विवत्सायाः स्यन्दिन्या यमसोस्तथा ॥
सन्धिन्यमेध्यक्षीरं च भुक्त्वा पक्षव्रती भवेत् ।
क्षीराणि यान्यपेयानि तद्विकाराशने बुधः ॥
सप्तरात्रव्रतं कुर्याद्यावकं कामतो द्विजः ॥

इति । द्विजग्रहणाद्यदपेयन्तस्यापि संग्रहः । तथा च स्मृत्यन्तरम् ।

क्षत्रियश्चापि वृत्तस्थो वैश्यः शूद्रोऽथ वा पुनः ।
यः पिबेत्कपिलाक्षीरं न ततोऽन्योऽस्त्यपुण्यकृत् ॥

इति । अत्र सर्वत्रापि व्रतान्ते पुनरुपनयन कार्यम् । तथा च शातातपः ।

लशुनं गृञ्जनं जग्ध्वा पलाण्डुं च तथा शुनी ।

उष्ट्री च महिषी अनिर्देशाहा पैठीनसिरपि अव्युष्ट्रीमहिषीक्षीरपाने तप्तकृच्छः पुनरुपनयनमिति ॥

गोमांसातिरिक्तमांसभक्षणे प्रायश्चित्तमाह ।

**मण्डूकं भक्षयित्वा तु मूषिकामांसमेव च ॥**
**ज्ञात्वा विप्रस्त्वहोरात्रं यावकान्नेन शुध्यति ॥ ११॥**

मण्डूको भेकः मूषिका आखुस्तन्मांसं चकारादुक्तपक्षिमांसं च भक्षयित्वा अनन्तरं ज्ञात्वा विप्रो यावकान्नेनाहोरात्रं परिकल्प्य शुध्यति भक्षणानन्तरं ज्ञात्वेतिवदता भक्षणमज्ञानादेवोक्तं भवति । अन्यथा ज्ञान पूर्वकभक्षणे त्वेकरात्रप्रायश्चित्तविरोधोऽज्ञानकृतभक्षणे प्रायश्चित्ताभावश्चापद्येत । तथा च विष्णुः । तित्तिरिकपिञ्जललावकवर्त्तमहारवर्जं सर्वपक्षिमांसाशने त्वहोरात्रमिति । कामतो भक्षणे त्रिरात्रम् ।

तदाह याज्ञवल्क्यः ।

अनुपाकृतमांसानि विट्जानि कवकानि च ।
क्रव्यादपक्षिदात्यूहशुकप्रतुदटिट्टिभान् ॥
सारसैकशफान् हंसान्सर्वांश्च ग्रामवासिनः ।
कोयष्टिप्लवचक्राह्वबलाकाबकविष्किरान् ॥
वृथाकृसरसंयावपायसाऽपूपशष्कुलीः ।
कलविङ्कं सकाकोलं कुररं रज्जुदालकम् ॥
जालपादान् खञ्जरीटानज्ञाताश्च मृगद्विजान् ।
चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च ॥
मत्स्यांश्च कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ।

इति । एतेन बकबलाकाहंसप्लवचक्रवाककारण्डवगृहचरकपोतपारावतचाषचटककाकपादोलूकशुकसारटिट्टिभमद्गुरचाषभासजालपादनक्रकलविंकविष्कृतमत्स्यक्रव्यादमेध्यानां भक्षणे पञ्चगव्यं पिबेत्त्रिरात्रमित्यौशनसं स्वविषये व्यवस्थापितम् । अभ्यासादौ स्मृत्यन्तरोक्तद्वादशरात्राद्यूह्यम् ॥

ननु शूद्रान्नभोजनवत्क्षत्रियाद्यन्नभोजनेऽपि प्रायश्चित्तं कुतो नोच्यते राजान्नं तेज आदत्त इत्यादिनिषेधस्य तत्रापि तुल्यत्वादित्यत आह ।

**क्षत्रियश्चापि वैश्यश्च क्रियावन्तौ शुचिव्रतौ ॥**
**तद्गृहे तु द्विजैर्भोज्यं हव्यकव्येषु नित्यशः ॥ १२ ॥**

शुचि अभग्नं व्रतं वेदाध्ययनाङ्गं ब्रह्मचर्यं ययोस्तौ क्रियाग्निहोत्रादिका इत्यादिस्तद्वन्तौ ब्रह्मचर्यपूर्वकाधीतवेदानुष्ठाननित्यनैमित्तिकश्रौतस्मार्त्तक्रियौ यौ क्षत्रियवैश्यौ तद्गृहे हव्यकव्येषु दैविकपैतृककर्मसु नित्यशो नित्यं क्रियमाणेषु द्विजैर्विप्रैर्भोज्यम्भोक्तव्यमिति । विशेषणद्वयोपादानबलादेव निषेधस्यातद्विधक्षत्रियादिविषयत्वं प्रपञ्चयति । अत एव चतुर्विंशतिमते । तत्र प्रायश्चित्तमप्यभिहितम् ।

सहस्रं तु जपेद्देव्याः क्षत्रियस्यान्नभोजने ।
तथोपवासं वैश्यस्य सहस्रसार्द्धमेव च इति ॥ १२ ॥

कस्य चिच्छूद्रान्नस्य प्रतिप्रसवमाह ।

**घृतं क्षीरं तथा तैलं गुडं स्नेहेन पाचितम् ॥**
**गत्वा नदीतटे विप्रो भुञ्जीयाच्छूद्रभोजनम् ॥ १३ ॥**

अगव्यमपि घृतादि शूद्रसबन्धि भोज्य द्रव्यं विप्रो भुञ्जीयात्परन्तु नदीतीरादौ गत्वा न तु क्षत्रियादिगृहेष्विव तद्गृह एव स्थित्वेति स्नेहेन घृतादिना पाचितमित्यत्र स्नेहस्यैव साधकतमत्वावगमाज्जलादिपरिहारेण स्नेहपक्वं स्नेहशब्दोपादानेन सस्नेहं वदुग्धादिपक्वं चाभ्यनुज्ञायते । तथाशब्देन कन्दूपक्वादेरपिग्रहणम् । अत एव देवलः ।

कन्दूपक्वं स्नेहपक्वं पायसं दधिसक्तवः ।
एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत् ॥

कन्दूर्भ्राष्टशाला । सुमन्तुरपि ।

गोरसं चैव सक्तुं च तैलं पिण्याकमेव च ।
अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसा कृतम् ॥

इति । आपस्तम्बोऽपि ।

आममद्यं मधु घृतं धानाः क्षीरं तथैव च ।
गुडमांसरसा ग्राह्या निवृत्तेनापि शूद्रतः ॥

चतुर्विंशतिमतेऽपि ।

आरनाल तथा क्षीरं कादुकन्दधिसक्तवः ।
स्नेहपक्वं च तक्रं च शूद्रस्यापि न दुष्यति ॥
आरनाल काञ्जिकाम् । तत्र विशेषमाहाङ्गिराः ।
अशृतं वारनालं च कटुकाः सक्तवस्तिलाः ॥
फलानि पिण्याकमथो ग्राह्यमौषधमेव च ।

इति । अशृतमशृतधान्यप्रकृतिकम् ॥ १३ ॥

घृतादिभोजनाय वर्ज्यावर्ज्यौ शूद्रौ विविनक्ति ।

**मद्यमांसरतं नित्यं नीचकर्मप्रवर्तकम् ॥**
**तं शूद्रं वर्जयेद्विप्रः श्वपाकमिव दूरतः ॥ १४ ॥**
**द्विजशुश्रूषणरतान्मद्यमांसविवर्जितान् ॥**
**स्वकर्मनिरतान्नित्यं तान् शूद्रान्न त्यजेद् द्विजः ॥१५॥**

यः शूद्रो नित्यं क्रयविक्रयाशनादिभिर्मद्यमांसयोस्तथा नीचानां प्रतिलोमजानां यानि कर्माणि च अविकृन्तनादीनि तत्प्रवर्तकस्तं श्वपाकमिव दूरत एव विप्रो वर्जयेत् । ये पुनर्द्विजसुश्रूषणेरत मद्यमांससम्बन्धेन विशेषतो वर्जिताःस्वकर्मणि पाकयज्ञादौ नित्यम विरतचित्ततरां तत्परास्तान् शूद्रानुक्तघृतादिभोजने द्विजो न परिहरेत् । अत्र वचनद्वयेऽप्येकवचनबहुवचनाभ्या मद्यादिरतस्यैकस्यापि न प्रतिगृह्णीयात्स्वकर्मरतानां बहूनामपि प्रतिग्रहे न दोष इत्युक्तं भवति ॥

प्रतिवर्णं सूतकान्नभोजने प्रायश्चित्तमाह ।

**अज्ञानाद्भुञ्जते विप्राः सूतके मृतकेऽपि वा ॥**
**प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत् ॥ १६ ॥**

गायत्र्यष्टसहस्रेण शुद्धिः स्याच्छूद्रसूतके ॥
वैश्ये पञ्चसहस्रेण त्रिसहस्रेण क्षत्रिये ॥ १७ ॥
ब्राह्मणस्य यदा भुङ्क्ते द्वे सहस्रे तु दापयेत् ॥
अथवा वामदेव्येन साम्नैवैकेन शुध्यति ॥ १८ ॥

यदि विप्रा जननमरणाशौचयोरज्ञानाद्भुञ्जते तदा तेषां विप्राणां तत्तद्वर्णनिमित्तं प्रायश्चित्तं कथं स्यादित्याशङ्क्याह शूद्रसूतके गायत्र्यष्टसहस्रेण शुद्धिः स्यात् । अष्टानां सहस्राणां समाहारोऽष्टसहस्र गायत्र्या अष्टसहस्रं गायत्र्यष्टसहस्र तेन एवमुत्तरत्रापि । सूतकिनः शूद्रस्यान्न विप्रो भुक्त्वाऽष्टसहस्राणि गायत्रीर्जपेत् वैश्यस्य पञ्चसहस्राणि क्षत्रियस्य त्रीणि सहस्राणि ब्राह्मणस्य द्वे सहस्रे इति अथवा सूतकिब्राह्मणान्नभोजने वामदेव्येनैकेन साम्नैव शुध्यति कया नश्चित्र आभुवदूतीत्यस्यामृच्युत्पन्नं साम वामदेव्यं तस्य सकृज्जपेनैव शुद्धिरिति । कामकृते त्वाह गर्गः ।

शावे च सूतके चैवामत्या भुक्त्वैन्दवं चरन् ।
मत्याभ्यासे तथा कुर्यात्कृच्छ्रं चान्द्रायणोत्तरम् ॥
त्र्यहं वा कामतः कुर्यादभ्यासे कृच्छ्रमेव च ।
द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि वा ॥
क्षत्रविट्शूद्रजातीनामाशौचे परिकीर्तितम् ।
सवर्णानां तु सर्वेषां विप्रवन्निष्कृतिः स्मृता ।
क्रमाद् वृद्धं क्रमाद्धीनं हीनजात्युत्तमेष्वपि ॥

इति । तत्राकामतो ब्राह्मणसूतकान्नभोजने विहितस्त्र्यहो द्विसहस्रगायत्रीजपसमान एव कृच्छ्रचतुर्थांशरूपत्वात् । इदं च प्रायश्चित्तमाशौचान्ते कर्तव्यम् । तथा च विष्णुः । ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्नीयात्तस्य तावदेवाशौचं यावत्तेषाम्, आशौचापगमे प्रायश्चित्तं कुर्यादिति । तथाऽऽशौचादिश्राद्धभोजनेऽपि प्रायश्चित्तमुक्तं चतुर्विंशतिमते ।

प्राजापत्यं नवश्राद्धे पादोनं चाद्यमासिके ।
त्रैपक्षिके तदर्द्धं स्यात्पादो द्वैमासिके ततः ॥

पादोनं कृच्छ्रमुद्दिष्टं षण्मासे चाब्दिके तथा।
त्रिरात्रं चान्यमासेषु प्रत्यब्दं चेदहः स्मृतम् ॥
चान्द्रायणं नवश्राद्धे पादोनं मासिके स्मृतम्।
त्रैपक्षिके सान्तपनं कृच्छ्रं मासद्वये स्मृतम् ॥
क्षत्रियस्य नवश्राद्धे व्रतमेतदुदाहृतम्।
वैश्यस्यार्द्धाधिकं प्रोक्तं क्षत्रियस्य मनीषिभिः ॥

शूद्रस्य तु।

नवश्राद्धे भवेदर्द्धं प्राजापत्यं तु सर्वदा।
सङ्कल्पितेषु भुक्त्वा तु त्रिरात्रं क्षपयेदिति ॥
ब्रह्मचारिणां श्राद्धभोजने यमः।
मासिकादिषु योऽश्नीयादसमाप्तव्रतो द्विजः ॥
त्रिरात्रमुपवासोऽस्य प्रायश्चित्तम्विधीयते।
मधुमांसं च योऽश्नीयाच्छ्राद्धे सूतक एव च ॥
प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेद्।
इति। अनुक्तविशेषे, उशनाः।
दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग् द्विजः ॥
ततः सन्ध्यामुपासीत शुध्येच्च तदनन्तरम्।

इति। संस्काराङ्गश्राद्धभोजने तु व्यासः।

निवृत्ते चूडहोमे तु प्राङ्नामकरणात्तथा।
चरेत्सान्तपनं भुक्त्वा जातकर्मणि चैव हि ॥
स्वतोऽन्येषु च भुक्त्वान्नं संस्कारेषु द्विजोत्तमः।
नियोगादुपवासेन शुध्यते निन्द्यभोजने ॥

इति। धौम्योऽपि।

ब्रह्मौदने च सोमे च सीमन्तोन्नयने तथा।
जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत् ॥ इति ॥ १८ ॥

पुनरपि कस्य चिच्छूद्रान्नस्य प्रतिप्रसवमाह ॥

**शुष्कान्नं गोरसं स्नेहं शूद्रवेश्मन आहृतम् ॥**
**पक्वं विप्रगृहे भुक्तं भोज्यं तन्मनुरब्रवीत् ॥ १९ ॥**

शुष्कमाममन्नं तण्डुलादि गोरसो दध्यादि घृतं क्षीरमित्यत्रोक्तस्यापि पुनरुपन्यासो गव्यत्वप्राप्त्यर्थः । स्नेहो नवनीतादि घृततैलयोः प्रागुक्तेः । एतत्सर्वं शूद्रगृहादानीय यदि विप्रगृहे पक्वं भवति तदा भोज्यमिति मनुराह । तत्र विशेषः अभुक्तमिति । यदि शूद्रगृहादानीयमानाच्छुष्कादेर्मध्याच्छूद्रैः कमपि कौतुकादिना भुक्तं न भवेत्तदैव तद्विप्रगृहपक्वमपि भोज्य नान्यथेति । तदाह प्रजापतिः । आममन्नमगर्हितमिति । सुमन्तुरपि । गोरसं चैवपक्व चेदित्यादि विशेषः प्रागेव निरूपितः ॥

आपदि शूद्रान्नभोजने प्रायश्चित्तान्तरमाह ।

**आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि ॥**
**मनस्तापेन शुध्येत द्रुपदां वा शतं जपेत् ॥ २० ॥**

यद्यापत्काले विप्रः शूद्रगृहे अकामाद्भुञ्जीत तदा मनस्तापात्कि मयेदं निषिद्धमाचरितं धिङ्मामित्याद्यनुशयाच्छुध्येत । कामतो भोजने द्रुपदा गायत्रीं याजुषीं द्रुपदादिवमुमुचान इत्येता शतवारं जपेदिति मनस्तापद्रुपदयोः शोधकत्वमाह योगीश्वरः ।

पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः ॥ इति ॥
द्रुपदानामगायत्री यजुर्वेदे प्रतिष्ठिता ॥ इति ॥

वैदिकावैदिकविषयत्वेनास्य शूद्रान्न सूतकान्नं चेत्यस्य च व्यवस्था करणीया ॥ २० ॥

शूद्रेष्वन्यानपि भोज्यान्नानाह ॥

**दासनापितगोपालकुलमित्रार्द्धसीरिणः ॥**
**एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥२१॥**

दासादयः षट् वक्ष्यमाणलक्षणाः शूद्रेषु भोज्यान्नाः ॥

तत्र दासन पितयोर्लक्षणमाह ॥

**शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः ॥**
**असंस्काराद्भवेद्दासः संस्कारादेव नापितः ॥ २२ ॥**

यो ब्राह्मणेन शूद्रकन्यायां समुत्पन्नस्स यदि यथोक्तजातकर्मादिभिः संस्कारैस्संस्कृतस्तदा तस्मादेव संस्कारान्नापित इत्युच्यते संस्काराभावे पुनर्दास इति ।

गोपाललक्षणमाह ।

**क्षत्रियाच्छूद्रकन्यायां समुत्पन्नस्तु यः सुतः ॥**
**स गोपाल इति ख्यातो भोज्यो विप्रैर्न संशयः॥२३॥**

क्षत्रियाच्छूद्रकन्यायामुत्पन्नः पुनः स गोपाल इति लोके ख्यातो नाम्ना वृत्त्या च प्रसिद्ध एवेति न संशयः स विप्रैर्भोज्यान्नो भवति । यद्यप्येतदनंतरकुलमित्रलक्षणं वक्तुमुचितं तथापि तस्यावयवसामर्थ्यादेव पितृपितामहादिमित्रस्य प्रतीयमानत्वादवचनेऽपि न न्यूनतेति । आचार्यस्तु वैश्याच्छूद्रकन्यायामुत्पन्नः कुलमित्र तथैव च प्रक्रमादित्याह ॥

अर्द्धसीरिलक्षणमाह ॥

**वैश्यकन्यासमुद्भूतो ब्राह्मणेन तु संस्कृतः ॥**
**सोत्यर्द्धिक इति ज्ञेयो भोज्यो विप्रैर्न संशयः॥२४॥**

यो ब्राह्मणेन वैश्यकन्यायामुत्पन्नः स यथोक्तसंस्कारसंस्कृत एवार्द्धिक इतिज्ञेयः स विप्रैर्भोज्यान्न इत्यत्र संशय एव नास्ति । अर्द्धसीरिण एव संज्ञांतरप्रदर्शनाय शब्दान्तरेण निर्देशः । एतदनन्तरमात्मनिवेदकलक्षणं वक्तव्यं तदप्यवयवार्थस्य स्पष्टतया वाङ्मनःकर्मभिस्तवाहमिति वादिनमेवाचष्ट इति नोक्तम् । अत्राप्याचार्योऽर्द्धिकसाहचर्यात् क्षत्रियायां ब्राह्मणादुत्पन्नमात्मनिवेदकमाह । न चैषा शूद्रत्वोक्तिर्न युक्ता द्विजापत्यतया शूद्रादुत्कृष्टत्वात् । अस्तु वात्र कथंचिद्वैश्यायां ब्राह्मणादुत्पन्नस्य आर्द्धिकस्य तु द्विजत्वादत्यंन्तायुक्तैव तदुक्तिरितिचेत् । उच्यते । विजातीयकन्याविवाहस्य कलौ निषेधेनाब्रोढात्वादिविशेषानुपादानादनूढास्वेव तासु व्यवहारो व्यभिचारोत्पन्नतया तदुक्तिः ।

शूद्राणां तु सधर्माणः सर्वेऽपध्वसजाः स्मृताः ।

इतिस्मरणात् । कुण्डासुतासूत्पन्नाना योगिना निषादादिसंज्ञां-तदाभिधानाच्च । नचैवं कुंडगोलकयोरब्राह्मणत्वापत्तिरिष्टापत्तेः तत्कन्यास्वप्यनुढासु द्विजात्युत्पन्नानामपि शूद्रसधर्मत्वमेव । नच कलावस वर्णकन्यानामृतुव्यापनेऽपि गमननिषेधान्नापिताद्यनुत्पत्तेरेव भोज्यान्नता विवेको न संभवतीति वाच्यम् । पूर्वपूर्वयुगोत्पन्नानामप्यन्नानुवृत्त्यातिक्रान्त-निषेधेभ्योऽप्युत्पत्त्या वा विचारसंभवादिति ॥

यदन्नभोजने प्रायश्चित्तमुक्तं तेषां जलादिपानेऽपि तदाह ॥

**भाण्डस्थितमभोज्यानां जलं दधि घृतं पयः ॥**
**अकामतस्तु यो भुङ्क्ते प्रायश्चित्तं कथं भवेत् ॥२५॥**
**ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा उपसर्पति ।**
**ब्रह्मकूर्चोपवासेन याज्या वर्णस्य निष्कृतिः ॥२६॥**

ये पूर्वमभोज्यान्नाः कदर्यादयो गणितास्तेषां भाण्डस्थजलदधि-घृतपयसामन्यतममकामतो यो भुङ्क्ते तस्य प्रायश्चित्तं कथं स्यादित्या-काङ्क्षायां ब्राह्मणादीनामन्यतम एवंविधो यः पर्षदमुपसर्पति तस्य च पर्षदा ब्रह्मकूर्चोपवासेन ब्रह्मकूर्चार्थमुपवासो ब्रह्मकूर्चोपवासस्तेन पूर्वेद्युरुपोष्य परेद्युराहारान्तरं परित्यज्य ब्रह्मकूर्चपानेन निष्कृतिः शुद्धि-र्याज्या । तत्र कालविशेषमाह जाबालिः ।

चतुर्दश्यामुपोष्याथ पौर्णमास्यां विशेषतः ।
पञ्चगव्यं पिबेत्प्रातर्ब्रह्मकूर्चमितिस्मृतम् ॥

इति । देशमप्याह शातातपः ।

नदीतीरेषु गोष्ठेषु पुण्यष्वायतनेषु च ।
तत्र गत्वा शुचौ देशे ब्रह्मकूर्चं समाचरेद् इति ॥

शूद्रस्य विशेषमाह ॥

**शूद्राणां नोपवासः स्याच्छूद्रो दानेन शुध्यति ॥**
**ब्रह्मकूर्चमहोरात्रं श्वपाकमपि शोधयेत् ॥ २७ ॥**

शूद्राणामुपवासस्थानापन्नेन दानेन शुद्धिर्ब्रह्मकूर्चे तु समानमेव सर्वेषाम् । ननु

पञ्चगव्यं पिबेच्छूद्रो ब्राह्मणश्च सुरां पिबेत् ।
उभौ तौ तुल्यदोषौ हि पूयाख्यनरके गतौ ॥

इत्यत्रिणा शूद्रस्य पञ्चगव्यप्रतिषेधात्कथं तदनुवृत्तेरित्यत आह ब्रह्मकूर्चपानार्थमहोरात्रमुपवासः श्वपाकमपि शोधयेत्किं पुनः शूद्रमिति अत एव स्मृत्यन्तरीयं लिङ्गम् ।

स्त्रीशूद्रस्य तु शुध्यर्थे प्राजापत्यं समाचरेत् ।
पञ्चगव्यं च कुर्वन्ति स्नात्वा पीत्वा शुचिर्भवेत् ॥

इति । नचात्रिवचनविरोधस्तद्वचस्य एव, तस्य प्रायश्चित्तानङ्ग-पञ्चगव्यप्राशनविषयत्वात् सुरापाननिषेधवत् ॥

ब्रह्मकूर्चद्रव्याण्याह ॥

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥
निर्दिष्टं पञ्चगव्यं तु पवित्रं पापशोधनम् ॥ २८ ॥

गोमूत्रादिपञ्चकं कुशोदकसहितं पञ्चगव्यं निर्दिष्टं तच्च पवित्रमतः पापानां शोधनं नाशनं भवति ॥

गोमूत्राद्युपादानगवीनां वर्णविशेषानाह ॥

गोमूत्रं कृष्णवर्णायाः श्वेतायाश्चैव गोमयम् ॥
पयश्च ताम्रवर्णाया रक्ताया गृह्यते दधि ॥ २९ ॥
कपिलायाः घृतं ग्राह्यं सर्वं कापिलमेव वा ॥

तत्तद्वर्णगवीनामसंभवे गोमूत्रादिपञ्चकमपि कापिलमेव ग्राह्य-मितरस्पष्टार्थम् ॥

गोमूत्रादीनां परिमाणमाह ॥

मूत्रमेकपलं दद्यादङ्गुष्ठार्द्धं तु गोमयम् ॥ ३० ॥
क्षीरं सप्तपलं दद्याद्दधि त्रिपलमुच्यते ॥
घृतमेकपलं दद्यात्पलमेकं कुशोदकम् ॥ ३१ ॥

मूत्रं गोः पलं चतुःसौवर्णिकं पलं सुवर्णाश्चत्वार इति स्मरणात् पर्वद्वयात्मकस्याङ्गुष्ठस्यैकं पूर्वार्द्धमुच्यते तन्मात्रं गोमयम् । शेषं स्पष्टार्थम्। एतत्सर्वं यथोक्तपरिमाणं पलाशाद्यन्यतमपात्रे दद्यात्समानयेत् । तदाह प्रजापतिः ।

पलाशं पद्मपत्रं वा ताम्रं वाथ हिरण्मयम् ।
पात्रं गृहीत्वा तस्मिंस्तु पञ्चगव्यं समानयेत् ॥

इति । अशक्तं प्रति परिमाणान्तरमाह वृद्धपराशरः ।

गोमूत्रे माषकास्त्वष्टौ गोमयस्य तु षोडश ।
क्षीरस्य द्वादश प्रोक्ता दध्नस्तु दश कीर्तिताः ।
गोमूत्रवद्घृते ज्ञेयास्तदर्द्धञ्च कुशोदकम् ॥ इति ॥

गोमूत्रादिग्रहणे मन्त्रानाह ॥

**गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् ॥**
**आप्यायस्वेति च क्षीरं दधिक्रावूणस्तथा दधि॥३२॥**
**तेजोऽसिशुक्रमित्याज्यं देवस्यत्वा कुशोदकम् ॥**
**पञ्चगव्यमृचापूतं स्थापयेदग्निसन्निधौ ॥ ३३ ॥**

गायत्र्यादिभिर्ऋचा ग्रहणेन पूत पवित्र पञ्चगव्यमेकीकृत्याग्निसन्निधौ स्थापयेत् । यद्यपि तेजोसि देवस्यत्वेत्यनयोर्यजुष्ट्वादृचेति साधारण-व्यपदेशो नोपपद्यते तथापि सृष्टीरुपदधातीतिवद् भूम्ना तत्सिद्धिरिति न दोषः । अनन्तरकर्तव्यमाह ।

**आपोहिष्ठेति चालोड्य मानस्तोकेति मन्थयेत् ।**

आपोहिष्ठेत्येकैव ऋक् ऋचेत्युपक्रमात् । तृचः इत्याचार्या प्रायेण तथा विनियोगात् ॥

होमसाधनमाह ॥

**सप्तावरास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः ॥**
**एतैरुद्धृत्य होतव्यं पञ्चगव्यं यथाविधि ॥ ३४ ॥**

सप्तप्रवरा येभ्यस्तेऽष्टादयोऽङ्किरायाः शुक्तिविषो हरितवर्णा दर्भास्तैरुद्धृत्य यथाविधि वक्ष्यमाणमंत्रैस्तत्पञ्चगव्यं जुहुयात् । यत्तु

स्थापयित्वा तु दर्भेषु पलाशैः पत्रकैरथ ।
नत्समुद्धृत्य होतव्य देवताभ्यो यथाक्रमम् ॥

इतिप्राजापत्यवचनबलात्पलाशपत्रेण होम इति व्याख्यातम् तत्पालाशो हरितो हरिदिति कोशादर्शननिबन्धनमिति मंतव्यम् । तथात्वे बहुवचनासगतिः । तस्मात्पलाशैर्हरितैरित्यर्थोऽवगन्तव्य इति ॥

होममंत्रानाह ॥

**इरावती इदंविष्णुर्मानस्तोके च शंवती ॥**
**एताभिश्चैव होतव्यं हुतशेषं पिबेद् द्विजः ॥ ३५ ॥**

इरावती धेनुमती, इदं विष्णुर्विचक्रमे, मानस्तोकेतनये, शंवती शंशब्दोपलक्षिता शवोदेवीरभिष्ट इत्येषा शंवतीः पारयते तं च क्षिप्तिवचो यथा। अद्यावतं यमावतं ययेवेनमिशुवत इति वात्तचोत्तेप एताभिभिश्चकारादग्नये सोमायेति नाममंत्रेण सावित्र्या प्रणवेनाग्नये स्विष्टकृते वेत्येतैरपि तंत्रैर्हुत्वा हुतशेषं द्विजः पिबेत् । द्विजग्रहणं वक्ष्यमाणमन्त्रविषयनियमाय । स्त्रीशूद्रयोस्तूष्णीमेव भवति तथा च प्रजापतिः ।

अग्नये चैव सोमाय सावित्र्या च तथैवच ॥
प्रणवेन तथा हुत्वा स्विष्टकृता तथैवच ॥

इति ।

पानेतिकर्तव्यतामाह ॥

**आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु ॥**
**उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु ॥ ३६ ॥**

हस्तेनालोड्य यज्ञियकाष्ठेन निमथ्योभयाभ्यां हस्ताभ्यामुद्धृत्याशब्दं पिबेत् प्रतिक्रियं प्रणवावृत्तिः।

ननु गोवधाद्युत्पन्नादृष्टरूपप्रत्यवायनिवृत्तिरस्तु प्रायश्चित्तेन अभो-

न्यभोजनादिषु त्वाहारपरिणामेनावयवोपचयरूपस्य दृष्टस्य कथं तेन निवृत्तिरित्यत आह ।

यत्त्वगस्थिगतं पापं देहे तिष्ठति देहिनाम् ॥
ब्रह्मकूर्चं दहेत्सर्वं प्रदीप्तोऽग्निरिवेन्धनम् ॥ ३७ ॥

भक्षितमभक्ष्यं यथा त्वगस्थ्यादिरूपेण परिणम्य देहिनां देहे पापमशुचिभूत्वा तिष्ठति तथा ब्रह्मकूर्चमपि पीतं तेन तेन रूपेण परिणतं सत्तत्तमवयवोपचयं दहतीति दृष्टद्वारैवास्य शोधकत्वं तत्र दृष्टान्तो यथाग्नेरिन्धनदहने नादृष्टमवान्तरव्यापारः किन्तु तत्संयोग एव तथा प्रकृतेपीति । अनेनाभक्ष्यभक्षणे ब्रह्मकूर्चपानमावश्यकमित्युक्तं भवति ।

नन्वेवं दशमूलीकषायपानवदस्यादृष्टरूपप्रत्यवायानिवर्तकत्वं स्यादित्यत आह ॥

पवित्रं त्रिषु लोकेषु देवताभिरधिष्ठितम् ॥

वरुणादिदेवताधिष्ठितत्वेन त्रिष्वपि लोकेषु प्रकारेषु दृष्टरूपदुष्टावयवनाशनादृष्टरूपप्रत्यवायनाशनापूर्वादृष्टजननरूपेषु पवित्रं सामर्थ्यमिति ।

ता देवता आह ॥

वरुणश्चैव गोमूत्रे गोमये हव्यवाहनः ॥ ३८ ॥
दध्नि वायुः समुद्दिष्टः सोमः क्षीरे घृते रविः ॥

गोमूत्रादीनां पञ्चानां वरुणादिपञ्च देवता अधिष्ठात्र्यो भवन्ति कुशोदकस्य तु कुशाधिष्ठातारो ब्रह्मविष्णुमहेशा एवाधिष्ठातारः अत एव ।

कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः ।
कुशाग्रे शङ्करोक्त इत्यभिधाय ।

शरीरेष्वथ तिष्ठन्ति कुशात्यजलबिंदवः ।
तस्य नश्यन्ति पापानि गरुडेनेव पन्नगाः ॥

इत्यभिहितं विष्णुधर्मोत्तरे ।

स्वोच्छिष्टजलपाने प्रायश्चित्तमाह ॥

पिबतः पतितं तोयं भाजने मुखनिःसृतम् ॥
अपेयं तद्विजानीयाद्भुक्त्वा चान्द्रयणं चरेत् ॥३९॥

मुखसयोजिते भाजनेपिबतः पुरुषस्य मुखान्निःसृत तोय यदि पतितं तर्हि तदपेयं विजानीयाद्भुक्त्वा चान्द्रायणं चरेत् । पीतावशिष्टजलपाने तु त्रिरात्रम् तदाह शंखः ।

पीतावशेषितं पीत्वा पानीयं ब्राह्मणः क्वचित् ।
त्रिरात्र तु व्रतं कुर्याद्वामहस्तेन वा पुनः ॥

इति । ब्राह्मणाद्युच्छिष्टजलपानेतूशनाः । ब्राह्मणोच्छिष्टानामपः पाने षोडश प्राणायामान् धारयेत्तत्रिये त्रिशद्वैश्ये चत्वारिंशच्छूद्राणां कुशवारिपाने त्र्यह बुद्धिपूर्वचेद् त्र्यहं चतुरहं पञ्चरात्रं सप्तरात्रं पञ्चगव्यं पानं क्रमेणेति ।

शवाद्युपहतकूपादिजलपाने प्रतिवर्णं प्रायश्चित्तमाह । ॥

कूपे च पतितं दृष्ट्वा श्वशृगालं च मर्कटम् ॥
अस्थिचर्मादि पतितं पीत्वाऽमेध्या अपो द्विजः ॥४०॥
नारं कुकूणकं काकं विड्वराहं खरोष्ट्रकम् ॥
गवयं सौप्रतीकं च मायूरं खाड्गकं तथा ॥४१॥
वैय्याघ्रमार्क्षसैंहं वा कपेर्यदि निमज्जति ॥
कुणपंक्तस्यपि दुष्टस्य पीतं स्यादुदकं यदि ॥ ४२ ॥
प्रायश्चित्तं भवेत्पुंसः क्रमेणैतेन सर्वशः ॥ ४३ ॥

यस्मिन् कूपे श्वशृगाल श्वा कुक्कुरः शृगालः क्रोष्टा तयोः समाहारः श्वशृगालं मर्कटं वानर पतितं दृष्ट्वा अस्थिचर्मआदिशब्दान्मूत्रपुरीषादि वा पतितं दृष्ट्वा अमेध्या अपो यो द्विजः पिबति तस्य वक्ष्यमाणं प्रायश्चितं भवेदिति संबंधः । तथा नारं मानुषं काकं वायसीय विड्वराहखरोष्टशब्देषु

तद्धितलोप आर्षः गवयः शबरः सुप्रतीकश्चित्रमृगः मयूरः केकी खड्गो गराडको व्याघ्रो द्वीपी ऋक्षो भल्लूकः सिंहः पंचास्यः कपिरपि मर्कटावान्तरजातिः एतत्सम्बन्धि कुणप यस्मिन् तडागे निमज्जति तस्य दुष्टस्य तडागस्य-दकं यदि पीतं स्यात्तदा तस्य सर्वशः सर्ववर्णस्य पुंसो वक्ष्यमाणं प्राय-श्चित्तं क्रमेण भवति ॥

तदेव प्रायश्चित्तमाह ।

**विप्रः शुध्येत्त्रिरात्रेण क्षत्रियस्तु दिनद्वयात् ।**
**एकाहेन तु वैश्यस्तु शूद्रो नक्तेन शुध्यति ॥ ४४ ॥**

पूर्वोक्तश्वाद्युपहतकूपादेर्जलपाने विप्रादयः क्रमात्त्रिद्व्येकरात्र-नक्तैः शुध्यन्ति तु शब्दादन्ते पञ्चगव्यप्राशनमपि भवति तदाह विष्णुः ।

मृतपञ्चनखात्कूपादत्यन्तोपहतमुदकं पीत्वा ब्राह्मणस्त्र्यहमुपव सेद्व्यहं राजन्य एकाहं वैश्यः शूद्रो नक्तं सर्वे चान्ते पञ्चगव्यं पिबेयुरिति यदि तत्रैव शवं शीर्यति तदा विशेषमाह देवलः ।

क्लिन्नं भिन्नं शवं चैव कूपस्थं यदि दृश्यते ।
पयः पिबेत्त्रिरात्रेण मानुषे द्विगुणं स्मृतम् ॥

इति । इदं च सकृत्पाने अभ्यासेत्वाह हारीतः ।

क्लिन्ने भिन्ने शवे तोये तत्रस्थं यदि तत्पिबेत् ।
शुद्धौ चान्द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा
यदि कश्चित्ततः स्नायात्प्रमादेन द्विजोत्तमः ।
जपंस्त्रिषवणस्नायी अहोरात्रेण शुध्यति ॥

इति । कामाकामाभ्यां चान्द्रतप्तकृच्छ्रयोर्व्यवस्था । चण्डालकूपादि-जलपाने त्वापस्तम्बः ।

चाण्डालकूपभाण्डस्थं नरः कामाज्जलं पिबेत् ।
प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत् ।
चरेत्सांतपनं विप्रः प्राजापत्यं तु भूमिपः ।
तदर्द्धन्तु चरेद्वैश्यः शूद्रे पादं विनिर्दिशेत् ॥

इति । अकामतस्तु देवलः ।

यस्तु चण्डालभाण्डस्थमज्ञानादुदकं पिबेत् ।
स तु त्र्यहेण शुध्येत शूद्रस्त्वेकेन शुध्यति ॥

इति । म्लेच्छादिपुष्करिण्यादिजलपानेऽप्यापस्तम्बः ॥

म्लेच्छादीनां जलं पीत्वा पुष्करिण्यां ह्रदेऽपि वा
जानुदघ्नं शुचि ज्ञेयमधस्तादशुचि स्मृतम् ।
तत्तोयं यः पिबेद्विप्रः कामतोऽकामतोऽपि वा ।
अकामान्नक्तभोजी स्यादहोरात्रं तु कामतः ॥

इति ।

इदानीमभोज्यान्नविशेषेण तदन्नभोजन प्रायश्चित्तविशेषमाह ॥

**परपाकनिवृत्तस्य परपाकरतस्य च ॥**
**अपचस्य च भुक्त्वान्नं द्विजश्चान्द्रायणं चरेत् ॥ ४५ ॥**

परपाकनिवृत्तादयस्त्रयोऽपि वक्ष्यमाणलक्षणाश्चकाराद्वृथापाकोप्येषामन्नं भुक्त्वा द्विजश्चान्द्रायणं कुर्यात् । इदं चात्यन्ताभ्यासविषयमवगन्तव्यम् । सकृद्भोजने तु भरद्वाज आह ।

निराचारस्य विप्रस्य निषिद्धाचरणस्य च ।
अन्नं भुक्त्वा द्विजः कुर्यादिनमेकमभोजनम् ॥

इति । निराचारो विहितपञ्चमहायज्ञानुष्ठानरहितः पाकनिवृत्तो निषिद्धाचरणः सर्वदा परान्नभोजनशीलः इदमपचस्याप्युपलक्षणं वृथापाकान्नभक्षणे त्वाह शातातपः ।

वृथापाकस्य भुंजानः प्रायश्चित्तं चरेद्द्विजः ।
प्राणायामांस्त्रिरभ्यस्य घृतं प्राश्य विशुध्यति ॥

इति ।

न केवलमपचान्नभोजने प्रत्यवायोऽपि तु तस्यान्नदानेऽपीत्याह ॥

**अपचस्य च यद्दानं दातुरस्य कुतः फलम् ॥**

दाता प्रतिगृहीता च द्वौ तौ निरयगामिनौ ॥४६॥

अपचस्यापचाय यद्दानं चतुर्थ्यर्थे षष्ठी बहुलानुशासनात् अस्य दातुः फलं कुतः यतस्तावुभावपि दातृप्रतिग्रहीतारौ निरयगामिनौ इति।

परपाकनिवृत्तस्य लक्षणमाह ॥

गृहीत्वाग्निं समारोप्य पञ्चयज्ञान्न निर्वपेत् ॥
परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्तितः ॥ ४७ ॥

दारकाले दायाद्यकाले गृहपतौ वा प्रेते योऽग्निमाधायात्मनि तमग्निसमारोप्य तस्मिन्नग्नौ पञ्चमहायज्ञांश्च निर्वपेदसौ परपाकनिवृत्तः पर उत्कृष्टो वैश्वदेवाद्यर्थं गृह्याग्नौ क्रियमाणः पाकः परपाकस्तस्मान्नि वृत्तः परपाकनिवृत्त इति मुनिभिरुच्यते। अग्नेः सर्वदात्मसमारोपणेन पञ्च-महायज्ञादिसाधनत्वाभावात्।

परपाकरतस्य लक्षणमाह ॥

पञ्चयज्ञान्स्वयं कृत्वा परान्नेनोपजीवति ॥
सततं प्रातरुत्थाय परपाकरतस्तु सः ॥ ४८ ॥

यस्सततं प्रत्यहं प्रातरुत्थाय पञ्चमहायज्ञान्स्वयं कृत्वा परान्नेनैवोपजीवति स परपाकरत इत्युच्यते।

परपाकरुचिर्नस्यादनिन्द्यामन्त्रणादृते ॥

इतिनिषेधातिक्रमात्।

अपचस्य लक्षणमाह ॥

गृहस्थधर्मा यो विप्रो ददाति न विवर्जितः ॥
ऋषिभिर्धर्मतत्वज्ञैरपचः परिकीर्तितः ॥ ४९ ॥

यो गार्हस्थ्यमास्थितोऽप्यन्नदानादिवर्जितः केवलमुदरम्भरिरेव सोऽपच इति मुनिभिः परिकीर्तितः। तथा श्रूयते "केवलाघो भवति केवलादी" ति ननु इकूश्तिपौ धातुनिर्देश इति वार्त्तिकाद्ददातिशब्दो धातुनिर्देशमेव

चरति ननु धात्वर्थनिर्द्देशमितिचेत् सत्यं। यजतिषु येयजामहं करोतीत्यादिष्वर्थनिर्द्देशोयमितिप्रत्ययदर्शनात् । वृथापाकलक्षणमाह वृहस्पतिः ।

यो हि हित्वा विवाहाग्निं गृहस्थ इति मन्यते ।

अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः ॥ इति ।

नन्वेवं कलैा कस्यापि भोज्यान्नता न स्यादेवंप्रायत्वात् सर्व्वेषामित्यत आह ॥

**युगे युगे तु ये धर्मास्तेषु तेषु च ये द्विजाः ॥**
**तेषां निन्दा न कर्तव्या युगरूपा हि ते द्विजाः॥५०॥**

अयमभिसन्धिः । युगस्वभावप्रयुक्ताया अधर्मप्रवृत्तेरपरिहार्यत्वद्विमाद्यालस्यादिपुरुषप्रयुक्तायास्त्ववश्यपरिहार्यत्वेन प्रायश्चित्ताभिधानस्यार्थवत्वान्नातिप्रसङ्गः इति । पदार्थस्तूपवर्णित एव प्राक् ।

एवं केषु चिदुपपातकेषु प्रायश्चित्तमभिधाय जातिभ्रंशकरेषु ब्राह्मणातिरस्कारप्रायश्चित्तमाह ॥

**हुङ्कारं ब्राह्मणस्योक्त्वा त्वङ्कारं च गरीयसः ॥**
**स्नात्वा तिष्ठन्नहः शेषमभिवाद्य प्रसादयेत् ॥५१॥**

यो ब्राह्मणस्य भर्त्सनाय हुङ्कारं प्रयुंक्ते यो अभिवाद्ययोर्विद्यादिगरिष्ठस्य त्वमित्येकवचन प्रयुङ्क्ते स तत्कालमेव स्नात्वा यावदस्तमयं निराहारि स्थित्वासन्ध्यायां तमभिवाद्य प्रसादयेत् । तथा च मनुः

हुङ्कारं ब्राह्मणस्योक्त्व त्वङ्कारं तु गरीयसः ।

स्नात्वा नाश्नवहःशेषमभिवाद्य प्रसादयेत् ॥

इति । यद्यपि ब्राह्मणस्य रुजः कृत्यमिति मनुना ब्राह्मणताडनमेव जातिभ्रंशकरेषु अभिवाद्यप्रसादयेदितिपरिगणितं न हुङ्काराद्यपि तथा मानसरुगुत्पादकत्वात्तस्यापि जातिभ्रंशकरत्वमविरुद्धमिति ।

ब्राह्मणताडनादैा प्रायश्चित्तमाह ॥

**ताडयित्वा तृणेनापि कण्ठे बध्वापि वाससा ।**

**विवादे वापि निर्जित्य प्रणिपत्य प्रसादयेत् ॥५२॥**

तृणताडनादीनां शरीरानुपघातकत्वेपि मानसोपघातकत्वेपि प्रायश्चित्तनिमित्तत्वमित्यपिशब्दार्थः । गर्वातिशयेनैतत्करणे तूपवासोऽपि । तदाह बृहस्पतिः ।

गुरुं त्वंकृत्य गर्वेण विप्रं निर्जित्य वादतः ।
ताडयित्वा तृणेनापि प्रसाद्योपवसेद्दिनम् ॥
इति । अभ्यासे तु बौधायनः ।
वादेन ब्राह्मणं जित्वा प्रायश्चित्तविधित्सया ।
त्रिरात्रोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत् ॥
इति । पादस्पर्शावाच्यवचनयोः प्रायश्चित्तमाह स एव ।
पादेन ब्राह्मणं स्पृष्ट्वा प्रायश्चित्तविधित्सया ।
दिवसोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत् ।
अवाच्यं ब्राह्मणस्योक्त्वा प्रायश्चित्तं विधीयते ।
कृच्छ्रातिकृच्छ्रं जित्वा तु प्रणिपत्य प्रसादयेत् ।
आक्रोशमनिशं कृत्वा कृच्छ्रं कुर्वीत मानवः ॥
इति ।

विप्रावगूर्णादौ प्राश्चित्तमाह ॥

**अवगूर्य त्वहोरात्रं त्रिरात्रं क्षितिपातने ।**
**अतिकृच्छ्रं च रुधिरे कृच्छ्रोऽभ्यंतरशोणिते ॥ ५३ ॥**

क्रोधावेशेन ब्राह्मणताडनाय दण्डाद्युपघाताभ्यामहोरात्रमुपवसेत् । ब्राह्मणं भूमौ निपात्य त्रिरात्रमुवसेत् । प्रहारेण रुधिरोत्पत्तावतिकृच्छ्रमभ्यन्तरशोणिते प्रवाहमन्तरेण घनीभूतरुधिरे प्रहारे कृच्छ्रं चरेत् । त्वग्भेदादौ प्रायश्चित्तमाह बृहस्पतिः ।

काष्ठादिना ताडयित्वा त्वग्भेदे कृच्छ्रमाचरेत् ।
अस्थिभेदेऽतिकृच्छ्रस्तु पराकस्त्वगकर्तने ॥
इति । तदेतत्समानजातीयस्यविजातीयस्य तु विशेषमाह प्रजापतिः ।

द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि वा।
क्षत्रविट्शूद्रजातीना ब्राह्मणस्य वधे व्रतम्॥

इति देवाद्याक्रोशने तु सुमन्तुः। देवर्षिगोब्राह्मणाचार्यमातापितृनरेन्द्राणां प्रतिषेधने आक्रोशने जिह्वां दहेद्धिरण्य दद्यादिति। प्रतिषेधनं निन्दनमाक्रोशो गालिदानम्।

इदानीं चाभिमतमतिकृच्छ्रलक्षणमाह॥

**नवाहमतिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः।**
**त्रिरात्रमुपवासः स्यादतिकृच्छ्रः स उच्यते॥९४॥**

यो नवाहोरात्रं पाणिः पूर्यते यावत्तावदन्नेन तद्भोजनमस्मिन्निति पाणिपूरान्नभोजनः स्यात्प्रसृतिपरिमितान्नभोजन इति यावत्।

यस्मिंश्च त्रिरात्रमुपवासः स्यात्स दशाहसाध्योऽतिकृच्छ्र इत्युच्यते। अतिकृच्छ्रशब्दस्यानुगतार्थतां स्पष्टयितुं पुनस्तेनैव विशेषेण॥

नन्वन्यान्यपि जातिभ्रंशकराख्यघ्रेयघ्राणादीनि सति तत्र किं प्रायश्चित्तमित्यत आह॥

**सर्वेषामेव पापानां संकरे समुपस्थिते।**
**दशसाहस्रमभ्यस्ता गायत्री शोधनं परम्॥ ९५॥**

सर्वत्वमाधिवारिकमितिन्यायेन पूर्वाधिकृतानां जातिभ्रंशकराणामघ्रेयघ्राणादीनां पापानां संकरे संपर्के समुपस्थिते दशसहस्रवारमभ्यस्ता गायत्र्येव परं शोधनं नान्यदिति। यत्वनुक्तनिष्कृतिषु सर्वेष्वपि निमित्तेष्विदं सामान्यप्रायश्चित्तं तज्जातिभ्रंशकरेष्वेवेति। तदयुक्तम्। शास्त्रान्तरे सामान्यप्रायश्चित्तान्तराभिधानेन पौनरुक्त्यात्। तस्माद्यथोक्तैव व्याख्या साधीयसीति।

**तपस्तप्त्वा तीव्रं यमलभत सार्द्धं सुरगणैः**
**सुतं साकन्देव्या विहितनियमः कश्यपमुनिः॥**

स्वयं स्रष्टुः स्रष्टा गतिरपि महेन्द्रस्त्रिजगता
मुपेन्द्रत्वं सोऽपि त्रिदशपतिभक्त्या प्रथयति ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दुश्रीरामपण्डितसुतेन विनायकेन ॥
एकादशोऽपि विवृतोऽत्र पराशरस्याध्यायः कृतावननीयविभुक्तिभुक्त्यै ॥ २ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितापरनामधेयविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायामेकादशोऽध्यायः॥

शुभमस्तु ॥

श्रीगणेशाय नमः ।

समाने शब्दार्थे तदनुगतवर्णेऽपि च समे
स्वरूपे सामर्थ्ये सकलपुरुषार्थौघहरणे ।
हरेर्यत्प्राथम्यं हरिहर "यदेवं" द्विजनता-
मुखाब्जेष्वासीत्तत्सकलमपि लक्ष्मीविलसितम् ॥१॥

धर्माधिकारिकुलकैरवकाननेन्दु-
श्रीरामपण्डितसुतेन विनायकेन ।
तद्द्वादशे विवरणं क्रियतेऽधुनाऽध्याये
महाघचयशुद्धिनिवारणाय ॥ २ ॥

एवमध्यायचतुष्टयेनोपपातकप्रायश्चित्तमभिधाय महापातकप्रायश्चित्तविधानाय द्वादशाध्यायमारभते । ·

तत्रसङ्करकाण्डे प्रक्रान्तप्रकीर्णकप्रायश्चित्तशेषं समापयितुं तावदाह ।

दुःस्वप्नं यदि पश्येत्तु वान्ते च क्षुरकर्मणि ।
मैथुने प्रेतधूमे च स्नानमेव विधीयते ॥ १ ॥

दुस्वप्नमरिष्टसूचकस्वप्नमात्मनः चौरतैलाभ्यङ्गादिदर्शनं स्वप्नाध्यायप्रतिपादितं यदि पश्येत्प्रातः स्मरेत्तदा वान्ते भुक्तावोद्गिरणे क्षुरकर्मणि चौरे मैथुने ऋतुकालीने स्त्रीसम्भोगे प्रेतधूमस्पर्शे चकारादजीर्णोद्गारे दुर्जनस्पर्शनचितिपूयस्मशानस्पर्शेषु च स्नानमाचरेत् । तदाहुर्मनुवृद्धपराशरशातातपाः ।

अजीर्णेऽभ्युदिते वान्ते श्मश्रुकर्मणि मैथुने ।
दुस्वप्ने दुर्जनस्पर्शे स्नानमेव विधीयते ॥
दुस्वप्ने मैथुने वान्ते विरिक्ते क्षुरकर्मणि ।
चितिपूयश्मशानानां स्पर्शने स्नानमाचरेत् ॥

ऋतौ तु गर्भे शङ्कित्वा स्नानं मैथुनिनः स्मृतम् ।
अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवत् ॥ इति ॥ १ ॥

इदानीं पुनः संस्कारनिमित्तान्याह ।

**अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च ।**
**पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥ २ ॥**

अज्ञानतो विरामूत्रप्राशने सुरासंसृष्टान्नप्राशने च त्रयो वर्णाः ब्राह्मणक्षत्रियवैश्याः तप्तकृच्छ्रचरणानन्तरं पुनः संस्कारं पुनरुपनयनमर्हन्ति विण्मूत्रमिति समाहाराद्रेतःकुणपयोरपि ग्रहणं तथा च गौतमो मत्या मद्यपाने तप्तकृच्छ्रस्ततोऽस्य संस्कारो मूत्रपुरीषकुणपरेतसां प्राशने चेति। सुरात्रपैष्टीवइतरस्याः क्षत्रियवैश्ययोरनिषेधात् । तत्संसर्गोप्यनुपलक्ष्य-गोरसोविवक्षितः । रसोपलब्धौ द्रव्यान्तरसंसर्गेपि सुरात्वानपायात् । आज्यत्वस्येव पृषदाज्ये । अत एवाज्यपा इति निगदाः कार्या न पृषदा-ज्यपा इत्युक्तम् । तथा च मुख्यमेव प्रायश्चित्तं तत्रापद्येत । अज्ञानादिति चात्राप्यनुषज्यते ।

अज्ञानात्प्राश्य विरामूत्रं सुरासंसृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयोवर्णा द्विजातयः ॥

इति मनुस्मरणात् । एतेनाज्ञानतः सुरापाने पुनः संस्कारः कैमु-तिकन्यायेन सिद्धः । तथा च बौधायनः । अमत्या सुरापाने कृच्छ्राब्द-पादं चरित्वा पुनरुपनयनमिति कामतः सुरापानेन मरणान्तिकस्यैवोक्त-त्वात् । किं पुनः संस्कारेण । ब्राह्मणस्य तु कामाकामाभ्यां मद्यपा-नेपि पुनः संस्कारः अमत्या मद्यपान इति गौतमवाक्यात् । मत्या मद्यपाने त्वसुरायाश्चज्ञाने कृच्छ्रो घृतप्राशनं पुनः संस्कारश्चेति वसिष्ठस्म-रणात् । चकारादुक्तानां चण्डालान्नभोजनादीनामनुक्तानामङ्गादिदेशगम-नानाञ्चोपसंग्रहः । तथा च वसिष्ठः । एतदेव चण्डालपतितान्नभोजनेषु ततः पुनरुपनयनमिति । वत्सुरपि । विड्वराहग्रामकुक्कुटनगोमांसभक्षणे

तु सर्वेष्वेतेषु द्विजानां प्रायश्चितान्ते पुनः संस्कारं कुर्यादिति । शातातपोऽपि ।

लशुनं गृञ्जनं जग्ध्वा पलाण्डुं च तथा शुनः ।
उष्ट्रमानुषकेभाश्वरासभीक्षीरभोजनात् ॥
उपनायं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुहुः ।

पैठीनसिः । उष्ट्रीमानुषीक्षीरभोजने तप्तकृच्छ्रः पुनरुपनयनमिति । आदिपुराणे ।

अङ्गवङ्गकलिङ्गेषु सौराष्ट्रमगधेषु च ।
विना यात्रां तु यो गच्छेत्पुनः संस्कारमर्हति ।
सौराष्ट्रसिन्धुसौवीरानावन्त्यं दक्षिणापथम् ।
एतान् देशान् द्विजो गत्वा पुनः संस्कारमर्हति ॥
हिमवत्कौशिकीं विन्ध्यां पारं पद्मस्य पश्चिमम् ।
तीर्थयात्रां विना गच्छेत्पुनः संस्कारमर्हति ॥
कर्मनाशाजलस्पर्शात्करतोयाविलङ्घनात् ।
गण्डकीबाहुतरणात्पुनः संस्कारमर्हति ॥

बौधायनः ।

सिन्धुसौवीरसौराष्ट्रान् तथा प्रत्यन्तवासिनः ।
अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति ।
रासभं महिषं मेषं बलीवर्दं क्रमेलकम् ।
आरुह्य ब्राह्मणो मोहात्पुनः संस्कारमर्हति ॥
मधुं विना चोपनीतः पुनः संस्कारमर्हति ।

हारीतोऽपि ।

शिखां छिन्दन्ति ये मोहाद्द्वेषादज्ञानतोऽपि वा ।
पुनः संस्कारमर्हन्ति ।
अज्ञाः छिन्दन्ति ये केचित् द्विजातीनां शिखां नराः ।
चरेयुस्ते दुरात्मानः प्राजापत्यं विशुद्धये ॥
इति । पुनःसंस्कारोऽत्र पुनरुपनयनं वक्ष्यमाणाजिनादिपर्युदा-

सत्यान्यत्रासम्भवात् । स च समाख्याबलादेव कर्मविशेषेण पूर्वसंस्कारनाशे पुनःसंस्काराधायको न तु शोधकः । शुद्धेः प्रायश्चित्तसाध्यत्वात् । अत एव प्रायश्चित्तान्ते पुनःसंस्कारं कुर्यादित्यादिविधिवाक्येषु द्वयोरपि स्वस्वकार्यप्रतिपादनमुखेनैव समाख्याभ्यां क्रमेणानुष्ठानप्रतिपादनं युक्तम् यत्तु यमेन ।

असुरामद्यपाने च कृते गोभक्षणेऽपि वा ।
तप्तकृच्छ्रपरिक्लिष्टो मौञ्जीहोमेन शुध्यति ॥
इति । मौञ्जीहोमस्य शोधकत्वमुक्तम् ।

तन्मौञ्जीहोमादुत्तरकालानुष्ठेयकर्माधिकाराभिप्रायेण, न तु दोषनिवृत्त्यभिप्रायेण । तस्मात्पुनरुपनयनं पुनःसंस्काराधायकं न तु प्रकृतदोषनिवर्तकमिति स्थितम् । यत्र तु जातकर्मादीत्यादिविशेषः स्मर्यते तत्र तदादीना सर्वेषामेवानुष्ठानम् । यथा

जीवन्यदि समागच्छेत् घृतकुम्भे निमज्य तम् ।
उद्धृत्य स्नापयित्वास्य जातकर्मादि कारयेत् ॥

चिरप्रोषितस्य जीवद्वार्त्तानाकर्णने कृतप्रेतक्रियस्य पुनरागमनेऽयं विधिः । तथा प्रव्रज्यादिप्रत्यावृत्तस्यापि प्रायश्चित्ताचरणानन्तरं जातकर्मादीति । संस्कारमाह वृद्धपराशरः ।

जातकर्मादिभिः सर्वैः संस्कृतैः शुद्धिमाप्नुयात् ॥
इति । यद्यपि सर्वैरित्यविशेषोपादाने सन्यासिनोपि विवाहादि प्रसज्येतेत्यर्थान्तरापातः । तथा च जातकर्मादीत्यादिशब्देनापि तत्पर्यन्तानामेवोपसंग्रहः ।

पुनरुपनयननाम्ना सर्वधर्मातिदेशप्राप्तापवादमाह ।

**अजिनं मेखला दण्डो भैक्ष्यचर्या व्रतानि च ॥**
**निवर्तन्ते द्विजातीनां पुनः संस्कारकर्मणि ॥ ३ ॥**

अजिनं कृष्णाजिनादि मेखला मौञ्ज्यादि दण्डः पलाशादि भैक्ष्यचर्या सायंप्रातर्विहिता व्रतानि सौम्यप्राजापत्यादीनि मधुमांसाञ्जनादि-

वर्जनानि वा, द्विजातीनां त्रैवर्णिकाना पुनः संस्कारकर्माणि निवर्तन्ते चकारादुपनादीन्यपि । तथा चाश्वलायनः । अथोपेतपूर्वस्य कृताकृतं केशवपनं मेधाजनन च निरुक्त परिदानं कालस्य च तत्सवितुर्वृणीमह इति सावित्रीमिति । तत्र विशेषमाह कश्यपः चीर्णप्रायश्चित्तः प्राच्या-मुदीच्यां वा दिशि गत्वायत्र पश्वादीनां शब्दो न श्रूयते तस्मिन्देशेऽग्निं प्रज्वाल्य ब्रह्मासनमास्तीर्य प्राक्प्रणीतेन विधिना पुनः संस्कारमर्हन्तीति ।

इदानीं प्रसगात्पूर्वोक्तामेध्याक्तभक्षणे प्रायश्चित्ते गुणान्तरमाह ।

**विण्मूत्रस्य च शुध्यर्थं प्राजापत्यं समाचरेत् ॥**
**पञ्चगव्यं च कुर्वीत स्नात्वा पीत्वा शुचिर्भवेत् ॥४॥**

विण्मूत्रमित्यमेध्यमात्रोपलक्षणं तद्भक्षणे पूर्वोक्त प्राजापत्यकृच्छ्रं चरेत्पञ्चगव्यं च पूर्वोक्तप्रकारेण कृत्वा तेन स्नात्वा तदेव पीत्वा शुचि-र्भवेत् ।

अथ विहितमरणे सङ्कल्पाचिवृत्तौ प्रायश्चित्तमाक्षिपति ।

**जलाग्निपतने चैव प्रव्रज्यानाशकेषु च ॥**
**व्रत्यावसितवर्णानां कथं शुद्धिर्विधीयते ॥ ५ ॥**

जलं जलप्रवेशोऽग्निप्रवेशः पतन भृगुपातः तेषांसमाहारस्तस्मिन् प्रव्रज्या संन्यासः अनाशकमनशनं बहुवचनात्महाप्रस्थानं गृह्यते । तेषु व्रत्या गृहीतव्रताः कृतसङ्कल्पा इति यावत् । ते च ते अवसिताश्च प्रत्यावृत्ता इति यावत्, तादृशानां वर्णानां कथं शुद्धिर्विधीयतइति प्रश्नार्थः । यद्यपि त्रिविधमपि जलादिमरणं सम्भवति विहितं प्रतिषिद्धमभ्यनुज्ञातं चेति, तथाप्यत्र विहितमेव विषयस्तत्रैव संकल्पादि व्रतसम्भवात् । व्रत्य-शब्देन च कृतसङ्कल्पस्यैवाभिधानात् । एतेन निषिद्धमरणायोद्यम्य निवृत्तस्य प्रायश्चित्तान्तरमूह्यमित्युक्तं भवति । तदेवाह यमः ।

जलाग्न्युद्बन्धनभ्रष्टाः प्रव्रज्यानाशकच्युताः ।
विषप्रपतनप्रायः शस्त्रघातच्युताश्च ये ।

न वै ते प्रत्यवसिताः सर्वधर्मबहिष्कृताः ।
चान्द्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेन च ॥

इति । निषिद्धमरणविषयत्वञ्चास्योद्बन्धनविषशस्त्रादिसाहचर्येण स्पष्टीकृतम् ।

इदानीं प्रायश्चित्तमाह ॥

**प्राजापत्यद्वयेनैव तीर्थाभिगमनेन च ॥**
**वृषैकादशदानेन वर्णाः शुध्यन्ति ते त्रयः ॥ ६ ॥**

क्षत्रियस्य प्राजापत्यद्वयेन वैश्यस्य प्राजापत्यचतुष्टयप्रत्याम्नायरूपतीर्थयात्रया शूद्रस्य प्राजापत्यद्वयेन वैश्यस्य प्राजापत्यचतुष्टयप्रत्याम्नायरूपतीर्थयात्रया शूद्रस्य वृषभैकादशगोदानेन च क्रमाच्छुद्धिर्भवति ।

ब्राह्मणस्य विशेषमाह ।

**ब्राह्मणस्य प्रवक्ष्यामि वनं गत्वा चतुष्पथे ॥**
**सशिखं वपनं कृत्वा प्राजापत्यत्रयं चरेत् ॥ ७ ॥**
**गोद्वयं दक्षिणां दद्याच्छुद्धिं पाराशरोऽब्रवीत् ॥**
**मुच्यते तेन पापेन ब्राह्मणत्वं च गच्छति ॥ ८ ॥**

ब्राह्मणस्य शुद्धिं पाराशरोऽब्रवीत्तामहं प्रवक्ष्यामीति संबन्धः । जलाग्न्यादिमरणसङ्कल्पान्निवृत्तो ब्राह्मणो वनं गत्वा चतुष्पथे सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरित्वा गोद्वयं प्रायश्चित्तसाद्गुण्याय दक्षिणां दत्वा तस्मात्पापान्मुच्यते । जलाग्न्यादिमरणसङ्कल्पान्निवृत्तस्य चण्डालत्वोत्पत्त्या यदपगतं ब्राह्मणत्वं तदपि पुनः प्राप्नोति । तदाह वृद्धपराशरः ।

अनाशकान्निवृत्तस्तु चातुर्वर्ण्यव्यवस्थितः ।
चण्डालः स तु विज्ञेयो वर्जनीयः प्रयत्नतः ।
लुप्तधर्मास्तु चण्डालाः परिव्राजकतापसाः ।
तेभ्यो जातान्यपत्यानि चण्डालैः सह वासयेत् ।

जलाग्निपतने चैव प्रव्रज्यानाशने तथा।
प्रत्यावसितवर्णानां प्रायश्चित्तं कथं भवेत्॥
ब्राह्मणानां प्रसादेन तीर्थाभिगमनेन च।
गवां च शतदानेन वर्णाः शुध्यन्ति ते त्रयः।
ब्राह्मणस्य प्रवक्ष्यामि गत्वारण्यं चतुष्पथे।
सशिखं वपनं कृत्वा त्रिसन्ध्यमवगाहनम्
सावित्र्यष्टसहस्रं तु जपेच्चैव दिने दिने।
मुच्यते सर्वपापेभ्यो ब्राह्मणत्वं च गच्छति।
भिक्षार्थी विचरेद्ग्रामे गृहान् सप्त वने वसन्।
तां च भिक्षां समश्नीयादर्द्धार्द्धेन विशुध्यति॥

इति। ननु वृद्धपराशरोक्तां शुद्धिं प्रवक्ष्यामीति मूले क्षत्रियशूद्रयोः प्राजापत्यवृषभैकादशगोदाने प्रोक्ते साक्षिवचने तु ब्राह्मणेन तु ब्राह्मणप्रसादगोप्रदाने तथा मूले ब्राह्मणस्य गोद्वयसहितं प्राजापत्यद्वयमुक्तं साक्षिवचने तु षाण्मासिकं व्रतमिति चेत्। उच्यते। युगान्तरीयनरापेक्षयापि प्रकृतकलियुगीयनराणामत्यल्पप्राणतया प्रायश्चित्तसंकोचस्य न्याय्यत्वात्।

अत एव संन्यासात्प्रत्यावृत्तौ संवर्तोऽपि षाण्मासिकमेव व्रतमाह।

सन्यस्य दुर्मतिः कश्चित् प्रत्यापत्तिं व्रजेद्यदि।
स कुर्यात्कृच्छ्रमश्रान्तः षण्मासान्प्रत्यनन्तरम्॥
इति। तथा वृद्धपराशरोऽपि व्रतान्तरमाह।
यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः।
अनाशकनिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति।
स चरेत्त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च।
जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात्॥

इति। तदेषां कल्पानां शक्त्याद्यपेक्षया व्यवस्थायां न विरोधः। ततश्च संन्यासादिप्रत्यावृत्तस्य यथोक्तप्रायश्चित्तानन्तरं जातकर्मादिभिः संस्कारैः पुनः संस्कारं कृत्वा पुनः संन्यासादिपरिपालनमेव कर्तव्यं न

गार्हस्थ्यमिति प्रघट्टकार्थः । समाप्तेः शास्त्रार्थत्वात् । तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्य इति न्यायात् । ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा व्रजेदिति जाबालश्रुतावानुलोम्यविधानात् ।

आश्रमाणामानुलोम्यं स्यात्प्रातिलोम्यं न विद्यते ।
प्रातिलोम्येन यो याति न तस्मात्पापकृत्तमः ॥

इति । दक्षेण क्रमप्रातिलोम्यनिषेधाच्च । प्रायश्चित्ताद्यकरणे तु राज्ञा स्वदास्यमामरणात्कारणीयम् । प्रव्रज्यावसितो राज्ञो दास आमरणान्तिक इति योगिस्मरणात् । तदशक्तावपि श्वपदेनाङ्कयित्वा निर्वासनीयः तदाह दक्षः ।

पारिव्रज्य गृहीत्वा तु यः स्वधर्मे न तिष्ठति ।
श्वपदेनाङ्कयित्वा तं राजा शीघ्र प्रसवायेत् ॥ इति ।

यदुक्त दुःस्वप्नादौ स्नानं कर्तव्यमिति तत्रापेक्षितं स्नान भेदमाह ।

**स्नानानि पञ्च पुण्यानि कीर्त्तितानि मनीषिभिः ।**
**आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च ॥ ९ ॥**

यद्यपि दुःस्वप्नादौ स्नानं मुख्यमेवापेक्षितं तथापि मुख्यस्नानासामर्थ्ये अनुकल्पो ऽप्यनुष्ठेय इति तदभिधानमर्थवदेव ।

आग्नेयादिस्नानस्वरूपमाह ।

**आग्नेयं भस्मना स्नानमवगाह्य तु वारुणम् ।**
**आपोहिष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतम् ॥१०॥**
**यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते ।**
**तत्र स्नानात्तु गङ्गायां स्नातोभवति मानवः ॥ ११ ॥**

ईशानादिमन्त्राभिमन्त्रितेन भस्मना शिरःप्रभृतिष्ववलेपनमाग्नेयं स्नानं भवति । तदुक्तं लैङ्गे ।

ईशानेन शिरोदेशं मुखं तत्पुरुषेण तु ।
उरोदेशमघोरेण गुह्यं वामेन सुव्रताः ॥
सद्योन पादौ सर्वाङ्गं प्रणवेन तु शोधयेदिति ।

ईशानतत्पुरुषाघोरवामदेवसद्योजातैः प्रणवादिनमोन्तैरनुलिम्पेदित्यर्थः । वारुणं जलावगाहनरूपं ब्राह्ममापोहिष्ठेति तृचेन पादहृदयमूर्धसु प्रतिपादं कुशोदकैर्मार्जनं तदाह कूर्मः ।

ब्राह्मं तु मार्जनं मन्त्रैः कुशैः सोदकबिन्दुभिः ।
तत्र विशेषमाह बौधायनः ।
भुवि मूर्ध्नि तथाकाशे मूर्ध्न्याकाशे तथा भुवि ।
आकाशे भुवि मूर्ध्नीति मन्त्रस्नान विधीयतइति ॥

सायमागच्छन्तीषु गोषु समुद्धतेन गोपादरजसा प्लावनं वायव्यस्नानम् ।

वायव्यङ्गोरजः प्रोक्तमस्ते गच्छति गोपतौ ।

इति बृहस्पतिस्मरणात् । आतपयुक्तेन वर्षोदकेनाप्लावनं दिव्यं स्नानं तद्गङ्गास्नानतुल्य भवति । अनेन यौगिकसारस्वते अपि स्नाने उपलक्ष्येते ।

तदाह बृहस्पति ।

यौगिकं स्नानमाख्यातं योगाद्विष्णुविचिन्तनम् ।
विद्वत्सरस्वतीप्राप्त स्नानं सारस्वतं स्मृतमिति ॥
विद्वदुक्तिप्रकारमाह व्यासः ।
स्वयमेवोपसन्नाय विनयेत द्विजातये ॥
तज्ज्ञः सम्पादयेत्स्नानं शिष्याय च सुताय च ।
दात्तायणमयैः कुंभैर्मन्त्रवज्जान्हवीजलैः ॥
कृतमाङ्गलपुण्याहैः स्नानमस्तु तदर्थिनाम् ।
आद्यौ तावत्प्रभासे बहुगुणसलिले मध्यमे पुष्करे वा
गङ्गाद्वारे प्रयागे कनखलसलिले भद्रकर्णे गयायाम् ।
राहुग्रस्ते च सोमे दिनकरसहिते सर्वहत्याविशेषा
देतैर्विख्याततीर्थैस्त्रिभुवनविदितैः स्नानमच्छिद्रमस्त्विति ।

एतेषु वारुणमेव मुख्यमिति तद्विधिरभिधीयते । तदाह शङ्खः ।

स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः ।
तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेदिति ॥

तान्यग्निपुराणे ।

नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलघर्षणम् ।
क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितम् ॥

तल्लक्षणान्याह शङ्खः ।

संस्नातस्तु पुमानर्होजपाग्निहवनादिषु ।
प्रातः स्नानं तदर्थं तु नित्यस्नानं प्रकीर्तितम् ॥
चण्डालशवपूयादि स्पृष्ट्वा स्नाता रजस्वलाम् ।
स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हितम् ॥
पुण्यस्नानादिकं यत्तु दैवज्ञविधिचोदितम् ।
तद्धि काम्यं समुद्दिष्टं नाकामस्तत्प्रयोजयेत् ॥

वसुकामः पवित्राणि तर्पयिष्यन्देवताः पितॄन् ।

स्नानं समाचरेद्यत्तु क्रियाङ्गं तत्प्रकीर्तितम् ।
मलापकर्षणं नाम स्नानमभ्यङ्गपूर्वकम् ।
मलापकर्षणार्थाय प्रवृत्तिस्तस्य नान्यथा ॥
सरस्सु देवखातेषु तीर्थेषु च नदीषु च ।
क्रियास्नानं समुद्दिष्टं स्नानं तत्र मता क्रियेति ॥

तच्च गङ्गायां मुख्यं 'कलौ गङ्गैव केवल'मिति स्कन्दपुराणात् ।
तदभावे बृहत्पराशर आह ।

देवखातनदीखातः सरस्सु स्नानमाचरेत् ।
स्नानं नद्यादिवन्येषु सद्भिः कार्यं सदम्बुषु ॥

निषिद्धदेशानाह स एव ।

न तीर्थे व्याकुले स्नायाच्चासज्जनसमाश्रिते ।
कदाचिद्विदुषा मत्या न स्नातव्यं पराम्भसा ॥

अम्भःसु दुष्कृतांशेन येन कर्ता विलिप्यते ।
पञ्च वा सप्त वा पिण्डानुद्धृत्य तत्र तु ॥

वाशब्दाच्चतुरो वा ।

उद्धृत्य चतुरः पिण्डान्परक्ये स्नानमाचरेदिति ।

अन्यत्र स्मरणात् ।

मासे नभसि न स्नायात्कदाचित् निम्नगासु च ।
रजस्वला भवन्त्येता वर्जयित्वा समुद्रगाः ॥
न स्नायात् क्षोभितास्वप्सु न स्वयं क्षोभयेच्च ताः ।
न निर्गतासु तीर्थाच्च पतन्तीष्वाहितासु च ॥
रविसङ्क्रान्तिवारेषु ग्रहणेषु शशिक्षये ।
व्रतेषु चैव षष्ठीषु न स्नायादुष्णवारिणा ॥
न स्नायाच्छूद्रहस्तेन नैकहस्तेन वा तथा ।
उद्धृताभिरपि स्नायादाहृताभिर्द्विजातिभिः ॥
स्वस्थाभिश्च सहेमाभिरनुष्णाभिस्तथा द्विजः ।
नवाभिर्निर्दशाहाभिरसंस्पृष्टाभिरन्त्यजैरिति ॥

अथ चण्डालावगाहनविधिरुष्णोदकनिषेधश्च शक्तस्य जलावगाहनं नित्यं स्नानं सर्वेषु वर्णेषु शक्तैरहरहः कार्यम् ।

तस्याथ विधिरुच्यतइति तत्स्मरणात् ।

आदित्यकिरणैः पूतं पुनः पूतं च वह्निना ।
आम्नातमातुरे स्नानं प्रशस्तं न श्रुतोदकमिति ॥

यमस्मरणाच्च । नद्याद्यसम्भवे तु नित्यस्नानाद्यप्यनातुरैरुष्णोदकेन कार्यम् ।

नित्यं नैमित्तिकं चैव क्रियाङ्गं मलकर्षणम् ।
तीर्थाभावे तु कर्तव्यमुष्णोदकपरोदकैरिति ॥

तत्राप्यशक्तो पूर्वोक्तानि गौणस्नानानि । तत्र कालविशेषं स्वयमेव विधास्यति । स्नानविधिस्तुस्वसूत्रादवगन्तव्यः । साधारणं तु त्रिविधमाह बृहत्पराशरः ।

सोङ्कारां चैव गायत्रीं महाव्याहृतिभिः सह ।
त्रिषष्ठ्येकधावर्त्य स्नायाद्विद्वानपि द्विजः ॥
छन्दोमुन्यमरैर्युक्तं स्वशाखास्वरसंयुतम् ।
आवृत्य प्रणवं स्नायाच्छतमर्द्धशतं दश ॥
चिद्रूपं परमज्योतिर्निरालम्बमनामयम् ।
अव्यक्तमव्ययं शान्तं स्नायाद्वापि हरिं स्मरन् ॥
गायत्रीं वारिसंस्नातः प्रणवैर्निर्मलीकृतः ।
विष्णुस्मरणसंशुद्धो ऽप्यर्हः सर्वेषु कर्मस्विति ॥

एते चत्वारोऽपि पक्षाः पूर्वपूर्वासम्भवे उत्तरोत्तरइति व्यवस्थया ज्ञेयाः स्नानानन्तरं क्रमप्राप्तं वस्त्रपरिधानं तच्च प्रथमाध्याय एव निरूपितम् । इदानीं स्नानप्रसङ्गाद्बुद्धिस्थमाचारादिकाण्डत्रयशेषं समापयितुं तर्पणनिर्णयमाह ॥

**स्नातुं यान्तं द्विजं सर्वे देवाः पितृगणैः सह ॥**
**वायुभूतास्तु गच्छन्ति तृषार्ताः सलिलार्थिनः ॥१२॥**
**निराशास्ते निवर्तन्ते वस्त्रनिष्पीडने कृते ॥**
**तस्मान्न पीडयेद्वस्त्रमकृत्वा पितृतर्पणम् ॥ १३ ॥**

गङ्गादौ स्नातुं गच्छन्तं द्विजं वायुभूताः सदेवाः पितरस्तृषार्ताः सलिलार्थिनो ऽनुगतास्तेऽपि निष्पीडिते स्नानवस्त्रे निराशा गच्छन्ति तस्मात्तर्पणमकृत्वा वस्त्रं न निष्पीडयेदित्यनेन तर्पणवस्त्रनिष्पीडनयोः पौर्वापर्यमुक्तं भवति । तदाह योगी याज्ञवल्क्यः ।

यावद्देवानृषींश्चैव पितॄंश्चापि न तर्पयेत् ।
तावन्न पीडयेद्वस्त्रं यो हि स्नातो भवेद्द्विजः ॥
निष्पीडयति यो मोहात्स्नानवस्त्रमतर्पिते ।
निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणमिति ॥
तद्वस्त्रनिष्पीडनं च स्थले कार्यम् ।
वस्त्रनिष्पीडितं तोयं श्राद्धं चोच्छिष्टभोजिनाम् ॥

भागधेयं श्रुतिः प्राह तस्मान्निष्पीडयेत् स्थलइति।
स्मृत्यन्तरात्। निष्पीडनमन्त्रस्तु।
ये के चास्मत्कुले जाता अपुत्रा गोत्रिणोमृताः।
ते गृह्णन्तु मया दत्त वस्त्रनिष्पीडनोदकमिति।

तिलस्थाने विशेषमाह॥

**रोमकूपे यवं स्थाप्य यत्तिलैस्तर्पयेत्पितॄन्॥**
**तर्पितास्तेन ते सर्वे रुधिरेण मलेन च॥ १४॥**

सलोमके प्रकोष्ठे तिलानवस्थाप्य तर्पणे अयं दोषः। तदाह देवलः।

रोमसंस्थांस्तिलान् कृत्वा यस्तु तर्पयते पितॄन्।
पितरस्तर्पितास्तेन रुधिरेण मलन चेति॥

इदमनुद्धृततोयतर्पणे उद्धृते तु विशेषमाह योगियाज्ञवल्क्यः।

यद्युद्धृतं निषिञ्चेत्तु तिलान्संमिश्रयेज्जले।
अतोन्यथा तु सव्येन तिला ग्राह्या विचक्षणैरिति॥

यो ऽपि गृहे निषिद्धं सतिलं तर्पणं तद्बुहिर्भवेदिति बौधायनीयो निषेधस्सोपि प्रत्यक्षतिलाभिप्राय एव। गृहे अनुद्धृतोदकासंभवाद् उद्धृते तु संमिश्रणाभिधानात्। तिलेषु विशेषमाह गोभिलः।

शुक्लैस्तु तर्पयेद्देवान्मनुष्यांच्छबलैस्तिलैः।
पितॄंस्तु तर्पयेत्कृष्णै-स्तर्पयन्सर्वतोद्विज इति॥

यवैर्देवर्षितर्पणमाह कूर्मः।

देवान् ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैरिति।
अञ्जलिनियममाह व्यासः।
एकैकमञ्जलिं देवा द्वौ द्वौ तु सनकादयः।
अर्हन्ति पितरस्त्रींस्त्रीं स्त्रियस्त्वेकैकमञ्जलिम्॥
स्त्रियोमात्रादिव्यतिरिक्ताः तासां शालङ्कायनो विशेषमाह॥
मातृमुख्यास्त्रियस्तिस्रस्तासां दद्याञ्जलाञ्जलीन्।
त्रींस्त्रींस्तु दद्यादन्यासां दद्यादेकैकमञ्जलिम्॥

सापत्नावार्यपत्नीनां द्वौ द्वौ दद्याज्जलाञ्जली इति ।

देवादितर्पणमेकहस्तेनापि भवति । पितृतर्पणन्त्वञ्जलिनैव तदाह कूर्मः ।

अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु ॥
देवर्षीं स्तर्पयेद्धीमानुदकाञ्जलिभिः पितॄनिति ।

तर्पणप्रकारमाह वशिष्ठः ।

सम्बन्धमनुकीर्त्यैव नाम गोत्रमनन्तरम् ।
वस्वादिरूप मुद्गीर्त्य स्वधातेन नमो ऽन्ततः ॥
तर्पयामि पदेनैव तर्पयेत्पितृपूर्वकमिति ।

तर्पणीयानाह हारीतः पित्रादीन्मात्रादीन्मातामहादीन्पितृव्यत्पुत्रज्येष्ठभ्रातृन्सपत्नीपौत्तुनाम्नस्तत्पत्नीर्गुर्वाचार्योपाध्यायान्सुहृत्सम्बन्धिबान्धवान् द्रव्यादातृपोपकर्तॄंश्चेत्यन्तत्पत्नीश्चतर्पयेदिति । तर्पणानाह व्याघ्रपात् ।

पितुः पुत्रेण कर्तव्याः पिण्डदानोदकक्रियाः ।
पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदर इति ॥

तस्यापवादः स्मृतिमञ्जर्याम् ।

अपुत्रा स्त्री यथा पुत्रः पुत्रवत्यपि भर्तरि ।
श्राद्धं पिण्डोदकं कुर्याज्जलमेकं तु पुत्रिणीति ।

स्नानकालीनाचियमानाह ॥

**अवधूनोति यः केशान्स्नात्वा प्रस्रवते द्विजः ।**
**आचामेद्वा जलस्थो ऽपि स बाह्यः पितृदैवतैः ॥१५॥**

यः स्नानानन्तरं केशान् विधुनुयात् योवा स्नानानन्तरमार्द्रवस्त्रएव प्रस्रवते शिरामूत्रमुत्सृजति यश्च स्नात्वा शुद्धवस्त्रो जले स्थित्वाऽऽचामेत्स त्रिविधो ऽपि पैतृकदैविकयोर्बाह्यो ऽनर्होभवति । तथाच मार्कण्डेयः ।

अवमृज्यान्न वस्त्रान्तोगात्राण्यम्बरपाणिभिः ।
न च निर्धुनुयात्केशान्वासश्चैव न निर्धुवन् ॥

जाबालिः।

स्नानं कृत्वार्द्रवासास्तु विण्मूत्रं कुरुते यदि।
प्राणायामत्रयं कृत्वा पुनः स्नानेन शुध्यति॥

हारीतः।

आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपम्।
शुष्कवासाःस्थले कुर्यात्तर्पणाचमनं जपमिति॥

अनेनार्द्रशुष्कवस्त्रयोर्विपर्यासे जलस्थलयोर्नाचामेदित्युक्तं भवति। आचमनकालीनान्नियमानाह।

**शिरःप्रावृत्य कण्ठं वा मुक्तकच्छशिरोऽपि वा।**
**विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्भवेत् ॥१६॥**

शिरः कण्ठं वा वाससा प्रावृत्य मुक्तकच्छो मुक्तशिखोयज्ञोपवीतरहितो वाऽऽचान्तोऽपि शुद्धो न भवति। तथाच ब्रह्माण्डपुराणे।

कण्ठं शिरोवा प्रावृत्य रथ्यापणगतोऽपि वा।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्॥

बौधायनोऽपि।

न तिष्ठन्न प्रह्वो न प्रणतो न मुक्तशिखो नावद्धकच्छो न बहिर्जानुर्न वेष्टितशिरा नाबद्धकक्षो न त्वरमाणो नायज्ञोपवीती न प्रसारितपादः शब्दं कुर्वन्स्त्रवोहृद्गमाः पिबेदिति। त्रिश्चतुर्वेति गौतमः। अनेनाचमनांगकलापविधानेन यत्राप्याचमनशिखावंधादीनां यौगपद्यमापद्यते तत्रापि शिखावंधादिपूर्वकमेवाचामेदित्यर्थः सिध्यति। ततश्च

विशिखोव्युपवीतीच यत्करोति न तत्कृतम्।
क्रियां यः कुरुते मोहादनाचम्येह नास्तिकः॥

न भवन्ति तथा तस्य क्रियाः सर्वा न संशय

इत्येताभ्यां शिखाबन्धाचमनयोः सर्वकर्माङ्गत्वे ऽपि न परस्पराङ्गत्वमन्वारभणीयामन्वारभणीयायाइव अनवस्थापातात्। किन्तु शिखाबन्धादीनामेवाचमने यत्तु।

सन्देहेषु च सर्वेषु शिखामोक्षे तथैव च ।
विना यज्ञोपवीतेन नित्यमेवमुपस्पृशेदिति ॥

वचनं तदाचमने निमित्तान्तरसंग्रहार्थं नत्वाचमनस्य शिखाबन्धादावङ्गत्वबोधनायेत्यलम् । विना यज्ञोपवीतेन यज्ञोपवीतस्य स्कन्धात्स्खलनदृत्यर्थः । आचमने तीर्थनियममाह । भरद्वाजः ।

ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् ।
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचनेति ॥
अत्र ब्रह्मादिना पूर्वपूर्वापघात उत्तरोत्तरं द्रष्टव्यम् ।
त्रिः पिबेद्ब्रह्मतीर्थेन जलमाचमनं चरन् ॥
पीत्वान्येन भवेत्पापी तीर्थेनेति मतिर्ममेति ।

तत्सम्भवेऽन्यनिषेधात् । तीर्थमयविधानादेव पित्र्यनिषेधे सिद्धे पुनर्निषेधोऽनिषिद्धानां मानुषाग्नेयार्षाणामित्यर्थः। तत्स्थानान्याह याज्ञवल्क्यः।

कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च ।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥

वसिष्ठोऽपि । अङ्गुल्यमूलस्योत्तरतो रेखा ब्राह्मं तीर्थमङ्गुलिकनिष्ठिकामूले दैवमङ्गुल्यग्रेषु मानुषं पाणिमध्यमाग्नेयं प्रदेशिन्यङ्गुष्ठयोरन्तरा पैत्र्यमिति । आश्वलायनोऽपि ।

आर्षं कनिष्ठिकामूले कायमथाङ्गुलीषु वै इति ।

शङ्खलिखितावपि । पूर्वेणान्तराङ्गुलिपर्वाणि दैवमिति । अत्र कनिष्ठिकामूलैर्दैवार्षप्राजापत्यानामङ्गुलीपर्वसु दैवार्षयोरङ्गुल्यग्रेव मानुषप्राजापत्यानां विकल्पो ज्ञेयः । तानि च दक्षिणहस्त एव ब्राह्मणस्य दक्षिणहस्ते पञ्चतीर्थानीति प्रचेतःस्मरणात् । किञ्च ।

**जले स्थलस्थो नाचामेज्जलस्थश्च बहिःस्थले ॥**
**उभे स्पृष्ट्वा समाचामेदुभयत्र शुचिर्भवेत् ॥ १७ ॥**

स्नात्वाशुष्कस्थल उपविष्टः प्रह्वोवा जलएवा वमनविन्दून्यातय-

त्राचामेदुभयथाप्युभयत्राशुद्धः । किन्तु जलस्थलयोः पादौ कृत्वाचामेत्तथा सत्युभयोरपि जलस्थलयोः शुद्धो भवति । तदाह दक्षः ।

स्नात्वाचामेत्सदा विप्रः पादौ कृत्वा जले स्थले ।
उभयोरप्यसौ शुद्धः स्नातः कार्यक्षमो भवेदिति ॥

बहिराचमननिमित्तान्याह ॥

**स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ॥**
**आचान्तः पुनराचामेद्वासो ऽपि परिधाय च ॥१८॥**

स्नानपानक्षुतस्वप्नभोजनरथ्याप्रसर्पणवस्त्रपरिधानेषु कृतेष्वाचान्तः पुनराचामेत्द्विराचामेदित्यर्थः । चकाराद्रोदनाध्ययनारम्भचापल्यानृतोक्त्यादिषु । तथाच वसिष्ठः । सुप्त्वा जप्त्वा स्नात्वा रुदित्वाऽऽचान्तः पुनराचामेदिति । मनुरपि ।

सुप्त्वा जप्त्वा च भुक्त्वा च ष्ठीवित्वोक्त्वाऽनृतं वचः ।
पीत्वाऽपो ऽध्येष्यमाणश्च आचामेत्प्रयतो ऽपि सन्निति ॥

आचमनासम्भवे तु कल्पमाह ।

**क्षुते निष्ठीवने चैव दन्तोच्छिष्टे तथानृते ॥**
**पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत् ॥ १९ ॥**

क्षुतनिष्ठीवनदन्तोच्छिष्टाशनानृतभाषणपतितसंभाषणादिष्वाचमनासंभवे दक्षिणं श्रवणं स्पृशेत् ।

तथाच वसिष्ठः ।

क्षुते निष्ठीवने सुप्ते परिधाने,-श्रुपातने ।
पञ्चस्वेतेषु चाचामेच्छ्रोत्रं वा दक्षिणं स्पृशेदिति ॥

मार्कण्डेयोऽपि ।

आचम्य सम्यग्योयेन क्रियाः कुर्वीत वै शुचिः ।
कुर्वीतस्पर्शनं वापि दक्षिणश्रवणस्य च ॥
यथाविभवतो ह्येतत्पूर्वाभावे ततः परम् ।
अविद्यमाने पूर्वोक्त उत्तरप्राप्तिरिष्यतइति ॥

तस्याप्यसम्भवे तु कल्पान्तरमाह बौधायनः ।

मौर्वीं विस्रस्य परिधायोपस्पृशेदार्द्रं तृणं गोमयं भूमिं वाभिमृशेदोषधीं वेति ।

अत्रार्थवादमाह ।

**प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ॥**
**विप्रस्य दक्षिणे कर्णे सन्तीति मनुरब्रवीत् ॥ २० ॥**
**अग्निरापश्च वेदाश्च सोमसूर्यानिलास्तथा ॥**
**सर्व एव तु विप्रस्य श्रोत्रे तिष्ठन्ति दक्षिणे ॥ २१ ॥**

प्रभासादितीर्थानि गङ्गादिसरितोग्निरापो वेदाः सोमसूर्यानिलाश्चेत्येते सर्वेपि विप्रस्य दक्षिणे कर्णे तिष्ठन्तीति मनुरुक्तवानतस्तत्स्पर्श आचमनकार्यकारीतियुक्तमेव ।

स्नानकालमाह ॥

**भास्करस्य करैः पूतं दिवास्नानं प्रशस्यते ॥**
**अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात् ॥ २१ ॥**

संपूर्णादित्यमण्डलदर्शनयोग्यः कालो दिवसस्तत्र सूर्यकिरणैः पवित्रीकृते स्नानमतिप्रशस्तमन्यथा तद्विपरीते काले रात्रावप्रशस्तम् पावित्र्यहेतुसूर्यकिरणासद्भावात् । नचैतावता सन्ध्यायां स्नानमभ्यनुज्ञातं भवति पावित्र्यहेतुसूर्यकिरणसद्भावादितिवाच्यम् तस्य शूर्पेण जुहोति तेन ह्यन्नं क्रियतइतिवदर्थवादतया हेतुत्वानभ्युपगमात् । तर्हि तद्व्यतिरेकाद्रात्रिस्नाननिषेधे हेतुर्न स्यादिष्टापत्तिः कल्प्यस्यार्थवादत्वात् । कथन्तर्हि सन्ध्यायां स्नानप्राप्तिः वचनान्तरादिति ब्रूमः ।

तथाच चतुर्विंशतिमते ।

उषस्युषसि यत्स्नानं सन्ध्यायामुदितेऽपि वा ।
प्राजापत्येन तत्तुल्यं सर्वपापप्रणाशनमिति ॥

नन्वेवं चन्द्रग्रहणेपि रात्रौ स्नानं न स्यादित्यत आह राहोरन्यत्र दर्शनादिति ।

तदाह वृद्धयाज्ञवल्क्यः ।

ग्रहणोद्वाहसङ्क्रान्तियात्रार्त्तिप्रसवेषु च ।
स्नानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यत इति ।

आर्त्तिर्मरणम् ।

ग्रहणस्नानप्रसंगाद्ग्रहणदानेऽप्यर्थवादेन पुरस्तात् प्रतिप्रसवमाह ।

**मरुतो वसवो रुद्रा आदित्याश्चाथ देवताः ।**
**सर्वे सोमे प्रलीयन्ते तस्माद्दानन्तु सङ्ग्रहे ॥ २३ ॥**

सङ्ग्रहे सम्यग्राहुणा ग्रस्यमाने चन्द्रे मरुद्वसुरुद्रादित्यादयः सर्वेऽपि देवा नश्यन्ति तस्माद्दानं कृत्वा ते रक्षणीया इति । यद्यपि रात्रिदान-प्रतिषेधो न मूलवचने प्रस्तुतस्तथापि वक्ष्यमाणं तमादायायं प्रतिप्रसव इतिज्ञेयम् ।

ग्रहणदृष्टान्तेनान्यत्रापि रात्रिदानमाह ।

**खलयज्ञे विवाहेच संक्रान्तौ ग्रहणे तथा ।**
**सर्वथा दानमस्त्येव नान्यत्र तु विधीयते ॥ २४ ॥**

यथा ग्रहणे रात्रौ दानं प्रतिप्रसूतं तथा खलयज्ञविवाहरविसंक्रा-न्तिष्वपि रात्रौ दानं भवतीति ज्ञेयम् ॥ खलयज्ञो द्वितीयाध्याये वर्णितः

किञ्च ।

**पुत्रजन्मनि यज्ञे च तथाचात्ययकर्मणि ।**
**राहोश्च दर्शने दानं प्रशस्तं नान्यदा निशि ॥२५॥**

राहुदर्शनवत् पुत्रजन्मनि यज्ञे ज्योतिष्टोमादौ अत्ययकर्मणि मरणे च तत्तन्निमित्तं दानं रात्रावपि भवति नान्यदेति ।

यदुक्तमप्रशस्तं निशि स्नानमिति तस्य प्रतिप्रसवान्तरमाह ॥

**महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयम् ।**
**प्रदोषपश्चिमौ यामौ दिनवत्स्नानमाचरेत् ॥२६॥**

योयं रात्रौ स्नाननिषेधस्स महानिशाविषयस्सच मध्यमं यामद्वयं प्रदोषपश्चिमयामयोस्तु दिनवद्ग्रहणादिष्वपि स्नान कर्तव्यम् ॥ अयञ्च नित्यस्नानस्यैवापद्विषयः कालान्तरविधिः । काम्यनैमित्तिकयोस्तु महानिशायामप्यभ्यनुज्ञानात् ।

तथाच व्यासः ।

महानिशा तु विज्ञेया मध्यं यामद्वयं निशि ।
तस्यां स्नानं न कुर्वीत काम्यनैमित्तिकादृते इति ।

इदानीं नैमित्तिकस्नानमाह ॥

**चैत्यवृक्षश्चितिर्यूपश्चण्डालः सोमविक्रयी ॥**
**एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेत् ॥२७॥**

चैत्यः चितियोग्यः श्मशान तत्रत्यो वृक्षश्चैत्यवृक्षश्चयनोद्भवो वा वृक्षश्च चितिश्चयनं वा यूपादयः प्रसिद्धा एतान् स्पृष्ट्वा स्पर्शकालीनवस्त्रयुक्तएव जलमाविशेत् । जलमाविशेदित्यनेन उद्धृतोदकस्नान निषेधति ।

तथाच विष्णुः

स्नानार्हो यो निमित्तेन कृत्वा तोयावगाहनम् ।
आचम्य प्रयतः पश्चात्स्नानं विधिवदाचरेत् ।

रात्रौ तु नैमित्तिकं स्नानं गृहे एव कार्यं । तदाह यमः ।

विप्रः स्पृष्टो निशायां तु उदक्या पतितेन च ।
दिवानीतेन तोयेन गृहे स्नानं समाचरेत् ।

तत्र विशेषमाह वृद्धपराशरः ।

रात्रौ स्नाने तु सम्प्राप्ते स्नायादनलसन्निधौ ।
यदि गेहे न तोयं स्यात्तदा शुद्धिः कथं भवेत् ।
धाम्नोधाम्नस्तु मंत्रेण गृह्णीयादग्निसंनिधौ ।

एवमपिजलग्रहणासम्भवे मरीचिः ।

दिवाहृतन्तु यत्तोयं गेहे यदि न विद्यते ।
प्रज्वाल्याग्निं ततः स्नायाच्चद्यां पुष्करणीषु च ।

अत्र स्नानाङ्गतर्पणं नास्तीत्याह वृद्धपराशरः ।

अस्पृश्यस्पर्शने जाते अश्रुपाते क्षुरे भगे ।
स्नानं नैमित्तिकं कार्यं दैवपित्र्यविवर्जितमिति ।

जन्ममरणक्षौरमैथुनेषु देवर्षिपितृतर्पणरहितमित्यर्थः ।

किञ्च ।

**अस्थिसञ्चयनात्पूर्वं रुदित्वा स्नानमाचरेत् ।**
**अन्तर्दशाहे विप्रस्य ह्यूर्ध्वमाचमनं स्मृतम् ॥२८॥**

मृतस्य विप्रस्य दशाहाभ्यन्तरे अस्थिसञ्चयनात्प्राक् ब्राह्मणः क्षत्रियादिर्वा रुदित्वा स्नानमाचरेत् । ऊर्ध्वं तस्मादाचमनमिति वर्णितं तृतीयाध्याये ।

यदुक्तं ग्रहणे रात्रिस्नानमपि प्रशस्तमिति तदुपपादयति ।

**सर्वं गंगासमं तोयं राहुग्रस्ते दिवाकरे ।**
**सोमग्रहे तथैवोक्तं स्नानदानादिकर्मसु ॥२९॥**

रविग्रहदृष्टान्तो निर्विवादता बोधनार्थः ।

तथाच भरद्वाजः ।

चन्द्रसूर्योपरागे तु यत्कर्तव्य तदुच्यते ।
सर्वे हेमसम दानं सर्वे ब्रह्मसमा द्विजाः ।
सर्वं गंगासमं तोयं राहुग्रस्ते दिवाकरे इति ।

इदानीमुक्तेषु स्नानादिषु गुणविशेषमाह ॥

**कुशैः पूतं भवेत्स्नानं कुशेनोपस्पृशेद्द्विजः ॥**
**कुशेन चोद्धृतं तोयं सोमपानसमं भवेत् ॥३०॥**

पूर्वोक्तं स्नानं मार्जनाद्यङ्गसाधनेन कुशैर्निर्वर्त्यमानं पूतं पावित्र्यातिशयहेतुर्भवेत् नैतावता कुशोपादानं काम्यं शङ्कनीयम् ।

जपे होमे च दाने च स्वाध्याये पितृतर्पणे ॥
अशून्यं तु करं कुर्यात्सुवर्णरजतैः कुशैरिति ।

शातातपेनावश्यकत्वबोधनात् ॥

कुशहीन तु यत्स्नानं तिलहीनं तु तर्पणम् ।
तत्सर्वं त्रिजटे तुभ्यं यच्च श्राद्धमदक्षिणमिति ॥

पुराणे कुशाभावे स्नानवैयर्थ्यबोधनाच्च । पूर्वोक्तमाचमनं कुशेन कुशहस्तेन कार्यम् यतः कुशोद्धृत तोय पीयमानं सोमपानसमफलकं भवति ।

तथाच मार्कण्डेयः

सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम् ।
नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेदिति ।

एतद्ग्रन्थिरहितदर्भाभिप्रायम् ।

ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनञ्चरेदिति हारीतस्मरणात् ।

पवित्रदलसङ्ख्योक्ता पुराणे ।

सप्तभिर्दर्भपिञ्जूलैः कुर्याद्ब्राह्मं पवित्रकम् ।
पञ्चभिः क्षत्रियस्यैव चतुर्भिश्च तथा विशः ।
द्वाभ्यां शूद्रस्य विहितमन्त्तराणां तथैव च ।

मार्कण्डेयोपि ।

चतुर्भिर्दर्भपिञ्जूलैः ब्राह्मणस्य पवित्रकम् ।
एकैकन्यूनमुद्दिष्ट वर्णे वर्णे यथाक्रमम् ।
त्रिभिर्दर्भैः शान्तिकर्म पञ्चभिः पौष्टिकं तथा ।
चतुर्भिश्चाभिचाराख्यं कुर्वन् कुर्यात्पवित्रकमिति ।
सर्वत्र सर्वेषां द्विदलमेवेति कात्यायनः ।
अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्र यत्र कुत्रचित् ।

कुशाभावे काशादयो ग्राह्याः । तदाह विष्णुः ।

कुशाः काशा यवा दूर्वा गोधूमाश्चाथ तण्डुलाः ।
उशीरा व्रीहयो मौञ्जा दशदर्भाश्च बल्वजा इति ।

इदानीं कृत्स्नवेदाध्ययनाशक्तावेकदेशाध्ययनमभ्यनुज्ञातुं सर्वथाध्ययनाभावं निन्दति ॥

**अग्निकार्यात्परिभ्रष्टाः सन्ध्योपासनवर्जिताः ।**
**वेदं चैवानधीयानाः सर्वे ते वृषलाः स्मृताः ॥३१॥**

अग्निकार्यं ततः कुर्यात्सन्ध्ययोरुभयोरपीत्यादिना ब्रह्मचारिणो विहितं समिदाधानं तद्रहिता ब्राह्मण्यं विहाय वृषलत्वं प्राप्नुवन्ति । इदञ्च सप्तरात्रादूर्ध्वमवगन्तव्यम् ।

तथाच मनुः ।

अकृत्वा भैक्षचरणमसमिध्य च पावकम् ।
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् । इति ।

तथा सप्तरात्रं त्रिकालविहितसन्ध्योपासनरहिता वृषला भवन्ति ।

तथाच संवर्त्तः ।

सन्ध्यातिक्रमणो यस्य सप्तरात्रं गमिष्यति ।
उन्मत्तदोषयुक्तोपि पुनः संस्कारमर्हति ।

तथावेदा वेदस्वाश्रयमृगादिकमप्यनधीयाना वृषला भवन्ति ।

तथाच श्रूयते ।

स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् अनन्वच्य ब्रह्मबन्धुरिवभव

वसिष्ठोपि ।

नानृग् ब्राह्मणो भवति न वणिग्न कुशीलवः ।
न शूद्रप्रेषणात्कुर्वस्तेनो न चिकित्सक इति ।

उपपादितं चैतदष्टमे

ब्राह्मणास्त्वनधीयानो ऽमन्त्रो ब्राह्मणस्तथा । तथा विप्रोऽनृचो-ऽफलइत्यादिना ।

तर्हि अशक्तेन किङ्कर्तव्यमित्यतआह ॥

**सतस्माद्वृषलस्तेन ब्राह्मणेन विशेषतः ॥**
**अध्येतव्योऽप्येकदेशो यदि सर्वं न शक्यते ॥ ३२ ॥**

पठित्वा चतुरो वेदांस्त्रीन् द्वावेकमथापि वा ।
अधीत्य चाधिगम्यार्थं ततःस्नायाद्द्विजोत्तमः ॥

इत्यादिस्मृत्या चतुस्त्रिद्व्येकवेदाध्ययने समुच्चयविकल्पौ

शक्ताशक्तयोर्विहितौ तत्रान्तिमे पक्षे एकवेदाध्ययनेऽप्यशक्तेन ब्राह्मणेनैकदेशोऽप्यध्यायकाण्डादिर्वेदस्याध्येतव्योऽन्यथा वृषलत्वापत्तेः ।

अयमभिसन्धिः । स्वाध्यायोऽध्येतव्य इत्यादिविधिर्वेदैकदेशाध्ययनेऽप्यात्मानं लभते वेदत्वस्यावयवावयविवृत्तित्वात्सुवर्णवत् । अन्यथा स्त्रीशूद्रौ वेदं नाधीयातामित्यादिनिषेधेषु समुदाय एव विषयः स्यात् । नचैवं वर्णमात्रोच्चारणप्रतिषेधेनातिप्रसङ्गः नित्यानुपूर्वीकः पदसमुदायो वेद इति वेदलक्षणेन नित्यायाः पदानुपूर्व्या एव वेदत्वाभिव्यञ्जकत्वात् । तर्ह्युन्मिषनिमील इति पदद्वयेनापि विधिः सिध्येत् । मैवम् । नानृग् ब्राह्मणो भवतीत्यादिना विधेः ऋङ्न्यूनविषयत्वाभावात् । तस्मादेकदेशाध्ययनेपि विधिसिद्धिः । एकदेशोपि च नित्यकर्मावबोधकएव नान्यः । तस्यैव नित्यकर्मापेक्षितत्वेन नित्याध्येयत्वात् । इतरभागाध्ययनत्वं नित्यापेक्षितत्वात्काम्यमेव । यद्यपि स्वाध्यायग्रहणेन सकलो वेदः परिगृहीतः तथापि दर्शपूर्णमासौ कुर्वाणस्य ज्योतिष्टोममन्त्रब्राह्मणं न क्वचिदुपयुज्यत इत्यसदपि नाधिकारं व्यावर्त्तयति । दृष्टिवेदनेनैव योग्यतायाः सिद्धत्वात् । तेन तद्याजिनस्तावानेव स्वाध्याय इति प्रपञ्चितमेव वार्त्तिके यदपि प्रायश्चित्ताद्यर्थं सकलवेदाध्ययनमिति तदप्यनित्यत्वात्प्रायश्चित्तस्य न सर्वाध्ययननित्यतां गमयति ।

अतएवोक्तम् ।

अधीत्य यत्किञ्चिदपि वेदार्थमधिगच्छति ।
स्वर्गलोकमवाप्नोति कर्मानुष्ठानविद्द्विज इति ॥

अर्थज्ञानमपि तावत एव नित्यमित्यलमतिप्रसङ्गेन ।
शाखाध्ययने तु स्वीयैव नित्या ॥

तथाच वसिष्ठः ।

पारम्पर्यागतो वेदः स वेदः परिबृंहणः ।
तच्छाखं कर्म कुर्वीत तच्छाखाध्ययनं तथा ॥
यः स्वशाखां परित्यज्य पारक्यामधिगच्छति ।
स शूद्रवद्बहिष्कार्यः सर्वकर्मसु गर्हितः ॥

यच्छाखीयैस्तु संस्कारैः संस्कृतो ब्राह्मणो भवेत्।
तच्छाखाध्ययनं कुर्याच्च तेन पतितो भवेदिति ॥

अत्रोपनीयवेदमध्यापयेदित्यनेनोपनयनस्य वेदाध्ययनार्थत्वेऽध्येष्यमाणशाखीयकल्पेनोपनीतस्यैव तच्छाखाध्ययनाधिकारो न शाखान्तरीयकल्पेन। पातित्यस्मरणात्। स्वशाखा च प्रथममध्येयेति तत्कल्पेनैवोपनीतस्य ब्राह्मण्यसिद्धिः। ततश्च प्रतिशाखाध्ययनं तत्तत्कल्पेनोपनयनं सिध्यति। महानाम्न्याद्यध्ययनाङ्गव्रतादेशनवत्।

तदाहाश्वलायनः।

अथोपेतपूर्वस्येत्यादि विवृणोत्येतद्धरदत्तः। एवं ब्रुवन्नेतज्ज्ञापयति तेन तेन प्रकारेण प्रतिवेदमुपनयन कर्तव्यमिति।

शौनकोऽपि।

यो वेदान्तरमध्येतुं तत्सूत्रविधिना ततः।
कृतोपनयनोधीत्य तं वेदं सकलं द्विजः ॥
द्वितीयमेवमृग्वेदमध्येतुमभिकाङ्क्षया।
एतद्गृह्योक्तविधिना पुनरप्युपनीयतइति ॥

एतेन ऋत्विजामपि मधुपर्कविवादो निरस्तः आर्त्विज्यशाखीयमधुपर्कसंस्कृतानामेव तत्तदार्त्विज्याधिकारात्।

अग्निकार्यादिषु त्रिषु नियमविशेषमाह।

**शूद्रान्नरसपुष्टस्याप्यधीयानस्य नित्यशः।**
**जपतो जुह्वतो वापि गतिरूर्ध्वा न विद्यते ॥ ३३ ॥**

निरन्तरं शूद्रान्नभोजिनो वेदाध्ययनगायत्रीजपाग्निहोमादिजन्योर्ध्वगतिर्न भवतीति तेषु तत्परिहार आवश्यकः। जपहोमानन्तरभाविनोपि वेदाध्ययनस्य पूर्वानुकीर्त्तनं तु वेदाध्ययनहेतुकत्वमितरयोर्ज्ञापयितुम्।

उक्तमर्थमुपपादयति।

**शूद्रान्नं शूद्रसम्पर्कः शूद्रेण तु सहासनम्।**
**शूद्राज्ज्ञानागमश्चापि ज्वलन्तमपि पातयेत् ॥३४॥**

शूद्रान्नं पूर्वोक्तं शूद्रसम्पर्कं एकगृहवासेन सङ्घर्षः, शूद्रेण सहैकासन उपवेशनं शूद्रादुपदेशाधिगमश्चेत्येते प्रत्येकं ज्वलन्तं ब्रह्मवर्चसातिशयेन दीप्यमानमपि नरके पातयन्ति ।

किञ्च

यः शूद्रया पाचयेन्नित्यं शूद्री च गृहमेधिनी ॥
वर्जितः पितृदेवेभ्यो रौरवं याति स द्विजः ॥३५॥

यः स्वीयमप्यन्नं शूद्रस्त्रिया प्रत्यहं पाचयित्वा भुङ्क्ते यस्य च शूद्रैव गृहमेधिनी गृहव्यापारनिर्वाहिका नतु भार्या, तस्याः कलावप्रसक्ते स द्विविधोऽपि द्विजातिर्विप्रादिः देवपितृकर्मानधिकारी सन् रौरवं नरकं प्राप्नोति ।

किञ्च ॥

मृतसूतकपुष्टाङ्गं द्विजं शूद्रान्नभोजिनम् ।
अथ तं न विजानामि कां कां योनिङ्गमिष्यति ॥३६॥

य असपिण्डस्य जननमरणाशौचयोरन्नं भुक्त्वा स्वाङ्गं पुष्णाति यश्च शूद्रान्नं भुङ्क्ते स कां कां योनिं गमिष्यतीत्यहं न जानामि अनेनानेकत्वं योनीनामुपवर्णितम् ।

तदेव स्पष्टयति ।

गृध्रो द्वादश जन्मानि दश जन्मानि शूकरः ।
श्वयोनौ सप्तजन्म स्यादित्येवं मनुरब्रवीत् ॥ ३७ ॥

श्वशूकरगृध्रयोनिषु क्रमेणसप्तदश दशद्वादश जन्मानि लभतइति मनुमतम् ।

नन्वेवं शूद्रान्नं मा नाम भुञ्जतां यागाद्यर्थं तद्ग्रहणे को दोष इत्यत आह ।

दक्षिणार्थं तु यो विप्रः शूद्रस्य जुहुयाद्धविः ।
ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेत् ॥३८॥

यो विप्रः शूद्रस्य दक्षिणार्थं शूद्राद्यागार्थं गृहीताया दक्षिणाया निर्वाहाय हविर्जुहोति ज्योतिष्टोमादिभिर्यजते स जीवन् शूद्रो ब्रह्मकर्मानर्हः प्रेत्य चण्डालश्च भवति ।

तथा च मनुः ।

न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत धर्मवित् ।
यजमानोऽपि भिक्षित्वा चण्डालः प्रेत्य जायत इति ।

नचैतावता शूद्रस्य यज्ञार्थद्रव्यदानप्रतिषेध इत्याह शूद्रस्तु ब्राह्मणो भवेदिति । यः शूद्रो यज्ञफलकामनया यज्ञपर्याप्त द्रव्यं दत्वा ब्राह्मणद्वारा यज्ञं कारयति स जात्या शूद्रोऽपि ब्राह्मणवद्यज्ञफलभाग्भवति ।

तथाच राजधर्मेषु ।

दक्षिणा सर्वयज्ञाना दातव्या भूतिमीप्सुभिः ।
पाकयज्ञा महार्हाश्च दातव्याः सर्वदस्युभिरिति ।

दस्युभिः पूर्वोक्तैः शूद्रादिभिः सर्वैर्नीचैर्भूतिमीप्सुभिस्तत्सवयज्ञफलकामैः सर्वयज्ञानां श्रौतस्मार्त्तानां दक्षिणा निर्वाहकं द्रव्यं दातव्यं तेनात्मनः फलसिद्धिर्भवतीत्यर्थः । तर्हि तदभावे किं न देयमित्यत आह । पाकयज्ञास्तोकयज्ञास्थालीपाकादयः महार्हा ज्योतिष्टोमादयश्च कर्त्तुं फलसिध्यर्थमपि देयाः कारणीया इत्यर्थः ।

**मौनव्रतं समाश्रित्य आसीनो न वदेद्द्विजः ।**
**भुञ्जानो हि वदेद्यस्तु तदन्नं परिवर्जयेत् ॥ ३९ ॥**

यो मौनेन भोक्ष्य इति संकल्प कृत्वा भोक्तुमासीनस्य यावद्भोजनसमाप्ति न वदेत्, यद्यन्तरा प्रमादाद्वदति तदाऽवशिष्टमन्न तथैव परित्यजेदिति ॥

किंच ।

**अर्द्धभुक्ते तु यो विप्रस्तस्मिन्पात्रे जलं पिबेत् ॥**
**हतं दैवं च पित्र्यं च आत्मानं चोपघातयेत् ॥ ४० ॥**

येऽसमाप्तभोजन एव भोजनपात्रमुद्धृत्य तेन जलादि पेयम् पिबेत् तेन पूर्वानुष्ठितमात्मनो दैवं पित्र्यं च कर्मजातं हतम् आत्मा चोपहत इति ।

किंच ।

**भुञ्जानेषु तु विप्रेषु यो ऽग्रपात्रं विमुञ्चति ॥**
**स मूढः स च पापिष्ठो ब्रह्मघ्नः स खलूच्यते ॥४१॥**

एकपंक्त्युपविष्टेष्वसमाप्तभोजनेष्वेव विप्रेषु यः प्रथममेव स्वपात्रं त्यक्त्वोत्तिष्ठति स मूढपापिष्ठब्रह्मघ्नादिशब्दैर्निन्द्यो भवति ।

भोजनपात्रपरित्यागप्रसंगेन श्राद्धे पात्रचालनकालमाह ॥

**भोजनेषु च तिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः ॥**
**न देवास्तृप्तिमायांति निराशाः पितरस्तथा ॥ ४२ ॥**

श्राद्धे विप्रभोजनानन्तरं भोजनपात्रेष्ववस्थितेषु यदि द्विजा स्वस्तीति वदन्ति तदा विश्वेदेवास्तृप्तिं नायान्ति पितरश्च निराशा गच्छन्ति तस्मात्स्वस्तिवाचनात्पूर्वं पात्रचालनं कार्यमिति ।

प्रकृतमनुसरति ।

**अस्नात्वा नैव भुञ्जीत अजप्त्वाग्निमपूज्य च ॥**
**न पत्रपृष्ठे भुञ्जीत रात्रौ दीपं विना तथा ॥४३॥**

यद्यपि स्नानादीनां भोजनकालात्प्रागेव विहितत्वादस्नानभोजनादि न प्रसक्तं तथा स्वकालेऽननुष्ठितानां भोजनकालेऽप्यनुष्ठानविधानार्थमिदम् अन्यथा स्वकालातिक्रमेण प्रधानलोपप्रसङ्गात् । तथा पत्रावस्थां भुञ्जानः पत्राणां पृष्ठभागे न भुञ्जीत किन्त्वन्तर्भागे, रात्रौ च दीपं विनान्धकारे न भुञ्जीत ।

इदानीं द्रव्यार्जनविधिविशेषमाह ॥

**गृहस्थस्तु दयायुक्तो धर्ममेवानुचिन्तयेत् ॥**
**पोष्यवर्गार्थसिद्ध्यर्थं न्यायवर्ती सुबुद्धिमान् ॥ ४४ ॥**

गृहस्थः पुत्रभृत्यकलत्रादिदैन्यदर्शनाक्षमतया दयायुक्तोपि पोष्यवर्गस्य पोषणरूपार्थसिध्यर्थं धर्मं शास्त्रीयमेव याजनादिद्रव्योपार्जनोपायं चिन्तयेत् । एवं न्यायवर्त्ती सन् परलोकप्रधानत्वेन सुबुद्धिमान् तत्त्वज्ञानवान् भवति ॥

किञ्च ।

**न्यायोपार्जितवित्तेन कर्तव्यं ह्यात्मरक्षणम् ॥**
**अन्यायेन तु यो जीवेत्सर्वकर्मबहिष्कृतः ॥ ४५ ॥**

न्यायैर्याजनाध्यापनप्रतिग्रहकृषिवाणिज्यशिल्पैः प्रथमद्वितीयाध्यायविहितैरुपायैरर्जितेन वित्तेनात्मनः सपरिवारस्य रक्षणं कर्तव्यम् ।

तथाच मनुः ।

षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते ।
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवतीति ।

याजनादिभिः षड्भिर्जीवत्येकः याजनादिस्त्रिभिरन्यः याजनाध्यापनाभ्यामपरः चतुर्थस्त्वध्यापनेनैवेत्यर्थः । पूर्वोक्तस्यानुवादोन्यनिषेधार्थस्तमेवाह अन्यायेन पूर्वविहितोपायातिरिक्तेनोपायेन ।

कुशूलकुम्भीधान्यो वा त्र्याहिको श्वस्तनोपि वा ।
जीवेद्वापि शिलोञ्छेन श्रेयानेषां परः परः ॥

इत्यादिना यो जीवेत्सनित्यनैमित्तिकादिद्रव्यातिशयसाध्यसर्वकर्माक्षमतया बहिष्कृतो लोकविद्विष्टो भवेत् ।

तथाच याज्ञवल्क्यः

अस्वर्ग्यं लोकविद्विष्टं धर्म्ममप्याचरेन्नत्विति ।

कलिवर्ज्येपि । आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनितया तथेति ।

अथदेवपूजानन्तरकर्तव्य मङ्गलदर्शनविधिमाह ॥

**अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः ॥**
**दृष्टमात्राः पुनन्त्येते तस्मात्पश्येत्तु नित्यशः ॥४६॥**

अग्निचिदिष्टकाचयनकृत् कपिला गौः सत्री अत्रसत्रादिकर्त्ता नतु क्रतुसत्रकर्त्ता तस्य कलिवर्ज्यत्वेनाप्रसङ्गः। राजा ऽभिषिक्तः क्षत्रिये भिक्षुः संन्यासी महोदधिः समुद्रः एते दर्शनेनैव द्रष्टारं पुनन्ति तस्मा देतानित्य पश्येत्।

अस्य कालमाह दक्षः। देवकार्यन्ततः कृत्वा गुरुमङ्गलवीक्षणमिति।

कात्यायनस्त्वन्यथाह।

श्रोत्रियं सुभगं गां च अग्निमग्निचितं तथा।
प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यतइति।

एतन्मणिमृदङ्गदर्पणरोचनाचन्दनहेमादीनां स्मृत्यन्तरोक्तानामुपलक्षणम्।

दर्शनीयमङ्गलप्रसङ्गेन रक्षणीयमङ्गलान्याह॥

**अरणिं कृष्णमार्जारं चन्दनं सुमणिं घृतम्।**
**तिलान् कृष्णाजिनं छागं गृहे चैतानि रक्षयेत्॥४७॥**

अरणिरग्नियोनिकाष्ठं कृष्णमार्जारः सर्वश्यामतनुः चन्दन मलयजं सुमणिः पद्मरागादिः घृततिलौ प्रसिद्धौ कृष्णाजिनं कृष्णसार त्वक् छागो बस्तः एतानि गृहस्थः स्वगृहे रक्षयेदेव।

इदानीमुक्तवक्ष्यमाणानां महापातकानां साधारणं निवृत्तिहेतुं गोचर्मदानं विधातुं तल्लक्षणमाह॥

**गवां शतं सैकवृषं यत्र तिष्ठत्ययन्त्रितम्।**
**तत् क्षेत्रं दशगुणितं गोचर्म परिकीर्तितम्॥ ४८॥**

एकेन वृषेण सहितं गोशतं यत्रायन्त्रितं स्वच्छन्दमवतिष्ठते तस्माद्दशगुणा भूमिर्गोचर्मेत्युच्यते।

मनुस्त्वन्यथाह।

दशहस्तेन दण्डेन त्रिंशतिं तु शतं पुनः।
पञ्च चाभ्यधिक कृत्वा एतद्गोचर्म कीर्तितमिति॥

वृद्धमनुरपि ।

सप्तहस्तेन दण्डेन त्रिंशद्दण्डानि वर्तनम् ।
तान्येव दश गोचर्म दाता पापैः प्रमुच्यतइति ॥

गोचर्मदानमाह ।

**ब्रह्महत्यादिभिर्मर्त्यो मनोवाक्कायकर्मजैः ।**
**एतद्गोचर्मदानेन मुच्यते सर्वकिल्विषैः ॥ ४६ ॥**

मनोवाक्कायकर्मजैर्ब्रह्महत्यादिभिः सर्वकिल्विषैरेतद्गोचर्मदानेन मर्त्यो मुच्यत इति ब्रह्महत्यादिभिरत्रादिशब्दात्सुरापानसुवर्णस्तेयगुरुतल्पगमनानां ग्रहणम् नतु तत्संसर्गस्य तस्य कलौ महापातकत्वनिराकरणात् मनोवाक्कायानां कर्माणि व्यापारास्तेभ्यो जातैरेतस्य पूर्वोक्तस्य गोचर्मणो नतु मन्वाद्युक्तस्येत्येवमर्थं प्रक्रान्तस्यापि पुनरेतच्छब्देन परामर्शः । आदिशब्देन विवक्षितग्रहणे सिद्धे पुनः सर्वशब्दोपादानं महापातकसमानामुपसंग्रहार्थं न तूपपातकादीनां तेषामतिलघुत्वात् । तेन महापातकसमैरपि किल्विषैर्मुच्यते इति । ननु मनोवाक्कायकर्मजेषु महापातकेषु तुल्यं प्रायश्चित्तमनुपपन्नं तेषां तुल्यत्वाभावात् । कलौ पतति कर्मणेत्यनेन मानसवाचिकव्यापारयोरपातकत्वबोधनाच्चेति चेत् । अत्राहुः । अत्यन्तावृत्तानां मानसानामीषदावृत्तानां वाचिकानां सकृत्कृतानां कायिकानां च समत्वसम्भवादिति । तन्न । एकेन विधिनानुदितेषु निमित्तेषु वैषम्याश्रयणे वाक्यभेदप्रसङ्गात् । अत्रोच्यते । मनोवाक्कायकर्मजैरित्यस्यायमर्थः मनसा सङ्कल्प्य वाचाऽभिलप्य कर्मणोपपादितैरिति अनेन कामकृतत्वमुपलक्ष्यते ततश्च कामकृतेषु ब्रह्महत्यादिषु चतुर्ष्वपीदं साधारणं प्रायश्चित्तमिति सिद्धम् । नचेदमनुवादमात्रमिति शङ्कनीयम् । सर्वेभ्यो दर्शपूर्णमासौ सर्वेभ्यो ज्योतिष्टोम इतिवत्फलविधित्वसम्भवात् । फलोत्पत्तिश्च योगसिद्ध्यधिकरणन्यायेन कामनावन्निमित्तवशेन क्रमिकैव ॥ यदापि युगपन्निमित्तसन्निपातस्तदापि प्रतिनिमित्तं नैमित्तिकावृत्तिन्यायेनावृत्तिरिति ।

उक्ते दाने पात्रविशेषमाह ।

**कुटुम्बिने दरिद्राय श्रोत्रियाय विशेषतः ।**
**यद्दानं दीयते तस्मै तद्दानं शुभकारकम् ॥ ५० ॥**

विशेषतइति कुटुम्बित्वादिभिः प्रत्येकं सम्बध्यते। तेन योतिकुटुम्बी योतिदरिद्रो योतिश्रोत्रियस्तस्मै यद्दानं तदेव शुभस्य प्रकृतपापक्षयस्य कारकमिति ।

उक्तलक्षणभूम्यपहारे शुध्यभावमाह ।

**वापीकूपतडागाद्यैर्वाजपेयशतैर्मखैः ।**
**गवां कोटिप्रदानेन भूमिहर्त्ता न शुध्यति ॥ ५१ ॥**

यो ब्रह्महत्यादिपापापनुत्तये स्वयमन्येन वा दत्तां गोचर्ममात्रां भूमिमपहरति स शास्त्रान्तरे प्रत्येकं शोधकत्वेन प्रसिद्धैरपि वाप्यादिभिरिह समुदितैरपि न शुद्ध्यत्यत्यन्तपतित एव भवतीति। नच सामान्यभूम्यपहारपरमिदं व्याख्येयं तस्य सुवर्णस्तेयसमत्वेनाद्धुप्रायश्चित्तसद्भावाच्छुध्यभावानुपपत्तेः । तस्माद्यथोक्तमेव साधीयः ।

इदानीं सप्तमाध्यायोक्तरजोनिर्णयस्य विशेषमाह ॥

**अष्टादशदिनादर्वाक् स्नानमेव रजस्वला ।**
**अतऊर्ध्वं त्रिरात्रं स्यादुशना मुनिरब्रवीत् ॥ ५२ ॥**

रजोदर्शननिमित्तात्स्नानादनन्तरमष्टादशदिनादर्वाक् सप्तदशेऽहनि पुनर्यदि रजस्वला भवति तदा स्नानमेवाचरेच्च त्रिरात्राशौचम् । अतः सप्तदशाहादूर्ध्वमष्टादशादिदिनत्रये रजोदर्शने क्रमेणैकाहत्रिदिनमित्येवं त्रिरात्रमाशौचं भवेदित्युशनसोमतम् ।

तथाच कश्यपः ।

ऋतुस्नाता तु या प्रौढा पुनरेव रजस्वला ।
स्नानात्सप्तदशाहे तु शौचेनैव शुचिर्भवेत् ।
अष्टादशाहे त्वेकाहं द्व्यहमेकोनविंशतौ ।

विंशतिप्रभृत्युत्तरेषु त्रिरात्रमशुचिर्भवेदिति । उपपादितमेतत्सप्तमाध्याये । तत्रैवोक्तस्य चण्डालादिस्पर्शनिर्णयस्य शेषमाह ॥

**युगे युगे द्वयं चैव त्रियुगं च चतुर्युगम् ।**
**चण्डालसूतिकोदक्यापतितानामधः क्रमात् ॥५३॥**

चण्डालादीनामधः क्रमात्प्रातिलोम्यक्रमेणैकद्वित्रिचतुर्युगमन्तरं स्पर्शनिवारणाय न्याय्यम् । तेनायमर्थः पतितस्य व्यवधानमेकेन युगेन उदक्याया युगद्वयेन सूतिकाया युगत्रयेण चण्डालस्य युगचतुष्टयेन कार्यमिति । युगं चायतौ बाहू व्याम इति यावत् ।

किंच ।

**ततः सन्निधिमात्रेण सचैलं स्नानमाचरेत् ॥**
**स्नात्वावलोकयेत्सूर्यमज्ञानात्स्पृशते यदि ॥ ५४ ॥**

उक्तव्यवधानाभावेन सन्निधिमात्रे स्पर्शाभावेपि सचैलं स्नानं कार्यम् । अज्ञानतः स्पर्शे तु स्नानं सूर्यावलोकनं च । कामतः स्पर्शे तु च्यवनः । श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजकं सोमविक्रयिणं यूपं चितिं चितिकाष्ठं मद्यं मद्यभाण्डं सस्नेहमानुषास्थिशवस्पृशं रजस्वलां महापातकिनं च कामतः स्पृष्ट्वा सचैलमम्भोऽवगाह्योत्तीर्याग्निमुपस्पृश्य गायत्र्यष्टशतं जपेद्घृतं प्राश्य पुनः स्नात्वा त्रिराचामेदिति । एवमन्येषामप्यस्पृश्यानां स्पर्शे स्नानं तत्स्पृष्टस्य स्पर्शे त्वाचमनम् तृतीयस्य श्रोत्रस्पर्श इत्याद्यवगन्तव्यम् । यद्यपि चण्डालस्य स्पर्शने चैवं सचैलं स्नानमाचरेदिति षष्ठेऽभिहितं तथाप्यज्ञानविषयतां तस्य स्पष्टयितुं पुनरत्रोपन्यासः पूर्वोक्तव्यवधानासम्भवे तु व्याघ्रपादः ।

चण्डालं पतितं चैव दूरतः परिवर्जयेत् ।
गोबालव्यजनादर्वाक् सचैलं स्नानमाचरेत् ।

तस्याप्यसम्भवे संवर्तः ।

संकटे विषमे चैव दुर्गे चैव विशेषतः ।
हट्टपट्टणमार्गे च संभवं तु यथाभवेदिति ।

इदानीमनन्तराध्यायोक्तानिषिद्धजलपानप्रायश्चित्तविधिशेषमाह ॥

**विद्यमानेषु हस्तेषु ब्राह्मणोऽज्ञानदुर्बलः ॥**
**तोयं पिबति वक्त्रेण श्वयोनौ जायते ध्रुवम् ॥५५॥**

जलं पिबेन्नाञ्जलिनेति निषेधस्य सार्वकालिकत्वभ्रमेण विशेषज्ञान हीनो यो ब्राह्मणो विद्यमानेष्वपि हस्तेषु गवादिवद्वक्त्रेणैव तोयं पिबेत्स जन्मान्तरे श्वयोनावभिजायते हस्तसद्भावकीर्त्तनं पात्राभावे तेनापि जलपानाभ्यनुज्ञानार्थं बहुवचनं स्वपरहस्ताभिप्रायेण तेन स्वहस्ताभावे परहस्तेनापि पेयमिति ।

एवमाचारादिकाण्डत्रयशेषं स्नानानि पञ्चपुण्यानीत्यारभ्य श्वयोनौ जायते ध्रुवमित्येतदन्तेन ग्रन्थसन्दर्भेण समाप्य प्रकृतं प्रायश्चित्ताभिधानमनुसरति । तत्र शपथोल्लङ्घने प्रायश्चित्तमाह ॥

**यस्तु क्रुद्धः पुमान्ब्रूयाज्जायायास्तु अगम्यताम् ।**
**पुनरिच्छति चेदेनां विप्रमध्ये तु श्रावयेत् ॥५६॥**
**आर्त्तः क्रुद्धस्तमोन्धोऽहं क्षुत्पिपासाभयार्दितः ।**
**दानं पुण्यमकृत्वा वा प्रायश्चित्तं दिनत्रयम् ॥५७॥**
**उपस्पृशेत्त्रिषवणं महानद्युपसंगमे ।**
**तीर्थान्ते चैव गां दद्याद्ब्राह्मणान् भोजयेद्दश ॥**

यः क्रोधेन स्वभार्यामगम्या त्वं मे मात्रादिसमेति प्रतिजानीयात्स तां यावज्जीवं न गच्छेत्। मनसोऽनियतेच्छानिबन्धनत्वात् यदि पुनर्गन्तुमिच्छति तदा पर्षदि प्रतिज्ञाहेतुक्रोधवीजमार्त्त्यादि स्वस्य निवेदयेत् यथा तस्मिन्कालेऽहमार्त्तो व्यथितस्तमोन्धोभ्रान्तः क्षुधितः पिपासितो राजादिभीतो वा आसमनया कटुवचनैर्मुहुस्तुद्यमानः क्रुद्धस्सन्नेवमब्रुवमिति । तथा दानं करिष्यामीति सङ्कल्प्य पुण्यं काशीयात्रादिकं वा सङ्कल्प्य न करोति सोऽपि पर्षदि स्वस्य सङ्कल्प इति निवेदयेत् । अनन्तरं पर्षदुप-

द्दिष्ट प्रायश्चित्त कुर्यात् । तच्चैवम् । समुद्रगामिन्योर्नद्योः सङ्गमे त्रिषवणस्नानपूर्वकं त्रिरात्रमुपोष्य चतुर्थेऽन्हि गां दत्वा दश ब्राह्मणान् भोजयेत् । ऋतु इति विशेषणाद्वैराग्येण प्रतिज्ञाने प्रायश्चित्तेनापि न गम्येति सिध्यति । अतएव वसिष्ठः ।

यस्तु प्रव्रजितो भूत्वा पुनः सेवेत मैथुनम् ।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिरिति ॥

पुमानिति सामान्यनिर्देशादुक्तव्रतस्य सार्ववर्णिकत्वमुक्तम् । यमस्तु प्रतिवर्णं व्रतभेदमाह ।

स्वभार्यां तु यदा क्रोधादगम्येति नरो वदेत् ।
प्राजापत्यं चरेद्विप्रः क्षत्रियो दिवसाष्टकं ।
षड्रात्रन्तु चरेद्वैश्यस्त्रिरात्रं शूद्र आचरेदिति ।

दानाकरणप्रायश्चित्तं तु धर्मार्थं मतिपूर्वकसंकल्प एव तत्वार्त्त्यादिनिमित्तकेऽपि

अदत्तन्तु भयक्रोधशोकवेगरुजान्वितैः ।
तथोत्कया च परीहासव्यत्यासच्छलयोगतः ॥
बालमूढास्वतन्त्रार्त्तमत्तोन्मत्तापवर्जितम् ।
कर्त्ताममेदङ्कर्मेति प्रतिलाभेच्छया तु यत् ॥
अपात्रे पात्रमित्युक्ते कार्ये चाधर्मसंहिते ।
यद्दत्त स्यादविज्ञाय तददत्तमिति स्मृतम् ।
इति नारदस्मरणात् । एष मत्यत्राप्यूहनीयम् ॥
योगाधमनविक्रीतं योगाद्दानं प्रतिग्रहम् ।
यत्र वाप्युपधिं पश्येत्तत्सर्वं विनिवर्तयेद् ॥

इति साधारणस्मरणात् । वधसयुक्ते शपथे तु प्रायश्चित्तमाह यमः ।

विप्रस्य वधसंयुक्तं कृत्वा तु शपथं नरः ।
ब्रह्महा यावज्जीवेन व्रतं चान्द्रायणं चरेत् ॥

क्षत्रियस्य पराकन्तु प्राजापत्यं चरेद्विशः ।
वृषलस्य त्रिरात्रन्तु व्रतं शूद्रहणश्चरेत् ॥
केचिदाहुरपापं तु वृषलस्य वधं मृषा ।
नैतन्मम मतं यस्माद् हतस्तेन भवत्यसाविति ॥

दुर्ब्राह्मणान्नभोजने प्रायश्चित्तमाह ।

**दुराचारस्य विप्रस्य निषिद्धाचरणस्य वा ।**
**अन्नं भुक्त्वा द्विजः कुर्याद्दिनमेकमभोजनम ॥ ५९ ॥**

विहिताऽननुष्ठातुर्निषिद्धानुष्ठातुश्च विप्रस्य गृहे भुक्त्वा द्विजोऽहोरात्रमुपवसेत् ॥

तदशक्तौ प्रायश्चित्तान्तरमाह ।

**सदाचारस्य विप्रस्य तथा वेदान्तवेदिनः ।**
**भुक्त्वान्नं मुच्यते पापादहोरात्रान्तरान्नरः ॥६०॥**

यदि दुर्ब्राह्मणान्नं भुक्तं तदा सदाचारस्य वेदान्तनिष्ठस्यान्न दिनान्तरे भुक्त्वा तस्मात्पापान्मुच्यते ।

यद्वाऽहोरात्रान्तरादहोरात्रमध्ये उत्पन्नात्पिपीलिकावधादिजन्यक्षुद्रपापाद्विशिष्टविप्रान्नभोजनेन मुच्यत इति । अतएव क्षुद्रपापान्युपक्रम्याह बौधायनः ।

मैत्रावारोऽग्निहोत्रिभ्यो मासेनैकेन शुध्यति ।
यायावरवनस्थेभ्यो दशभिः पञ्चभिर्दिनैः ॥
एकाहधनिनोऽन्नेन दिनेनैकेन शुध्यति ।
कपोतव्रतनिष्ठस्य पीत्वापः शुध्यते द्विज इति ॥

मरणकालीनाशुद्धौ प्रायश्चित्तमाह ।

**ऊर्ध्वोच्छिष्टाधरोच्छिष्ट अन्तरिक्षे मृतौ तथा ।**
**कृच्छ्रत्रयं प्रकुर्वीत आशौचमरणे तथा ॥ ६१ ॥**

वान्तादिकमूर्ध्वोच्छिष्टं विण्मूत्रोत्सर्गाद्यधरोच्छिष्टं तत्र शौचमकृत्वा मरणे अन्तरिक्षे खट्वाट्टालिकादौ आशौचे जननमरणाशौचे च मरणे

पुत्रादिः संस्कर्त्ता गवादिप्रत्याम्नायेन कृच्छ्रत्रयं तदैव कुर्यादन्यथा शवशुध्यनुत्पत्तौ संस्कारानुपपत्तेः । यत्वाशौचमरण नाम रजस्वलासूतिकामरणमिति तत्र तत्र प्रायश्चित्तान्तरस्य सप्तमाध्याये ऽभिहितत्वात् ॥

इदानीं कृच्छ्रप्रत्याम्नायानाह ।

**कृच्छ्रो देव्ययुतं चैव प्राणायामशतद्वयम् ।**
**पुण्यतीर्थे ऽनार्द्रशिरः स्नानं द्वादशसंख्यया ॥ ६२ ॥**
**द्वियोजनं तीर्थयात्रा कृच्छ्रमेकं प्रकल्पितम् ।**

अयुतसंख्यया गायत्रीजपः शतद्वय प्राणायामाः द्वादशवारमनार्द्रशिरसः पुण्यतीर्थे स्नानं योजनद्वयं तीर्थयात्राया गमनमित्येवं कृच्छ्रसमानि । अनार्द्रशिरस्त्वविशेषणात्स्नानानन्तरं तदङ्गमनुष्ठाय शिरः शोषयित्वा द्वितीयवारं स्नायादित्युक्तं भवति योजनद्वयमिति मूलोक्तषोडशाहसाध्यप्राजापत्यप्रत्याम्नायत्वमभिप्रेत्य तस्य प्राजापत्यद्वयस्थानीयत्वादितरत्सर्वं द्वादशाहसाध्यप्राजापत्यप्रत्याम्नायत्वाभिप्रायेणेति । न केवलमेतावदेव किन्त्वन्यदपि मुनिभिः प्रकल्पितमुदवासाद्येककृच्छ्रसमं भवति । तथा च चतुर्विंशतिमतादिपुराणयोः ।

कृच्छ्रो ऽयुतन्तु गायत्र्या प्राणायामशतद्वयम् ।
शिरःसंशोषणे स्नानं साङ्गं द्वादशसंख्यया ।
तिलहोमसहस्रं तु घृतहोमशतद्वयम् ।
रुद्रैकादशिनी वापि वेदपारायण तथा ।
विप्रा द्वादश वा भोज्याः पावकेष्टिस्तथैव च ।
अन्या वा पावमानेष्टिरुदवासस्तथैवच ।
धेनुप्रदानं विप्राय निष्कदानमथापि वा ॥
निष्कार्द्धं निष्कपादं वा द्वादशांशो निवर्तनात् ।
योजनं सिंधुगातीरे समान्याहुर्मनीषिण इति ।

स्मृत्यन्तरेऽपि ।

प्राजापत्यक्रियाशक्तौ धेनुं दद्यात्पयस्विनीम् ।
धेनोरभावे निष्कं स्यात्तदर्द्धार्द्धमथापि वेति ।

द्वात्रिंशन्मतेऽपि ।

धेनुः पञ्चभिराढ्यानां मध्यानां त्रिपुराणिका ।
कार्षापणैकमूल्या हि दरिद्राणां प्रकीर्तितेति ।
यत्तु, द्वात्रिंशत्पणिका गावो वृषभः षट्पुराणिकः ।
त्रिपुराणोवत्सतरोवत्सः पौराणिको मतः ॥

इतिकात्यायनीयं मूल्याध्यायस्मरणम् । तत्प्रकरणगतत्वा-त्राचोपतिष्ठते ।

प्रायश्चित्तप्रकरणान्तस्य प्राबल्यात् । यच्च योजने वर्द्धमाने तु पादकृच्छ्रो विवर्द्धत इति स्मृत्यर्थसारीय स्मरण तत्तोर्थतारतम्यमभिप्रेत्य न सामान्यत इति ज्ञेयम् ॥

अथ रेतस्खलनप्रायश्चित्तमाह ।

**गृहस्थः कामतः कुर्याद्रेतसस्खलनं यदि ।**
**सहस्रं तु जपेद्देव्याः प्राणायामैस्त्रिभिः सह ॥ ६३ ॥**

यदि गृहस्थो बुद्धिपूर्वं रेतस्खलनं कुर्यात्तदा प्राणायामत्रयपूर्वकं सहस्रसंख्यया गायत्रीं जपेत् । अकामकृते याज्ञवल्क्य आह ।

यन्मरेतइत्याभ्यां स्कन्नं रेतोऽभिमन्त्रयेत् ।
स्तनान्तरे भ्रुवोर्मध्ये तेनानामिकया स्पृशेदिति ॥
यन्मरेतः पुनर्मामैत्विन्द्रियमित्येताभ्याम् ।

वनियत्योस्तु कण्व आह ।

रेतोत्सर्गं गृही कृत्वा वारुणीभिरुपस्पृशेत् ।
वानप्रस्थोयतिश्चैव चरेच्चान्द्रायणत्रयम् ॥

स्वप्ने तु कश्यप आह ।

सूर्यस्य त्रिर्नमस्कारं स्वप्ने सिक्त्वा गृही चरेत् ।
वानप्रस्थो यतिश्चैव त्रिः कुर्यादघमर्षणमिति ॥

ब्रह्मचारिणस्तु मनुराह ।

स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः ।

स्नात्वार्कमर्चयित्वा त्रिः पुनर्मामित्यृचं जपेदिति ।

भयादौ प्रजापतिराह ।

भये रोगे तथा स्वप्ने सिक्त्वा शुक्रमकामतः ।

आदित्यमर्चयित्वा तु पुनर्मामित्यृचंज्जपेदिति ॥

नैष्ठिकस्य हारीत आह ।

उपकुर्वाणकः कुर्यात्कामतोऽकामतोपि वा ।

तदेव द्विगुणं कुर्याद् ब्रह्मचारी तु नैष्ठिक इति ॥

एवमशेषं प्रायश्चित्तविशेषं प्रकीर्णकादिष्वभिधायेदानीमध्यायार्थं ब्रह्मवधे महापातके प्रायश्चित्तमाह ।

**चतुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके ।**
**समुद्रसेतुगमनं प्रायश्चित्तं समादिशेत् ॥ ६४ ॥**

ऋगादयश्चतस्रो विद्याश्चतुर्विद्यास्ताभिरुपपन्नस्तदध्ययनानुष्ठानवानेतेन चातुर्विद्यो विकल्पी चेत्यादिपूर्वोक्ताववा पर्षदुपलक्ष्यते स ब्राह्मणघातके पुरुषे समुद्रसेतुगमनं समुद्रे लवणोदे सेतुर्वक्ष्यमाणलक्षणस्तद्गमनं तद्यात्रां प्रायश्चित्तं विधिवद्वक्ष्यमाणविधिना सम्यगादेशप्रकारेण आदिशेत् । सामान्यप्राप्ताया अपि पर्षदः पुनरनुमर्शः पूर्वोक्तेषु पर्षत्पक्षेष्वस्यैवात्र नियमार्थः ।

तत्र ब्रह्मघातकलक्षणमाह विष्णुः ।

रागाद्द्वेषात्प्रमादाद्वा स्वतः परत एव वा ॥

ब्राह्मणं घातयेद्यस्तु स भवेद् ब्रह्मघातक इति ।

घातो नाम प्राणवियोगफलको व्यापारस्तस्य स्वयमनुष्ठाता साक्षाद्धन्ता परप्रयुक्त्यादिनानुष्ठाता परतो घातकः

तथा च मनुः ।

बहूनामेककार्याणां सर्वेषां शस्त्रधारिणाम् ।
यद्येको घातकस्तत्र सर्वे ते घातकाः स्मृता इति ॥

सचानेकविधा । अनुग्राहकप्रयोजकानुमन्तृनिमित्तिभेदात् ! तत्र यः पलायमानवध्यमुपरुध्य हन्तारमन्येभ्यो वारणेन हन्तुर्हृष्टिमानमुपजनयति सोऽनुग्राहकः । अप्रवृत्तप्रवर्त्तकः प्रयोजकः सोऽपि त्रिविधः । आज्ञापकोऽभ्यर्थक उपदेष्टा चेति तत्र स्वशत्रु दिव्यापादनाय भृत्यादिप्रवर्तकस्स्वाम्याज्ञपकः तदर्थमेव प्रार्थनादिना स्वाम्यादिप्रवर्त्तको भत्यादिरभ्यर्थकः मरणप्रकाराख्यापक उपदेष्टेति । स्वतः प्रवृत्तस्य हन्तुः राजदण्डादिभयनिवर्त्तकोनुमन्ता । आक्रोशादिना मरणहेतुमन्यूत्पादकोनिमित्तीति ।

तथा च विष्णुः ।

आक्रुष्टस्ताडितो वापि धनै र्वा विप्रयोजितः ।
यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ॥

तथा ।

ज्ञाति मित्रकलत्रार्थे सुहृत्क्षेत्रार्थमेवच ।
यमुद्दिश्य त्यजेत्प्राणास्तमाहुर्ब्रह्मघातकम् ॥
अन्यायेन गृहीतस्तु न्यायमर्थयते यदि ।
यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकमिति ॥
तानेतान्सर्वान्सङ्ग्रयाह पैठीनसिः ।
हन्ता मन्त्रोपदेष्टाच तथा सप्रतिपादकः ॥
प्रोत्साहकः सहायश्च तथा मार्गानुदेशकः ।
आश्रयः शस्त्रदाता च भक्तदाता विकर्मिणाम् ॥
उपेक्षकः शक्तिमांश्चेद्दोषवक्तानुमोदकः ।
आकार्यकारिणस्तेषां प्रायश्चित्तं प्रकल्पयेदिति ॥

तच्चाग्रेवक्ष्यामः । अनाकृष्टादेरुन्मादादिना तदुद्देशेनापि मरणे न तस्य निमित्तत्वम् ।

अकारणस्तु यः कश्चिद्द्विजः प्राणान्परित्यजेत् ।
तस्यैव तद्भवेत्पापं न तु यं परिकीर्त्तयेदिति स्मरणात् ।

अन्यत्रापि तदपवादमाह विष्णुः ।
उद्विश्य कुपितो हत्वा तोषितः श्रावयेत्पुनः ।
तस्मिन्मृते न दोषोस्ति द्वयोरुच्छ्रावणे कृत इति ।

तथा शिक्षार्थं शास्त्रीयताडनेन मरणेपि न दोषस्तथाच भविष्यपुराणे ।

पुत्रः शिष्यस्तथा भार्या शासतश्चेद्विनश्यति ।
न शास्ता तत्र दोषेण लिप्यते देवसत्तमेति ।

शास्त्रीयच ताडनमाह गौतमः । शिष्यशिष्टिरवधेनाशक्तौ रज्जुवेणुविदलाभ्यामन्येन घ्नन् राज्ञा शास्यइति । तथाततायिवधे न दोषः ।

गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् ।
आततायिनमायान्तं हन्यादेवाविचारयन् ॥

इतिविष्णुस्मरणात् । दोषएव नास्तीति प्राच्याः । संपूर्णो दोषो नास्ति किन्तु स्वल्प इतिदाक्षिणात्याः । नाततायिवधे दोषोऽन्यत्र गोब्राह्मणेभ्य इतिसुमन्तुस्मरणात् । तथोपकारार्थप्रवृत्तौ तन्मरणेपि न दोषः ।

तथा च याज्ञवल्क्यः । क्रियमाणोपकारे तु मृते विप्रे न पातकमिति ।

एवमन्यत्रापि बन्धने रोधश्चिकित्सार्थमित्यादिना नवमाध्यायेपि दोषाभाव उपपादितः । यदुक्तं यथोक्तविधिनेति तमेव विधिमाह ।

**सेतुबन्धपथे भिक्षां चातुर्वर्ण्यात्समाचरेत् ।**
**वर्जयित्वा विकर्मस्थान् छत्रोपानद्विवर्जितः ॥६५॥**

पर्षदा यथावदुपदिष्टव्रतो ब्रह्महा छत्रोपानद्भ्यां विशेषतस्तत्स्थानापन्नाभ्यामन्याभ्यामपि विवर्जितः सेतुबन्धयात्रार्थं प्रस्थितो मार्गे विकर्मस्थान्निषिद्धानुष्ठातॄन्विहितानानुष्ठातॄंश्च गृहस्थान्वर्जयित्वा चातुर्वर्ण्यात् चतुर्भ्योऽपि वर्णेभ्यः पूर्वपूर्वाभावे उत्तरोत्तरेभ्यः ब्राह्मणानां मुख्यत्वात् भिक्षां ग्रासपरिमितां सम्यग्यथोक्तविधिना आचरेत् । सच विधिः

शेषं मुनिविभावितमिति परिभाषणात्स्मृत्यन्तरोक्तो ज्ञेयः। तत्र भिक्षापात्राकाङ्क्षायामाह यमः।

मृन्मयेन कपालेन स्वकर्म श्रावयंस्तथा।
सप्तागाराण्यपूर्वाणि यान्यसङ्कल्पितानि वै॥
सञ्चरेत्तानि शनकैर्विधूमे भुक्तिवर्जिते।
एककालं चरेद्भैक्षमलब्ध्वोपवसेद्दिनमिति॥

यद्यप्येषां द्वादशवार्षिकव्रतप्रक्रमेऽभिधानात्कर्मान्तरे अस्मिन्नुपसंहारो न युक्तः प्रतिभाति तथापि भिक्षाविध्याकाङ्क्षितत्वेनावान्तरप्रकरणाच्च भिक्षाङ्गानामेषां यत्र भिक्षाविधिस्तत्रोपसंहारो युक्त एव छत्रोपानद्वर्जनेन वृहत्पराशरोक्ता अन्येपि धर्मा उपलक्षिताः। यथा।

मुण्डितस्तु शिखावर्जं सकौपीनो निराश्रयः।
चीरचीवरवासाश्चास्त्रिः स्नायी सन् शुचिः व्रती॥
सम्मितातश्चरेत्कान्तच्छत्रोपानद्विवर्जितः।
सेतुं दृष्ट्वा समुद्रस्य स्नात्वा वा लवणाम्भसि॥
ब्राह्मणेषु चरेद्भैक्षं स्वकर्म ख्यापयन् शुचिरिति।

सशिखं तु निपातन इत्यनेन प्राजापत्याधिके सशिखवपनप्राप्तौ शिखावर्जमित्युक्तम्।

भिक्षायाचनप्रकारमाह।

**अहन्दुष्कृतकर्मा वै महापातककारकः।**
**गृहद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघातकः॥ ६९॥**

अनेन स्वकर्मख्यापनपूर्वकमेव भैक्ष्यं चरेदितिविहितम्।

तथा च शङ्खः। स्वकर्मख्यापयन् चरेद्भैक्षमिति।

अप्रख्यापने "कृत्वा पापं न गूहेत गूहमानस्य वर्द्धते" इति दोषस्मरणात्। विशेषणत्रयं च सामान्यविशेषाभ्यां तस्यैव प्रख्यापनातिशयार्थम्। द्वारस्थित्यभिधानेन गृहमध्यगमनं निषिध्यते। ब्राह्मणावसथांश्चैव देवागाराणि वर्जयेदिति स्मरणात्। पथोपक्रामेत्सन्दर्शनादार्यस्येतिगौतमस्मरणाच्च।

अथ श्रान्तस्य निवासस्थानमाह ।

**गोकुलेषु वसेच्चैव ग्रामेषु नगरेषु च ।**
**तपोवनेषु तीर्थेषु नदीप्रस्रवणेषु च ॥ ६७ ॥**

ग्रामाद्बहिः कल्पितो गोनिवासो गोकुलं तस्मिन् वसेत् चौरव्याघ्रादिभयेन तन्निवासयोग्यं स्थानमाह शङ्खः । शून्यागारनदीपर्वतवृक्षमूलगुहानिकेतन इति । अन्यथा तपोवनादिषु वा तपोवनमुपवनं तीर्थं देवखातादि नदीप्रस्रवणौ प्रसिद्धौ तत्र च निवसेदिति प्रत्येकं सम्बन्धः ।

प्रतिनिवासमेनः ख्यापयन्नेव व्रजेदित्याह ।

**एतेषु ख्यापयन्नेनः पुण्यं गत्वातु सागरम् ।**
**दशयोजनविस्तीर्णं शतयोजनमायतम् ॥ ६८ ॥**
**रामचन्द्रसमादिष्टं नलसञ्चयसञ्चितम् ।**
**सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति ॥ ६९ ॥**

पूर्वोक्तेषु गोकुलादिषु निवासस्थानेषु स्वकर्मख्यापयन्नेव यावत्सागरं गच्छेत् तत्र दशरथकुलनन्दनस्य श्रीमद्रामचन्द्रस्यादेशवर्त्तिना नलाभिधेने वानरराजेन विश्वकर्मापरावतारेण निबद्धं दशयोजनविस्तारं शतयोजनायामं समुद्रसेतुं दृष्ट्वा पूर्वकृतां ब्रह्महत्यां व्यपोहतीति । सेतुदर्शनानन्तरकर्तव्यमाह ।

**सेतुं दृष्ट्वा विशुद्धात्मा त्ववगाहेत सागरम् ।**

पूर्वोक्तं सेतुं दृष्ट्वा विशुद्धात्मा पूतान्तःकरणः सन् सागरमवगाहेत । ननु विशुद्धात्मेत्यनेन सेतुदर्शनमात्रेणैव शुद्धिः, उत्तराङ्गानुष्ठानाभावादुत्तरविधिवैयर्थ्यापत्तेः ।

क्षत्रियस्य कामतो विप्रवधे प्रायश्चित्तमाह ।

**यजेत चाश्वमेधेन राजा तु पृथिवीपतिः ॥ ७० ॥**

पृथिवीपतिः सार्वभौमः नाऽसार्वभौमो यजेतेत्यसार्वभौमस्य प्रतिषेधदर्शनात् राजा क्षत्रियो ब्रह्महत्यापनोदायाश्वमेधेन यजेत ।

तथा च श्रुतिः । तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उचैनमेवं वेदेति । वाशब्दात्क्रत्वन्तरोपसंग्रहः ।

तथा च मनुः ।

यजेत वाश्वमेधेन स्वर्जिता गोसवेन च ।
अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वेति ।

दक्षिणाधिक्यपक्षाश्रयणेनाश्वमेधसमतैषामनुसन्धेया । ननु स्यादेवं यदि प्रधानतामयमाप्नुयात्सैव त्वस्य दुर्लभा । सेतुयात्राङ्गस्नानदंशपातित्वेन तदङ्गत्वावगमात् । यथा प्रयाजाङ्गसंन्दंशपातेनातिक्रमणस्येति चेत् । सत्यम् । तथापि निर्ज्ञातप्रयोजनतया प्रयोजनाकाङ्क्षाविरहेणाङ्गत्वायोगात् । यथा सामिधेनीप्रकरणमध्यवर्त्तिनां निवित्पदानामग्निसमिन्धनार्थत्वेन सामिधेनीसमानकार्याणां न सामिधेन्यङ्गत्वम् । नचाश्वमेधस्य सेतुयात्रामध्ये नियमेन पातोऽपि, स्मृत्यन्तरे तथा ऽदर्शनात् अत्रैव विषये भविष्यपुराणे ।

हत्वा तु क्षत्रियो विप्रं गुणाढ्यमिह कामतः ।
प्रायश्चित्तं चरेद्घोरं विधिवत्कायशुद्धये ॥
लक्ष्यं शस्त्रभृतां वा स्याद्विदुषामिच्छयात्मनः ।
प्रास्यदात्मानमग्नौ वा सामद्धे त्रिरवाक्शिराः ॥
यजेत वाश्वमेधेन क्षत्रियो विप्रघातकः ।

प्रायश्चित्तत्रयं ह्येवं क्षत्रियस्य प्रकीर्त्तितमिति ।

ननु कलिधर्माभिधानप्रवृत्तस्याचार्यस्य कथं तद्विरुद्धधर्माभिधानम् । अश्वमेधस्य कलौ निषेधात् । न च निषेधस्य काम्याश्वमेधविषयत्वं वाच्यम् । निषेधश्रुतेः साधारण्येन विनिगमकाभावात् मैवम् । काम्यस्य कामनामात्रनिमित्तकत्वेनाकरणे अनिष्टान्तरानुत्पत्तेः । नैमित्तिकस्य त्वकरणे निमित्तजन्यप्रत्यवायानिवृत्तौ नरकाद्यनिष्टापत्तेरेव विनिगमकत्वात् । किञ्च । कलावश्वमेधनिषेधे बीजं जनमेजयशापस्तत्र च शक्रेण क्रतुधर्षणं तत्रापि फलैर्व्यैवेति स्पष्टं हरिवंशे ॥

अद्यप्रभृति देवेन्द्रमजितेन्द्रियमस्थिरम्।
क्षत्रिया वाजिमेधेन न यक्ष्यतीति शौनक ॥

इति जनमेजयेनेन्द्रे शप्ते विश्वावसुनाभिहितम् ॥

बिभेत्यभिभवाच्छक्रस्तव क्रतुफलैर्नृप
तस्मान्निवर्त्तितश्चैव क्रतुरिन्द्रेण ते प्रभो।

अंशितस्त्वं च विप्राश्च फलादिन्द्रसमादिहेत्यादि।

तस्मात्सिद्धं निषेधस्य काम्याश्वमेधविषयत्वेन न कश्चिद्दोषो नैमित्तिकानुष्ठान इति। सेतोः प्रत्यागतस्य कर्त्तव्यमाह।

**पुनः प्रत्यागतो वेश्म वासार्थमुपसर्पति।**
**सपुत्रः सहभृत्यश्च कुर्याद्ब्राह्मणभोजनम् ॥ ७१ ॥**
**गाश्चैवैकशतं दद्याच्चातुर्विद्येषु दक्षिणाम्।**
**ब्राह्मणानां प्रसादेन ब्रह्महा तु विमुच्यते ॥ ७२ ॥**

सेतुं दृष्ट्वा प्रत्यागतो निमित्ती शतं चातुर्वैद्यान् ब्राह्मणान् भोजयित्वा तेभ्यश्चैकैकां गामित्येव शतं गाश्च दक्षिणा दत्वा ब्राह्मणान् शुद्धस्त्वमभूरित्यादिवाक्यप्रसादेन शुद्धः सन् सपुत्रभृत्यो वासार्थं वेश्मोपसर्पेत्। यद्यपि क्रमेणैवास्याश्वमेधाङ्गता प्रतीयते तथाऽपि बलवता प्रकरणेन सेतुयात्राङ्गत्वमेवाध्यवसेयम्। नचास्यापि प्रकरणं यथोत्पन्नस्यैव विनियोगेनात्रोत्पत्त्यभावात्। यथा सौत्येऽहन्यूत्पन्नस्य सवनीयपशोः प्रचारविप्रकर्षाख्यगुणविधानायोपवसथ्येऽहनि कीर्त्तितस्य सन्निहिता अपि यूपच्छेदनादयो धर्मा नाङ्गम्। तत्रोत्पत्त्यभावेन प्रकरणाभावात्। किंत्वाग्नीषोमीयस्यैव स्थानप्रमाणेन उक्तं च।

कर्मणश्च विधिर्यत्र तत्र प्रकरणं भवेत्।
तत्तु यत्र गुणार्थेन श्रवणं तत्र विद्यत इति ॥

यद्यपि पाठक्रमेण वेश्मोपसर्पणं पूर्वमनन्तरं विप्रभोजनादीति प्रतीयते तथाप्यार्थक्रमप्राबल्याद्वैपरीत्यमवसेयम्। अतएव बृहत्पराशरेण।

ब्राह्मणानां प्रसादेन तीर्थाभिगमनेन च।
गोशतस्य प्रदानेन शुध्यते नात्र संशयः ॥

इत्यन्त एव शुद्धिरभिहिता ॥

सोऽयं सर्वोऽपि विधिरुक्तोऽभविष्ये ।
यद्वा पराशरोक्तेन प्रायश्चित्तेन शुध्यति ।
चातुर्विद्यमनुज्ञाय ब्रह्महा गुरुतल्पगः ।
सेतुदर्शनसंयुक्तं प्रायश्चित्तं समाचरेत् ॥
सेतुबन्धपथे भिक्षां चातुर्वर्ण्यात्समाचरेत् ।
वर्जयित्वा विकर्मस्थान् छत्रोपानद्विवर्जितः ॥
विख्यापयन् स्वकं कर्म यथावच्छृणु मे वचः ।
अहो दुष्कृतकर्माऽहमहोसाहसकारकः ॥
वेश्मद्वारेषु तिष्ठामि भिक्षार्थी क्षुत्पिपासितः ।
पर्यटंश्चैव तीर्थानि पुण्यान्यायतनानि च ॥
सेतुबन्धं ततः पश्येल्लङ्कामार्गं महोदधौ ।
दशयोजनविस्तीर्णं शतयोजनमायतम् ॥
रामचन्द्रसमादेशाज्जलसञ्चयसञ्चितम् ।
सेतुं दृष्ट्वा महापुण्यं ब्रह्महत्याविनाशनम् ॥
ब्रह्महत्याविशुद्धात्मा ह्यवगाह्य महोदधिम् ।
गवां चैव शतं दद्याच्चातुर्विद्याय दक्षिणाम् ॥
एवं शुद्धिमवाप्नोति पराशरमतं यथेति ।
अस्य च नैमित्तिकः समाप्त्यवधिरुक्तस्तत्रैव ॥
सेतुबन्धमसम्प्राप्तौ राजानं पृथिवीपतिम् ।
यजन्तमश्वमेधेन दृष्ट्वा सद्यः शुचिर्भवेत् ॥
दर्शनेनात्रावभृथस्नानं लक्षयति ।
तथाश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयादिति
योगिस्मरणात् । तथाष्टमेऽध्याये ।
ब्राह्मणार्थे गवार्थे वा सद्यः प्राणान्परित्यजेत् ॥
मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य चेति ।

बृहत्पराशरीयेऽपि ।

रोगार्तां गां द्विजं वापि मार्गे वेदसमन्वितम् ।
दृष्ट्वा कृत्वा निरातङ्कं ब्रह्मघ्नः शुद्धिमाप्नुयादिति ॥

अयं च प्रक्रान्तप्रायश्चित्तस्य कथञ्चिद्ब्राह्मणत्राणादिक कुर्वतो व्रतसमाप्त्यवधिरुच्यते। यथासारस्वते सत्रे। त्याज्यप्रस्रवणं प्राप्योत्थानमृषभैकशतानां वा गवां सहस्राभावे सर्वस्वयाज्यानां गृहपतिमरणे चेति। न पुनः स्वतन्त्रं प्रायश्चित्तान्तरं सेतुदर्शनाय प्रस्थितस्य मार्गे गवादिविचिकित्साविधानात्। आष्टमिके वाक्ये स्वप्रमाणपरित्यागेन गवादिरक्षणमुक्तम्। वृहत्पाराशरीये पुनरौषधादिदानेनेति विशेषः। प्रक्रान्तप्रायश्चित्तस्य मध्ये मरणेऽपि शुद्धिर्भवत्येव। यथाह हारीतः।

प्रायश्चित्ते व्यवसिते कर्ता यदि विपद्यते।
पूतस्तदहरेवासाविह लोके परत्र चेति॥

ननु यात्रापादानावध्यनिरूपणे त्वनियतः शास्त्रार्थः स्यादित्यत आह।

**विन्ध्यादुत्तरतो यस्य निवासः परिकीर्तितः।**
**पराशरमतं तस्य सेतुबन्धस्य दर्शनम्॥ ७३॥**

यदुक्तं ब्रह्महत्यायां समुद्रसेतुगमनं प्रायश्चित्तमिति तद्विन्ध्यपर्वतादुदग्देशवर्त्तिनो दक्षिणदेशवर्त्तिन इति वृद्धपराशरस्य मतम्। तथा च भविष्यपुराणे सेतुयात्रां प्रक्रम्योक्तम्॥

यस्तूत्तरे वसेत्पार्श्वे विन्ध्यस्य पुरुषोत्तम।
दक्षिणे वसतश्चेदं न भवेदितितच्छ्रुणुष्वति॥

विन्ध्याद्दक्षिणदेशवर्त्तिनस्तु तत्समाना काशीयात्रा प्रायश्चित्तमिति ज्ञेयम्। तथाच ब्रह्मपुराणे।

आगमिष्यन्ति ये द्रष्टुं सज्जना योजनेन तु।
ते ब्रह्महत्यामोक्षास्तु भविष्यन्ति ममानुमगा इति॥

योजनेनेति विन्ध्यादुत्तरतो यावद्योजनदूरमा आसेतोस्तावत्संख्याकेन योजनेनेत्यर्थः। अयमभिसन्धिः

ब्रह्महा द्वादशाब्दानि मितभुक् शुद्धिमाप्नुयात्।

इत्यादिस्मृत्यन्तरोक्ते द्वादशाब्दे व्रते द्वादश द्वादश दिनान्येकैक

यः कामतोमहापापं नरः कुर्यात्कथं चन ।
न तस्य शुद्धिर्निर्दिष्टा भृग्वग्निपतनादृत इति ॥

अग्निपातप्रकारस्तु मनुनोक्तः । प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिरा इति । अथवा यत्र कामकृते मरणमेवादिष्टम् तत्राप्यकामकृतप्रायश्चित्तस्य सेतुदर्शनद्वादशवार्षिकादेर्द्वैगुण्य मरणवैकल्पिक कर्तव्यम् । यथा ब्रह्महत्याव्रतमभिधायाह व्यासः ।

गत्वैतदेव कुर्वीत गुरुतल्पमकामतः ।
कामतोद्विगुणं प्रोक्तं पूर्वेषु च यदुच्यत इति ॥

यदेतद्ब्रह्महत्याव्रतमुक्तं तदकामतो गुरुतल्पगमनेऽपि ज्ञेयम् । कामतो गमने तु तदेव द्विगुणं कार्यं न केवलमिदमत्रैवोच्यते । किन्तु पूर्वत्रापि ब्रह्महत्यादिष्वकामकृतेषु यद्व्रतमेतुयात्राद्वादशाब्दादिव्रतमुपदिष्टं तदपि द्विगुणं कार्यमित्यर्थः । अनेन चास्य मरणेन सह तुल्यबलत्वाद्विकल्पोऽभिहितः । सवनस्थब्राह्मणवधे तु याज्ञवल्क्य आह । द्विगुणं सवनस्थे तु ब्राह्मणे व्रतमादिशेदिति । द्वैगुण्यप्रकार उक्तो भविष्ये ।

बालं वृद्धं गुरुं चैव स्त्रियं वा च रजस्वलाम् ।
ब्राह्मणं यजमानं च हत्वा निष्कृतिमाचरेत् ॥
चरित्वा द्वादशाब्दानि सेतुबन्धं च पश्यतीति ।
मात्रादिहनने तु विशेषस्तत्रैव ॥
मातरं पितरं हत्वा सोदर्यं भ्रातरं तथा ।
गुरुं हत्वा श्रोत्रियञ्च आहिताग्निमथापि वा ।
अन्तिमाद्यावदुच्छ्वासाद् तं कृत्वा विशुध्यतीति ॥

आपस्तम्बीयेऽपि गुरुं हत्वा श्रोत्रियं वा एतदेव व्रतमोत्तमादुच्छ्वासाच्चरेन्नास्यास्मिन्लोके प्रत्यापत्तिर्विद्यत इति । उत्तमादुच्छ्वासादामरणात् । प्रत्यापत्तिर्व्यवहारः । इदं च कामतः, अकामतस्तु ब्रह्मपुराणे

यज्ञसंस्थौ तु पितरौ राजानं वाप्यनागसम् ।
हत्वा चरेद्व्रतं सम्यक् चतुर्विंशतिवत्सरानिति ॥

यज्ञसंस्थौ दम्पतीति ज्ञेय । न पितृविशेषणमविशेषापातात् जातिमात्रब्राह्मणहनने भविष्यपुराण उक्तम् ।

जातिमात्रं यदा हन्याद् ब्राह्मणो ब्राह्मणं गुह ।
वेदाभ्यासविहीनो वै धनवानग्निवर्जितः ॥
प्रायश्चित्तं तदा कुर्यादिदं पापविशुद्धये ।
धनं वा जीवनायालं गृहं वा सपरिच्छदमिति ॥

विकर्मस्थब्राह्मणहनने तु षष्ठाध्यायोक्तं विकर्मस्थन्द्विजोत्तमम् हत्वा चान्द्रायणं कुर्यात्त्रिंशद्गाश्चैव दक्षिणामिति । पाठविप्रहनने तु षट्त्रिंशन्मतोक्तम् ।

पाठं तु ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत् ।
चान्द्रायणं च कुर्वीत पराकद्वयमेव चेति ॥
क्रमिकानेकब्राह्मणवधे तु विशेषमाहतु. सुमन्तुदेवलौ ।
द्वितीये प्राथमिकादस्माद्द्विगुणं व्रतमाचरेत् ॥
तृतीये त्रिगुणं प्रोक्तं चतुर्थे नास्ति निष्कृतिरिति ।

अत्र कश्चित् । क्रमिकानेकब्राह्मणवधे व्रतकालदेशकालकर्तृक्येण विज्ञानविशेषतया तन्त्रेणैकस्मिन् द्वादशाब्दव्रते प्राप्ते प्रतिनिमित्तं नैमित्तिकविधानार्थमिदं व्रतमित्याह । तत्र आवृत्तेरपि न्यायतएव प्राप्तत्वेन वाक्यानर्थक्यप्रसङ्गात् । न च नैयायिकावृत्त्यनुवादेन चतुर्थे तदभावविधायकमावृत्तिविधानेऽपि वाक्यभेदादिति वाच्यम् । अनुवादकत्वे नैरर्थक्याच्चतुर्थादिपर्युदासेनेतरत्रावृत्तिविधानेनैकवाक्यत्वाच्च । तस्मादेवं व्याख्येयम् । द्वितीयादिब्रह्मवधे द्वादशवार्षिकाद्यावृत्तिर्न विधेया । किन्तु द्वैगुण्यादिविधेयं शब्दसामर्थ्यात् । तथाच द्वयोः क्रमिकयोर्ब्रह्मवधयोर्युगपत्प्रायश्चित्तानुष्ठाने षड्विंशदाब्दिकव्रतं कार्यमेवं त्रयाणां द्विसप्तत्यब्दमिति । एवं च चतुर्थे नास्ति निष्कृतिरिति घटते विंशोत्तरशताब्दकालाभावात् ।

अन्यथा चतुर्व्वं व्यमात्वारिंशद्वर्षव्रतविधानसम्भवाच्चिष्कृत्यभावो ऽदृष्टार्थः स्यात् । तस्माद्द्वादशादिविधानेन न तन्त्र नाप्यावृत्तिमात्रमिति । युगपदनेकब्राह्मणवधे तु भविष्यपुराणे विशेषः ॥

एवं कालं यदा हन्याद्युगपत्सुरमर्द्दन ।
निमित्तमेकमाश्रित्य हन्त्यनेकेन वा विभो ।
ब्राह्मण ब्राह्मणौ वीर ब्राह्मणा तु बहूनपि ॥
निहत्य युगपद्वारमेक प्राणान्तिक चरेत्
किन्त्वत्र सुरशार्दूल विशेषं गदतः शृणु ।
बुद्धिपूर्बाबुद्धिपूर्वविशेषं शृणु पुत्रक ।
अकामतोयदा हन्याद्ब्राह्मणान्मानवो गुह ।
चरेद्वने तदा घोरे यावत्प्राणपरिक्षयम् ।
कामतश्च यदा हन्याद्ब्राह्मणं सुरसत्तम ।
तदात्मानं दहेदग्नौ विधिना येन तच्छृणु ।
भूत्वा निष्कालको वीर वेष्टयित्वा तु वाससा ।
घृताक्तेन महाबाहो दत्वा सर्वस्वमेवहि ।
छित्वा पादौ करीषाग्नौ दहेदात्मानमात्मना ।
उत्तमाङ्गानि विधिवदन्तः स्यात्सुरसत्तम ।
एवमत्र महाबाहो निर्द्दोषः परिकीर्तित इति ।

निष्कालकः केशरोमरहितः । क्षत्रियादीनां तु तत्तदेव द्वैगुण्यादियोज्यम् । तदाहाङ्गिराः ।

पर्षद्या ब्राह्मणानां तु स राज्ञां द्विगुणा मता ।
वैश्याना त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतमिति ।

अनयैव दिशा मूर्धावसिक्तादीनामनुलोमजाना दण्डवत्प्रायश्चित्तमूहनीयम् । दण्डतारतम्यमाह याज्ञवल्क्यः । दण्डप्रणयनं कार्यं वर्णजात्युत्तराधरैरिति । ततश्च मूर्धावसिक्तस्य ब्राह्मणवधे ब्राह्मणाधिकं क्षत्रियात्र्यू नमंध्यर्द्धद्वादशवार्षिकं ज्ञेयम् । तथा प्रतिलोमजानामपि प्रायश्चित्तमूहनीयम् । तथाश्रमिणामपि द्वैगुण्याद्याहाङ्गिराः ।

गृहस्थोक्तानि पापानि कुर्वन्त्याश्रमिणो यदि ।
शौचवच्छोधनं कुर्युरर्वाक् ब्रह्मनिदर्शनादिति ।

शौचवदित्यनेन

एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।

त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणमितिज्ञापितम् । शोधनं प्रायश्चित्तम् । ब्रह्मदर्शनं तत्साक्षात्कारः । ब्रह्मचारिणः प्रायश्चित्तद्वैगुण्यं षोडशवर्षानन्तरम् अर्वाक् द्वयमेव ।

अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः ।
प्रायश्चित्तार्द्धमर्हन्ति स्त्रियो रोगिण एव चेति ।

अङ्गिरस्स्मरणात् । तथा

अर्वाक् तु द्वादशाद्वर्षादशीतेरूर्ध्वमेव वा ।
अर्द्धमेव भवेत्पुंसां तुरीयं तत्र योषितामिति

षोडशद्वादशाब्दयोर्बालत्तलक्षणयोः शक्त्यपेक्षयाविकल्पः । अशक्तौ पादः ।

स्त्रीणामर्द्धं प्रदातव्यं वृद्धानां रोगिणां तथा ।
पादो बालेषु दातव्यः सर्वपापेष्वयं विधिरिति ।

विष्णुस्मरणात् । बालवृद्धयोः स्त्रियोः पादोऽन्यथा सर्वत्राप्यर्द्धमेव अर्वाक् द्वादशादित्यत्र पूर्वावधिं विशेषं चाह शंखः ।

ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च ।
प्रायश्चित्तं चरेद्भ्राता पिता वान्यः सुहृज्जनः ।
अतो बालतरस्यास्य नापराधो न पातकम् ।
राजदण्डो न तस्यास्ति प्रायश्चित्तं न विद्यत इति ।

प्रायश्चित्तमेव नास्तीति प्रायः सम्पूर्णं नास्ति किन्तु पाद एवेति दाक्षिणात्याः । तदेतत्प्रायश्चित्तं हन्तुं प्रवृत्तस्य कथं चिदनिवृत्तावपि भवति । तदाह याज्ञवल्क्यः । चरेद्व्रतमहत्वापि घातार्थं चेत्समागत इति । गौतमोऽपि । सृष्टश्चेद्ब्राह्मणवधे अहत्वापीति । हननाहननयोस्तु

त्यप्रतायोगाख्यार्थम् पादोनव्रतं चरेदित्यर्थः। तदेतद्वत साक्षाद्धन्तुरेव। अनुग्राहकादीनां तु दोषतारतम्येण प्रायश्चित्ततारतम्यं कल्पनीयम्। तद्यथा। अनुग्राहकस्य नवाब्दं प्रयोजकस्य षडब्दमनुमन्तुस्सार्द्धं चतुर्वार्षिकंनिमित्तिकं त्र्यब्दमिति। अत एवाङ्गिराः।

> षड्भिर्वर्षैर्ब्रह्मचारी ब्रह्महा पूयते नरः।
>
> सुमन्तुरपि।
>
> तिरस्कृतो यदा विप्रो हत्वा पानं मृतो यदि।
>
> निर्गुणः सहसा क्रोधाद्गृहक्षत्रादिकारणात्।
>
> त्रैवार्षिकं व्रतं कुर्यात्प्रतिलोमा सरस्वतीम्।
>
> गच्छेद्वापि विशुध्यर्थम् तत्पापस्येति निश्चयम्।
>
> अत्यर्थं निर्गुणो विप्रो ह्यत्यर्थं निर्गुणोपरि।
>
> क्रोधाद्वै म्रियते यस्तु निर्निमित्तं तु भर्त्सितः।
>
> वत्सरात्रतयं कुर्यान्नरः कृच्छ्रं विशुद्धय इति।

निमित्तिनोऽत्यन्तगुणित्वे हन्तुश्चात्यन्तनिर्गुणत्वे वार्षिकव्रतमेव।

> केशश्मश्रुनखादीनां कृत्वा तु पतनं वने।
>
> ब्रह्मचर्यं चरन्विप्रो वर्षेणैकेन शुध्यतीति।

स्मरणात्। एवमेवानुग्राहकादीनामपि। येऽनुग्राहकादयस्तेषामपि प्रायश्चित्तं कल्पनीयम्। प्रयोजयितानुमन्ताकर्ताचेति स्वर्गनरकफलेषु कर्मसु भागिनो यआरभते तस्मिन् फलविशेष इत्यापस्तम्बस्मरणात्। एवमन्येषामपि पातकेष्वनुग्राहकादीनां प्रायश्चित्तमूह्यम्।

इदानीं निमित्तान्तरेऽपि ब्रह्महत्याव्रतातिदेशमाह।

**सवनस्थां स्त्रियं हत्वा ब्रह्महत्या व्रतं चरेत्॥**

सवनं सोमयागस्तत्र दीक्षिता स्त्रियं हत्वा पूर्वोक्तं ब्रह्महत्याव्रतं कुर्यात्। अत्र स्त्रियमिति सामान्योपादानात् क्षत्रियवैश्ययोरपि ग्रहणम् तयोरपि सवनाधिकारात्। ततश्च यद्गुणपुरुषवधोक्तं व्रतं तद् ब्रह्म-

हत्याव्रतेतिकर्तव्यतया कुर्यात् तत्र ब्राह्मणीवधे सम्पूर्णं ब्रह्महत्याव्रत सेतुयात्रामेव कुर्यात् क्षत्रियादिवधे तु वैश्य वा क्षत्रियं घातयित्वाविना षष्ठाध्यायाभिहित विंशतिगो दक्षिणाक कृच्छ्रद्वयं कुर्यात् अतिदेशस्योप-देशापेक्षित्वेन तदीक्षाया यस्या स्मृतौ यद्व्रतमुपदिष्ट तस्यैवोपस्थितेः सवनस्थामित्यग्निहोत्रिण्यात्रेय्योरप्युपलक्षणम् । तथाचाङ्गिराः ।

आहिताग्नेर्द्विजाग्र्यस्य हत्वा पत्नीमनिन्दिताम् ।
ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव चेति ।

आहिताग्निभार्या आधाने सहाधिकारिणी । आत्रेय्यत्रिगोत्रोढा ऋतुमती ऋतुस्नाता गर्भिण्याजन्मसंस्कृतावेति । तथा च विष्णुः । अत्रिगोत्र वा नारीमिति । जन्मोद्वाहाभ्यां गोत्रसम्बन्धाद्विविधाप्यनेनै-वोक्ता । वसिष्ठोऽपि रजस्वला ऋतुस्नातामात्रेयीमाहुरत्रहास्यदाम्पत्यम-वतीति । अनेनापि रजस्वलामृतुस्नाता चेति द्विविधोक्ता तत्र स्नानानन्तरं त्रयोदशदिनानि ऋतुस्नाता । अत्र ह्यस्य दाम्पत्यम्भवतीति व्युत्पत्तिप्रदर्शन संख्याव्युदासार्थम् अन्यथा व्यर्थं स्यादिति केचित् । तच्च तेन ह्यत्र क्रियतइति वत्स्यार्थवादत्वेन हेतुत्वायोगात् । यमोऽपि ।

जन्मप्रभृति संस्कारैः संस्कृता मन्त्रवच्च या ।
गर्भिणीत्वथ वा या स्यात्तामात्रेयीं विदुर्बुधा इति ।

अनेनापि द्विधेक्ति षड्विधात्रेयी । अत्रापि यद्वर्णामात्रेयीं हन्ति तद्वर्णपुरुषवधोक्त व्रत कुर्यात् । गर्भहा च यथावर्णं तथात्रेयी-निषूदक इति योगिस्मरणात् । स्त्रियमित्युपलक्षणं तेन सवनस्थयोः क्षत्रियवैश्ययोरपि हनने ब्रह्महत्याव्रतं कार्यमिति सिध्यति । तथाच याज्ञवल्क्यः । यागस्थक्षत्रविद्घाती चरेद्ब्रह्महणो व्रतमिति । यागोऽत्रसोम-यागः सवनगतौ च राजन्यवैश्याविति वासिष्ठे सवनसाध्यस्य तस्यैव निर्देशात् । तथा गर्भहननेऽपि ब्रह्महत्याव्रतं कार्यम् । तदाह स एव । गर्भहा च यथावर्णमिति विवाहितासु भर्तृनिहितं गर्भं स्त्रीपुंनपुंसकत्वेना-

निर्णीत हत्वा नपुंसकवधोक्तं प्रायश्चित्तं कुर्यात् । हत्वा गर्भमविज्ञातमिति मानवात् । अविज्ञाताहि गर्भाः पुमांसो भवन्तीति वचनाच्च विशेषान्तरं चतुर्थाध्याय एव निरूपितमिति नेहोच्यते ।

इदानीं मद्यपानप्रायश्चित्तमाह ।

**मद्यपश्च द्विजः कुर्यान्नदीं गत्वा समुद्रगाम् ॥ ७४ ॥**
**चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ।**
**अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणाम् ॥७५॥**

पनसादिजन्य मदकारणं द्रवद्रव्यं । मद्यं तदाह पुलस्त्यः,

पानसन्द्राक्षमाधूकं खार्जूरं तालमैक्षवम् ।
मधूत्थं सैरमारिष्टं मैरेयं नारिकेलजम् ।
सामान्यानि विजानीयान्मद्यान्येकादशैवत्विति ।

एषामेकादशानामन्यतमं मद्यं पीत्वा द्विजः त्रैवर्णिकः समुद्रगां महानदीं गत्वा तस्यास्तीरे पूर्वोक्तविधिना चान्द्रायणं कृत्वा ब्राह्मणान् भोजयित्वा गोमिथुनं दक्षिणां दद्यात् । इदमेव प्रायश्चित्तमाह वृद्धपराशरः ।

अगम्यागमने चैव मद्यगोमांसभक्षणे ।
शुध्यै चान्द्रायणं कुर्यान्नदीं गत्वा समुद्रगाम्
चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ।
अनडुत्सहिता गा च दद्याद्विप्रेषु दक्षिणामिति ।

एतच्चाकामतः पाने, कामतस्तु चान्द्रायणमेव अभ्यसनीय तथाच भविष्यपुराणे ।

असुरामद्यपाने च कृते विप्रस्तु कामतः ।
चान्द्रायणं समभ्यस्येच्छुद्धिकाम स्वशुद्धय इति ।

अकामतोऽभ्यासे महापातकप्रायश्चित्तं सेतुदर्शनमेव कामतोऽत्यन्ताभ्यासे मरणान्तिकमिति ज्ञेयम् । मद्यपानस्यापि ।

ब्रह्महा मद्यपस्तेनस्तथैव गुरुतल्पगः ।
एते महातकिन इति ।
महापातकित्वस्मरणात् । अतएव व्याघ्रः ।
मत्या मद्यममत्या वा पुनः पीत्वा द्विजोत्तमः ।
ततोऽग्निवर्णां तत्पीत्वा मृतः शुध्येत्सकिल्विषादिति ।
यद्यपि, माधूकमैक्षव मैरं तालखार्जुरपानसम् ।
मधूत्थचैव माध्वीक मैरेयं नारिकेलजम् ।
अमेध्यानि दशैतानि मद्यानि ब्राह्मणस्यत्विति ।
विष्णुना ब्राह्मणस्यैव मद्यनिषेधाद्

वृहद्याज्ञवल्क्येन च

कामादपि च राजन्यो वैश्यो वापि कथं च न ।
मद्यमेवासुरा पीत्वा न दोषं प्रतिपद्यत इति ।

क्षत्रियवैश्ययोरनिषेधाच्च द्विजपद ब्राह्मणमात्रपरमिति प्रतीयते । तथापि नराश्वमेधौ मद्यं चेत्यनेन कलौ क्षत्रियवैश्ययोरपि मद्यनिषेधात्त्रैवर्णिकसाधारणमिदं प्रायश्चित्तमिति बोधयितुं द्विजपदोपादानम् । अतएव मद्यभाण्डस्थित तोयं यदि कश्चित्पिबेद्द्विज इति यमवसिष्ठादिवाक्येष्वपि तदेवोपात्तम् । अन्यथासर्वत्रविशेषणत्वप्रसङ्ग इत्यलम् । दशेति प्रचयशिष्टसङ्ख्यानुवादो न परिसङ्ख्या ।

यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम् ।
तद्ब्राह्मणेन नात्तव्यं देवानामश्नताहविरिति मानवात् ।

यद्यपि च द्विजपदोपादानसामर्थ्यादुपनयनानन्तरमेवेद प्रायश्चित्तमिति प्रतीयते तथापि नित्य मद्य ब्राह्मणो वर्जयेदिति निषेधस्य जात्याश्रयत्वेनानुपनीतस्यापि तद्वत्त्येव । अतएव तस्य प्रातश्चित्तमाह जातूकर्ण्यः ।

अनुपेतस्तु यो बालो मद्य मोहात् पिबेद्यदि ।
तस्य कृच्छ्रत्रयं कुर्यान्माता भ्राताथवापितेति ।
अनुपेतत्वस्य पूर्वावधिमाह कुमारः ।
मद्यमूत्रपुरीषाणां भक्षणे नास्ति कश्चन ।

दोषस्तु वत्सरात् पञ्च ऊर्ध्वं पित्रोः सुहृद्गुरोरिति ।

शंखोऽपि । पञ्चवर्षमुपक्रम्य अतो बालतरस्यास्य नापराधो न पातकमिति । तत्रापि कृच्छ्रत्रयस्य पादः प्रायश्चित्तमित्यपरे । अत्रापि स्त्रीणामर्द्धादि पूर्ववदेव ज्ञेयम् । तासामपि ब्राह्मणत्वजातिसमवायात् । एवं बालवृद्धयोरपि मद्यवासितशुष्कभांडोदकस्याज्ञानतः पाने वृहद्यमोक्तं ज्ञेयम् ।

मद्यभाण्डे स्थितं तोयं यदि कश्चित्पिबेद्द्विजः ।
कुशमूलविपक्वेन त्र्यहक्षीरेणवर्तयेदिति ।
ज्ञानतः पाने तु वासिष्ठः ।
मद्यभाण्डस्थिततोयम् यदि कश्चित्पिबेद्द्विजः ।
पद्मोदुम्बरबिल्वाना पलाशस्य कुशस्य च ।
एतेषामुदकं पीत्वा षड्रात्रेण विशुध्यतीति ।
अज्ञानतोऽभ्यासे विष्णूक्तम् ।

पंचरात्रं शंखपुष्पीशृतपयः पानम् । ज्ञानतोऽभ्यासे शंखोक्तम् सप्तरात्रं गोमूत्रयावकपानम् । अत्यन्ताभ्यासे हारीतोक्तम् । द्वादशाहं ब्राह्मीशृतपयः पानमिति । द्विजोऽत्र त्रैवर्णिकः । क्षत्रियादेरपि तन्निषेधादित्युक्तम् प्राक् ।

अथसुरापानप्रायश्चित्तमाह ।

**सुरापानम् संकृत्कृत्वा अग्निवर्णां सुरां पिबेत् ॥**
**स पावयेद्थात्मानमिह लोके परत्र च ॥ ७६ ॥**

अन्नविकाराद्द्रवद्रव्यविशेषः सुरा । तथाच मनुः ।

सुरा वै मलमन्नाना पाप्मा च मलमुच्यत इति ।

तेन पैष्ट्येव मुख्या सुरा । गौडी माध्वी तु गौणी । तथाच भविष्ये । सुरातु पैष्टीमुख्योक्ता न तस्यास्तीतरा समा इति । तत्र पैष्टी त्रयाणामपि वर्णाना निषिद्धा ।

गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा ।

यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैरिति मनुस्मरणात् ।

यद्यपि क्षत्रियवैश्ययोर्गौडीमाध्वीनिषेधो न प्रतीयते । प्रत्युतउभौ मध्वामवक्षीबौ दृष्टौ मे केशवार्जुनावित्यादिलिङ्गदर्शनात्पानमेव प्रतीयते तथापि द्विजातिमात्रस्य कलौ मद्यमात्रनिषेधाद्गौडीमाध्वीनिषेधोऽपि सिध्यति तथाच भविष्ये। सकृत्पीत्वा द्विजो गौडीमिति द्विजमात्रस्य गौडीपानप्रायश्चित्तमपि सगच्छते । अन्यथा विशेषलक्षणापातात् । ब्राह्मणोद्देशेन च सुरापाननिषेधादुद्देश्यगतत्वेन लिङ्गमविवक्षितम् तेन च तत्स्त्रीणामपि मानिषिद्धेति सिध्यति । अतएव कुमारः । सुरापान-निषेधोऽय जात्याश्रयइति स्थितिरिति जन्मप्रभृत्यामरणम् तत्तज्जातीय व्यक्तिमात्रस्यैव सुरानिषेधमाह । प्रायश्चित्ते तु शेषं वक्ष्यामः । तद्यथा ब्राह्मणक्षत्रियवैश्याः सकृदपि पैष्टीं सुरां पीत्वा शुध्यर्थं तामेव क्वथनेना ग्निसमस्पर्शां पिबेयुः तेनैहिकामुष्मिकयोः शुध्यन्ति । अयवात्रापि च मरणवैकल्पिकम् चतुर्विंशतिवार्षिकम् प्रायश्चित्तं कार्यम् ब्रह्महत्याव्रता नुवृत्तौ कामतो द्विगुणं प्रोक्तं पूर्वेषु च यदुच्यत इति व्यासवचनात् । तदेत दग्निवर्णसुरापानमार्द्रवाससा कार्यम् । तथाच पैठीनसिः । सुरापश्चार्द्र वासाअग्निवर्णां सुरां पिबेदिति । तथा लौहेन पात्रेण । सुरां योऽग्नि-वर्णामायसेन पात्रेणताम्रेण वा पिबेदिति प्रचेतःस्मरणात् । सुरेति पयोजलगोमूत्राज्यानां सुरालक्षणम् । अतएव बृहत्पराशरः ।

सुरापस्तु सुरां तप्तां पयोवा जलमेव वा ।

तप्तगोमूत्रमाज्यं वा पीत्वा मृत्वा विशुध्यतीति ।

गोमूत्रसाहचर्याद्गव्यएव घृतपयसी ग्राह्ये घृतपयः साहचर्याच्च स्त्रैणमेव गोमूत्रम् इदम् च कामकृते सुरापाने । तदाह बृहस्पतिः ।

सुरापस्य कामकृते ज्वलन्तीं तां विनिक्षिपेत् ।

मुखे तया विनिर्दग्धे मृतः शुद्धिमवाप्नुयादिति ।

यद्यपि मूले मद्यादीति वचनात्सकृत्पान एवेदं प्रायश्चित्तमिति गम्यते । तथाप्यांगिरसे सुरापान सकृत्कृत्वाप्यग्निवर्णा सुरां पिबेदित्यपिनाभ्यासेऽप्येतदेवेत्युक्तम् । अतएव वसिष्ठः । अभ्यासे तु सुरापाय्यग्निवर्णा तां पिबेद्द्विजइति । तथा कामतो गौडीमाध्व्योरसकृत्पानेऽप्येतदेव । तथा भविष्ये ।

गौडीमाध्व्योस्तथाभ्यासे प्राणान्तिकमुदाहृतम् ।
अभ्यासेत्वसुरापाने तामेवाग्निनिभां पिबेदिति ।

तथाज्ञानत इत्यर्थः । असुरापानस्त्रिविधसुराव्यतिरिक्तस्य मद्यस्याप्यभ्यासेतदेवाग्निवर्णां पिबेदित्यर्थः । तदेतद्वाघववचनेनोपपादितमधस्तात । अकामतः सकृत्सुरापाने तु महापातकसामान्यप्रायश्चित्त सेतुदर्शनमेव कार्यम् । तथाच पद्मपुराणे ।

एवं संस्तूयमानस्तु देवदेवो महेश्वरः ।
उवाच राघवं वाक्य भक्तिनम्रं पुरःस्थितम् ।
त्वयाचेह कृते स्थाने मदीये रघुनन्दन ।
आराध्यमाना ये रामं पश्येयुरिह सागरे ।
महापातकयुक्ता ये तेषां पाप विनश्यतीति ।

अत्रापि पूर्वोक्तरीत्या सेतुयात्रा तुल्यकचतुर्दशाब्दव्रतं वा कार्यम् । तदाह वृहत्पराशरः ।

जटी वा वालवासा वा ब्रह्महत्याव्रतं चरेत् ।
यद्यज्ञानात्पिबेद्विप्रो द्विजातिर्वा सुरां पुनरिति ।

अकामतोऽभ्यासे तु विधे प्राथमिकादस्माद्द्वितीये द्विगुणं भवेदिति न्यायेनास्येव द्वैगुण्यादि कल्प्यम् । अज्ञानतः पानोत्तर छर्दने तु त्रैवार्षिकव्रतं कार्यम् ।

एतदेव व्रतं कुर्यान्मद्यपः छर्दने कृते ।
पञ्चगव्यं च तस्योक्तं प्रत्यहं कायशोधनमिति व्यासवचनात ।

मद्यमत्र पैष्टी सुरा एतदेव प्रकमात्त्रैवर्णिकमित्यर्थः। कामतो-गौडीमाध्व्योः सकृत्पाने विशेषो भविष्ये।

सकृत्पीत्वा द्विजो गौडीमज्ञानात्सुरसत्तम।
कृच्छ्रातिकृच्छ्रौ विहितौ घृतप्राशनमेव च।

द्विजोऽत्र त्रैवर्णिकस्त्युक्त प्राक् यत्राप्यकामतोऽभ्यासे विधे. प्राथमिकादिति न्यायेन कृच्छ्रातिकृच्छ्रघृतप्राशनानामेव द्वैगुण्यादि कल्पनीयम्। अनन्यौषधसाध्यव्याध्युपशमार्थं पाने तु बृहस्पति-।

गौडीमाध्व्यौ सुरां पैष्टीं पीत्वा विप्रः समाचरेत्।
तप्तकृच्छ्रं पराकं च चान्द्रायणमनुक्रमादिति।
सुरासंसृष्टशुष्करसाद्यभक्षणे तु मनुः।
अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातय इति।

सुरासंसृष्टोपलभ्यमानगन्धरसाद्यभक्षणे तु सुरापानप्रायश्चित्तमेव। संसर्गेऽपि सुरास्वादापातात्। आज्यस्यास्य पृथक्त्वात्ये शुष्कसुराभाण्डोदकपाने छर्दन घृतप्राशनमहोरात्रोपवासश्चेति शातातपोक्त ज्ञेय तस्यैव पर्युषितस्य पाने बौधायनः।

सुरापानस्य यो भाण्डेष्वपः पर्युषिताः पिबेत्।
शङ्खपुष्पीविपक्वं तु क्षीरं स तु पिबेत्त्र्यहमिति।

तस्यैवाकामतोऽभ्यासे मानवं पञ्चरात्रं शङ्खपुष्पीशृतपयःपानम्। कामतः पाने वैष्णवम् सप्तरात्रं शङ्खपुष्पीशृतपयःपानम्। कामतोऽभ्यासे बृहद्याम्यं द्वादशाहं क्षीरेण ब्राह्मीसुवर्चलापानमिति सोमपस्य सुरापमुखगन्धाघ्राणे मनुः।

ब्राह्मणस्तु सुरापस्य गन्धमाघ्राय सोमपः।
प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुध्यतीति।

असोमपस्य तु गौतमः। गन्धाघ्राणे सुरापस्य प्राणायामो घृत प्राशनं चेति। सम्यक्सुरागन्धाघ्राणस्य तु घ्रातिरघ्रेयमद्ययोरिति जातिभ्रंशकरत्वात्।

आतिथ्यं यच्चकर्म कृत्वैकमन्यतमस्मिन्क्रिया ।
चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छयेति ।

मनूक्तं द्रष्टव्यम् । स्त्रीणां त्वर्द्धव्रतविधानान्मरणांते चार्द्धत्वासंभवान्मरणान्तिकप्रायश्चित्तस्य चतुर्विंशतिवार्षिकव्रतस्यार्द्धं द्वादशवार्षिकं कल्प्यम् । विशेषान्तरं त्वत्र दशमाध्याये निरूपितम् । एवं बालवृद्धयोरप्यर्द्धपादादि ज्ञेयम् । द्वादशवार्षिकस्यैवाबाल्यवृद्धपादादीत्यन्ये । अन्यत्र तूक्तव्रतस्यैवार्द्धपादादीति । तथा ब्रह्मचार्यादीनामार्त्तमिथ्या पूर्ववद्द्विगुण्यादि ज्ञेयम् । प्रयोजकादीनां चात्र प्रायश्चित्तं पूर्ववदेव । पतितोपक्रमे पातकसंयोजकाद्येति गौतमेन सामान्यतः सर्वपातकप्रयोजकानां पतितत्वाभिधानात् ।

अथ सुवर्णस्तेयप्रायश्चित्तमाह ॥

अपहृत्य सुवर्णं तु ब्राह्मणस्य ततः स्वयम् ।
गच्छेन्मुसलमादाय राजानं स्ववधाय तु ॥ ७७ ॥
हतः शुद्धिमवाप्नोति राज्ञाऽसौ मुक्त एव च ॥

ब्राह्मणस्वामिकं सुवर्णमपहृत्य स्वयमेव स्ववधाय मुसलमादाय राजानं गच्छेत्तेनैव मुसलेन राज्ञा हतो मुक्तो वा शुद्धिं प्राप्नोति । तदेतत्स्पष्टयन्नाह शंखः सुवर्णस्तेनः प्रकीर्णकेश आर्द्रवासा आयसं मुसलमादाय राजानमुपतिष्ठेदिदं मया पापं कृतमनेन मुसलेन घातयस्वेति स राज्ञः शिष्टः पूतो भवतीति । मुसलमित्युपलक्षणम् । अतएव वृद्धपराशरः ।

असिं वोभयतस्तीक्ष्णमायसं दण्डमेव वा ।
खादिरं लगुडं वापि हन्यादेतेन तं नृप इति ।
हननं च राज्ञा सकृत्कार्यं तेन मृतो जीवन्वापि शुध्यतीति ।

तथाच यमः ।

तस्मात्तन्मुसलं गृह्य ह्याख्यापापमात्मनः भूपतिः
सकृद्धन्यान्मृतो वापि जीवन्वापि विशुध्यतीति ।

यथा स्वशक्त्या राजा हन्तुमसमर्थस्तदा वसिष्ठः । स्तेनः प्रकीर्य केशो राजानमभियाचेत ततस्तस्मै राजोदुम्बरं शस्त्रं दद्यात्तेनात्मानं प्रमापयेन्मरणात्पूतो भवतीति चौदुम्बरं ताम्रमयं यदि तु कथञ्चित्कृपालुना राज्ञा पुनर्नैवं कार्यं गच्छेत्युक्त्वा मुच्यते तदाप्यसौ शुद्ध्येत । हतो मुक्तोऽपि वा शुचिरिति योगिस्मरणात् । पूतोऽवधमोक्षाभ्यामिति गौतमस्मरणाच्च । नचैवमकार्यकृच्छुद्ध्यापात इति वाच्यम् । विप्रवाक्यवद्राजवाक्यस्यैव शुद्धिकारणत्वात् , यतोऽस्य सर्वदेवमयत्वमाह मनुः ।

इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च ।
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ।
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः ।
तस्मादभिभवत्येष सर्वभूतानि तेजसा ।
बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः ।
महती देवता ह्येषा नररूपेण तिष्ठतीति ।

अतएव सद्यः शोचमकमे यस्य चेच्छति पार्थिव इति मनुनैव राजवाक्यस्य शोधकत्वमाविष्कृतं सकृत्कृतेऽपीति । नच तत्रानुबन्धापेक्षया तथैव्यास्तां तस्य प्रकृतेऽपि तथा तावतापि मुक्तस्य शुद्ध्युपपत्तेः । न चानग्रहेनस्त्यो राजेति गौतमवाक्यविरोधास्तस्य लोभादिविषयत्वात् । स्वयमिति वचनात् स्वयं गमने ताडनमेव दण्डार्थं प्रायश्चित्तार्थं च भवति । अतएव भविष्ये ।

स्वयं गमनपक्षे तु ब्राह्मणस्य नृपं प्रति ।
दण्डस्ताडनमेव स्यादवशक्तो तत्तयोर्गुर्विति ।
बलाद्रानयने तु दण्डताडनयोः समुच्चयः ।

तथाच तत्रैव ।

आनीयते बलाद्यस्तु स्तेनोवै पार्थिवं प्रति ।
प्रायश्चित्तं तु तस्य स्याद्दण्डश्च सुरसत्तमेति ।

दण्डस्वरूपमाह कात्यायनः । सुवर्णस्य शतं स्तेनो वधार्हो दण्डम-

हरतीति । यद्यपि सुवर्णस्तेयकृद्विप्र इति मनुना ब्राह्मणसुवर्णहरणं द्विजातीनां महापातकमिति व्यवनेन च क्षत्रियादय इति शूद्रस्य परिहृतः तथापि ब्राह्मणादयस्त्रयो वर्णा इति भविष्यवचनात्सर्वेषामिदं महापातकम् । तच्च ब्राह्मणस्य वधतपसोर्विकल्पः । सुवर्णस्तेयकृद्विप्र इत्युपक्रम्य सकृद्धन्यात्तु तं स्वयमिति सर्वनाम्ना प्रकृतविप्रपरामर्शेनैव मनुना वधविधानात् । ब्राह्मणस्तपसैव वेति तयोर्विधानाच्च नच वधेन शुध्यति स्तेन इति सामान्यविषयेण वधेन ब्राह्मणस्तपसैव वेति विशेषविषयस्य तपसो विकल्पानुपपत्तिः ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय चेतिवदिति वाच्यम् । स्तेनो ब्राह्मण इति विशेषणविशेष्यभावेनैकवाक्यतया विकल्पोपपत्तेः सामान्यविशेषतया वाक्यभेदानङ्गीकारात् । वधतपसोर्द्वयोरपि सामान्यविषयत्वे ब्राह्मणपदानर्थक्याच्च । नचैकवाक्यतायामपि स्तेनपदानर्थक्यम् । निमित्तविशेषसमर्पणेन सार्थक्यम् । विकल्पश्च व्यवस्थितः । तथाच भविष्ये ।

निर्गुणस्तु यदा विप्रः स्वयं स्तेयं करोति च ।
प्रायश्चित्तमिदं कुर्यात्तदा शुध्यर्थमात्मनः ॥
गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम् ।
वधेन शुध्यति स्तेनो ब्राह्मणस्तपसैव चेति ॥

अत्र मुसलघातस्य निर्गुणविषयत्वात्तपः सगुणविषयमर्थत एव सिद्धम् । श्रेष्ठविप्रसुवर्णाहरणे तु मरणे प्रकारविशेषस्तत्रैव ।

श्रेष्ठविप्रसुवर्णं तु प्रभूतमपहृत्य च ।
सविशेषानुबन्धं च ब्राह्मणोद्भूतवल्लभः ॥
प्रायश्चित्तमिदं कुर्यान्निबोध गदतो मम ।
लोभहीनोऽघृताक्तश्च आत्मानं पावके दहेदिति ॥
क्षत्रियादीनां तु वध एव । तथाच तत्रैव ।
अपहृत्य सुवर्णं तु ब्राह्मणस्य सुराधिप ॥
पञ्च निष्कप्रमाणं तु राजानं क्षत्रियो व्रजेत् ।
तस्मादौदुम्बरं शस्त्रं प्राप्यात्मानं हनेद्बुध ॥

निमीलिताक्षो जठरे स्वशक्त्या मरणाच्छुचिः ।

इदं तु जातिमात्रब्राह्मणसुवर्णहरणे गुणाढ्यस्य तु हरणे विशेष-स्तत्रैव ।

क्षत्रादयस्त्रयो वर्णा निर्गुणाद्व्रतत्पराः ।
गुणाढ्यस्य तु विप्रस्य पञ्च निष्कान् हरन्ति ये ॥
निष्कालकादिविधिना दग्ध्वात्मानं तु पावके ।
शुध्येयुर्मरणान्तीरं तद्वियात्य नु तस्य वै इति ॥

अनेन क्षत्रियादीनां पञ्चनिष्कप्रमाणविप्रसुवर्णहर एव महापा-तकं नार्वागिति सिद्धम् । चतुःसौवर्णिको निष्कः । निष्कं सुवर्णश्चत्वार इति स्मरणात् । न चापकर्तुः सगुणनिर्गुणत्वाभ्यां परिमाणभेदो व्यवस्थाप्य इति वाच्यम् । तस्य प्रायश्चित्ततारतम्यप्रयोजकत्वात् पूर्ववाक्ये गुण-विशेषाश्रवणाच्च नचोत्तरेणोपसंहारो निमित्तभेदे नैमित्तिकभेद प्रतिपादने-नोभयोरपि विशेषकत्वात् । ब्राह्मणस्य तु सुवर्णाधिकहरण एव महा-पातकम् ।

सुवर्णमात्रहरणे वत्सरः परिकीर्तितः ।
ऊर्ध्वं प्राणान्तिकं ज्ञेय ब्राह्मणे मघवद्व्रतमिति ।

षड्विंशन्मते सुवर्णाधिकहरणएव प्राणान्तिकव्रतविधानात्सुवर्ण-हरणे वार्षिकव्रतविधानाच्च । न च श्रुते मन्वादिमहास्मृतिषु च सुवर्ण-शब्दस्यैव प्रयोगादत्र सुवर्णशब्दः किञ्चिन्न्यूनसुवर्णपरस्तदधिकश्च सुवर्णं गत्रेति न विरोधइति वाच्यम् । तस्य जातिमात्रवचनत्वे सकृदुच्चरित स्यानिलिङ्गद्वयविरोधात्परिमाणविशिष्टहेमवचनत्वे पलादिशब्देष्वप्यति-प्रसङ्गेनाऽन्यत्र प्रयोगविरोधात् । न च गौणत्वे प्रमाणाभावात् । या तु मनुयाज्ञवल्क्यादीनां हेमरजतताम्राण्यभिप्रेत्य सुवर्णधरणपरादिशब्दपरि-भाषा सापि नात्रोपतिष्ठते । सुवर्णशब्दप्रयोगानियमाभावात् । तथाहि याज्ञवल्क्यएव तावत्स्वकृतपरिभाषापरिहारेण ब्राह्मणस्वर्णहारी तु राज्ञे

मुसलमर्पयेदिति स्वर्णशब्द प्रयुक्तवान्सुवर्णशब्दम् । अतएवाङ्गिरानिमिसवाक्येऽपि गुरुतल्पीसुरापश्चरुक्मस्तेय्यय विप्रहेति रुक्मशब्दमेव प्रयुक्तवान् । विश्वामित्रोऽपि ब्राह्मणस्वर्णहरणं न कर्तव्य कदाचनेति । शंखेऽपि । रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पग इति । न च परिमाणविशेषाऽनाकलितानां सामान्यानामेषां विशेषेण सुवर्णशब्देनोपसंहारः। सुवर्णस्तेयकृद्विप्र इत्यादौ समासेनास्पष्टलिङ्गस्पष्टलिङ्गस्य विशेषत्वानवधारणात् । एतेन मूलस्थमपि द्वितीयातं सुवर्णपदं व्याख्यातम् । तस्माज्जातिवचनानामेषां परिमाणाकांक्षाया षड्त्रिंशन्मतेन तत्पूरणमिति साधीयः । तथाच परिमाणभेदेन प्रायश्चित्तभेदोऽपि तत्रैव ।

वालाग्रमात्रेऽपहृते प्राणायामं समाचरेत्  
लिक्षामात्रेऽपि च तथा प्राणायामत्रय बुधः ।  
राजसर्षपमात्रे च प्राणायामचतुष्टयम् ।  
गायत्र्यष्टसहस्रं च जपेत्पापविशुद्धये ।  
गौरसर्षपमात्रे तु सावित्रीं वै दिनं जपेत् ।  
यवमात्रसुवर्णस्य प्रायश्चित्तं दिनद्वयम् ।  
सुवर्णकृष्णल ह्येकमपहृत्य द्विजोत्तमः ।  
कृच्छ्रं सातपनं कुर्यात्तत्पापस्य विशुद्धये ।  
अपहृत्य सुवर्णस्य माषमात्रं द्विजाधमः ।  
गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुध्यति ।  
सुवर्णस्यापहरणे वत्सरं यावको भवेत्  
ऊर्ध्वं प्राणान्तिकं ज्ञेयमथवा ब्रह्महव्रतमिति ।

सान्तपनं द्वितीयदिनं पूर्वोक्त तदेव कृष्णलचतुष्टयपर्यन्तं द्वैगुण्यादिनावर्त्तनीयम् । त्रैमासिकमेव च प्रतिमाषकमष्टादशाष्टादशदिनवृध्यायोज्यम् । इदं च स्तेयप्रायश्चित्तमपहृतधनमेकादशगुणं स्वामिने दत्त्वैव कार्यम् ।

स्तेये ब्रह्मस्वभूतस्य सुवर्णादेः कृते पुनः ।  
स्वामिनोऽपहृत देयं हृता त्वेकादशाधिकमिति स्मरणात् ।

अत्राशक्तावपहृतमेव देयम् । तथाभविष्ये ।
यद्यस्यापहृतं द्रव्यं तत्तस्यैव निवेदयेत् ।
प्रायश्चित्तं ततः कुर्यादेव शुद्धिमवाप्नुयादिति ।
स्वाम्यभावे विशेषमाह नारदः ।
ब्राह्मणस्य तु यद्देयं सान्वयस्य च नास्ति चेत् ।
निर्वपेत्तत्सकुल्येषु तदभावेऽस्य बन्धुषु ।
यदा तु न सकुल्यः स्यात्तत्र सम्बन्धिबान्धवाः
तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्वप्सु निक्षिपेदिति ।
अपहृतद्रव्यनाशे तु तत्समं द्रव्यान्तरं तन्मूल्यं वा दद्यात् ।
प्रमापणे प्राणभृतां दद्यात्तत्प्रतिरूपकम् ।
तस्याऽनुरूपं मूल्यंवेति ।

गोवधे लिङ्गदर्शनात् । सर्वथाऽशक्तौ यथाकथंचित्स्वामितुष्टिमुत्पादयेत् ।

यो यस्य हिंस्याद्द्रव्याणि ज्ञानतोऽज्ञानतोऽपि वा ।
स तस्योत्पादयेत्तुष्टिमिति मानवात् ।

स्वाम्यभावेन तुष्ट्यनुत्पादने द्रव्याभावे च व्रतमेव चतुर्गुणं कार्यम् । अभावे कांचनस्य स्याद्व्रतमेव चतुर्गुणमिति विष्णुस्मरणात् यत्तु चतुर्विंशतिमते ।

आत्मतुल्यसुवर्णं वा दद्याद्विप्रायवाप्नुमात् ।
तीर्थानि वा भ्रमेद्विद्वान्स्वतस्तेयाद्विमुच्यतइति ।

तत्सार्वभौमविषयं तस्यैवाधिकारकाश्वमेधसमभिव्याहारात् । क्रतुशब्देन च तस्यैवोक्तत्वात् । तथाच विष्णुः ।

अश्वमेधेन शुध्यन्ति महापातकिनस्त्विमे ।
पृथिव्यां सर्वतीर्थानां तथाऽनुसरणेन चेति ।
एतच्च मरणान्तिकं कामकृतसुवर्णस्तेयविषयम् ।
मरणान्तं हि यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः ।
तत्तु कामकृते पापे विज्ञेयं नात्र संशय इत्यङ्गिरः स्मरणात् ।

तत्रैव मरणवैकल्पिकं चतुर्विंशति वार्षिकं वा कार्यम् । ब्रह्महत्याव्रतानुवृत्तौ "कामतो द्विगुणं प्रोक्तं पूर्वेषु च तदुच्यत इति" व्यासवचनात् । अकामकृते तु सेतुदर्शनं द्वादशाब्दव्रतं वा ।

त्वया चेह कृते स्थाने मदीये रघुनन्दन ।
आराध्यमानं मां राम पश्येयुरिह सागरे ।
महापातकयुक्ता वै तेषां पापं विनश्यतीति पाद्मवचनात् ।
नित्यं त्रिषवणस्नायी कृत्वा पर्णकुटीं वने ।
अधःशायी जटाधारी पर्णमूलफलाशनः ।
ग्रामं विशेत भिक्षार्थी स्वकर्म परिकीर्तयन् ।
एककालं तु भुञ्जानो वर्षे तु द्वादशे गते ।
रुक्मस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः ।
व्रतेनैतेन शुध्यन्ति महापातकिनस्त्विमे इति शङ्खस्मरणाच्च ।
नच लोभैकमूलस्य चौर्यस्याकामकृतत्वमेवासम्भवतीति वाच्यम् ।

वस्त्राद्यपहरतस्तत्प्रान्तग्रथितं सुवर्णमजानतो रजतत्वादिना वा जानतोऽपहारानन्तरमेव च नाशयतोऽन्यस्मै ददतो वा स्वाभिप्रायेण भावेनाकामतोऽप्यपसंहारसम्भवात् । कृत्रिमसुवर्णे तु न सुवर्णत्वं रसवेधापादितसुवर्णसाम्यात्तदपहारे नेदं प्रायश्चित्तं सुवर्णस्तेयाभावात् । द्रव्यान्तरसंसृष्टसुवर्णापहारेतु भवत्येव सुवर्णस्तेयं, संसर्गेऽपि सुवर्णत्वानपायात् पृषदाज्ये आज्यत्ववत् तेन तत्रापि कामाकामाभ्यां व्रतव्यवस्था कल्प्या सगुणस्य निर्गुणसुवर्णहरणे त्रैवार्षिकम् । यथा भविष्ये ।

विशिष्टः गुणवान्विप्रो निर्गुणस्यापहृत्य तु ।
चतुर्थकाले भुञ्जानस्त्रिभिर्वर्षैर्विशुध्यतीति ।

मानमसुवर्णस्तेये तु सुमन्तुः । सुवर्णस्तेयी द्वादशरात्रं वायुभक्षः-पूतोभवतीति । रजतादिस्तेये तु प्रायश्चित्तं चतुर्विंशतिमते ।

रूप्यं हृत्वा द्विजो मोहाच्चरेच्चान्द्रायणव्रतम् ।
गद्याणादशकादूर्ध्वमाशतादृद्विगुणं चरेत् ।

आमहस्ताच्च त्रिगुणमूर्ध्वं हेमविधिः स्मृतः ।
सर्वेषां धातुलोहानां पराकं तु समाचरेत् ॥
धान्यानां हरणे कृच्छ्रन्तिलानामैन्दवं स्मृतम् ।
रत्नानां हरणे विप्रश्चरेच्चान्द्रायणव्रतमिति ॥
इदानीं ब्रह्मवधादित्रयप्रायश्चित्तशेषमाह ।

**कामतस्तुकृतं यत्स्यान्नान्यथा वधमर्हति ॥**

कामकृतेष्वेव ब्रह्मवधसुरापानसुवर्णास्तेयष्वग्निप्रवेशाग्निवर्णसुरापानमुसलाभिघातादिना वधमर्हति नान्यथा अकामकृतेष्वपीति, तथाचाङ्गिराः ।

य: कामतो महापापं नरः कुर्यात्कथञ्चन ।
न तस्य शुद्धिर्निर्दिष्टा भृग्वग्निपतनादृत इति ।

प्रतिपदोक्तवधप्रकारोपलक्षणमेतत् इत्थं महापातकत्रयप्रायश्चित्तमत्रोक्तम् । गुरुतल्पप्रायश्चित्तं तु दशमाध्याये मातरं यदि गच्छेत्त्वित्यादिना पूर्वमेवोक्तं तदेतत्सर्वं प्रायश्चित्तं विख्याते रहस्ये च दोषे समानम् । न विख्यातमात्र एव । तस्मात् प्रकाशयेत्पापमित्यादिना रहस्यस्यापि प्राकाश्यत्वाभिधानात् प्रच्छादने नरकस्मरणात् । कलौ रहस्यप्रायश्चित्तनिषेधाच्चेत्युक्तं प्रथमतत्रयो. स्तेयान्येति विशेषणात् सुवर्णस्तेये तु रहस्यव्रतमपि वर्तते । तदाह याज्ञवल्क्यः ब्राह्मणस्वर्णहारी तु रुद्रजाप्री जले स्थित इति । त्रिरात्रोपोषित इत्यनुवर्तते शुध्यति इति शेषः । रुद्रजपश्चैकादशकृत्वः कार्यः ।

एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित् ।
महापापैरपि स्पृष्टो मुच्यते नात्र संशय इत्यत्रिस्मरणात् ।

इदानीं स्मृत्यंतरप्रसिद्धस्य पतितसंसर्गस्य महापातकत्वाभावमभिप्रेत्य पापमात्रोत्पादकत्वं प्रपञ्चयितुमाह ।

**आसनाच्छयनाद्यानात्संभाषात्सहभोजनात् ।**
**संक्रमन्तीह पापानि तैलबिन्दुरिवाम्भसि ॥ ७९ ॥**

सहशब्दोऽत्रासनादिभिः प्रत्येकमभिसम्बध्यते । पतितादिभिः सहासनात्सहशयनात्सहयानात्सहसंभाषणात्सहभोजनादिह संसर्गकर्तृषु सङ्क्रामन्ति यथाम्भसि तैलबिन्दुरिति । तत्र च कालविशेषेण प्रायश्चित्त-तत्पापाना विशेषो ऽभिहितश्चतुर्थेऽध्याये संसर्गमाचरन्विप्रः पतिता-दिष्वकामत इत्यादिना ।

एवं विवोक्तनिविशेषेषु निमित्तेषु स्वयमेव प्रायश्चित्तविरोधमभि-धायाऽन्यत्र तु शेषं मुनिविभाषितमित्यनेन स्मृत्यन्तरोक्तमेवाभ्युपगम्ये-दानीं स्वयमन्यैश्चानुक्तप्रायश्चित्तेषु निमित्तेषु साधारणप्रायश्चित्तमाह ।

**चान्द्रायणं यावकं च तुलापुरुष एव च ॥**
**गवाञ्चैवानुगमनं सर्वपापप्रणाशनम् ॥ ८० ॥**

चान्द्रायणं पूर्वोक्तं तस्य सर्वपापनाशकत्वमाह याज्ञवल्क्यः ।

अनादिष्टेषु पापेषु शुद्धिश्चान्द्रायणेन च ।
धर्मार्थं यश्चरेदेतच्चन्द्रस्यैति सलोकतामिति ।

यावकमाह शंखः ।

गोपुरीषयवाभ्यासो मासमेकं समाहितः ।
व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये इति ।

यावकमिति प्रसृतयावकस्याप्युपलक्षणम् । तदाह हारीतः अथात्मकृतैः कर्म यदा कृतैर्गुरुमात्मानं पश्येदथात्मार्थं प्रसृतयावकं श्रप-येत्स्नातः शुचिर्भूत्वोदितेषु नक्षत्रेषु ताम्रपात्रे प्रसृतयावकं श्रपयेद्यथ यवागूर्भवति तस्य श्रपणकाले रक्षां कुर्यान्नमो रुद्राय भूताधिपतये पर्व ताना पतये त्वामम रक्षस्वेति । शृतेवरावणेनाग्नौ जुहुयाद्देवबलिकर्म देवस्यत्वेत्युत्पूय साविच्याभिमन्त्रयेत् ।

यवोऽसि धान्यराजोऽसि वारुणो मधुसंयुतः ।
निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतम् ।
वाचा कृतं कर्मकृतं मनसा दुर्विचिन्तितम् ॥

अलक्ष्मीं कालकर्णीं च सर्वं पुनत मे यवाः ।
महापातकसंयुक्तं दारुणं राजकिल्बिषम् ॥
बालवृत्तमधर्मं च सर्वं पुनत मे यवाः ।
सुवर्णस्तैन्यमव्रत्यमयाज्यस्य च याजनम् ॥
ब्राह्मणानां परीवादं सर्वं पुनत मे यवाः ।
श्वशूकरावधूतं च काकाद्युच्छिष्टमेव च ॥
मातापित्रोस्तु शुश्रूषां सर्वं पुनत मे यवाः ।
गणान्नं गणिकान्नं च शूद्रान्नं श्राद्धसूतकम् ॥
चोरस्यान्नं तथाभक्ष्यं सर्वं पुनत मे यवाः ।

इत्येतैः षड्भिस्तैर्ना ब्रह्मादेवानामिति प्राश्य ततः प्राणायस्वाहेत्यादिभिर्यथोक्तं सर्वं प्राश्नीयात् यद्वाच ततोनियमातिक्रमजातमतिथिसेवनजातमभक्ष्यभक्षणजाच्च सर्वस्मात्पापात्प्रमुच्यते सप्तरात्रं पीत्वा भ्रूणहत्यां गुरुतल्पं सुवर्णस्तेयं सुरापानं च पुनाति एकादशरात्रं पीत्वा पूर्वकृतं पापं नुदति एकविंशतिरात्रं पीत्वा गणान् पश्यति गणाधिपतिं गणाधिपतिं पश्यति एवमहरहरनन्याहारो यावकं प्राश्नीयाद्योऽश्नीयाद्यावकं पाचितं गोमूत्रे सोऽहमः प्रमुच्यत इत्याह भगवान्मैत्रावरुणिरिति । तुलापुरुषमाह याज्ञवल्क्यः ।

पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम् ।
एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते ॥
एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम् ।
तुलापुरुष इत्येष ज्ञेयः पञ्चदशाहिक इति ॥

तत्प्रकारमाह हारीतः । अथातस्त्रिनयनोक्तस्य तुलापुरुषस्य कल्पं व्याख्यास्यामः ।

अयाज्ययाजनं कृत्वा प्राश्य मूत्रपुरीषके ।
अप्रतिग्राह्यमादाय भोजयित्वा तु निन्दितान् ॥
विनायकोपसृष्टस्य महाव्याधिहतस्य च ।
एतत्कृच्छ्रतुलापुरुषं महापातकनाशनम् ॥

स्वर्गद्वारमिदं पुण्यं महादेवेन निर्मितम् ।
आचाममथपिण्याकं तक्रं चोदकसक्तुकान् ।
त्र्यहं त्र्यहं प्रयुञ्जानो वायुभक्षस्त्र्यहं परम्
वाचा कायेन मनसा कृतानि विकृतानि च ।
आचामस्तानि निर्हन्ति नच श्राद्धं च सूतकम् ।
तिलस्य दारुणं किञ्चित्केशकीटहतं तु यत् ।
आखोर्मूत्रं पुरीषं च ब्रह्महस्पृष्टमेव च ।
पिण्याकस्तानि निर्हन्ति अस्थिमित्वा तु यत् स्थितम् ।
आहारेषु च ये दोषाः स्नेहदोषाश्च ये क्वचित् ।
खरोष्ट्रमुखसंस्पृष्टं मद्यसंस्पृष्टमेव च ।
तक्रेण तानि निर्हन्ति यच्चाण्डालश्ववावलोकितम् ।
कनकाश्च तिलागावो भूमिराच्छादनं स्त्रियः ।
सर्वं पुनाति धर्मात्मा गूढं चोदकसक्तुभिः ।

ब्रह्महत्यां भ्रूणहत्यां सुवर्णस्तेयं सुरापानं गुरुदाराभिगमनं कन्यादूषणं क्लीबाभिगमनं वायुभक्षः पुनाति ।

गन्धौशीरमयौ कार्यौ पुरुषौ पलसंमितौ ।
नदीमृत्तिकया वापि पुरुषौ द्वौ तु कारयेत् ।
महापशुर्येन शरेण विद्धा यद्वाशस्त्रमुभयोर्लक्ष्यलक्षम् ।
तेनावर्तौ सुकृतौ कारयित्वा प्रादेशमाचामुभयोः क्रान्तशिक्यां ।
सौवर्णीं राजतीं वापि तुलां देवीं तु कारयेत् ।
अपि चन्दनवृक्षस्य खदिरस्यापि कारयेत् ।
तस्यालाभे तुला कार्या यथा वाप्युपपद्यते ।

यः पुरुषः पिङ्गलो बभ्रुर्हलमुसलचक्रपाणिस्तमहं पिङ्गलं बभ्रुं हलमुसलवज्रपाणिमावाहयिष्यामि स्तुत एहि नाग एहि कृष्णाजिन एहि स्वागतमनुस्वागतं भवते तुलापुरुषाय महादेवायेदमासनमिदं पाद्यमिदमर्घ्यमिदं गंधमाल्यधूपदीपं प्रतिगृहाण प्रसीद देव तुभ्यं नमोऽस्तु सुमना भव । अथ तुलामभिमन्त्रयेत ।

ऋषिसत्य देवसत्य यत्सत्य तेन सत्येन सत्यवादिनि ।
देशाना सम्पदं ब्रूहि किं वीजं वर्द्धयिष्यसि ।
राज्ञा च सम्पदं ब्रूहि कं नृप वर्द्धयिष्यसि ।
अस्माक सम्पदं ब्रूहि किमस्माक भविष्यति ।
यदा तु गुरुमात्मानमसक्तुलया धृतम् ।
परं चैव लघुं मन्ये तदा कर्म समारभेत् ।

अग्नये पृथिव्यधिपतये स्वाहा वायवेऽन्तरिक्षाधिपतये स्वाहा सूर्याय दिवोऽधिपतये स्वाहा सोमाय नक्षत्राधिपतये स्वाहा कुवेराय यक्षाधिपतये स्वाहा इन्द्राय देवाधिपतये स्वाहा ब्रह्मणे त्रैलोक्याधिपतये स्वाहा देव्यै नगाधिपतये स्वाहा शालकटङ्कटाय स्वाहा कुष्माण्ड-राजपुत्राय स्वाहा विनायकाय स्वाहा महाविनायकाय स्वाहा वक्रतुण्डाय गणानां पतये स्वाहा धर्माय स्वाहा अधर्माय स्वाहा तुलायै स्वाहा तुला पुरुषाय स्वाहा प्रजापतिर्देवाय महद्भिः सहैव पुनरागमनाय स्वाहा सकृच्चरित्वा पूतः कर्मण्यो भवति द्वितीयं चरित्वा गाणपत्यं प्राप्नोति त्रिः कृत्वा महादेवस्याद्धासनं प्राप्नोति आषाढ्यां कार्त्तिक्यां फाल्गुन्यां पुण्ये वा नक्षत्रे एषविहितो धर्म इति । अप्रतिग्राह्यप्रतिग्राह्यमिषां कृष्णाजिनादि निन्दितान्पतितान्, आचामो मण्डः । पिण्याकन्तिलखलिः तक्रम्पादाम्बु । उदकमिश्राः सक्तवो भक्ष्यवर्णानि । एतानि कृत्वा ... त्र्यहं त्र्यहमात्यं त्र्यहमुपवसेदेवं पञ्चदशदिनानि भवन्ति। नतूदकस्य सक्तूनां च पृथगुपभोगेनोपवासनिवृत्या पञ्चदशत्व मिश्राणामेवफलसाधनत्वश्रवणादुपवासश्रवणाच्च विवृतानि प्रकाशानि । तैलस्य दारुणनिषिद्धाहःसु भोजनाभ्यङ्गादिजन्यमलक्ष्मीकरं पापम् । केशकीटाखुवक्त्रघ्राद्युपहताक्षभोजनजन्य अघिस्य चिरसञ्चितम् । आहारदोषा अभक्ष्याक्षभक्षणजन्याः अभक्ष्येह भक्षणजन्याः सुवर्णाश्वादिप्रतिग्रहजन्य प्रापम् । क्लीवाभिगमनं नपुंसकेषु मैथुनम् ।

इदानीमुक्तव्रतानुष्ठानानिमित्तनिश्चयार्थं पूर्वकर्त्तव्यमाह ॥

गन्धोशीरमयाविति । गन्धश्चन्दनकाष्ठम् । उशीरं वीरणमूल ताभ्यापलपरिमिते द्वे पुरुषप्रतिमे कार्ये तदभावे नदीतीरद्वयमृत्तिकया वा । तत्र गन्धमयी स्वतटमृन्मयी वा स्वप्रतिमा स्वर्गसंज्ञा । उशीरमयी परतटमृन्मयी वा परप्रतिमा नरकसंज्ञा ।

प्रतिमा चान्दनी कार्या एकैव स्वर्गसंज्ञिता ।
उशीरस्यापरा कार्या तथा नरकसंज्ञितेति यमस्मरणात् ।

महापशुर्गजस्तद्वधकशरेण यद्वोभयतोधारस्य शस्त्रस्यास्यादेः खण्डेन सुवर्णरजतचन्दनखदिराणामन्यतमेनान्येन यथालाभोपपन्नेन वा प्रादेशमात्रा सुदृढां पार्श्वद्वये शिक्यद्वयोपेता तुला कारयेत् तस्या यः पुरुषः पिङ्गलइति, मन्त्रेण माहादेवमावाह्य भगवते तुलापुरुषाय महादेवायेति मन्त्रेण दर्भासनमित्यासनादीनि प्रदाय तानि प्रतिगृहाणेत्यादि सुमनाभवेत्यतानुषङ्गेण दद्यात् । ऋषिसत्यमिति तुलामभिमन्त्रयेत् । देशनामित्यादि मन्त्रलिङ्गेन देशवीजराशेष्टानिष्टपरीक्षास्वप्ययं प्रकार इति दर्शितम् । वीजपरीक्षाया तु वीजानामेव तोलनम् । तत्र बीजानि स्थापयेदिति यमस्मरणात् । अन्यत्र प्रतिमाया एव स्वतोलनेऽ मार्कमितिमन्त्रः । तुलारोहणानन्तरं स्वगौरवे परलाघवे च ज्ञाते व्रताधिकारी भवति एवं साम्येऽपि तुलादिव्ये तथादर्शनात् तोलनं वा मन्द्वारत्रयं किञ्चित्कालविलम्बेन कार्यं तत्र वारत्रयमपि स्वगौरवे दोषाधिक्य वारद्वय गौरवे दोषमाध्यस्थ्यं एकवारं गौरवे दोषाल्पत्वं साम्येऽल्पतरत्वमिति ज्ञेयम् ।

गौरवं तु पापपरीक्षायामेवानिष्टमन्यत्रेष्टमेव । अग्नय इत्यादि त्रयोदशाहुतीर्हुत्वा व्रतारम्भ इति । गवां वनं गच्छन्तीनामागच्छन्तीना वानुगमनम् । तथाच हारीतः ।

चान्द्रायणं यावकं च तुलापुरुष एव च ।
गवां चैवानुगमनं सर्वपापप्रणाशनमिति ।
चकारात्कृच्छ्रातिकृच्छ्रादीनामपि ग्रहणम् ।

तथा च षट्त्रिंशन्मते ।

यानि कानि च पापानि गुरोर्गुरुतराणि च ।
कृच्छ्रातिकृच्छ्रचान्द्रैस्तु शोध्यते मनुरब्रवीदिति ।

मनुरपि । पराकोनामकृच्छ्रोऽय सर्वपापापनोदनइति । जन्मप्रभृत्यनेकपापानुवृत्तौ षडब्दकृच्छ्रं कुर्यात् । तथा चतुर्विंशतिमते ।

जन्मप्रभृति पापानि बहूनि विविधानि च ।
कृत्वार्वाक् ब्रह्महत्यायाः षडब्दं कृच्छ्रमाचरेत् ।
प्रत्याम्नाये गवां देयं सार्शोति धनिना शतम् ।
तथाष्टादशलक्षाणि गायत्र्या वा जपेद्बुध इति ।

ब्रह्महत्येति महापातकोपलक्षणम् । ततोऽर्वाक्तनानि विनेति । महापातकावृत्तौ तु प्रत्येकप्रायश्चित्ताशक्तावेकं प्राणान्तिकमेव कार्यम् । तथाच विवस्वान् ।

धर्मार्जनासमर्थस्य कर्त्तुः पापाङ्कितस्य वा ।
ब्राह्मणस्याप्यनुज्ञातं तीर्थे प्राणविमोचनमिति ।

धर्मार्जनासमर्थस्य प्रत्येकं महापातकप्रायश्चित्तासमर्थस्य पापैर्महद्भिरङ्कितस्य युक्तस्यैकतीर्थे मरणमेव शोधकमित्यर्थः । तीर्थं वाराणस्यादि तथाच कूर्मः ।

अस्मिन्कलियुगे घोरे लोकाः पापानुवर्त्तिनः ।
भविष्यन्ति महाबाहो वर्णाश्रमविवर्जिताः ।
नान्यत्पश्यामि जन्तूनां मुक्त्वा वाराणसीं पुरीम् ।
सर्वपापप्रशमनं प्रायश्चित्तं कलौ युग इति ।
मरणप्रकारमप्याह विवस्वान् ।
सर्वेन्द्रियविमुक्तस्य स्वव्यापाराक्षमस्य च ।
प्रायश्चित्तमनुज्ञातमग्निपातो महापथ इति ।

इदमित्थमेव व्याख्येयम् । उपपातकाद्यावृत्तावपि षडब्दविधानेन मरणाभावात् स्वधर्मानुष्ठानासमर्थपरत्वे तु पापाङ्कितप्रायश्चित्तपदयोरसङ्गतत्वापत्तेः ।

एवं काण्डत्रयेण कलिप्रधानान् धर्मानभिधायेदानीं स्वकृतश्लोकसंदर्भस्य संख्यावर्णनेनावापोद्वापशङ्कामपाकुर्वन्पराशरत्वोक्त्या च स्वोत्प्रेक्षामात्रमूलत्वशङ्कामुन्मूलयन् कर्त्ता शास्त्र मुपसंहरति ॥

**एतत्पाराशरं शास्त्रं श्लोकानां शतपञ्चकम् ॥**
**द्विनवत्या समायुक्तं धर्मशास्त्रस्य संग्रहः ॥ ८१ ॥**

एतन्मदुक्तं नतुसुव्रतोक्तं श्लोकानामष्टोनषट्शतं पराशरस्यैव शास्त्र शासन पराशरोक्तिमूलकमेव नान्योक्तिमूलकम्। ननु सुवतोक्तं वृहत्पराशरीयमेवात्रार्थेशास्त्रमुज्जृम्भते किन्त्वत्प्रयासेनेत्यत आह। धर्मशास्त्रस्य संग्रहइति। तस्य युगान्तरीयधर्मस्याप्यनुवादकत्वेनासाधारण्याभावादनेकत्र विप्रकीर्णानां कलिधर्मवचनानामेकत्र सङ्कलनमसाधारणं प्रयोजनं मत्प्रवृत्तेरित्यर्थः

ननूक्तकलिधर्मानुष्ठानमेतच्छास्त्राध्ययने सम्भवति तत्प्रापकमेव तु-प्रमाणं नास्तीत्यतआह ॥

**यथाध्ययनकर्माणि धर्मशास्त्रमिदं तथा ॥**
**अध्येतव्यं प्रयत्नेन नियतस्वर्गकामिना ॥ ८२ ॥**

अध्ययनक्रियाकर्माणि वेदादीनि तत्तद्विधिभिर्नियत नित्यं यथाध्येतव्यानि तथा धर्मशास्त्राध्ययनविधिना शौचाचारांश्चशिक्षयेदित्यादिना इदमप्यध्येतव्यम्। नित्यस्याप्येतदध्ययनस्य काम्यत्वप्रतिपादनायाह। प्रयत्नेन स्वर्गकामिनेति। स्वर्गश्च

यन्न दुःखेन सम्भिन्न नचग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुख स्वः पदास्पदमिति।

एव माद्युक्त लक्षणस्य कामतोऽभिलाषः सोस्यास्तीति स्वर्गकामी तेन प्रयत्नेन यथोक्त ब्रह्मचर्यादियवतोपनयनानन्तरं वेदाध्ययनोपक्रमात्प्रागिदमध्येतव्यम्। अनेन द्विजानामेवैतदध्ययनमुक्तम्। तथाच बृहत्पराशरीये।

पराशरेणोदितं शास्त्रं चतुर्वर्णाश्रमाय च ।
वेदितव्यं प्रयत्नेन सदाध्येयं द्विजातिभिरिति ।
अध्यापने तु ब्राह्मणस्यैवाधिकारः । तथाच मनुः ।
विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः ।
शिष्येभ्यश्च प्रवक्तव्यं सम्यङ्नान्येन केनचिदिति ।
तस्य पर्वमात्रेऽनध्यायो नान्यत्र तथाच कौर्मे ।
अनध्याया नचाङ्गेषु नेतिहासपुराणयोः ।
न धर्मशास्त्रेष्वन्येषु पर्वाण्येतानि वर्जयेदिति ॥

श्रीवत्सं निजवक्षसो हृदि यत्नं दर्शयित्वा श्रियं
सन्धातुं किमु रत्नं त्रजगवां विज्ञानतत्त्वः पुरा ॥
येनाम्भोनिधिमन्थने सुरवरांस्त्यक्त्वा परा न्वत्सला
श्रीरेवाभ्यगमत्स्वयं पतिमसौ कृष्णः क्रियान्मङ्गलम् ॥ १ ॥

धर्माधिकारिकुलकैरवकाननेन्दुः
श्रीरामपण्डितसुतेन विनायकेन ।
तद्द्वादशे विवरणं विहितं तथात्राध्याये
महाघचयशुद्धिविचारणाय ॥ २ ॥

व्यर्थं प्रार्थनमेतयोरुभयथेत्यस्मान्निवृत्तं मया
यच्छीलं सहजं सदा सदसतोः स्तत्कोऽन्यथा त्वं नयेत् ॥
कस्य प्रार्थनया पुनाति सकलं दुष्टं जनं जाह्नवी
कस्य व्यर्थनया निहन्ति सुकृतं सा कर्मनाशापि वा ॥ ३ ॥

उच्चावचेषु विषयेषु परिभ्रमन्ती
धीश्चेदियं स्खलति कुत्रचिदप्यगाधे ।
सन्तः स्वधर्ममनुरुध्य निरुध्य
चैष्यामुद्धर्तुमेव तदिमां तरसा यतध्वम् ॥ ४ ॥

पराशरस्मृतेर्व्याख्या जाताभिरव्याप्रकाशिका ।
येनान्तरात्मना सोऽयमनया प्रीयतां हरिः ॥ ५ ॥

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितात्मजविनायकपण्डितकृतौ पराशरस्मृतिविवृतौ विद्वन्मनोहरायां द्वादशोऽध्यायः ॥

शुभमस्तु ।